मारणोच्चाटनाकर्ष स्तंभं मोहन कर्मणि ॥
सप्तवारं जपेदेतद्दिनानामेकविंशतिम् ।
तत्तत्फलमवाप्नोति साधको नात्र संशयः ॥
एकविंशतिवारं च पठेत्तावद्दिनानि यः ।
कारागृह गतं सद्यो राज्ञावध्यं च मोचयेत् ॥
राजदर्शन वेलयां पठेदेत त्रिवारतः ।
स राजानं वशं नीत्वा प्रकृतिञ्च सभां जयेत् ॥
इदं गणेश कवचं कश्यपेनसमीरितम् ।
मुद्गलाय च तेनाथ माण्डव्याय महर्षये ॥
मह्यं स प्राह कृपया कवचं सर्वसिद्धिदम् ।
न देयं भक्ति हीनाय देयं श्रद्धावते शुभम् ॥
अनेनास्य कृता रक्षा न बाधाऽस्य भवेत्क्वचित् ।
राक्षसा सुरवेताल दैत्य दानव संभवा ॥

॥ इति श्रीगणेश पुराणे गणेश कवचम् संपूर्णम् ॥

॥ मयूरेश स्तोत्रम् ॥

यह स्तोत्र शोक निवारण तथा रोगोपद्रव को शान्त करने वाला है। ४१०० संख्या में जपकर, मधुत्रय व लाजा से होम करें।

॥ ब्रह्मोवाच ॥

पुराण पुरुषं देवं नाना क्रीडाकरं मुदा।
मायाविनं दुर्विभाव्यं मयूरेशं नमाम्यहम् ॥
परात्परं चिदानन्दं निर्विकारं हृदि स्थितम्।
गुणातीतं गुणमयं मयूरेशं नमाम्यहम् ॥
सृजन्तं पालयन्तं च संहरन्तं निजेच्छया।
सर्वविघ्न हरं देवं मयूरेशं नमाम्यहम् ॥
नानादैत्य निहन्तारं नाना रूपाणि बिभ्रतम्।
नानाऽयुधहारं भक्त्या मयूरेशं नमाम्यहम् ॥
इन्द्रादि देवतावृन्दैरभिष्टुतमहर्निशम्।
सदसद्वयक्तमव्यक्तं मयूरेशं नमाम्यहम् ॥
सर्व शक्तिमयं देवं सर्वरूपधरं विभूम्।
सर्व विद्या प्रवक्तारं मयूरेशं नमाम्यहम् ॥
पार्वतीनन्दनं शम्भोरानन्दपरिवर्धनम्।
भक्तानन्द करं नित्यं मयूरेशं नमाम्यहम् ॥
मुनिध्येयं मुनिनुतं मुनिकाम परिपूरकम्।
समिष्टव्यष्टिरूपं त्वां मयूरेशं नमाम्यहम् ॥
सर्वाज्ञाननिहन्यारं सर्वज्ञान करं शुचिम्।
सत्यज्ञानमयं सत्यं मयूरेशं नमाम्यहम् ॥
अनेक कोटि ब्रह्माण्ड नायकं जगदीश्वरम्।
अनन्त विभवं विष्णुं मयूरेशं नमाम्यहम् ॥

॥ मयूरेश उवाच ॥

इदं ब्रह्मकरं-स्तोत्रं सर्वपापप्रणाशनम्।
सर्वकामप्रद नृणां सर्वोपद्रव नाशनम् ॥
कारागृहगतानां च मोचनं दिन सप्तकान्।
आधिव्याधि हरं चैव भुक्ति मुक्ति प्रदं शुभम् ॥

॥ श्रीगणपति सहस्रनाम स्तोत्रम्॥

विनियोग: - अस्य श्रीमहागणपति सहस्रनाम स्तोत्र मन्त्रस्य महागणपतिर्ऋषिः, अनुष्टुप् छन्दः, महागणपतिर्देवता, गं बीजम्, हुं शक्तिः, स्वाहा कीलकम् चतुर्विध पुरुषार्थ सिद्ध्यर्थे जपे: विनियोगः।

ऋष्यादिन्यास: - ॐ महागणपतये ऋषये नमः शिरसि, अनुष्टुप् छन्दसे नमः मुखे, महागणपतिर्देवतायै नमः हृदि, गं बीजाय नमः गुह्ये, हुं शक्तये नमः पादयो, स्वाहा कीलकाय नमः नाभौ, विनियोगाय नमः सर्वाङ्गे।

ध्यानम् :–

गण्डपाली गलद्दान पूरलाल समानसान् ।
द्विरेफान् कर्णतालाभ्यां वारयन्तं मुहुर्मुहुः ॥१॥
कराग्रधृत माणिक्यकुम्भ वक्त्र-विनिर्गतैः ।
रत्नवर्षैः प्रीणयन्तं साधकान् मदविह्वलम् ।
माणिक्य मुकुटोपेतं सर्वाभरण भूषितम् ॥२॥

॥ स्तोत्रम् ॥

ॐ गणेश्वरो गणक्रीडो गणनाथो गणाधिपः ।
एकदंष्ट्रो वक्रतुण्डो गजवक्त्रो महोदरः ॥१॥
लम्बोदरो धूम्रवर्णो विकटो विघ्ननायक ।
सुमुखो दुर्मुखो बुद्धो विघ्न राजोगजाननः ॥२॥
भीमः प्रमोद आमोदः सुरानन्दो महोत्कटः ।
हेरम्बः शम्बरः शम्भर्लम्बकर्णो महाबलः ॥३॥
नन्दनोऽलम्पटोऽभीरूर्मेघनादो गणंजयः ।
विनायको विरूपाक्षो धीर शूरो वरप्रदः ॥४॥
महागणपतिर्बुद्धिप्रियः क्षिप्रप्रसादनः ।
रुद्रप्रियो गणाध्यक्षः उमापुत्रोऽघनाशनः ॥५॥
कुमार गुरुरीशानपुत्रो मूषकवाहनः ।
सिद्धिप्रियः सिद्धिपतिः सिद्धः सिद्धिविनायकः ॥६॥
अविघ्नस्तुम्बुरः सिंहवाहनो मोहिनी प्रियः ।
कंकटो राजपुत्रः शालकः सम्मितोऽमितः ॥७॥

कुष्माण्डसाम सम्भूतिर्दुर्जयो धुर्जयो जयः ।
भूपतिर्भुवनपतिर्भूतानां - पतिर्व्यय ॥८॥
विश्वकर्ता विश्वमुखो विश्वरूपो निधिर्घृणिः ।
कविः कविनामृषभो ब्रह्मण्यो ब्रह्मणस्पतिः ॥९॥
ज्येष्ठराजो निधिपति निधिप्रियपति प्रियः ।
हिरण्मय पुरान्तः स्थः सूर्यमण्डल मध्यमः ॥१०॥
कराहतिध्वस्तसिन्धुसलिलः पूषदन्तभित् ।
उमाङ्ककेलिकुतकी मुक्तिदः कुल पालनः ॥११॥
किरीटी कुण्डलीहारी वनमाली मनोमयः ।
वैमुख्यहतदैत्यश्रीः पादाहतिजितक्षितिः ॥१२॥
सद्योजातस्वर्णमुंजमेखली दुर्निमित्तहृत ।
दुःस्वप्नहृत प्रसहनो गुणी नादप्रतिष्ठितः ॥१३॥
सुरूपः सर्वनेत्राधिवासो वीरासनाश्रयः ।
पीताम्बरः खण्डरदः खण्डेन्दुकृतशेखरः ॥१४॥
चित्राङ्कश्यामदशनो भालचन्द्रश्चतुर्भुजः ।
योगाधिपस्तारकस्थः पुरुषो गजकर्णकः ॥१५॥
गणाधिराजो विजयस्थिरो गजपतिध्वजी ।
देवदेवः स्मरप्राणदीपको वायुकीलकः ॥१६॥
विपश्चिद्वरदो नादोन्नादभिन्नबलाहकः ।
वराहरदनो मृत्युञ्जयो व्याघ्राजिनाम्बरः ॥१७॥
इच्छाशक्तिधरो देवत्राता दैत्यविमर्दनः ।
शम्भुवक्त्रोद्भवः शम्भुकोपहा शम्भुहास्यभूः ॥१८॥
शम्भुतेजाः शिवाशोकहारी गौरीसुखावहः ।
उमाङ्गमलजो गौरीतेजोभूः स्वर्धुनीभवः ॥१९॥
यज्ञकायो महानादो गिरिवर्ष्मा शुभाननः ।
सर्वात्मा सर्वदेवात्मा ब्रह्ममूर्धा ककुप्श्रुतिः ॥२०॥
ब्रह्माण्डकुम्भश्चिद्व्योमभालः सत्यशिरोरुहः ।
जगज्जनमलयोन्मेषऽग्न्यर्क सोमदक् ॥२१॥
गि[illegible]कैकरदो धर्माधर्मोष्ठः सामबृंहितः ।

ग्रहर्क्षदशनो वाणीजिह्वो वासवनासिकः ॥२२॥
कुलाचलांसः सोमार्कघण्टो रुद्रशिरोधरः ।
नदीनदभुजः सर्पाङ्गलीकस्तारकानखः ॥२३॥
भ्रूमध्यसंस्थितकरो ब्रह्मविद्यामदोत्कटः ।
व्योमनाभिः श्रीहृदयो मेरूपृष्ठोऽर्णवोदरः ॥२४॥
कुक्षिस्थयक्षगन्धर्वरक्षः किंनरमानुषः ।
पृथ्वीकटिः सृष्टिलिङ्ग शैलोरुर्दस्त्रजानुकः ॥२५॥
पाताल जङ्घो मुनिपात्कालाङ्गुष्ठस्त्रयी तनुः ।
ज्योर्तिर्मण्डललाङ्गलो हृदयालाननिश्चलः ॥२६॥
हृत्पद्मकर्णिकाशालिवियत्केलि सरोवरः ।
सद्भक्त ध्यान निगडः पूजा वारी निवारितः ॥२७॥
प्रतापी कश्यपसुतो गणपो विष्टपी बली ।
यशवी धार्मिकः स्वोजा प्रथमः प्रथमेश्वरः ॥२८॥
चिन्तामणिद्वीपपतिः कल्पद्रुमवनालयः ।
रत्नमण्डपमध्यस्थो रत्नसिंहासनाश्रयः ॥२९॥
तीव्रशिरोद्धृतपदो ज्वालिनी मौलि लालितः ।
नन्दानन्दित पीठ श्री र्भोगदा भूषितासनः ॥३०॥
सकामदायिनीपीठः स्फुरदुग्रासनाश्रयः ।
तेजोवतीशिरोरत्नं सत्यानित्यावतंसितः ॥३१॥
सविघ्ननाशिनीपीठः सर्वशक्त्यम्बुजाश्रयः ।
लिपिपद्मासनधारो वह्निधामत्रयाश्रयः ॥३२॥
उन्नतप्रपदो गूढ़गुल्फः संवृतपार्ष्णिकः ।
पीनजङ्घे श्लिष्टजानुः स्थूलोरूः प्रोन्नमत्कटिः ॥३३॥
निम्ननाभिः स्थूल कुक्षिः पीनवक्षा वृहद्भुजः ।
पीनस्कन्धः कम्बूकण्ठो लम्बोष्ठो लम्बनासिकः ॥३४॥
भग्नवामरदस्तुङ्गसव्यदन्तौ महाहनुः ।
ह्रस्वनेत्रत्रयः शर्पकर्णौ निबिडमस्तकः ॥३५॥
स्तवकाकारकुम्भाग्रो रत्नमौलिर्निरङ्कुशः ।
सर्पाहारकटिसूत्रः सर्पयज्ञोपवीतवान् ॥३६॥

सर्पकोटीरकटकः सर्पग्रैवेयकाङ्गदः ।
सर्पकक्ष्योदारबन्धः सर्पराजोत्तरीयकः ॥३७॥
रक्तोरक्ताम्बरधरो रक्तमाल्य विभूषणः ।
रक्तेक्षणों रक्तकरो रक्तताल्वोष्ठ पल्लवः ॥३८॥
श्वेत : श्वेताम्बरधरः श्वेतमाल्यविभूषणः ।
श्वेतातपत्ररुचिरः श्वेतचामर वीजितः ॥३९॥
सर्वावयव सम्पूर्णं सर्व लक्षण लक्षितः ।
सर्वाभरणशोभाढ्यः सर्वशोभा समन्वितः ॥४०॥
सर्वमङ्गलमाङ्गल्यः सर्वकारणकारणम् ।
सर्वदैककरः शार्ङ्गी बीजापूरी गदाधरः ॥४१॥
इक्षुचापधरः शूली चक्रपाणि सरोजभृत ।
पाशी भृतोत्पलः शालीमञ्जरी स्वदन्तभृत् ॥४२॥
कल्पवल्लीधरो विश्वाभयदैककरो-वशी ।
अक्षमालाधरो ज्ञानमुद्रावान् मुद्गरायुधः ॥४३॥
पूर्णपात्री कम्बूधरो विधृतालिसमुद्गकः ।
मातुलिङ्गधरश्चूतकलिकाभृत् कुठारवान् ॥४४॥
पुस्करस्थस्वर्णघटी पूर्णरत्नाभिवर्षकः ।
भारती सुन्दरीनाथो विनायकरति प्रियः ॥४५॥
महालक्ष्मीप्रियतमः सिद्धलक्ष्मी मनोरमः ।
रमारमेश पूर्वाङ्गो दक्षिणोमामहेश्वरः ॥४६॥
महीवराहवामाङ्गो रतिकंदर्पपश्चिमः ।
आमोदमोदजननः सप्रमोद प्रमोदनः ॥४७॥
समेधितसमृद्धि श्री ऋद्धि सिद्धि प्रवर्तकः ।
दत्त सौमुख्य सुमुखः कान्तिकंदालिताश्रयः ॥४८॥
मदनावत्याश्रिताङ्घ्रिः कृत्तदौर्मुख्यदुर्मुखः ।
विघ्नसम्पल्लवोपघ्नः सेवोन्निद्रमदद्रवः ॥४९॥
विघ्नकृन्निघ्न चरणे द्राविणी शक्ति सत्कृतः ।
तीव्रा प्रसन्ननयनो ज्वालिनीपालितैक दृक् ॥५०॥

मोहिनी मोहिनो भोगदायिनी कान्तिमण्डितः ।
कामिनीकान्तवक्त्र श्रीराधिष्ठितवसुन्धरः ॥५१॥
वसुन्धरामदोन्नद्ध महाशङ्ख निधि प्रभो ।
नमद्वसुमती मौलि महापद्ममनिधि प्रभुः ॥५२॥
सर्वसद्गुरुसंसेव्य शोचिष्केशहृदाश्रयः ।
ईशानमूर्धा देवेन्द्रशिखा पवननन्दनः ॥५३॥
अग्रप्रत्यग्रनयनो दिव्यास्त्राणां प्रयोगवित् ।
ऐरावतादिसर्वाशावारणा वरणप्रियः ॥५४॥
वज्राद्यस्त्रपरीवारो गजचण्डसमाश्रयः ।
जयाजयपरीवारो विजयाविजयावहः ॥५५॥
अजितार्चितापादाब्जो नित्यानित्यावतंसितः ।
विलासिनीकृतोल्लासः शौण्डी सौन्दर्यमण्डितः ॥५६॥
अनन्तानन्तः सुखदः सुमङ्गलसुमङ्गलः ।
इच्छाशक्ति ज्ञानशक्ति क्रियाशक्ति निषेवितः ॥५७॥
सुभगासंश्रितपदो ललिता ललिताश्रयः ।
कामिनी कामनः काममालिनी केलि लालितः ॥५८॥
सरस्वत्याश्रयो गौरीनन्दनः श्रीनिकेतनः ।
गुरुगुप्तपदो वाचासिद्धो वागीश्वरीपतिः ॥५९॥
नालिनी कामुको वामारामो ज्येष्ठा मनोरमः ।
रौद्रीमुद्रित पादाब्जो हुम्बीजस्तुङ्ग शिक्तकः ॥६०॥
विश्वादि जननत्राणः स्वाहा शक्ति सकीलकः ।
अमृताब्धिकृतावासो मदघुर्णितलोचनः ॥६१॥
उच्छिष्टगण उच्छिष्ठगणेशो गणनायकः ।
सार्वकालिक ससिद्धिर्नित्यशैवो दिगम्बरः ॥६२॥
अनपायोऽनन्त दृष्टिरप्रमेयोऽजरामरः ।
अनाविलोऽप्रतिरथो ह्यच्युतोऽमृतमक्षरम् ॥६३॥
अप्रतर्क्योऽक्षयोऽजय्यो - ऽनाधारोऽनामयोऽमलः ।
अमोघसिद्धिद्वैतमघोरो - ऽप्रमिताननः ॥६४॥

अनाकारोऽब्धि भूम्यग्निबलाघ्नोऽव्यक्त लक्षणः ।
आधारपीठः आधारः आधाराधेयवर्जितः ॥६५॥
आखुकेतन आशापूरक आखूमहारथः ।
इक्षु सागरमध्यस्थ इक्षुभक्षणलालसः ॥६६॥
इक्षुचापातिरेक श्रीरिक्षुचाप निषेवितः ।
इन्द्रगोपसमान श्रीरिन्द्रनील समद्युतिः ॥६७॥
इन्दीवरदलश्याम इन्दुमण्डल निर्मलः ।
इध्मप्रिय इडाभाग इराधामेन्दिरा प्रियः ॥६८॥
इक्षवाकुविघ्नविध्वंसी इतिकर्त्तव्यतेप्सितः ।
ईशानमौलिरोशान ईशानसुत ईतिहा ॥६९॥
ईषणात्रयकल्पान्त ईहामात्रविवर्जितः ।
उपेन्द्र उडुभृन्मौलिरुण्डेरकबलिप्रियः ॥७०॥
उन्नतानन उतुङ्ग उदारत्रिदशाग्रणीः ।
ऊर्जस्वानूष्मलमद ऊहापोहदुरासदः ॥७१॥
ऋग्यजुः सामसम्भुतिर्ऋद्धि सिद्धि प्रवर्तकः ।
ऋजुचितैक सुलभ ऋणत्रय विमोचकः ॥७२॥
लुप्तविघ्नः स्वभक्तानां लुप्तशक्तिः सुरद्विषाम् ।
लुप्तश्रीर्विमुखार्चानां लूताविस्फोटनाशनः ॥७३॥
एकार पीठ मध्यस्थ एकपादकृतासनः ।
एजिताखिल दैत्य श्रीरेधिताखिलसंश्रयः ॥७४॥
ऐश्वर्य निधिरैश्वर्य मैहिकामुष्मिक प्रदः ।
ऐरम्मदसमोन्मेष ऐरावत निभाननः ॥७५॥
ओंकारवाच्य ओंकार ओजस्वानोषधीपतिः ।
औदार्यनिधिरौद्धत्यधुर्य औन्नत्यनिरस्वनः ॥७६॥
अंकुशः सुरनागानामंकुशः सुरविद्विषाम् ।
अः समस्तविसर्गान्तपदेषु परिकीर्तित ॥७७॥
कमण्डलुधरः कल्पः कपर्दी कलभाननः ।
कर्मसाक्षी कर्मकर्ता कर्माकर्म फलप्रदः ॥७८॥

कदम्बगोलकाकारः कूष्माण्ड गणनायकः ।
कारुण्यदेहः कपिलः कथकः कटिसूत्रभृत् ॥७९॥
खर्वे खड्गप्रिय खड्गखान्तान्तस्थः खनिर्मलः ।
खल्वाट श्रृंगनिलयः खट्वाङ्गो खदुरासदः ॥८०॥
गुणाढ्यो गहनो गस्थो गद्य पद्य सुधार्णवः ।
गद्यगानप्रियो गर्जो गीतगीर्वाण पूर्वजः ॥८१॥
गुह्याचारतो गुह्यो गुह्यागम निरूपितः ।
गुहाशयो गुहाऽधिस्थो गुरुगम्यो गुरोर्गुरुः ॥८२॥
घण्टाघर्घरिकामाली घटकुम्भो घटोदरः ।
चण्डश्चडेश्वर सुहृच्चण्डीशश्चण्ड विक्रमः ॥८३॥
चराचरपतिश्चिन्तामणि – चर्वणलालसः ।
छन्दश्छन्दोवपुश्छन्दो दुर्लक्ष्यश्छन्दविग्रहः ॥८४॥
जगद्योनिर्जगत्साक्षी जगदीशो जगन्मयः ।
जपो जपपरो जप्यो जिह्वासिंहासनप्रभुः ॥८५॥
झलज्झलोल्लसद्दानझङ्कारि भ्रमरा कुलः ।
टंकारस्फारसंरावष्टंकारि मणिनूपुरः ॥८६॥
ठद्वयीपल्लवान्तः स्थसर्वमन्त्रैक सिद्धिदः ।
डिण्डिमुण्डो डाकिनीशो डामरो डिण्डिम प्रियः ॥८७॥
ढक्कानिनादमुदितौ ढौको ढुण्ढि विनायकः ।
तत्त्वानां परं तत्त्वं तत्त्वं पद निरूपितः ॥८८॥
तारकान्तर संस्थानस्तारकस्तारकान्तकः ।
स्थाणुः स्थाणुप्रियः स्थाता स्थावरं जङ्गमं जगत् ॥८९॥
दक्षयज्ञप्रमथनो दाता दानवमोहनः ।
दयावान् दिव्यविभवो दण्डभृद्दण्डनायकः ॥९०॥
दन्तप्रभिन्नाभ्रमालो दैत्यवारणदारणः ।
दंष्ट्रालग्नद्विपघटो देवार्थनृगजाकृतिः ॥९१॥
धनधान्यपतिर्धन्यो धनदो धरीणीधरः ।
ध्यानैक प्रकटो ध्येयो ध्यानं ध्यानपरायणः ॥९२॥

नन्द्यो नन्दिप्रियो नादो नादमध्य प्रतिष्ठितः ।
निष्कलो निर्मलो नित्यो नित्यानित्यो निरामयः ॥९३॥
परं व्योम परं धाम परमात्मा परं पदम् ।
परात्परः पशुपतिः पशुपाश विमोचकः ॥९४॥
पूर्णानन्दः परानन्दः पुराणपुरुषोत्तमः ।
पद्मप्रसन्ननयनः प्रणताज्ञान मोचनः ॥९५॥
प्रमाण प्रत्यातीतः प्रणतार्तिनिवारणः ।
फलहस्तः फणिपतिः फेत्कारः फाणितः प्रियः ॥९६॥
बाणार्चिताङ्घ्रियुगलो बालकेलिकुतूहली ।
ब्रह्म ब्रह्मर्चितपदो ब्रह्मचारी बृहस्पतिः ॥९७॥
ब्रह्मत्तमो ब्रह्मपरो ब्रह्मण्यो ब्रह्मवित्प्रियः ।
ब्रह्मन्नादाग्रयचीत्कारो ब्रह्माण्डावलिमेखलः ॥९८॥
भ्रूक्षेपदत्त लक्ष्मीको भर्गो भद्रो भयापहः ।
भगवान भक्तिसुलभो भूतिदो भूतिभूषणः ॥९९॥
भव्यो भूतालयो भोगदाता भ्रूमध्य गोचरः ।
मन्त्रो मन्त्रपतिर्मंत्री मदमत्तमनोरमः ॥१००॥
मेखलावान् मन्दगतिर्मतिमत्कमलेक्षणः ।
महाबलो महावीर्यो महाप्राणो महामनाः ॥१०१॥
यज्ञो यज्ञपतिर्यज्ञगोप्ता यज्ञफलप्रदः ।
यशस्करो योगगम्यो याज्ञिको याजकः प्रियः ॥१०२॥
रसो रसप्रियो रस्यो रञ्जको रावाणार्चितः ।
रक्षोरक्षाकरो रत्नगर्भो राजसुखप्रदः ॥१०३॥
लक्ष्यं लक्ष्यप्रदो लक्ष्यो लयस्थो लड्डूकप्रियः ।
लानप्रियो लास्यपरो लाभकृल्लोकविश्रुतः ॥१०४॥
वरेण्यो वह्निवदनो वन्द्यो वेदान्तगोचरः ।
विकर्ता विश्वतश्चक्षुर्विधाता विश्वतोमुखः ॥१०५॥
वामदेवो विश्वनेता वज्रिवज्रनिवारणः ।
विश्व बन्धनविष्कम्भाधारो विश्वेश्वरप्रभुः ॥१०६॥

शब्दब्रह्म शमप्राप्यः शम्भुशक्ति गणेश्वरः ।
शास्ता शिखाग्रनिलयः शरण्यः शिखरीश्वरः ॥१०७॥
षड्ऋतुकुसुमस्त्रग्वी षडाधारः षडक्षरः ।
संसार वैद्यः सर्वज्ञः सर्वभेषजभेषजम् ॥१०८॥
सृष्टिस्थितिलयक्रीडः सुरकुञ्जरभेदनः ।
सिन्दूरितमहाकुम्भः सदसद्व्यक्तिदायकः ॥१०९॥
साक्षी समुद्रमथनः स्वसंवेद्यः स्वदक्षिणः ।
स्वतन्त्रः सत्यसंकल्प सामगानरतः सुखी ॥११०॥
हंसो हस्तिपिशाचिशो हवनं हव्यकण्यभुक् ।
हव्यो हुतप्रियो हर्षो हृल्लेखामन्त्रमध्यगः ॥१११॥
क्षेत्राधिपः क्षमाभर्ता क्षमापरपरायणः ।
क्षिप्र क्षेमकरः क्षोमानंदः क्षोणी सुरद्रुमः ॥११२॥
धर्मप्रदोऽर्थदः कामदाता सौभाग्य वर्द्धनः ।
विद्याप्रदो विभवदो भुक्ति मुक्ति फलप्रदः ॥११३॥
आभिरूप्यकरो वीर श्रीप्रदो विजयप्रदः ।
सर्ववश्यकरो गर्भदोषहा पुत्र पौत्रदः ॥११४॥
मेघादः कीर्तिदः शोकहारी दौर्भाग्य नाशनः ।
प्रतिवादी मुखस्तम्भो रुष्टचित्तप्रसादनः ॥११५॥
पराभिचारशमनो दुःखभञ्जन कारकः ।
लवस्त्रुटिः कलाकाष्ठा निमेषस्तत्परः क्षणः ॥११६॥
घटी मुहूर्त्त प्रहरो दिवा नक्तमहनिशम् ।
पक्षो मासोऽयनं वर्ष युगं कल्पो महालयः ॥११७॥
राशिस्तारा तिथिर्योगो वारः करणमंशकम् ।
लग्नं होरा कालचक्रं मेरू सप्तर्षयो ध्रुवः ॥११८॥
राहुर्मन्दः कविर्जीवो बुधो भौमः शशि रविः ।
कालः सृष्टिः स्थितिर्विश्वं स्थावरं जङ्गमंचयत् ॥११९॥
भूरापोऽग्निर्मरुद्व्योमाहंकृतिः प्रकृतिः पुमान् ।
ब्रह्मा विष्णुः शिवो रुद्रः ईशः शक्तिः सदाशिवः ॥१२०॥

त्रिदशाः पितरः सिद्धा यक्षा रक्षासि किंनराः ।
साध्या विद्याधरा भूता मनुष्यः पशवः खगाः ॥१२१॥
समुद्राः सरितः शैला भूतं भव्यं भवोद्भवः ।
सांख्यं पातंजलंयोगः पुराणानि श्रुतिः स्मृतिः ॥१२२॥
वेदाङ्गानि सदाचारो मीसांसा न्याय विस्तरः ।
आयुर्वेदो धनुर्वेदो गन्धर्वं काव्यनाटकम् ॥१२३॥
वैखनसं भागवतं सात्वतं पाञ्चरात्रकम् ।
शैवं पाशुपतं कालामुखं भैरवशासनम् ॥१२४॥
शाक्तं वैनायकं सौरं जैनमार्हतसहिता ।
सदसद्वयक्तमव्यक्तं सचेतनमचेतनम् ॥१२५॥
बन्धो मोक्षः सुखं भोगोऽयोगः सत्यमणुर्महान् ।
स्वास्ति हुं फट् स्वधा स्वाहा श्रौषड्वौषड्वषण्णमः ॥१२६॥
ज्ञानंविज्ञानमानन्दो बोधः संविच्छमो यमः ।
एक एकाक्षराधरा एकाक्षरपरायणः ॥१२७॥
एकाग्रधीरेकवीर एकानेक स्वरूपधृक् ।
द्विरूपो द्विभुजो द्वयक्षो द्विरदो दीपरक्षकः ॥१२८॥
द्वैमातुरो द्विवदनो द्वंद्वातीतो द्वयातिगः ।
त्रिधामा त्रिकरस्त्रेता त्रिवर्ग फलदायकः ॥१२९॥
त्रिगुणात्मा त्रिलोकादिस्त्रिशक्तिश त्रिलोचनः ।
चतुर्बाहुश्चतुर्दन्तश्चतुरात्मा चतुर्मुखः ॥१३०॥
चतुर्विधोपायमपपायश्चतुर्वर्णाश्रमाश्रयः ।
चतुर्विधवचोवृत्तिपरिवृत्तिप्रवर्तकः ॥१३१॥
चतुर्थी पूजनप्रीतश्चतुर्थीतिथि सम्भवः ।
पञ्चाक्षरात्मा पञ्चात्मा पञ्चास्यः पञ्चकृत्यकृत् ॥१३२॥
पञ्चाधारः पञ्चवर्णः पञ्चाक्षर परायणः ।
पञ्चतालः पञ्चकरः पञ्चप्रणवभावितः ॥१३३॥
पञ्चब्रह्ममयस्फूर्तिः पञ्चावर्णवारितः ।
पञ्चभक्ष्यप्रियः पञ्चवाणः पञ्चशिवात्मकः ॥१३४॥

षट्कोणपीठः षट्चक्रधामा षड्ग्रन्थिभेदकः ।
षड्ध्वध्वान्तविध्वंसी षडङ्गुलमहाह्रदः ॥१३५॥
षण्मुखः षण्मुखभ्राताः षट्शक्तिपरिवारितः ।
षड्वैरिवर्गविध्वंसी षड्र्भिभयभञ्जनः ॥१३६॥
षट्तर्कदूरः षट्कर्मनिरतः षड्साश्रयः ।
सप्तपातालचरणः सप्तद्वीपोरुमण्डलः ॥१३७॥
सप्तस्वर्लोकमुकुटः सप्तसप्तिवरप्रदः ।
सप्ताङ्गराज्यसुखदः सप्तर्षिगणमण्डितः ॥१३८॥
सप्तच्छन्दोनिधिः सप्तहोता सप्तस्वराश्रयः ।
सप्ताब्धिकेलिकासारः सप्तमातृनिषेवितः ॥१३९॥
सप्तच्छन्दोमोदमदः सप्तच्छन्दोमखप्रभुः ।
अष्टमूर्ति ध्येयमूर्तिरष्टप्रकृतिकारणम् ॥१४०॥
अष्टाङ्गयोगफल भूरष्टपत्राम्बुजासनः ।
अष्टशक्तिसमृद्ध श्रीरष्टैश्वर्यप्रदायकः ॥१४१॥
अष्टपीठोपपीठ श्रीरष्टमातृ समावृतः ।
अष्टभैरवसेव्योऽष्टवसुवन्द्योऽष्टमूर्तिभृत् ॥१४२॥
अष्टचक्र स्फुरन्मूर्तिश्ष्ट-द्रव्य हविः प्रियः ।
नवनागासनाध्यासी नवनिध्यनुशासिता ॥१४३॥
नवद्वारपुराधारो नवाधारनिकेतनः ।
नवनारायण स्तुत्यो नवदुर्गानिषेवितः ॥१४४॥
नवनाथ महानाथो नवनागविभूषणः ।
नवरत्नविचाङ्गो नवशक्तिशिरोधृतः ॥१४५॥
दशात्मको दशभुजो दशदिक्पति वन्दितः ।
दशाध्यायो दशप्राणो दशेन्द्रियनियामकः ॥१४६॥
दशाक्षरमहामन्त्रो दशाशाव्यापिविग्रहः ।
एकादशादिभीरुद्रैः स्तुत एकादशाक्षरः ॥१४७॥
द्वादशोद्दण्डदोर्दण्डो द्वादशान्तनिकेतनः ।
त्रयोदशभिदाभिन्न विश्वदेवाधिदैवतम् ॥१४८॥

चतुर्दशेन्द्रवरदश्चतुर्दशमनु प्रभुः ।
चतुर्दशादिविद्याढ्यश्चतुर्दश- जगत्प्रभुः ॥१४९॥
सामपञ्चदशः पञ्चदशीशीतांशुनिर्मलः ।
षोडशाधारनिलयः षोडशस्वरमातृकः ॥१५०॥
षोडशान्तपदावासः षोडशेन्दुकलात्मकः ।
कला संप्तदशी सप्तदशः सप्तदशाक्षरः ॥१५१॥
अष्टादशद्वीपपतिरष्टादश - पुराणकृत् ।
अष्टादशौषधिसृष्टिरष्टादशविधिः स्मृतः ॥१५२॥
अष्टादशलिपिव्याष्टि समष्टिज्ञान कोविदः ।
एकविंशः पुमानेक विंशत्यङ्गुलि पल्लवः ॥१५३॥
चतुर्विंशतितत्त्वात्मा पञ्चविंशाख्य पुरुषः ।
सप्तविंशतितारेशः सप्तविंशति योगकृत् ॥१५४॥
द्वात्रिंशद्भैरवाधीशश्चतुर्स्त्रिशन्महाह्रदः ।
षट्त्रिंशतत्त्वसम्भूतिरष्टात्रिंशत्कलातनुः ॥१५५॥
नमदेकोनपञ्चाशन्मरुद्वर्गनिरर्गलः ।
पञ्चाशदक्षरश्रेणी पञ्चाशद्रुद्रविग्रहः ॥१५६॥
पञ्चाशद्विष्णुशक्तिशः पञ्चाशन्मातृकालयः ।
द्विपञ्चाशद्वपुः श्रेणी त्रिषष्ट्यक्षर संश्रयः ॥१५७॥
चतुःषष्ट्यर्णनिर्णेता चतुःषष्टि कलानिधिः ।
चतुःषष्टि . महासिद्धियोगिनीवृन्दवन्दितः ॥१५८॥
अष्टषष्टिमहातीर्थक्षेत्र भैरव भावनः ।
चतुर्नवतिमन्त्रात्मा षण्णवत्यधिक प्रभुः ॥१५९॥
शतानन्दः शतधृति शतपत्रायतेक्षणः ।
शतनीकः शतमुखः शतधारावरायुधः ॥१६०॥
सहस्त्रपत्रनिलयः सहस्त्रफणभूषणः ।
सहस्त्रशीर्षापुरुष सहस्त्राक्ष सहस्त्रपात् ॥१६१॥
सहस्त्रनामसंस्तुस्यः सहस्त्राक्षबलापहः ।
दशसाहस्त्रफणभृत् फणिराजकृतासनः ॥१६२॥
अष्टाशीतिसहस्त्राद्य महर्षिस्तोत्रयन्त्रितः ।
लक्षाधीशप्रियाधारो लक्षाधारमनोमयः ॥१६३॥

चतुर्लक्षजपप्रीतश्चतुर्लक्षप्रकाशितः ।
चतुरशीतिलक्षाणं जीवानां देहसंस्थितः ॥१६४॥
कोटिसूर्यप्रतीकाशः कोटिचन्द्रांशुनिर्मलः ।
शिवाभवाध्युष्टकोटि विनायकधुरंधरः ॥१६५॥
सप्तकोटि महामन्त्रमन्त्रितावयवद्युतिः ।
त्रयस्त्रिंशत्कोटिसुरश्रेणी प्रणत पादुकः ॥१६६॥
अनन्तनामानन्तश्रीरनन्तानन्तसौख्यदः ।
ॐ इति वैनायकं नाम्नां सहस्त्रमिदमीरितम् ॥१६७॥
इदं ब्राह्मे मुहूर्त्ते वै यः पठेत् प्रत्यहं नरः ।
करस्थं तस्य सकलमैहिकामुष्मिकं सुखम् ॥१६८॥
आयुरारोग्यमैश्वर्यं धैर्यं शौर्यं बलं यशः ।
मेधा प्रज्ञा धृतिः कान्ति सौभाग्यमति रूपता ॥१६९॥
सत्यं दया क्षमा शांतिर्दाक्षिण्यं धर्म शीलता ।
जगत संयमनं विश्वसंवादो वादपाटवम् ॥१७०॥
सभापाण्डित्यमौदार्य गाम्भीर्यं ब्रह्मवर्चसम् ।
औन्नत्यं च कुलं शीलं प्रतापो वीर्यमार्यता ॥१७१॥
ज्ञा । विज्ञानमास्तिक्यं स्थैर्यं विश्वातिशायिता ।
धनधान्याभिवृद्धिश्च सकृदस्य जपाद्भवेत् ॥१७२॥
वश्यं चतुर्विधिं नृणां जपादस्य प्रजायते ।
राज्ञो राजकलत्रस्य राजपुत्रस्य मन्त्रिणः ॥१७३॥
जप्यते यस्य वश्यार्थं सः दासस्तस्य जायते ।
धर्मार्थकाम मोक्षाणमनायासेन साधनम् ॥१७४॥
शाकिनी डाकिनीरक्षो यक्षोरगभयापहम् ।
साम्राज्य सुखदं चैव समस्तरिपुमर्दनम् ॥१७५॥
समस्त कलह ध्वंसी दग्धबीजप्ररोहणम् ।
दुःस्वप्न शामनं क्रुद्धस्वामीचित्तप्रसादनम् ॥१७६॥
षट्कर्माष्ट महासिद्धि त्रिकालज्ञान-साधनम् ।
परकृत्याप्रशमनं परचक्रविमर्दनम् ॥१७७॥
सङ्गरामरङ्गे सर्वेषामिदमेकं जयावहम् ।
सर्ववन्ध्यात्वदोषघ्नं गर्भरक्षैककारणम् ॥१७८॥

पठ्यते प्रत्यहं यत्र स्तोत्रं गणपतिरिदम् ।
देशे तत्र न दुर्भिक्षमीतयो दुरतानि च ॥१७९॥
न तद्गृहं जहाति श्रीर्यत्रायं जप्यते स्तवः ।
क्षयकुष्ट प्रमेहार्शोभगन्दरविषूचिकाः ॥१८०॥
गुल्मं प्लीहानमश्मानमतिसारं महोदरम् ।
कासं श्वासमुदवर्तं शूलं शोफादिसम्भवम् ॥१८१॥
शिरोरोगं वंमि हिक्कां गण्डमालामरोचकम् ।
वातपित्तकफद्वन्द्व त्रिदोषजनितज्वरम् ॥१८२॥
आगुन्तं विषमं शीतमुष्णं चैकाहिकादिकम् ।
इत्याद्युक्तमनुक्तं वा रोगं दोषादिसम्भवम् ॥१८३॥
सर्वं प्रशमयत्याशु स्तोत्रस्यास्य सकृज्जपः ।
सकृतपाठेन् संसिद्धः स्त्रीशूद्रपतिवैरपि ॥१८४॥
सहस्त्रनाममन्त्रोऽयं जपितव्यः शुभाप्तये ।
महागणपतेः स्तोत्रं सकामः प्रजपन्निदम् ॥१८५॥
इच्छितान् सकलान् भोगानुपभुज्येह पार्थिवान् ।
मनोरथफलैर्दिव्यैर्व्योमयानैर्मनोरमैः ॥१८६॥
चन्द्रेन्द्रभास्करोपेन्द्र ब्रह्मशर्वादिसद्मसु ।
कामरूपः कामगतिः कामतो विचरन्निह ॥१८७॥
भुक्त्वा ये थेप्सिनान् भोगानभीष्टान् सहबन्धुभिः ।
गणेशानुचरो भूत्वा महागणपतेः प्रियः ॥१८८॥
नन्दीश्वरादिसान्दी नन्दितः सकलैर्गणः ।
शिवाभ्यां कृपया पुत्रनिर्विशेषं च लालितः ॥१८९॥
शिवभक्तः पूर्णकामो गणेश्वरवरात् पुनः ।
जातिस्मरो धर्मपरः सार्वभौमोऽभिजायते ॥१९०॥
निष्कामस्तु जपन्नित्यं भक्त्या विघ्नेशतत्परः ।
योग सिद्धिं परां प्राप्यं ज्ञानवैराग्य संस्थितः ॥१९१॥
निरन्तरोदितानन्दे परमानन्दसंविदि ।
विश्वोत्तीर्णे परे पारे पुनरावृत्तिवर्जिते ॥१९२॥
लीनो वैनायके धान्ति रमते नित्यनिर्वृत्तः ।
योनाभिर्हुनेदेतैर्स्चर्चयेत् पूज्येन्नरः ॥१९३॥

राजानो वश्यतां यान्ति रिपवो यान्ति दास्ताम् ।
मन्त्रा सिध्यन्ति सर्वेऽपि सुलभास्तस्य सिद्धयः ॥१९४॥
मूलमन्त्रादीप स्तोत्रमिदं प्रियतरं मम् ।
नभस्ये मासि शुक्लायां चतुर्थ्यां मम जन्मनि ॥१९५॥
दुर्वाभिर्नामभिः पूजां तर्पणं विधिवच्चरेत् ।
अष्टद्रव्यैर्विशेषेण जुहुयाद्भक्ति संयुतः ॥१९६॥
तस्येप्सितानि सर्वाणि सिद्धयन्त्यत्र न संशयः ।
इदं प्रजप्तं पठितं पाठितं श्रावितं श्रुतम् ॥१९७॥
व्याकृतं चर्चितं ध्यानं विमृष्टमभिनन्दितम् ।
इहामुत्र च सर्वेषां विश्वैश्वर्यप्रदायकम् ॥१९८॥
स्वच्छन्दचारिणाप्येव येनायं धार्यते स्तवः ।
सरक्ष्यते शिवोदभूतैर्गणैरध्युष्ट कोटिभिः ॥१९९॥
पुस्तके लिखितं यत्र गृहे स्त्रोत्रं प्रपूजयेत् ।
तत्र सर्वोत्मा लक्ष्मीः संनिधत्ते निरन्तरम् ॥२००॥
दानैरशेषैरखिलैर्व्रतैश्च तीर्थैरशेषैः सकलैर्मखैश्च ।
न तत्फलं विन्दति यद्गणेशसहस्त्रनाम्नां स्मरणेन सद्यः ॥२०१॥
एतन्नाम्नां सहस्त्रं पठति दिनमणौ प्रत्यहंप्रोज्जिहाने,
सायं मध्यंदिने वा त्रिषवणमथवा संततं वाजनो यः ।
स स्यादैश्वर्यधुर्यः प्रभवति च सतां कीर्तिमुच्चैस्तनोति,
प्रत्यूहं हन्ति विश्वं वश्यति सुचिरं वर्धते पुत्र पौत्रैः ॥२०२॥
अकिंचनोऽपि मत्प्राप्तिचिन्तको नियताशनः ।
जपेत्तु चतुरो मासान् गणेशार्चन तत्परः ॥२०३॥
दरिद्रतां समुन्मूल्य सप्तजन्मानुगामपि ।
लभते महती लक्ष्मीमित्याज्ञा परमेश्वरी ॥२०४॥
आयुष्यवीतरोगं कुलमतिविमलं सम्पदश्चार्तदानाः,
कीर्तिर्नित्यावदाता भणितिरभिनवा कान्तिरव्याधिभव्या ।
पुत्राः सन्तः कलत्रं गुणवदभिमतं यद्यदेतश्च सत्यं,
नित्यं यः स्तोत्रमेतत् पठति गणपतेस्तस्यहस्ते समस्तम् ॥२०५॥

॥ इति श्रीगणपति सहस्त्रनाम स्तोत्रं सम्पूणम् ॥

卐 इति श्रीगणेश तन्त्रम् सम्पूणम् 卐

॥ अथ विष्णुतन्त्रम् ॥

भगवान श्रीविष्णु ने समय समय पर कई अवतार लेकर असुरों का दमन कर धर्म का अभ्युदय किया एवं भक्तों की रक्षा की। कामना प्रयोजन हेतु मुख्य-मुख्य प्रयोग दिये जा रहे हैं।

॥ विविध विष्णु मन्त्राः॥

षडक्षर हरिः :- श्रीं हरये नमः। यह मंत्र दारिद्र्य नाशक है। **ह्रीं हरये नमः।** यह मन्त्र भक्ति-मुक्ति दायक है। यह मंत्र ज्ञान वृद्धि कारक है। **क्लीं हरये नमः।** यह वंशवृद्धि कारक है। **हूं हरये नमः।** इस मंत्र से शत्रुओं पर विजय प्राप्त होती है।

इस मंत्र के ऋषि नारद, छन्द गायत्री और देवता हरि है।

ध्यानम् :-

मेघ श्यामं सुनयनं काकपक्ष विराजितं-
राधिकादि प्रियायुक्तं पर्यटन्तं वने वने ।
विचित्र परिधिं वंशीं दधतं वाम दक्षयोः ॥

॥ अष्टाक्षर नारायण मंत्र प्रयोगः ॥

ॐ अस्य श्रीनारायण मंत्रस्य साध्यनारायण ऋषिः। देवी गायत्री छन्दः विष्णुर्देवता। सर्वेष्टसिद्धये जपे विनियोगः।

ऋषिन्यासः:- **ॐ साध्यनारायण ऋषये नमः शिरसि१. गायत्रीछन्दसे नमः मुखे २. विष्णुदेवतायै नमः हृदि ३. विनियोगाय नमः सर्वाङ्गे ४.। इति ऋष्यादिन्यासः।**

अंगादिन्यास :-

ॐ क्रुद्धोल्काय नमः	अंगुष्ठाभ्यां नमः।	हृदयाय नमः।
ॐ महोल्काय नमः	तर्जनीभ्यां नमः।	शिरसे स्वाहा।
ॐ वीरोल्काय नमः	मध्यमाभ्यां नमः।	शिखायै वषट्।
ॐ द्युल्काय नमः	अनामिकाभ्यां नमः।	कवचाय हुँ।
ॐ सहस्रोल्काय नमः	कनिष्ठिकाभ्यां नमः।	नेत्रत्रयाय वौषट्।

ॐ स्वाहोल्काय नमः करतल करपृष्ठाभ्यां नमः। अस्त्राय फट्।

मेरुतंत्रे :- १. कुब्जोल्काय २. महोल्काय ३. अविरक्तोल्काय ४. सहस्त्रोल्काय ५. स्वाहोल्काय इत्यादि षड्न्यास देवता है। इ मंत्रस रत्न मंजूषा में अत्युल्काय तो हिन्दी तन्त्रसार में द्यूल्काय है।

मन्त्र - **ॐ नमो नारायणाय नमः।**

मन्त्र न्यासः :-

ॐ नमः	हृदयाय नमः।	अंगुष्ठाभ्यां नमः।
ॐ नं नमः	शिरसे स्वाहा।	तर्जनीभ्यां नमः।
ॐ मों नमः	शिखायै वषट्।	मध्यमाभ्यां नमः।
ॐ नां नमः	कवचाय हुँ।	अनामिकाभ्यां नमः।
ॐ रां नमः	नेत्रत्रयाय वौषट्।	कनिष्ठिकाभ्यां नमः।
ॐ यं नमः	अस्त्राय फट्।	करतलाय करपृष्ठाभ्यां नमः।
ॐ णां नमः	कुक्षौः।	करपृष्ठाभ्यां नमः।
ॐ यं नमः	पृष्ठे।	मणिबन्धये नमः।

द्वादशमूर्ति पञ्जर न्यास :- (ललाटे) **ॐ अं केशवाय धात्रे नमः।** (कुक्षौ) **ॐ नं आं नारायणाय अर्यम्ने नमः।** (हृदि) **ॐ मों इं माधवाय मित्राय नमः।** (कण्ठे) **ॐ भं ईं गोविन्दाय वरुणाय नमः।** (दक्षपार्श्वे) **ॐ गं उं विष्णवे अंशवे नमः।** (दक्षिणांसे) **ॐ वं ऊं मधुसूदनाय भगाय नमः।** (गलदक्षिणभागे) **ॐ तें एं त्रिविक्रमाय विवस्वते नमः।** (वामपार्श्वे) **ॐ वां ऐं वामनाय इन्द्राय नमः।** (वामांसे) **ॐ सुं ओं श्रीधराय पूष्णे नमः।** (गलवामभागे) **ॐ दें औं हृषिकेशाय पर्जण्याय नमः।** (पृष्ठे) **ॐ वां अं पद्मनाभाय त्वष्ट्रे नमः।** (ककुदि) **ॐ यं अः दामोदराय विष्णवे नमः।**

व्यापक न्यासः- **ॐ किरीट केयूरहारकुण्डलधर शङ्ख चक्रगदाम्भोज हस्त पीताम्बरधर श्रीवत्साङ्कित वक्षःस्थल श्री भूमिसहित स्वात्मज्योतिर्मय दीप्तकराय सहस्त्रादित्यतेजसे नमः।** इस मंत्र से शरीर में व्यापक न्यास करें।

ध्यानम् :-

उद्यत् कोटि दिवाकराभमनिशं शङ्खं गदां पङ्कजम्
चक्रं विभ्रितमिन्दिरा वसुमती संशोभि पार्श्वद्वयम् ।
कोटीराङ्गद हार कुण्डलधरं पीताम्बरं कौस्तुभो -
द्दीप्तं विश्वधरं स्ववक्षसि लसत् श्रीवत्सचिन्हं भजे ॥

॥ यंत्रपूजनम् ॥

यंत्र में या यंत्राधार मण्डल में (सर्वतोभद्र में) मण्डूकादि पीठ पूजन करें :-

अष्टाक्षर विष्णु पूजन यंत्रम्

यथा - **मं मंडूकाय नमः, कां कालाग्नि रुद्राय नमः, वं वराहाय नमः, कूं कूर्माय नमः, पृं पृथिवे नमः, अं अमृतवार्णाय नमः, नं नंदनोद्यानाय नमः, कं कल्पवृक्षाय नमः, रं रत्नवेदिकायै नमः, रं रत्नसिंहासनाय नमः।**

विष्णु की नवपीठ शक्तियों का पूजन करें :- पूर्वादिक्रमेण - **ॐ विमलायै नमः, ॐ उत्कर्षिण्यै नमः, ॐ ज्ञानाय नमः, ॐ क्रियायै नमः, ॐ योगायै नमः, ॐ प्रह्वयै नमः, ॐ सत्यायै नमः, ॐ ईशानायै नमः।** मध्ये - **ॐ अनुग्रहायै नमः।**

स्वर्णादिनिर्मित यंत्र का अग्नुत्तारण कर '**ॐ नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोग पीठात्मने नमः**' से पुष्पादि द्वारा आसन देकर पीठ पर विराजमान करें। प्राणप्रतिष्ठा करें, मूर्ति को भी प्राणप्रतिष्ठत कर यंत्र मध्य में रखें।

मूर्ति का पूजन कर विष्णुयंत्र के आवरण मण्डल देवताओं के पूजन की आज्ञा मांगे।

ॐ सचिन्मयः परोदेवः परामृतरस प्रियः ।
अनुज्ञां देहि मे विष्णो परिवारार्चनाय मे ॥

यंत्र पूजा में प्रत्येक नाम के बाद पादुकां पूजयामि तर्पयामि कहें।

प्रथमावरणम् :- (षट्कोण केसरेषु) अग्निकोणे - **ॐ क्रुद्धोल्काय** (कुब्जोल्काय) **हृदयाय नमः।** नैऋत्ये - **ॐ महोल्काय शिरसे स्वाहा।** वायव्ये - **ॐ वीरोल्काय शिखायै वषट्।** ऐशान्ये - **ॐ द्वयुल्काय नमः कवचाय हुँ।** देवाग्रे - **ॐ सहस्त्रोल्काय नेत्रत्रयाय वौषट्।** (पंचाङ्ग पूजन में **सहस्त्रोल्काय अस्त्राय फट्** है।) स्वाग्रे - **ॐ स्वाहोल्काय अस्त्राय फट्।**

द्वितीयावरणम् :- अष्टदलों के मूलभाग में पूर्वादिक्रमेण से - **ॐ ॐ नमः १. ॐ नं नमः २. ॐ मों नमः ३. ॐ नां नमः ४. ॐ रां नमः ५. ॐ यं नमः ६. ॐ णां नमः ७. ॐ यं नमः।**

तृतीयावरणम् :- अष्टदलों के मध्य भाग में पूर्वादिक्रमेण - **ॐ वासुदेवाय नमः, ॐ शांत्यै नमः, ॐ संकर्षणाय नमः, ॐ श्रियै नमः, ॐ प्रद्युम्नाय नमः, ॐ सरस्वत्यै नमः, ॐ अनिरुद्धाय नमः, ॐ रत्यै नमः।**

चतुर्थावरणम् :- (अष्टदलो के अग्रभाग में)- पूर्वे **ॐ चक्राय नमः।** अग्निकोणे- **ॐ कोस्तुभाय नमः।** दक्षिणे- **ॐ शंखाय नमः।** नैऋत्ये- **ॐ मुसलाय नमः।** पश्चिमे- **ॐ गदायै नमः।** वायव्ये **ॐ खड्गाय नमः।** उत्तरे- **ॐ पद्माय नमः।** ऐशान्ये **वनमालायै नमः।**

पंचमावरणम् :- भूपूर में (३१) पूर्वे - **ॐ गरुड़ाय नमः।** (३२) दक्षिणे- **ॐ शंखनिधये नमः** । (३३) पश्चिमे - **ॐ ध्वजाय नमः।** (३४) उत्तरे- **ॐ पद्मनिधये नमः** । (३५) अग्निकोणे- **ॐ विघ्नाय नमः।** (३६) नैर्ऋत्ये- **ॐ आर्याय नमः** । (३७) वायव्ये- **ॐ दुर्गायै नमः** । (३८) ऐशान्ये -**ॐ सेनान्यै नमः।**

षष्टमावरणम् - पूर्वादिक्रम से इन्द्रादि दिक्पालों व उनके आयुधों का आवाहन करे। पूर्वे **ॐ लं इन्द्राय नमः, रं अग्नये नमः, मं यमाय नमः, क्षं निऋत्ये नमः, वं वरुणाय नमः, यं वायवे नमः, कुं कुबेराय नमः, हं ईशानाय नमः।** इन्द्रेशानमध्ये- **आं ब्रह्मणे नमः वरुणनिऋत्योर्मध्ये ॐ ह्रीं अनंताय नमः।**

पुनः पूर्वादिक्रमेण - **वं वज्राय नमः, शं शक्तये नमः, दं दण्डाय नमः। खं खड्गाय नमः, पं पाशाय नमः, अं अंकुशाय नमः, गं गदायै नमः, त्रिं त्रिशूलाय नमः, पं पद्माय नमः, चं चक्राय नमः।**

तत्पश्चात् पूजन करके '**ॐ नमो नारायणाय**' इस मंत्र का जाप करे।

इस मंत्र का पुरश्चरण षोडश लक्ष जप का कहा गया है।

॥ अथ द्वादशाक्षरी विष्णुमंत्र विधानम् ॥

मंत्रो यथा - **ॐ नमो भगवते वासुदेवाय। (शारदायाम्)**

विनियोगः - **अस्य श्री नमोभगवते वासुदेवाय मंत्रस्य प्रजापति ऋषिः। गायत्री छंदः। वासुदेव परमात्मादेवता। सर्वेष्ट सिद्धये जपे विनियोगः।**

ऋषिन्यासः - **ॐ प्रजापति ऋषये नमः शिरसि, गायत्री छन्दसे नमः मुखे, वासुदेवपरमात्म देवतायै नमः हृदि, विनियोगाय नमः सर्वाङ्गे।**

अङ्गन्यासः -

ॐ	अंगुष्ठाभ्यां नमः।	हृदयाय नमः।
नमो	तर्जनीभ्यां नमः।	शिरसे स्वाहा।
भगवते	मध्यमाभ्यां नमः।	शिखायै वषट्।
वासुदेवाय	अनामिकाभ्यां नमः।	कवचाय हुँ।
ॐ नमो भगवते वासुदेवाय	कनिष्ठिकाभ्यां नमः।	अस्त्राय फट्।

मंत्रवर्णन्यास : - **ॐ ॐ नमः मूर्ध्नि, ॐ नं नमः भाले, ॐ मों नमः नेत्रयोः, ॐ भं नमः मुखे, ॐ गं नमः गले, ॐ वं नमः बाह्वो , ॐ तें नमः हृदये, ॐ वां नमः कुक्षौ, ॐ सुं नमः नाभौ, ॐ दें नमः लिङ्गे, ॐ वां नमः जान्वो, ॐ यं नमः पादयोः।**

ध्यानम् :–

विष्णुं शारदचन्द्रकोटिसदृशं शंङ्खं रथाङ्गं गदामंभोजं
दधतं सिताब्जनिलयं कान्त्या जगन्मोहनम् ।
आबद्धांगदहार कुण्डल महामौलिं स्फुरत्कंकणं
श्रीवत्सांकमुदार कौस्तुभधरं वंदे मुनीन्द्रैः स्तुतम् ॥

अन्य न्यासों में :- विष्णु द्वादशमूर्तिन्यास एवं व्यापक न्यास पूर्ववत करें। केशवमातृका न्यास, विष्णु कृष्ण, राम व अन्य अवतारों की उपासना हेतु किये जाते है जो पुस्तक में आगे दिये हुये हैं।

॥ अथ यंत्रार्चनम् ॥

सर्वतोभद्रपीठ के मण्डूकादिपीठ देवताओं तथा विमलादि नवपीठ शक्तियों का पूजन पूर्व में वर्णित विधान से करें। यंत्र का अग्न्युत्तारण करें एवं पीठ पर स्थापित कर आवरण पूजा हेतु देव से आज्ञा प्राप्त करें।

ॐ सच्चिन्मय परोदेवः परामृतरसप्रियः ।
अनुज्ञां देहि मे विष्णो परिवारार्चनाय मे ॥

यंत्रार्चन में प्रत्येक देवता के नाम के बाद पादुकां पूजयामि तर्पयामि से गंधार्चन एवं तर्पण करें।

प्रथमावरणम् :- षट्कोण के पांच अङ्गों में पूजन करे। अग्निकोणे - **ॐ हृदयाय नमः**। नैर्ऋते - **ॐ नमः शिरसे स्वाहा**। वायव्ये - **ॐ भगवते शिखायै वषट्**। ईशान्ये - **ॐ वासुदेवाय कवचाय हुं**। देवतापश्चिमे - **ॐ नमो भगवते वासुदेवाय अस्त्राय फट्**।

द्वादशाक्षर विष्णु पूजन यंत्रम्

द्वितीयावरणम् :- (अष्ट दले) पूर्वे - **ॐ वासुदेवाय नमः**, दक्षिणे - **ॐ संकर्षणाय नमः**, पश्चिमे - **ॐ प्रद्युम्नाय नमः**, उत्तरे - **ॐ अनिरुद्धाय नमः**। अग्रिकोणे - **ॐ शांत्यै नमः**, नैऋत्ये - **ॐ श्रियै नमः**, वायव्ये - **ॐ सरस्वत्यै नमः**, ऐशान्ये - **ॐ रत्यै नमः**।

तृतीयावरणम् :- (द्वादशदले) पूर्वादिक्रमेण - **ॐ केशवाय नमः, ॐ नं नारायणाय नमः, ॐ मों माधवाय नमः, ॐ भं गोविन्दाय नमः, ॐ गं विष्णवे नमः, ॐ वं मधुसूदनाय नमः, ॐ तें त्रिविक्रमाय नमः, ॐ वां वामनाय नमः, ॐ सुं श्रीधराय नमः, ॐ दें हृषिकेशाय नमः, ॐ वां पद्मनाभाय नमः, ॐ यं दामोदराय नमः।**

चतुर्थावरणम् एवं पंचमावरणम् :- अष्टाक्षरी मंत्र में भूपूर में गरुड़ादि देवता तथा इन्द्रादि लोकपालों व उनके आयुधों का जो पूजन दिया है उसी क्रम से पूजन करें।

पुरश्चरण - **अस्य पुरश्चरणं द्वादशलक्ष जपः ।**

॥ नारायण हृदयम् ॥

लक्ष्मीनारायण की प्रसन्नता के लिए लक्ष्मीहृदय के साथ इसका पाठ करने से धनधान्य ऐश्वर्य की वृद्धि होती है। अशक्ति में लक्ष्मी मंत्र का जाप ही करें अन्यथा लक्ष्मीरुष्ट हो जाती है।

विनियोग: - **ॐ अस्य श्रीनारायण हृदय स्तोत्रमन्त्रस्य भार्गव ऋषिः, अनुष्टुप् छन्दः, श्रीलक्ष्मीनारायणो देवता, ॐ बीजम्, नमः शक्तिं, नारायणायेति कीलकं, श्रीलक्ष्मीनारायण प्रीत्यर्थे पाठे विनियोगः।**

ऋषिन्यासः – ॐ भार्गव ऋषये नमः शिरसि। अनुष्टुप् छन्दसे नमः मुखेः। श्रीलक्ष्मीनारायण देवतायै नमः हृदि। ॐ बीजाय नमो गुह्ये। नमः शक्तये नमः पादयोः। नारायणायेति कीलकाय नमः नाभौ। विनियोगाय नमः सर्वाङ्गे।

करन्यासः – ॐ नारायणः परं ज्योतिः अंगुष्ठाभ्यां नमः। ॐ नारायणः परं ब्रह्मेति तर्जनीभ्यां नमः। ॐ नारायणः परोदेव इति मध्यमाभ्यां नमः। ॐ नारायणः परो ध्यायेति अनामिकाभ्यां नमः। ॐ नारायणः परं धामेति कनिष्ठिकाभ्यां नमः। ॐ नारायणः परो धर्म इति करतलकरपृष्ठाभ्यां नमः। इसी तरह हृदयादिन्यास करें।

दिग्रक्षणः – ॐ नमः सुदर्शनायास्त्राय हुं फट् बध्नामि नमश्चक्राय स्वाहा। इस मन्त्र से तीन ताली देकर दशों दिशाओं में दिग्बंधन करें।

ध्यानम् –

उद्यदादित्यसंकाशं पीतवास समच्युतम्।
शङ्खचक्रगदापाणिं ध्यायेल्लक्ष्मीपतिं हरिम्॥

"ॐ नमो नारायणाय" इस मंत्र का १०८ बार जप करके स्तोत्र का पाठ करें।

ॐ नारायणः परं ज्योतिरात्मा नारायणः परः।
नारायणः परंब्रह्म नारायण नमोस्तुते ॥१॥

नारायणः परोदेव दाता नारायणः परः।
नारायणः परो ध्याता नारायण नमोस्तुते ॥२॥

नारायणः परंधाम ध्यानं नारायणः परः।
नारायणः परो धर्म्मो नारायण नमोस्तुते ॥३॥

नारायणः परो वेद्यो विद्या नारायणः परः।
विश्वं नारायणः साक्षान्नारायण नमोस्तुते ॥४॥

नारायणद्विधिर्जातो जातो नारायणाच्छिवः।
जातो नारायणादिन्द्रो नारायण नमोस्तुते ॥५॥

रविर्नारायणं तेजश्चान्द्रं नारायणं महः।
वह्निर्नारायणः साक्षान्नारायण नमोस्तुते ॥६॥

नारायण उपास्यः स्याद्गुरुर्नारायणः परः।
नारायणः परोबोधो नारायण नमोस्तुते ॥७॥

नारायणः फलं मुख्यं सिद्धिर्नारायणः सुखम् ।
सेव्यो नारायणः शुद्धो नारायण नमोस्तुते ॥८॥

॥ इतिमूलाष्टकम् ॥

॥ अथप्रार्थनादशकम् ॥

ॐ नारायणस्त्वमेवासि दहराख्ये हृदि स्थितः ।
प्रेरकः प्रेर्य्यभाणानां त्वया प्रेरितमानसः ॥१॥
त्वदाज्ञां शिरसा धृत्वा जपामि जनपावनम् ।
नानोपासन मार्गाणां भावहृद्भावबोधकः ॥२॥
भावार्थकृद्भावभूतो भावसौख्यप्रदोभव ।
त्वन्मायामोहितं विश्वं त्वयैव परिकल्पितम् ॥३॥
त्वदधिष्ठानमात्रेण सैषा सर्वार्थकारिणी ।
त्वमेव तां पुरस्कृत्य मम कामान्समर्प्यय ॥४॥
न मे त्वदन्यस्त्रातास्ति त्वदन्यन्नहि दैवतम् ।
त्वदन्यं नहि जानामि पालकं पुण्यरूपकम् ॥५॥
यावत्सांसारिको भावो मनःस्थो भावनात्मकः ।
तावत्सिद्धिर्भवेत्साध्या सर्वथा सर्वदा विभो ॥६॥
पापिनामहमेवाग्र्यो दयालूनां त्वमग्रणीः ।
दयनीयो मदन्योऽस्ति तव कोऽत्र जगत्त्रये ॥७॥
त्वयाण्यहं न सृष्टश्चेन्न स्यात्तव दयालुता ।
आमयो नैव सृष्टश्चेदौषधस्य वृथोदयः ॥८॥
पापसंघपरिक्रांतः पापात्मा पापरूपधृक् ।
त्वदन्यः कोऽत्र पापेभ्यस्त्राता मे जगतीतले ॥९॥
त्वमेव माता च पिता त्वमेव बंधुश्च सखा त्वमेव ।
त्वमेव विद्या च गुरुस्त्वमेव सर्वं मम देव देव ॥

पहले नारायण हृदय फिर लक्ष्मी हृदय पुनः नारायण हृदय का पाठ करें। इस तरह से आधि व्याधि का नाश होवें सभी कामनायें सिद्ध होवें। प्रेतादि उपद्रव नष्ट होवे।

लक्ष्मी हृदयकं प्रोक्तं विधिना साधयेत्सुधीः ।
भृगुवारे च रात्रौ च पूजयेत्पुस्तक द्वयम् ॥१॥

सर्वस्वं सर्वदा सत्यं गोपयेत्साधयेत्सुधीः ।
गोपनात्साधनाल्लोके धन्यो भवति तत्त्वतः ॥२॥

॥ इति अथर्वण रहस्ये उत्तरभागे नारायण हृदयम् ॥

॥ नारायण सूक्तम् ॥

ॐ सहस्त्रशीर्ष देवं विश्वाक्षं विश्व शंभुवम् ।
विश्वं नारायणं देवमक्षरं परमं पदम् ॥१॥
विश्वतः परमान्नित्यं विश्वं नारायण ँ हरिम् ।
विश्वमे वेदं पुरुषस्तद् विश्वमुप जीवति ॥२॥
पतिं विश्वस्यात्मेश्वर ँ शाश्वत ँ शिवमच्युतम् ।
नारायणं महाज्ञेयं विश्वात्मानं परायणम् ॥३॥
नारायणं परोज्योतिरात्मा नारायणः परः ।
नारायण परं ब्रह्मतत्त्वं नारायणः परः ॥४॥
नारायण परो ध्याता ध्यानं नारायणः परः ।
यच्च किञ्चिज्जगत् सर्वं दृश्यते श्रूयतेऽपिवा ॥५॥
अन्तर - बहिश्च तत् सर्वं व्याप्य नारायणः स्थितः ।
अनंतमव्ययं कवि ँ समुद्रेन्तं विश्व शंभुवम् ॥६॥
पद्मकोश प्रतीकाश ँ हृदयं चाप्यधोमुखम् ।
अद्यो निष्ठयावित स्यान्ते नाभ्यामुपरि तिष्ठति ॥७॥
ज्वालमालाकुलंभाति विश्वस्यायतनं महत् ।
सन्तत ँ शिलाभिस्तु लम्बत्याकोश सन्निभम् ॥८॥
तस्यान्ते सुषिर ँ सूक्ष्मं तस्मिन् सर्वं प्रतिष्ठितम् ।
तस्य मध्ये महानग्नि - र्विश्वार्चि-र्विश्वतोमुखः ॥९॥
सोग्रभुग्विभजन् तिष्ठन्नाहारमजरः कविः ।
तिर्यगूर्ध्वमधः शायी रश्मयस्तस्य सन्तताः ॥१०॥
संतापयति स्वं देह मा पादतल मस्तकः ।
तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थितः ॥११॥
नीलतोयद मध्यस्था विद्युल्लेखेव भास्वरा ।

नीवार शूक वत्तन्वी पीताभास्वत्यणूपमा ॥१२॥
तस्या शिखाया मध्ये परमात्मा व्यवस्थितः ।
स ब्रह्मा स शिवः स हरिः सेन्द्र परम स्वराट् ॥१३॥
ऋतु ॐ सत्यं परं ब्रह्म पुरुषं कृष्णापिंगलम् ।
उर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमा नमः ॥१४॥
नारायणाय विद्महे वासुदेवाय धीमहि ।
तन्नो विष्णुः प्रचोदयात् ॥१५॥

॥ इति नारायण सूक्तम् ॥

॥ अथ नारायणास्त्रम् ॥

॥ अथमन्त्रः ॥

हरिः ॐ नमो भगवते श्रीनारायणाय नमो नारायणाय विश्वमूर्तये नमः श्री पुरुषोत्तमाय पुष्पदृष्टिं प्रत्यक्षं वा परोक्षं वा अजीर्णं पञ्चविषूचिकां हन हन ऐकाहिकं द्व्याहिकं त्र्याहिकं चातुर्थिकं ज्वरं नाशय नाशय चतुरशीतिवातान ष्टादशकुष्ठान् अष्टादशक्षय रोगान् हन२ सर्वदोषान् भंजय२ तत्सर्वं नाशय २ शोषय शोषय आकर्षय २ शत्रून् २ मारय २ उच्चाटयोच्चाटय विद्वेषय २ स्तंभय २ निवारय २ विघ्नैर्हन २ दह २ मथ २ विध्वंसय २ चक्रं गृहीत्वा शीघ्रमागच्छागच्छ चक्रेण हत्वा परविद्यां छेदय छेदय भेदय २ चतुःशीतानि विस्फोटय २ अर्शवातशूलदृष्टि सर्पसिंहव्याघ्र द्विपदचतुष्पद पद बाह्यान्दिवि भुव्यन्तरिक्षे अन्येऽपि केचित् तान्द्वेषकान्सर्वान् हन २ विद्युन्मेघनदी पर्वताटवीसर्वस्थान रात्रिदिनपथचौरान् वशं कुरु कुरु हरिः ॐ नमो भगवते ह्रीं हुं फट् स्वाहा ठः ठं ठं ठः नमः ॥

॥ विधानम् ॥

एषा विद्या महानाम्नी पुरा दत्ता मरुत्वते ।
असुराञ्जितवान्सर्वाञ्च्छ क्रस्तु बलदानवान् ॥१॥
यः पुमान्पठते भक्त्या वैष्णवो नियतात्मना ।
तस्य सर्वाणि सिद्ध्यन्ति यच्च दृष्टिगतं विषम् ॥२॥
अन्यदेहविषं चैव न देहे संक्रमेद्ध्रुवम् ।
संग्रामे धारयत्यङ्गे शत्रून्वै जयते क्षणात् ॥३॥

अतः सद्यो जयस्तस्य विघ्नस्तस्य न जायते ।
किमत्र बहुनोक्तेन सर्वसौभाग्यसंपदः ॥४॥
लभते नात्र संदेहो नान्यथा तु भवेदिति ।
गृहीतो यदि वा येन बलिना विविधैरपि ॥५॥
शतिं समुष्णतां याति चोष्णं शीतलतां व्रजेत् ।
अन्यथा न भवेद्विद्यां यः पठेत्कथितां मया ॥६॥
भूर्जपत्रे लिखेन्मंत्रं गोरोचनजलेन च ।
इमां विद्यां स्वके बद्धा सर्वरक्षां करोतु मे ॥७॥
पुरुषस्याथवा स्त्रीणां हस्ते बद्धा विचक्षणः ।
विद्रवंति हिं विघ्नाश्च न भवंति कदाचन ॥८॥
न भयं तस्य कुर्वंति गगने भास्करादयः ।
भूतप्रेतपिशाचाश्च ग्रामग्राही तु डाकिनी ॥९॥
शाकिनीषु महाघोरा वेतालाश्च महाबलाः ।
राक्षसाश्च महारौद्रा दानवा बलिनो हि ये ॥१०॥
असुराश्च सुराश्चैव अष्टयोनिश्च देवता ।
सर्वत्र स्तम्भिता तिष्ठेन्मन्त्रोच्चारणमात्रतः ॥११॥
सर्वहत्याः प्रणश्यंति सर्वं फलति नित्यशः ।
सर्वे रोगा विनश्यंति विघ्नस्तस्य न बाधते ॥१२॥
उच्चाटनेऽपराह्ने तु संध्यायां मारणे तथा ।
शान्तिके चार्धरात्रे तु ततोऽर्थः सर्वकामिकः ॥१३॥
इदं मन्त्ररहस्यं च नारायणास्त्रमेव च ।
त्रिकालं जपते नित्यं जयं प्राप्नोति मानवः ॥१४॥
आयुरारोग्यमैश्वर्यं ज्ञानं विद्यां पराक्रमम् ।
चिंतितार्थ सुखप्राप्तिं लभते नात्र संशयः ॥१५॥

॥ इति नारायणास्त्रम् ॥

॥ श्रीसुदर्शनकवचम् ॥

॥श्रीमत्प्रणतार्तिहरवरदपरब्रह्मणे नमः॥

॥ श्रीसुदर्शनाय नमः॥

विनियोगः – अस्य श्रीसुदर्शनकवच महामन्त्रस्य भगवानन्तर्यामी नारायण ऋषिः, अनुष्टुप् छन्दः। श्रीसुदर्शनरूपी श्रीमन्नारायणो देवता। रं बीजम्। हुं शक्तिः। फट् कीलकम्। श्रीसुदर्शनप्रसाद सिद्ध्यर्थे जपे विनियोगः। शङ्खं चक्रं गदां पद्मं मुसलं खड्गमेव च। धेनुं च यमपाशं च मुद्रा ह्येताः प्रकीर्तिताः॥ पाञ्चजन्याय शङ्खाधिपतये नमः। सुदर्शनाय हेतिराजाय नमः। कौमोदक्यै गदाधिपतये नमः। पं पद्माय नमः। मुं मुसलाय नमः। नं नन्दकाय खड्गाधिपतये नम। सुं सुरभ्यै नमः। यं यमपाशाय नमः॥

ध्यानम् :–

शङ्खं शार्ङ्गं सखेटं हलपरशुगदाकुन्तपाशान्दधानं
त्वन्यैवमिश्रै चक्रेष्वसिमुसललसद्वज्र शूलाङ्कुशाग्रीन् ।
ज्वालाकेशं किरीटं ज्वलदनलनिभं वह्निमुग्रस्थ पीठं
प्रत्यालीढं त्रिनेत्रं रिपुगण दमनं भावयेच्चक्रराजम् ॥

अथवा :- ॐ अस्य श्रीसुदर्शनकवचस्तोत्र महामन्त्रस्याहिर्बुध्न्यो भगवानृषिः अनुष्टुप् छन्दः श्रीसुदर्शन महा श्रीनृसिंहो देवता। सहस्त्रारमिति बीजम्॥ सुदर्शनमिति शक्तिः। चक्रमिति कीलकम्। मम सर्वरक्षार्थे श्रीसुदर्शन पुरुष श्रीनृसिंहप्रीत्यर्थे जपे विनियोगः॥ ॐ सं अचक्राय स्वाहा अंगुष्ठाभ्यां नमः॥

करन्यासः – ॐ हं विचक्राय स्वाहा तर्जनीभ्यां नमः॥ ॐस्त्रां सुचक्राय स्वाहा मध्यमाभ्यां नमः॥ ॐ रं सूर्यचक्राय स्वाहा अनामिकाभ्यां नमः॥ ॐ सुदर्शनचक्राय स्वाहा कनिष्ठिकाभ्यां नमः। हुं ज्वाला चक्राय स्वाहा। करतलकरपृष्ठाभ्यां नमः॥

अङ्गन्यासः – ॐ सं अचक्राय स्वाहा हृदयाय नमः॥ ॐ हं विचक्राय स्वाहा शिरसे स्वाहा॥ ॐ स्त्रां सुचक्राय स्वाहा शिखायै वषट्॥ ॐ रं सूर्य्यचक्राय स्वाहा बलाय कवचाय हुम्॥ ॐ हुं ज्वालाचक्राय स्वाहा नेत्रत्रयाय वौषट्। ॐ फट् सुदर्शनचक्राय स्वाहा अस्त्राय फट्॥ ॐ भूर्भुवः स्वरोमिति दिग्बन्धः॥

अथ ध्यानम् :–

शङ्खं चक्रं च चापं परशुमिषुमसिं शूलपाशाङ्कुशास्त्रं
बिभ्राणं वज्रखेटं हलमुसलगदाकुंतमत्युग्रदंष्ट्रम् ।
ज्वालाकेशं त्रिनेत्रं ज्वलदनलनिभं हारकेयूरभूषं,
ध्यायेत् षट्कोणसंस्थं सकलरिपुजन प्राण संहारचक्रम् ॥

ॐ नमो भगवते सुदर्शनाय भो भो सुदर्शन दुष्टं दारय दारय दुरितं हन हन पापं दह दह। रोगं मर्दय मर्दय। आरोग्यं कुरु कुरु॥ ॐ ॐ ह्रां ह्रां ह्रीं ह्रीं ह्रूं ह्रूं फट् फट् दह दह हन हन भीषय भीषय स्वाहा॥

मस्तकं मे सहस्त्रारः फालं पातु सुदर्शनः ।
भ्रुवौ मे चक्रराट् पातु नेत्रे द्वेऽर्केन्दुलोचनः ॥१॥
कर्णौ वेदस्तुतः पातु घ्राणं मे सुविभीषणः ।
महादीप्तः कपोलौ मे ओष्ठौ रुद्रवरप्रदः ॥२॥
दन्तान्पातु जगद्वन्द्यो रसनां मम सर्वदा ।
सर्वविद्यार्णवः पातु गिरं वागीश्वरो मम ॥३॥
वीरसिंहो मुखं पातु चुबुकं भक्तवत्सलः ।
सर्वदा पातु कण्ठं मे मेघगम्भीरनिस्वनः ॥४॥
मम स्कन्धयुगं पातु धराभारापहारकः ।
बाणासुरभुजारण्यदावाग्निः पातु मे भुजौ ॥५॥
कालनेमिशिरश्छेत्ता पातु मे कूर्परद्वयम् ।
करौ दिव्यायुधः पातु नखान्वज्रनखोपमः ॥६॥
कुक्षिं पातु महाशूरः स्तनौ शत्रुनिषूदनः ।
पातु मे हृदयं भक्तजनानन्दश्च सर्वदा ॥७॥
सर्वशास्त्रार्थसद्भूतिहेतुः पातूदरं मम ।
वक्षः पातु महाधारो दिवि दानवमर्दनः ॥८॥
पार्श्वौ मे पातु दीनार्तः शरणागतवत्सलः ।
सर्वदा पृष्ठदेशं मे देवानामभयप्रदः ॥९॥
नाभिं षट्कोणधामा मे पातु घण्टारवः कटिम् ।
आदिमूलः पुमान् पातु गुह्यदेशं निरन्तरम् ॥१०॥
ऊरू पातु महाशूरो जानुनी भीमविक्रमः ।

जङ्घे पातु महावेगो गुल्फौ पातु महाबलः ॥११॥
पादौ पातु सदा श्रीदो ब्रह्माद्यैरभिवन्दितः ।
पातु पादतलद्वन्द्वं विश्वभारो निरन्तरम् ॥१२॥
सुदर्शननृसिंहो मे शरीरं पातु सर्वदा ।
मम सर्वांगरोमाणि ज्वालाकेशः स रक्षतु ।
मम सर्वाङ्गकान्ति वै कल्पान्ताग्नि समप्रभः ॥१३॥
अन्तर्बहिश्च मे पातु विश्वात्मा विश्वतोमुखः ।
रक्षाहीनं च यत्स्थानं प्रचण्डस्तत्र रक्षतु ॥१४॥
सर्वतो दिक्षु मे पातु ज्वालाशतपरीवृतः ।
त्रिनेमिः पातु मत्प्राणान्भ्रातृ न्पात्वनलद्युतिः ॥१५॥
भार्यां लक्ष्मीसखः पातु पुत्रान्पातु सुदर्शनः ।
श्रीकरो मे श्रियः पातु बन्धून्पातु बलाधिकः ॥१६॥
गोपांश्चैव पशून् पातु सहस्त्रारधरस्सदा ।
क्षेत्रं विश्वम्भरः पातु मित्रं पात्वघनाशनः ॥१७॥
दिवारात्रौ च मां पातु अहिर्बुध्न्यवरप्रदः ।
षोडशोत्तुँगबाहुस्तु पातु मे राजसम्मुखम् ॥१८॥
वैरिविद्वेषसङ्घे तु संग्रामे शत्रुसूदनः ।
अवान्तरा अबाधाश्च त्रासयेत्सार्वकालिकम् ॥१९॥
आधिव्याधिमहाव्याधिमध्ये चोपद्रवे तथा ।
अपमृत्युमहामृत्यु नाशयेच्चक्रनायकः ॥२०॥
परप्रयुक्तमन्त्रांश्च यन्त्रतन्त्रविभञ्जनः ।
सुदर्शनोऽयमस्माकं दुर्दशादुःखनाशनः ॥२१॥
सर्वसम्पत्प्रदाता मां चक्रराजो निरन्तरम् ।
जपं पातु जगद्वन्द्यो मनसामक्षयप्रदः ॥२२॥
प्रमादांश्चास्त्रधामासौ ज्ञानं रक्षतु सर्वदा ।
अणिमादिमहैश्वर्यं पातु साम्राज्यसिद्धिदः ॥२३॥
तिर्यग्ज्वालाग्निरूपश्च नष्टराज्यार्थदो मम ।
राज्यं पातु सहस्त्रारः पादातिं पातु वाऽच्युतः ॥२४॥
चतुरंगबलस्तोमं रक्ष त्वं चक्रभावन ।

ज्योतिर्मयश्चक्रराजः सर्वान्वरुणरक्षक ॥२५॥
अखण्डमण्डितः पातु परचक्रापहारकः ।
त्रिविक्रमश्चक्रराजः पातु धैर्य्यं सदा मम ॥२६॥
नमो दशदिशव्याप्तिकीर्तिं पातु सुदर्शनः ।
आयुर्बलं धृतिं पातु लोकत्रयभयापहः ॥२७॥
सुधाममण्डलसंविष्टो मायापञ्चसुशीतलः ।
राजद्वारे सभामध्ये पातु मां चण्डविक्रमः ॥२८॥
पूर्वे सुदर्शनः पातु आग्नेये पातु चक्रराट् ।
याम्ये रथांगकः पातु त्रिनेमिः पातु नैर्ऋते ॥२९॥
लोकत्रयप्रभाकारज्वालो रक्षतु पश्चिमे ।
षट्कोणः पातु वायव्ये ह्यस्त्रराजोत्तरां दिशम् ॥३०॥
ऐशान्यां चक्रराट् पातु मध्ये भूचक्रचक्रिणः ।
अनन्तादित्यसंकाशः क्ष्मान्तरिक्षौ च पातु मे ॥३१॥
सर्वतो दिक्षु मे पातु ज्वालासाहस्त्रसंवृतः ।
एवं सर्वत्र संरक्ष सर्वदा सर्वरूपवान् ॥३२॥
सकारः पृथिवी ज्ञेयो हकारो अप उच्यते ।
स्त्राकारो वायुरुक्तश्च रकारोऽम्बर उच्यते ॥३३॥
हुंकारमग्निरित्याहुः फट्कारं सूर्यरूपकम् ।
स्वाहाकारं न्यसेन्मूर्ध्नि पीतरक्तसुवर्णकम् ॥३४॥
सकारं नासिकायां तु हकारं वदने न्यसेत् ।
स्त्राकारं हृदये चैव सृष्टिसंहारकारणम् ॥३५॥
रकारं विन्यसेद् गुह्ये हुंकारं जानुदेशके ।
फकारं गुल्फदेशे तु टकारं पादयोर्न्यसेत् ॥३६॥
सर्वाणि चैव वर्णानि जप्यान्यङ्गुलिपर्वसु ।
क्षिप्रं सौदर्शनं चक्रं ज्वालामालातिभीषणम् ॥३७॥
सर्वदैत्यप्रशमनं कुरु देववराच्युत ।
सुदर्शन महाज्वाल छिन्धि छिन्धि सुवेदनाम् ॥३८॥
परयन्त्रं च तन्त्रं च छिन्धि मन्त्रौषधादिकम् ।
सुदर्शन महाचक्र गोविन्दस्य करायुध ॥३९॥

सूक्ष्माधार महावेग छिन्धि छिन्धि सुभैरव ।
छिन्धि पातं च लूतं च छिन्धि घोरं महद्विषम् ॥४० ॥
इति सौदर्शन दिव्यं कवचं सर्वकामदम् ।
सर्वबाधा प्रशमनं सर्वव्याधिविनाशनम् ॥४१ ॥
सर्वशत्रुक्षयकरं सर्वमंगल दायकम् ।
त्रिसन्ध्यं पठतां नृणां सर्वदा विजयप्रदम् ॥४२ ॥
सर्वपापप्रशमनं भोगमौक्षेक साधकम् ।
प्रातरुत्थाय यो भक्त्या पठेदेतत्सदा नरः ॥४३ ॥
तस्य सर्वेषु कालेषु विघ्नः क्वापि न जायते ।
यक्षराक्षसवेतालभैरवाश्च विनायकाः ॥४४ ॥
शाकिनी डाकिनी ज्येष्ठा निद्रा बालग्रहादयः ।
भूतप्रेतपिशाचाद्या अन्ये दुष्टग्रहा अपि ॥४५ ॥
कवचस्यास्य जप्तारं दृष्ट मात्रेण तेऽखिलाः ।
पलायन्ते यथा नागाः पक्षिराजस्य दर्शनात् ॥४६ ॥
अस्यायुतं पुरश्चर्यं दशांशं तिलतर्पणम् ।
हवन तर्पणं चैव तर्पणं गन्धवारिणा ॥४७ ॥
पुष्पाञ्जलिर्दशांशं च मिष्टान्नं सघृतप्लुतम् ।
चतुर्विंशदिद्वजा भोज्या वैष्णवा वेदपारगा ।
पञ्चसंस्कारसंपन्नास्तत्तत्कार्याणि साधयेत् ॥४८ ॥
विन्यस्यांगेष्विदं धीरो युद्धार्थं योऽभिगच्छति ।
रणे जित्वाखिलाञ्छत्रून् विजयी भवति ध्रुवम् ॥४९ ॥
मन्त्रिताम्बु त्रिवारं वा पिबेत्सप्तदिनावधि ।
व्याधयः प्रविनश्यन्ति सकलाः कुक्षिसम्भवाः ॥५० ॥
मुखप्रक्षालने नेत्रनासिकारोगनाशनम् ।
भीतानामभिषेकं च महाभयनिवारणम् ॥५१ ॥
सप्ताभिमन्त्रितानेन तुलसीमूलमृत्तिका ।
लेपान्नश्यन्ति ते रोगाः सद्यः कुष्ठादयोऽखिलाः ॥५२ ॥
ललाटे तिलकं स्त्रीणां मोहनं सर्ववश्यकृत् ।
परेषां मन्त्रयन्त्राणि तन्त्राण्यपि विनाशकृत् ॥५३ ॥

व्यालसर्पादि सर्वेषां विषापहरणं परम् ।
सौवर्णे रजते वापि भूर्जे ताम्रादिकेऽपि वा ॥५४॥
लिखित्वा त्वर्चयेद्भक्त्या स श्रीमान् भवति ध्रुवम् ।
बहुना किमिहोक्तेन यद्यद्वाञ्छति यो नरः ॥
सकलं प्राप्नुयादस्य कवचस्य प्रसादतः ॥५५॥
ध्वजे गजानामथ वाजिसायके शरेष्वमोघेष्वथ वीरपट्टके ।
लिखेच्च चक्रं विजयेषु संयुगेष्वमोघवीर्यं जयमाप्नुयाद्ध्रुवम् ॥५६॥
श्रियः प्रवृत्यै परिपूजनीयो ह्यभीष्टसिद्धिं कुरुते सुदर्शनः ।
कन्याञ्च भर्ता पुरुषो वधूञ्च लभेच्च विद्यां धनधान्ययुक्ताम् ॥५७॥

॥इति श्रीविहगेन्द्रसंहितायां तन्त्ररहस्ये सुदर्शनकवचं समाप्तम्॥

॥ श्रीरामचन्द्र मन्त्र प्रयोगः॥

षडक्षरमंत्राः-

	षड्मंत्र स्वरूपम्	ऋषिः	छन्दः	देवता
१	रां रामाय नमः	ब्रह्मा:	गायत्री	श्रीरामः
२	क्लीं रामाय नमः	संमोहन, विश्वामित्र	गायत्री	श्रीरामः
३	ह्रीं रामाय नमः	शक्तिः	गायत्री	श्रीरामः
४	ऐं रामाय नमः	दक्षिणामूर्तिः	गायत्री	श्रीरामः
५	श्रीं रामाय नमः	अगस्तिः	गायत्री	श्रीरामः
६	ॐ रामाय नमः	शिवः	गायत्री	श्रीरामः

हिन्दी तन्त्रसार में अन्य मंत्र भी है यथा - **श्रीं राम श्रीं स्वाहा। श्रीं राम श्रीं हुं फट्। श्रीं राम श्रीं नमः। ह्रीं राम ह्रीं हुं फट्। ह्रीं राम ह्रीं नमः। क्लीं राम क्लीं स्वाहा। क्लीं राम क्लीं हुं फट्। क्लीं राम क्लीं नमः।**

षडक्षर मंत्रस्य प्रयोग यथा - **ॐ रां रामाय नमः मंत्रस्य ब्रह्मा ऋषिः।** गायत्रीछन्दः। श्रीरामो देवता। रां बीजम्। नमः शक्तिः। चतुर्विध पुरुषार्थ सिद्ध्ये जपे विनियोगः।

ऋषिन्यासः - ॐ ब्रह्मणे ऋषये नमः शिरसि। गायत्री छन्दसे नमः मुखे। श्रीरामदेवतायै नमः हृदि। रां बीजाय नमः गुह्ये। नमः शक्तये नमः पादयोः। विनियोगाय नमः सर्वाङ्गे।

मंत्र	करन्यासः	अङ्गन्यासः
ॐ रां	अंगुष्ठाभ्यां नमः।	हृदयाय नमः।
ॐ रीं	तर्जनीभ्यां नमः।	शिरसे स्वाहा।
ॐ रूं	मध्यमाभ्यां नमः।	शिखायै वषट्।
ॐ रैं	अनामिकाभ्यां नमः।	कवचाय हुँ।
ॐ रौं	कनिष्ठिकाभ्यां नमः।	नेत्रत्रयाय वौषट्।
ॐ रः	करतलकरपृष्ठाभ्यां नमः।	अस्त्राय फट्।

ध्यानम् –

नीलाम्भोधरकांति कान्तमनिशं वीरासना-ध्यासनीम्
मुद्रां ज्ञानमयीं दधानमपरं हस्ताम्बुजं जानुनि ।
सीतां पार्श्वगतां सरोरुहकरां विद्युन्निभां राधवम्
पश्यन्तं मुकुटाङ्गदादि विविधाकल्पोज्जवलाङ्गं भजे ॥

॥ रामयंत्रपूजनम् ॥

रामषडक्षर मन्त्र पूजन यंत्र

सर्वप्रथम सर्वतोभद्र मण्डल बनायें। उस पर मण्डूकादि पीठदेवताओं का पूजन विष्णु यंत्र की तरह करें।

ॐ मण्डूकादि परतत्वांत पीठदेवताभ्यो नमः। नवपीठ शक्तियों का पूर्वादिक्रम से पूजन करे। **ॐ विमलायै नमः, ॐ उत्कर्षिण्यै नमः, ॐ ज्ञानायै नमः, ॐ क्रियायै नमः, ॐ योगायै नमः, ॐ प्रह्वयै नमः, ॐ सत्यायै नमः, ॐ ईशानायै नमः,** मध्ये – **ॐ अनुग्रहायै नमः।**

स्वर्णादि से निर्मित यन्त्र मूर्ति का अग्न्युत्तारण प्राणप्रतिष्ठा करके सर्वतोभद्र पर रखें।

ॐ नमो भगवते रामाय सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोग

पद्मपीठात्मने नमः। इस मत्र से पुष्पादि द्वारा आसन प्रदान करें। आवरण पूजा के लिये देव से आज्ञा प्राप्त करें।

ॐ सच्चिन्मयः परोदेवः परामृतरसप्रियः ।
अनुज्ञां देहि मे राम परिवारार्चनाय ते ॥

इस मंत्र से पुष्पाञ्जलि द्वारा आसन प्रदान करे। प्रत्येक नाम मंत्र के साथ **पादुकां पूजयामि तर्पयामि** कहे (गंध पुष्पार्चन करें तथा तर्पण करें)।

प्रथमावरणम् :- देववामपार्श्वे - **श्रीसीतायै नमः। सीता श्रीपादुकां पूजयामि तर्पयामि नमः। इति सर्वत्र।** अग्निकोणे - **ॐ शार्ङ्गाय नमः।** दक्षिणपार्श्वे - **ॐ शराय नमः।** वामपार्श्वे - **ॐ चापाय नमः।**

द्वितीयावरणम् :- (षट्कोणे) अग्निकोणे - **ॐ रां हृदयाय नमः**, निर्ऋते - **ॐ ह्रीं शिरसे स्वाहा**, वायव्ये - **ॐ शिखायै वषट्**, ऐशान्ये - **ॐ रैं कवचाय हुँ**, स्वाग्रे - **ॐ रौं नेत्रत्रयाय वौषट्**, देवपश्चिमे - **ॐ रः अस्त्राय फट्।**

तृतीयावरणम् :- (अष्टदले) पूर्वादिक्रमेण - **ॐ हनुमते नमः, ॐ सुग्रीवाय नमः, ॐ भरताय नमः, ॐ विभीषणाय नमः, ॐ लक्ष्मणाय नमः, ॐ अंगदाय नमः, ॐ शत्रुघ्नाय नमः, ॐ जाम्बवते नमः।**

चतुर्थावरणम् :- (अष्टदलाग्रेषु) - **ॐ सृष्टाय नमः, ॐ जयन्ताय नमः, ॐ विजयाय नमः, ॐ सुराष्ट्राय नमः, ॐ राष्ट्रवर्धनाय नमः, ॐ अकोपाय नमः, ॐ धर्मप१लाय नमः, ॐ सुमन्ताय नमः।**

पंचमावरणम् :- (भूपूरे) - पूर्वादिक्रम से इन्द्रादि दिक्पाल एवं उनके आयुधों का पूजन करें। यथा - **ॐ इन्द्राय नमः, ॐ अग्नये नमः, ॐ यमाय नमः, ॐ निर्ऋते नमः, ॐ वरुणाय नमः, ॐ वायवे नमः, ॐ कुबेराय नमः, ॐ ईशानाय नमः**, इन्द्रईशानयोर्मध्ये - **ॐ ब्रह्मणे नमः।** वरुणनिर्ऋत्योर्मध्ये - **ॐ अनंताय नमः।**

पुनः भूपूरे - **ॐ वज्राय नमः, ॐ शक्तये नमः, ॐ दण्डाय नमः, ॐ खड्गाय नमः, ॐ पाशाय नमः, ॐ अङ्कुशाय नमः, ॐ गदायै नमः, ॐ त्रिशूलाय नमः, ॐ पद्माय नमः, ॐ चक्राय नमः।**

भगवान श्रीरामचन्द्रजी का ध्यान कर पूजन करें -

वामेभूमिसुता पुरस्तु हनुमान पश्चात् सुमित्रासुत
शत्रुघ्नो भरतश्च पार्श्वदलयो वायव्यादि कोणेषु च ।

सुग्रीवश्च विभीषणश्च युवराट् तारासुतो जाम्बवान्
मध्ये नील सरोज कोमलरुचिं रामं भजे श्यामलम् ॥

पुष्पाञ्जलि प्रदान करें -

श्रीरामचन्द्र रघुपुङ्गव राजवर्य
राजेन्द्रराम रघुनायक राघवेश ।
राजाधिराज रघुनन्दन रामचन्द्र
दासोऽहं मध्ये भवतः शरणागतोऽस्मि ॥

इस मंत्र का पुरश्चरण ६ लाख मंत्र जप का है। जातीफल चंदन के होम से राजवशीकरण, कमल के होम से धनप्राप्ति, नीलपुष्प से वशीकरण, बिल्वहोम से सुख-समृद्धि, दूर्वा होम से दीर्घायु, पलाश होम से मेधावृद्धि होवे, लालचंदन व लाल पुष्प होम से अभीष्ट की प्राप्ती होवें।

॥ दशाक्षर मंत्र प्रयोगः ॥

मन्त्र - 'हुं जानकी वल्लभाय स्वाहा'

विनियोग:- ॐ अस्य मंत्रस्य वसिष्ठ ऋषिः। विराट् छंदः। सीतापाणिपरिग्रहे श्रीरामो देवता। हुं बीजम्। स्वाहा शक्तिः। चतुर्विधपुरुषार्थ सिद्धये जपे विनियोगः।

ऋषिन्यास: - ॐ वशिष्ठ ऋषये नमः शिरसि। विराट् छन्दसे नमः मुखे। सीतापाणिपरिग्रहे श्रीरामो देवतायै नमः हृदि। हुं बीजाय नमः गुह्ये। स्वाहा शक्तये नमः पादयो। विनियोगाय नमः सर्वाङ्गे।

करन्यास: - ॐ क्लीं अंगुष्ठाभ्यां नमः। ॐ क्लीं तर्जनीभ्यां नमः। ॐ क्लीं मध्यमाभ्यां नमः। ॐ क्लीं अनामिकाभ्यां नमः। ॐ क्लीं कनिष्ठिकाभ्यां नमः। ॐ क्लीं नेत्रत्रयाय वौषट्। ॐ क्लीं करतलकरपृष्ठाभ्यां नमः।

अङ्गन्यास :- इसी तरह हृदयादि का न्यास करें।

मंत्रवर्णन्यास: - ॐ हुं नमः शिरसि। ॐ जां नमः ललाटे। ॐ नं नमः भ्रूमध्ये। ॐ कीं नमः तालुनि। ॐ वं नमः कण्ठे। ॐ ल्लं नमः हृदि। ॐ भां नमः बाह्वोः। ॐ यं नमः नाभौ। ॐ स्वां नमः जान्वोः। ॐ हां नमः पादयोः।

ध्यानम् :-

अयोध्यानगरे रम्ये रत्न - सौंदर्यमण्डपे
मंदारपुष्पैराबद्धवितान तोरणांकिते ।

सिंहासनसमारूढं पुष्पकोपरि राघवम्
रक्षोभिर्हरिभिर्देवै र्दिव्ययानगतैः शुभैः ॥
संस्तूयमानं मुनिभिः सर्वतः परिसेवितम्
सीतालंकृतवाभागं लक्ष्मणेनोपशोभितम् ॥१॥
वैदेहि सहितं सुरद्रुमतले हेमेमहामण्डपे
मध्ये पुष्पकमानसे मणिमये वीरासने संस्थितम् ।
अग्रेवाचयति प्रभञ्जनसुते तत्वं मुनिभ्यपरम्
व्याख्यातं भरतादिभि परिवृतंराम भजे श्यामलम् ॥२॥

षड़क्षरमंत्र के विधान की तरह यंत्रार्चन करें। एवं पुष्पाञ्जलि प्रदान करें।

लोकाऽभिरामं रणरङ्गधीरं
राजीव नेत्रं रघुवंश नाथम् ।
कारुण्यरूपं करुणाकरन्तं
श्रीरामचन्द्रं शरणं प्रपद्ये ॥

अष्टादशाक्षर मंत्रः :- 'ॐ नमः भगवते रामाय महापुरुषाय स्वाहा'

यह भरत द्वारा उपासित मंत्र है। इसके **विश्वामित्र ऋषि, गायत्रीछंद, दशास्यदलनो रामभद्र देवता, ॐ बीजं तथा नमः शक्ति है।**

द्वाविंशदक्षर मंत्र :- 'ॐ नमो भगवते रामभद्राय बन्दीविमुक्त शृङ्खले स्वाहा।' यह इन्द्र द्वारा उपासित मंत्र है जिसके प्रभाव से वे रावण के कारागार से मुक्त हो सकतेथे। इस मंत्र के **विभीषण ऋषि, जगतीछंद, रामभद्रदेवता, ॐ बीजं तथा स्वाहा शक्ति है।**

द्वात्रिंशदक्षर मंत्रः :- (विभीषणोपासितं) **'रामभद्र महष्वास रघुवीर नृपोत्तम दशास्यन्तक रां रक्ष देहि दापय मे श्रियम्'**

यह मोक्षदायक, भक्तों को अभयप्रद राज्य एवं श्री प्रदान करने वाला मंत्र है। **इस मंत्र के विश्वामित्र ऋषि, अनुष्टुप् छंद तथा रामभद्र देवता है।**

अङ्गन्यासः -

रामभद्र	अंगुष्ठाभ्यां नमः।	हृदयाय नमः।
महष्वास	तर्जनीभ्यां नमः।	शिरसे स्वाहा।
रघुवीर	मध्यमाभ्यां नमः।	शिखायै वषट्।
नृपोत्तम	अनामिकाभ्यां नमः।	कवचाय हुँ।

दशास्यन्तक रां रक्ष कनिष्ठिकाभ्यां नमः। नेत्रत्रयाय वौषट्।
देहि दापय मे श्रियम् करतल करपृष्ठाभ्यां नमः। अस्त्राय फट्।

रामगायत्री: – **ॐ दाशरथये विद्महे सीतावल्लभाय धीमहि। तन्नो रामः प्रयोदयात्॥ इस मंत्र के वामदेव ऋषि, गायत्री छंद,जानकीवल्लभ देवता, श्रीराम बीजम्, दाशरथये शक्ति है।**

(तंत्रों में दशारथाय नहीं लिखा है, दाशरथाय या दाशरथये लिखा है।)

सीतामंत्र: – **'श्रीसीतायै नमः।' इस मंत्र के जनक ऋषि, गायत्री छंद, सीताभगवती देवता, श्रीं बीजं तथा नमः शक्ति है। श्रां श्रीं श्रूं श्रें श्रौं श्रः** से अंगादि न्यास करें।

सीतागायत्री :- ॐ जनकजायै विद्महे रामप्रियायै धीमहि। तन्नः सीता प्रचोदयात्॥

न्यास :- **ॐ जनकजायै हृदयाय नमः। ॐ विद्महे शिरसे स्वाहा। ॐ रामप्रियायै शिखायै वषट्। ॐ धीमहि कवचाय हुं। ॐ तन्नः सीता नेत्रत्रयाय वौषट्। ॐ प्रचोदयादस्त्राय फट्।**

॥ अङ्गदेवता॥

सीता (षडक्षर) – **श्रीं सीतायै स्वाहा।**

(शारदा तिलक में ऋषि राम एवं नारदपुराण में वाल्मीकि बताया गया है)

ध्यानम् –

ध्यायेत् सदा महादेवीं सीतां त्रैलोक्य पूजितां
तप्तहाटकवर्णाभां पद्मयुग्मं करद्वये ।
सद्रत्नभूषण-स्फूर्जद दिव्यदेहां शुभात्मिकां
नाना वस्त्रां शशिमुखीं पद्माक्षीं मुदितान्तराम् ॥
पश्यन्तीं राघवं पुण्यं शय्यायां षड्गुणेश्वरीम् ।

लक्ष्मण – लं लक्ष्मणाय नमः। (सप्ताक्षर)

ऋषि अगस्त्य, छन्द गायत्री, देवता लक्ष्मण, बीज लं, शक्ति नमः है। लां लीं लूं लें लौं लः से षड्ङ्गन्यास करें।

द्विभुजं स्वर्णरुचिरं तनुं पद्मनिभेक्षणम् ।
धनुर्वाणकरं रामसेवा संसक्त मानसम् ॥

भरत – **भं भरताय नमः। भां भीं भूं** से षडङ्गन्यास करें।

शत्रुघ्न – **शं शत्रुघ्नाय नमः। शां शीं शूं** से षडङ्गन्यास करें। ऋष्यादि लक्ष्मण मन्त्र के समान है।

॥ रामकवचम् ॥

आजानुबाहुमरविंददलायता- क्षमा जन्मशुद्धरसहा समुखप्रसादम्।
श्यामं गृहीत-शरचापमुदाररूपं रामं सराममभिरामं मनुस्मरामि ॥

विनियोगः – **अस्य श्रीरामकवचस्य अगस्त्य ऋषिः, अनुष्टप् छन्दः, सीतालक्ष्मणोपेतः, श्रीरामचन्द्रो देवता, वरप्रसादसिद्ध्यर्थे जपे विनियोगः।**

ध्यानम् –

नीलजीमूतसंकाशं विद्युद्वर्णवरावृतम्।
कोमलाङ्गं विशालाक्षं युवानमतिसुन्दरम् ॥१॥
सीतासौमित्रि सहितं जटामुकुटधारिणम्।
सासितूण धनुर्वाणपाणिं दावनमर्दनम् ॥२॥
यदा चौरभये राजभये शत्रुभये तथा।
ध्यात्वा रघुपतिं क्रुद्धं कालानल समप्रभम् ॥३॥
चीरकृष्णाजिनधरं भस्मोद्धूलित विग्रहम्।
आकर्णाकृष्ट – विशिखकोदण्डभुजमण्डितम् ॥४॥
रणे रिपून् रावणादींस्तीक्ष्णमार्गणवृष्टिभिः।
संहरंतः – महावीरमुग्रमैन्द्रथस्थितम् ॥५॥
लक्ष्मणाधैर्महावीरैर्वृतं हनुमदादिभिः।
सुग्रीवाद्यैर्महावीरैः शैलवृक्षक रोद्यतैः ॥६॥
वेगात्कराल हुंकारैर्भुभुक्कारमहारवैः।
नदद्भिः परिवादाद्भिः समरे रावणं प्रति ॥७॥
श्रीराम शत्रुसंघान्मे हन मर्दय खादय।
भूतप्रेतपिशाचादीन् श्रीरामाशु विनाशय ॥८॥
एवं ध्यात्वा जपेद्रामकवचं सिद्धिदायकम्।
सुतीक्ष्ण वज्रकवचं शृणु वक्ष्याम्यनुत्तमम् ॥९॥

॥ कवचम् ॥

श्रीरामः पातु मे मूर्ध्नि पूर्वे च रघुवंशज ।
दक्षिणे मे रघुवरः पश्चिमे पातु पावनः ॥१॥
उत्तरे मे रघुपतिर्भालं दशरथात्मजः ।
भ्रुवोर्दूर्वादलश्यामस्तयोर्मध्ये जनार्दनः ॥२॥
श्रोत्रं मे पातु राजेन्द्रो दृशो राजीव लोचनः ।
घ्राणं मे पातु राजर्षिर्गण्डो मे जानकीपतिः ॥३॥
कर्णमूले खरध्वंसी भालं मे रघुवल्लभः ।
जिह्वां मे वाक्पतिः पातु दंतपंक्ती रघुत्तम ॥४॥
ओष्ठौ श्रीरामचन्द्रो मे मुखं पातु परात्परः ।
कंठं पातु जगद्वंद्यः स्कंधौ मे रावणांतकः ॥५॥
धनुर्वाणधरः पातु भुजौ मे बालिमर्दनः ।
सर्वाण्यंगुलिपर्वाणि हस्तौ मे राक्षसांतकः ॥६॥
वक्षो मे पातु काकुत्स्थः पातु मे हृदयं हरिः ।
स्तनौ सीतापतिः पातु पार्श्वं मे जगदीश्वरः ॥७॥
मध्य मे पातु लक्ष्मीशो नाभि मे रघुनायकः ।
कौसल्येयः कटी पातु पृष्ठं दुर्गतिनाशनः ॥८॥
गुह्यं पातु ऋषिकेशः सक्थिनी सत्यविक्रमः ।
ऊरू शार्ङ्गधरः पातु जानुनी हनुमत्प्रियः ॥९॥
जङ्घेपातु जगद्व्यापी पादौ मे ताटिकांतकः ।
सर्वाङ्गं पातु मे विष्णुः सर्वसंधीन नामयः ॥१०॥
ज्ञानेन्द्रियाणि प्राणादीन् पातु मे मधुसूदनः ।
पातु श्रीरामभद्रो मे शब्दादीन्विषयानपि ॥११॥
द्विपदादीनि भूतानि मत्संबंधीनि यानि च ।
जामदग्न्यमहादर्पदलनः पातु तानि मे ॥१२॥
सौमित्रपूर्वजः पातु वागादीनीन्द्रियाणि च ।
रोमांकुराण्यशेषाणि पातु सुग्रीवराज्यदः ॥१३॥
वाङ्मनोबुद्ध्यहंकारै ज्ञानाज्ञान कृतानि च ।

जन्मान्तर कृतानीह पापानि विविधानि च ॥१४॥
तानि सर्वाणि दग्ध्वाशु हरदोण्डखण्डनः ।
पातु मां सर्वतो रामः शार्ङ्गबाणधरः सदा ॥१५॥
इति श्रीरामचन्द्रस्य कवचं वज्रसंमितम् ।
गुह्याद्गुह्यतमं दिव्यं सुतीक्ष्ण मुनिसत्तम ॥१६॥
यः पठेच्छृणुयाद्वापि श्रावयेद्वा समाहितः ।
स याति परमं स्थानं रामचन्द्र प्रसादतः ॥१७॥
महापातकयुक्तो वा गोघ्नो वा भ्रूणहा तथा ।
श्रीरामचन्द्र कवचपठनात् शुद्धिमाप्नुयात् ॥१८॥
ब्रह्महत्यादिभिः पापैर्मुच्यते नात्र संशयः ।
भो सुतीक्ष्ण यथा पृष्टं त्वया ममपुरा शुभम् ,
तथा श्रीरामकवचं मया ते विनिवेदितम् ॥१९॥

अधिक आवृत्ति करनी हो तो श्लोक १ से १५ पुनरावृत्ति करें।

॥ इति आनन्दरामायणे मनोहरकाण्डे सुतीक्ष्णागस्त्य संवादे श्रीरामकवचं समाप्तं ॥

॥ श्रीरामरक्षास्तोत्रम् ॥

विनियोगः- ॐ अस्य श्रीरामरक्षास्तोत्र मंत्रस्य बुधकौशिक ऋषिः, अनुष्टुप् छन्दः, श्रीसीता-रामचन्द्रो देवता, सीता शक्तिः, श्रीमद्हनुमान् कीलकं, श्रीरामचन्द्रप्रीत्यर्थे श्रीरामरक्षास्तोत्र मंत्रजपे विनियोगः।

ऋष्यादिन्यास- बुधकौशिक ऋषये नमः शिरसि, अनुष्टुप् छन्दसे नमः मुखे, श्रीसीता-रामचन्द्र देवतायै नमः हृदि, सीता शक्तये नमः नाभौ, श्रीमद्हनुमान कीलकाय नमः पादयोः, श्रीरामचन्द्र-प्रीत्यर्थे श्रीरामरक्षास्तोत्र मंत्रजपे विनियोगाय नमः सर्वाङ्गे।

ध्यानम्–

ध्यायेदाजानुबाहुं धृतशरधनुषं बद्धपद्मासनस्थम्,
पीतं वासोवसानं नवकमलदल-स्पर्धिनेत्रं प्रसन्नम् ।
वामाङ्कारूढ-सीतामुखकमल-मिलल्लोचनं नीरदाभम्,
नानालङ्कारदीप्तं दधतमुरु-जटामण्डनं रामचन्द्रम् ॥

॥ स्तोत्रम् ॥

चरितं रघुनाथस्य शतकोटि-प्रविस्तरम् ।
एकैकमक्षरं पुंसां महापातकनाशनम् ॥१॥
ध्यात्वा नीलोत्पल-श्यामं रामं राजीवलोचनम् ।
जानकी-लक्ष्मणोपेतं जटामुकुटमण्डितम् ॥२॥
सासि-तूण-धनुर्बाण-पाणिं नक्तं चरान्तकम् ।
स्व-लीलया जगत्-त्रातुमाविर्भूतमजं विभुम् ॥३॥
रामरक्षां पठेत् प्राज्ञः पापघ्नीं सर्वकामदाम् ।
शिरो मे राघवः पातु भालं दशरथात्मजः ॥४॥
कौसल्येयो दृशौ पातु विश्वामित्रप्रियः श्रुती ।
घ्राणं पातु मखत्राता मुखं सौमित्रिवत्सलः ॥५॥
जिह्वां विद्यानिधिः पातु कण्ठं भरतवन्दितः ।
स्कन्धौ दिव्यायुधः पातु भुजौ भग्नेश-कार्मुकः ॥६॥
करौ सीतापतिः पातु हृदयं जामदग्न्यजित् ।
मध्यं पातु खरध्वंसी नाभिं जाम्बवदाश्रयः ॥७॥
सुग्रीवेशः कटि पातु सक्थिनि हनुमत्प्रभुः ।
ऊरू रघूत्तमः पातु रक्षःकुलविनाशकृत ॥८॥
जानुनी सेतुकृत् पातु जङ्घे दशमुखान्तकः ।
पादौ विभीषणश्रीदः पातु रामोऽखिलं वपुः ॥९॥
एतां रामबलोपेतां रक्षां यः सुकृती पठेत् ।
सः चिरायुः सुखी पुत्री विजयी विनयी भवेत् ॥१०॥
पाताल-भूतल-व्योम चारिणश्छद्म-चारिणः ।
न द्रुष्टमपि शक्तासे रक्षितं राम-नामभिः ॥११॥
रामेति रामभद्रेति रामचन्द्रेति वा स्मरन् ।
नरो न लिप्यते पापैर्भुक्तिं मुक्तिं च विन्दति ॥१२॥
जगज्जैत्रैक-मन्त्रेण राम-नाम्नाऽभिरक्षितम् ।
यः कण्ठे धारयेत् तस्य करस्थाः सर्वसिद्धयः ॥१३॥
वज्रपञ्जर नामेदं यो रामकवचं स्मरेत् ।
अव्याहताज्ञः सर्वत्र लभते जयमङ्गलम् ॥१४॥

आदिष्टवान् यथा स्वप्ने रामरक्षामिमां हरः ।
तथा लिखितवान् प्रातः प्रबुद्धो बुध-कौशिकः ॥१५॥
आरामः कल्पवृक्षाणां विरामः सकलापदाम् ।
अभिरामस्त्रिलोकानां रामः श्रीमान् स नः प्रभुः ॥१६॥
तरुणौ रूपसम्पन्नौ सुकुमारौ महाबलौ ।
पुण्डरीक-विशालाक्षौ चीर-कृष्णाजिनाम्बरौ ॥१७॥
फल-मूलाशिनौ दान्तौ तापसौ ब्रह्मचारिणौ ।
पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ ॥१८॥
शरण्यौ सर्वसत्त्वानां श्रेष्ठौ सर्वधनुष्मताम् ।
रक्षःकुलनिहन्तारौ त्रायेतां नो रघूत्तमौ ॥१९॥
आत्त-सज्ज-धनुषाविशु-स्पृशावक्षयाशुग-निषङ्गसङ्गिनौ ।
रक्षणाय मम रामलक्ष्मणावग्रतः पथि सदैव गच्छताम् ॥२०॥
सन्नद्धः कवची खड्गी चापबाणधरो युवा ।
गच्छन् मनोरथोऽस्माकं रामः पातु सलक्ष्मणः ॥२१॥
रामो दाशरथिः शूरो लक्ष्मणानुचरो बली ।
काकुत्स्थः पुरुषः पूर्णा कौसल्येयो रघूत्तमः ॥२२॥
वेदान्तवेद्यो यज्ञेशः पुराण-पुरुषोत्तमः ।
जानकी-वल्लभः श्रीमानप्रमेय-पराक्रमः ॥२३॥
इत्येतानि जपन्नित्यं मद्भक्तः श्रद्धयाऽन्वितः ।
अश्वमेधाधिकं पुण्यं सम्प्राप्नोति न संशयः ॥२४॥
रामं दूर्वादल-श्यामं पद्माक्षं पीतवाससम् ।
स्तुवन्ति नामभिर्दिव्यैर्न ते संसारिणो नरः ॥२५॥
रामं लक्ष्मणपूर्वजं रघुवरं सीतापतिं सुन्दरम् ।
काकुस्थं करुणार्णवं गुणनिधिं विप्रप्रियं धार्मिकम् ।
राजेन्द्रं सत्य सन्धं दशरथतनयं श्यामलं शान्त मूर्तम् ।
वन्दे लोकाभिरामं रघुकुलतिलकं राघवं रावणारिम् ॥२६॥
रामाय रामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥२७॥
श्रीराम राम रघुनन्दन राम राम ।

श्रीराम राम भरताग्रज राम राम ।
श्रीराम राम रण कर्कश राम राम ।
श्रीराम राम शरणं भव राम राम ॥२८॥

श्रीरामचन्द्र चरणौ मनसा स्मरामि ।
श्रीरामचन्द्र चरणौ वचसा गृणामि ।
श्रीरामचन्द्र चरणौ शिरसा नमामि ।
श्रीरामचन्द्र चरणौ शरणं प्रपद्ये ॥२९॥

माता रामो मत्पिता रामचन्द्रः,
स्वामी रामो मत्सखा रामचन्द्रः ।
सर्वस्वं मे रामचन्द्रो दयालुर्नान्यं जाने नैव जाने न जाने ॥३०॥

दक्षिणे लक्ष्मणो यस्य वामे तु जनकात्मजा ।
पुरतो मारुतिर्यस्य तं वन्दे रघुनन्दनम् ।
लोकाभिरामं रणरङ्गधीरं राजीवनेत्रं रघुवंशनाथम् ।
कारुण्यरूपं करुणाकरं तं श्रीरामचन्द्रं शरणं प्रपद्ये ॥३२॥

मनोजवं मारुततुल्य वेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानर यूथमुख्यं श्रीरामदूतं शरणं प्रपद्ये ॥३३॥

कूजन्तं रामरामेति मधुरं मधुराक्षरम् ।
आरुह्य कविताशाखां वन्दे वाल्मीकि-कोकिलम् ॥३४॥

आपदामपहर्तारं दातारं सर्वसम्पदाम् ।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥३५॥

भर्जनं भव-बीजानामर्जनं सुख-सम्पदाम् ।
तर्जनं यमदूतानां रामरामेति गर्जनम् ॥३६॥

रामो राजमणिः सदा विजयते रामं रमेशं भजे ।
रामेणाभिहता निशाचर-चमू रामाय तस्मै नमः ।
रामान्नास्ति परायणं पर-तरं रामस्य दासोऽस्म्यहम् ।
रामे चित्तलयः सदा भवतु मे भो राम! मामुद्धर ॥३७॥

राम रामेति रामेति रमे रामे मनोरमे ।
सहस्रनाम तत्तुल्यं रामनाम वरानने! ॥३८॥

॥ इति श्रीरामरक्षास्तोत्रम् सम्पूर्णम् ॥

॥ अथ कृष्णावतार विविध मन्त्राः॥

एकाक्षरी मंत्र :- 'क्लीं' इस मंत्र के मोहन नारद संमोहन ऋषि, गायत्री छंद, संमोहन कृष्ण देवता है।

क्लां क्लीं क्लूं क्लें क्लौं क्लः से षडङ्गन्यास करे।

मेरु तन्त्रके अनुसार नारद ऋषि, जगती छन्द, देवता **श्री कृष्ण, गं बीजं, ॐ शक्ति है। गां गीं इत्यादि से न्यास करें।**

अष्टाक्षर मंत्राः –

१. **श्रीकृष्णः शरणं मम।**

ॐ श्री हृदयाय नमः, ॐ कृष्ण शिरसे स्वाहा, ॐ शरणं शिखायै वषट्, ॐ मम कवचाय हुं। ॐ श्रीकृष्णः शरणं मम अस्त्राय फट्।

२. **क्लीं हृषिकेशाय नमः।** दोनों मंत्रों के ऋषिन्यास एकाक्षरी मंत्रवत् है।

३. **श्रीं ह्रीं क्लीं कृष्णाय स्वाहा।** इस मंत्र के नारद ऋषि, अनुष्टुप् छंद एवं श्रीकृष्ण देवता है।

॥ दशाक्षर मन्त्र प्रयोगः ॥

दशाक्षर मन्त्र – **गोपीजन बल्लभाय स्वाहा।**

विनियोग न्यास – **शिरसि नारद ऋषये नमः। मुखे विराट् छन्दसे नमः। हृदि श्रीकृष्णाय देवतायै नमः। गुह्ये क्लीं बीजाय नमः। पादयो स्वाहा शक्तये नमः।**

इसके बाद **'मंत्राधिष्ठातृ देवतायै दुर्गायै नमः'** से दुर्गा को नमस्कार कर अन्य न्यास करे। (हिन्दीतन्त्रसारे)

दशाक्षरन्यास – **गों नमः दक्षांगुष्ठे। पीं नमस्तर्जन्यां। जं नमो मध्यमायां। नं नमोऽनामिकायां। वं नमः कनिष्ठिकायां। ल्लं नमो वामाङ्गुष्ठे। भां नमो वामतर्जन्यां यं नमः वाम मध्यमायां। स्वां नमो वामानामिकायां हां नमो वामकनिष्ठायां।**

गों नमः हृदि। पीं नमः शिरसि। जं नमः शिखायां। नं नमः सर्वाङ्गे। वं नमः दिक्षु। ल्लं नमः दक्षपार्श्वे। भां नमः वामपार्श्वे। यं नमः कटिदेशे। स्वां नमः पृष्ठे। हां नमः मूर्ध्नि।

पञ्चाङ्गन्यास -

आचक्राय स्वाहा	अंगुष्ठाभ्यां नमः।	हृदयाय नमः।
विचक्राय स्वाहा	तर्जनीभ्यां नमः।	शिरसे स्वाहा।
सुचक्राय स्वाहा	मध्यमाभ्यां नमः।	शिखायै वषट्।
त्रैलोक्य रक्षण चक्राय स्वाहा	अनामिकाभ्यां नमः।	कवचाय हुँ।
असुरान्तक चक्राय स्वाहा	कनिष्ठिकाभ्यां नमः।	अस्त्राय फट्।

सृष्टिन्यासः - शिरसि - **गों नमो**। नेत्रयो - **पीं नमः**। कर्णयोः - **जं नमः**। घ्राण - **नं नमो**। मुखे - **वं नमः**। हृदि - **ल्लं नमो**। नाभौ - **भां नमः**। लिङ्गे - **यं नमो**। जानुनोः - **स्वां नमो**। पादयोः - **हां नमः**।

ध्यानम् -

फुल्लेन्दीवर - कान्तिमिन्दुवदनं वहवितंस प्रियम्
श्रीवत्साङ्कमुदार - कौस्तुभधरं पीताम्बरं सुन्दरम्।
गोपीनां नयनोत्पलार्चित - तनुं गो-गोपसङ्घावृतम्
गोविन्दं कलवेणु वादनपरं दिव्याङ्गभूषं भजे ॥

॥ अथ यंत्र आवरण पूजनम् ॥

अष्टदल एवं भूपूर युक्त यंत्र बनायें। अष्टदल के पत्रों के मूलभाग को केशर कहते हैं। बाहर के चतुर्द्वार युक्त परिधि को भूपूर कहते है।

कृष्ण दशाक्षर यंत्रम्

प्रथमावरणम् - यंत्र मध्य में उपर्युक्त ध्यान मन्त्र से देव का आवाहन करें मूर्ति पूजा करें। इसके बाद केशरों में पूजन करें।

पूर्वे - **ॐ दामाय नमः**। दक्षिणे - **ॐ सुदामाय नमः**। पश्चिमे - **ॐ वासुदेवाय नमः**। उत्तरे - **ॐ किङ्किण्यै नमः**। आग्नेये - **ॐ आचक्राय स्वाहा हृदयाय नमः**। नैऋते - **ॐ विचक्राय स्वाहा शिरसे स्वाहा**। वायव्ये - **ॐ सुचक्राय स्वाहा शिखायै वषट्**। ईशाने - **ॐ त्रैलोक्य रक्षण चक्राय स्वाहा कवचाय हुँ**। चतुर्दिक्षु - **ॐ असुरान्तक चक्राय स्वाहा अस्त्राय फट्**।

(चक्रों का पूजन यन्त्र में षट्कोण हो तो उसमें भी किया जा सकता है। अस्त्रायफट् से पूजन अग्रभाग कोण में होगा।)

द्वितीयावरणम् - (पत्रों पूर्वादिक्रम से) अष्टदले -**ॐ रुक्मिण्यै नमः। ॐ सत्यभामायै नमः। ॐ नाग्नजित्यै नमः। ॐ सुनन्दायै नमः। ॐ मित्रविन्दायै नमः। ॐ सुलक्षणायै नमः। ॐ जाम्बवत्यै नमः। ॐ सुशीलायै नमः।**

तृतीयावरणम् - (पत्रों के अग्रभाग में पूर्वादिक्रम से) अष्टदले - **ॐ वासुदेवाय नमः। ॐ देवक्यै नमः। ॐ नन्दाय नमः। ॐ यशोदायै नमः। ॐ बलभद्राय नमः। ॐ सुभद्रायै नमः। ॐ गोपेभ्य नमः। ॐ गोपीभ्य नमः।**

चतुर्थावरणम् -अष्टदले- पत्रों के बाहर पूर्वादि क्रम से - **ॐ मन्दराय नमः। ॐ सन्तानकाय नमः। ॐ पारिजाताय नमः। ॐ कल्पवृक्षाय नमः।** मध्ये - **हरिचन्दनाय नमः।**

पञ्चमावरणम् - पूर्वादि दिशाओं में - **ॐ श्रीकृष्णाय नमः। ॐ वासुदेवाय नमः। ॐ देवकीनन्दनाय नमः। ॐ नारायणाय नमः। ॐ यदुश्रेष्ठाय नमः। ॐ वार्ष्णेयाय नमः। ॐ धर्मसंस्थापनाय नमः। ॐ असुराक्रान्त भारहारिण्यै नमः।**

षष्ठमावरणम् - भूपूर में दशों दिक्पालों एवं आयुधों का पूजन करें। देव का अर्चन कर पुष्पाञ्जलि प्रदान करें। गौतमीय तन्त्र में लिखा है कि देव के अक्षय निर्मल स्वरूप दक्षभाग में श्वेत चन्दन युक्त श्वेत तुलसी एवं रजोगुणमयी नित्यारक्षिणी मूर्ति स्वरूप वामभाग में रक्तचन्दन युक्त रक्ततुलसी समर्पण करें। शिरोदेश पर दो तुलसीपत्र, दो करवीर पुष्प और दो पद्मपुष्प प्रदान करें।

॥ द्वादशाक्षर कृष्णमंत्र प्रयोगः ॥

(१) श्रीं ह्रीं क्लीं कृष्णाय गोविन्दाय स्वाहा॥

(२) ह्रीं श्रीं गोपीजनवल्लभाय स्वाहा ॥

मेरुतन्त्र में ध्यान इस प्रकार है :-

चन्द्र - कुन्द - सुगौराङ्गं रक्तपद्मदलेक्षणं
अरिकम्बु गदा पद्मं बाहुदण्डैश्च विभ्रतम् ।
दिव्यैश्च चन्दनालेपैः पद्मनाना विभूषितं
पीताम्बरलसद्गात्रं तरुणं मुनि सेवितम् ।
विकसत् पद्म मध्यस्थं ध्यात्वा नन्दात्मजं प्रभुं
स्वहृत पद्मगतं देवं पुराणं पुरुषं नवम् ॥

हिन्दी तन्त्रसार में लिखा है कि इसमें सृष्टि स्थिति क्रम से पूजन न करके संहार

क्रम से करें। अर्थात् मातृकान्यास संहार क्रम से करें। देवपूजा नख से शिर पर्यन्त करे। यंत्र पूजा में जो विधान कहा है उसमें कृष्ण की जो पूजा लिखी है उसे विलोम क्रम से करे अर्थात् पहले भूपूर में दिक्पालों की, फिर अष्टदल के देवताओं की, फिर षट्कोण में पूजा करें।

न्यासः- **श्रीं अंगुष्ठाभ्यां नमः। ह्रीं तर्जनीभ्यां नमः। क्लीं मध्यमाभ्यां नमः। कृष्णाय अनामिकाभ्यां नम। गोविन्दाय कनिष्ठिकाभ्यां नमः। स्वाहा करतल करपृष्ठाभ्यां नमः।** इसी तरह से हृदयादिन्यास करे।

॥ षोडशाक्षर मंत्र प्रयोगः ॥

मन्त्र - **ॐ नमो भगवते रुक्मिणीवल्लभाय स्वाहा।**

विनियोगः - **ॐ अस्य मंत्रस्य नारदऋषिः, अनुष्टुप्छंदः, श्रीरुक्मिणीवल्लभ देवता सर्वार्थसिद्धये जपे विनियोगः।**

ऋषिन्यासः - **नारद ऋषये नमः शिरसि। अनुष्टुप् छन्दसे नमः मुखे। रुक्मिणीवल्लभ देवतायै नमः हृदि। विनियोगाय नमः सर्वाङ्गे॥**

मन्त्रन्यासः - **ॐ अंगुष्ठाभ्यां नमः। ॐ नमः तर्जनीभ्यां नमः। ॐ भगवते मध्यमाभ्यां नमः। ॐ रुक्मिणी वल्लभाय अनामिकाभ्यां नमः। ॐ स्वाहा कनिष्ठाभ्यां नमः।** इसी तरह हृदयादिन्यास करें।

ध्यानम् :-

तापिञ्छच्छविरङ्कगां प्रियतमां स्वर्णप्रभामम्बुज-
प्रद्योद्‌वामभुजां स्ववामभुजयाश्लिष्यन् सचित्तस्मयाम् ।
श्लिष्यन्तीं स्वमन्य हस्त विलसित् सौवर्ण वेत्रश्चिरम्
पायान्नः शणसून पीतवसनो नानाविभूषो हरिः ॥

॥ यंत्रपूजा ॥

सर्वतोभद्रपीठ पर मण्डूकादि पीठदेवताओं का आवाहन करें। विमलादि नवपीठ शक्तियों का आवाहन विष्णु यंत्र की तरह करें।

देव से आवरण पूजा की आज्ञा प्राप्त करे। यंत्र का अग्न्युत्तारण करें। सर्वतोभद्र पर स्थापित करे।

प्रथमावरणम् :- (षट्कोणेषु) - **अग्निकोणे ॐ हृदयाय नमः।** निर्ऋतिकोणे - **नमः शिरसे स्वाहा।** वायव्ये - **भगवते शिखायै वषट्।** ईशाने -

रुक्मिणीवल्लभाय कवचाय हुँ। देवाग्रे - स्वाहा अस्त्राय फट्।

षोडशाक्षर कृष्ण मन्त्र पूजन यंत्रम्

द्वितीयावरणम् :- (अष्टदलेषु) पूर्वादिक्रमेण - **ॐ नारदाय नमः। ॐ पर्वताय नमः। ॐ जिष्णवे नमः। ॐ निशठाय नमः। ॐ उद्धवाय नमः। ॐ विश्वक् सेनाय नमः। ॐ शौनेयाय नमः। ॐ शैलेयाय नमः।**

तृतीयावरणम् - भूपूर में इन्द्रादि लोकपालों व उनके आयुधो का आवाहन करे।

यंत्र मध्य में प्रधान देवता का आवाहन पूजन करे। एक लक्ष जप करके घृतमधु शर्करा युक्त रक्तपुष्प से होम करे।

॥ अष्टादशाक्षरो मन्त्र विधानम् ॥ (शारदा तिलके)

विनियोगः - **अस्य मन्त्रस्य नारद ऋषिः, गायत्री छन्दः, श्रीकृष्णो देवता, क्लीं बीजम्, स्वाहा शक्तिः, चतुर्विध पुरुषार्थ सिद्ध्यर्थे जपे विनियोगः।**

ऋषिन्यासः - **ॐ नारदऋषये नमः शिरसि। ॐ गायत्रीछन्दसे नमः मुखे। श्रीकृष्णदेवतायै नमः हृदि। क्लीं बीजाय नमः गुह्ये। स्वाहाशक्तये नमः पादयोः। विनियोगाय नमः सर्वाङ्गे।**

मन्त्र - **क्लीं कृष्णाय गोविन्दाय गोपीजनवल्लभाय स्वाहा।**

पञ्चाङ्गन्यासः—

क्लीं कृष्णाय	अंगुष्ठाभ्यां नमः।	हृदयाय नमः।
गोविन्दाय	तर्जनीभ्यां नमः।	शिरसे स्वाहा।
गोपीजन	मध्यमाभ्यां नमः।	शिखायै वषट्।
वल्लभाय	अनामिकाभ्यां नमः।	कवचाय हुँ।
स्वाहा	कनिष्ठिकाभ्यां नमः।	अस्त्राय फट्।

ध्यानम् –

स्मरेद् वृदावने रम्ये मोहयन्तमनारतम् ।
गोविन्दं पुण्डरीकाक्षं गोपकन्याः सहस्त्रशः ॥
आत्मनो वदनाम्भोजे प्रेरिताक्षिमधुव्रताः ।
पीडिताः कामवाणेन चिरामाश्लेषणोत्सुकाः ॥
मुक्ताहारलसत् पीनतुङ्गस्तनभरानताः ।
स्त्रस्तधम्मिल्लवसना मदस्खलितभाषणाः ॥
दक्तपङ्क्ति प्रभोद्भासि स्पन्दमानाधराञ्चिताः ।
विलोभयन्तीर्विविधैर्विभ्रमैर्भाव गर्भितैः ॥

॥ अथ यन्त्रावरण पूजनम् ॥

सर्वतोभद्र मण्डल पर मण्डूकादि पीठ देवताओं का पूजन कर देव की नवपीठ शक्तियों का आह्वान करें।

अष्टादशाक्षर कृष्ण पूजन यंत्रम्

पूर्वादिक्रमेण – **ॐ विमलायै नमः। ॐ उत्कर्षिण्यै नमः। ॐ ज्ञानायै नमः। ॐ क्रियायै नमः। ॐ योगायै नमः। ॐ प्रह्वयै नमः। ॐ सत्यायै नमः। ॐ ईशानायै नमः।** मध्ये – **अनुग्रहायै नमः।**

यंत्र को घृत से अभ्यज्य कर दुग्ध जलधारा से अग्न्युत्तारण करें। एवं मण्डल पर स्थापित कर आज्ञा मांगे –

ॐ सविन्मयः परो देवः परामृतरसप्रियः ।
अनुज्ञां कृष्ण मे देहि परिवारार्चनाय ते ॥

प्रथमावरणम् – यंत्र मध्ये (षट्कोण के पाँच कोणो में) – अग्निकोणे – **क्लीं कृष्णाय हृदयाय नमः।** नैऋते – **गोविन्दाय शिर से स्वाहा।** वायवे – **गोपीजन शिखायै वषट्।** ईशाने– **वल्लभाय कवचाय हुँ।**

प्रत्येक नामावली के साथ **पादुकां पूजयामि तर्पयामि नमः** सर्वत्र उच्चारण करें। प्रत्येक आवरण पूजा के बाद पुष्पाञ्जलि अर्पण करते हुये कहें।

**ॐ अभीष्ट सिद्धि मे देहि शरणागत वत्सल ।
भक्त्या समर्पये तुभ्यं (अमुक) प्रथमावरणार्चनम् ॥**

द्वितीयावरणम् - (अष्टदलो में पूर्वादि क्रमेण से) **ॐ कलिंद्यै नमः। ॐ नाग्नजित्यै नमः। ॐ मित्र विन्दायै नमः। ॐ चारुहासिन्यै नमः। ॐ रोहिण्यै नमः। ॐजांबवत्यै नमः। ॐ रुक्मिण्यै नमः। ॐ सत्यभामायै नमः।**

तृतीयावरणम् - (अष्टदल के पात्राग्रे में) - **ॐ ऐरावताय नमः। ॐ पुण्डरीकाय नमः। ॐ वामनाय नमः। ॐ कुमुदाय नमः। ॐ अंजनाय नमः। ॐ पुष्पदन्ताय नमः। ॐ सर्व भौमाय नमः। ॐ सुप्रतीकाय नमः।**

चतुर्थावरणम् - भूपूर में पूर्वादि क्रम से इन्द्रादि दश दिक्पालो व आयुधों का पूजन करें।

॥ अथ विंशत्त्यक्षर मंत्र ॥

मंत्र - **ह्रीं श्रीं क्लीं कृष्णाय गोविन्दाय गोपीजन वल्लभाय स्वाहा।**

ऋषिन्यासः - **शिरसि ब्रह्मणऋषये नमः। मुखे गायत्री छन्द से नमः। हृदि श्री कृष्णाय देवतायै नमः। गुह्ये क्लीं बीजाय नमः। पादयोः स्वाहा शक्तये नमः।**

ध्यानम् -

रत्नदीपावलीभिश्च प्रदीपितदिगन्तरे ।
उद्यदादित्य सङ्काशमणि - सिंहासनाम्बुजे ॥
समासीनोऽच्युतो ध्येयो द्रुत हाटकसन्निभः ।
समानोदित - चन्द्रार्कतडित् कोटि समद्युतिः ॥

॥ यंत्र पूजा विधानम् ॥

श्री कृष्ण का यंत्र इस प्रकार है- **षट्कोण के मध्य में क्लीं साध्यं लिखकर कृष्णाय गोविन्दाय गोपीजन वल्लभाय स्वाहा** मंत्र लिखें। पूर्व नैऋते एवं वायु काणों में "**श्री**" अवशिष्ट तीन कोणों में "**ह्रीं**" लिखकर छहों संधियों में "**क्लीं, कृ, ष्णा, य, न, मः**" इन छ अक्षरो को लिखे।

विंशत्यक्षर कृष्ण पूजन यंत्रम्

इसके बाद "**कामदेवाय विद्महे पुष्पबाणाय धीमहि तन्नोऽनंग प्रचोदयात्**" इस कामगायत्री मन्त्र के ३-३ अक्षरों को एक-एक केशर

(दल का निम्न भाग) में लिखकर अष्टदल के एक-एक दल में **नमः कामदेवाय, सर्वजन सम्मोहनाय, ज्वल ज्वल, प्रज्ज्वल, सर्वजनस्य, हृदयं, मम वशं, कुरु कुरु स्वाहा** अक्षरों को लिखे।

सर्वतोभद्रपीठ के मध्य में मण्डूकादिपीठ देवताओं एवं विमलादि नव पीठशक्तियों का पूजन कर यंत्र स्थापित करें। नारायण का पूजन करें **शस्त्राङ्ग** पूजन करें -

ॐ कीरीटाय नमः, कुण्डलाभ्यां नमः, शङ्खाय नमः चक्राय नमः, गदायै नमः, पद्माय नमः, वनमालायै नमः, श्रीवत्साय नमः, कौस्तुभाय नमः।

प्रथमावरणम् - षट्कोण में आग्नेयादि क्रम से पूजन करें - **ह्रीं श्रीं क्लीं हृदयाय नमः। कृष्णाय शिरसे स्वाहा। गोविन्दाय शिखायै वषट्। गोपीजन कवचाय हुँ। वल्लभाय नेत्रत्रयाय वौषट्। स्वाहा करतल करपृष्ठाभ्यां फट्।**

द्वितीयावरणम् - अष्टदल के पत्रो के मूलभाग में पूर्वादिक्रमेण - **ॐ वासुदेवाय नमः। ॐ सङ्कर्षणाय नमः। ॐ प्रद्युम्नाय नमः। ॐ अनिरुद्धाय नमः।** अग्न्यादि चतुष्कोणों में पत्रों के मूल में - **ॐ शान्त्यै नमः। ॐ श्रियै नमः। ॐ सरस्वत्यै नमः। ॐ रत्यै नमः।**

तृतीयावरणम् - अष्टदल के मध्यभाग में पूर्वादिक्रमेण - **ॐ रुक्मिण्यै नमः। ॐ सत्यभामायै नमः। ॐ कालिंद्यै नमः। ॐ नाग्नजित्यै नमः। ॐ मित्रविंदाय नमः। ॐ चारुहासिन्यै नमः। ॐ रोहिण्यै नमः। ॐ जाम्बवत्यै नमः।**

चतुर्थावरणम् - अष्टदलाग्रे - **ॐ षोडशसहस्त्र महिषीभ्यो नमः।**

पञ्चमावरणम् - अष्टदल के वहिर्भाग में पूर्वादिक्रमेण - ॐ इन्द्रनिधियै नमः। ॐ नीलनिधियै नमः। ॐ मुकुन्दनिधियै नमः। ॐ मकरनिधियै नमः। ॐ आनन्दनिधियै नमः। ॐ कच्छपनिधियै नमः। ॐ पद्मनिधियै नमः। ॐ शङ्खनिधियै नमः।

षष्ठमावरणम् - भूपूर में इन्द्रादि लोकपालों व आयुधों का पूजन करें। यन्त्र पूजा में प्रत्येक नामावलि के बाद में चतुर्थी से आवाहन व प्रथमा विभक्ति से पादुकां पूजयामि तर्पयामि नमः कहकर पूजन, तर्पण करते हैं।

प्रत्येक आवरण के पूजन, तर्पण के बाद '**ॐ अभीष्ट सिद्धिं मे .....**' से पुष्पाञ्जलि प्रदान करें।

अथ द्वाविंशत्यक्षरो मन्त्र - ऐं क्लीं कृष्णाय ह्रीं गोविन्दाय आं गोपीजनवल्लभाय स्वाहा सौं।

अथ त्रयस्त्रिंशदक्षरो मंत्र - क्लीं नमो भगवते नंदपुत्राय बालादिवपुषे श्यामलाय गोपीजनवल्लभाय स्वाहा।

॥ श्री प्राणेश्वर श्रीकृष्ण प्रयोगः॥

विनियोगः - ॐ अस्य श्री प्राणेश्वर श्रीकृष्ण मन्त्रस्य भगवान् श्रीवेदव्यास ऋषिः। गायत्री छन्दः। श्रीकृष्ण परमात्मा देवता। क्लीं बीजं श्रीं शक्तिः ऐं कीलकं। प्रणवो (ॐ) व्यापकः। मम समस्तक्लेश परिहारार्थं चतुर्वर्ग प्राप्तये सौभाग्य वृद्ध्यर्थं च जपे विनियोगः।

ऋष्यादिन्यासः - श्रीवेदव्यास ऋषये नमः शिरसि। गायत्री छन्दसे नमः मुखे। श्रीकृष्ण परमात्मा देवतायै नमः हृदि। क्लीं बीजाय नमः गुह्ये। श्रीं शक्तये नमः नाभौ। ऐं कीलकाय नमः पादयोः। ओम् व्यापकाय नमः सर्वाङ्गे। मम समस्तक्लेश परिहार्थं चतुर्वर्ग प्राप्तये सौभाग्य वृद्ध्यर्थं च जपे विनियोगाय नमः अञ्जलौ।

षडङ्गन्यास	करन्यास	अङ्गन्यास
ॐ ऐं श्रीं क्लीं	अंगुष्ठाभ्यां नमः।	हृदयाय नमः
प्राणवल्लभाय	तर्जनीभ्यां स्वाहा।	शिरसे स्वाहा।
सौः	मध्यमाभ्यां वषट्।	शिखायै वषट्।
सौभाग्यदाय	अनामिकाभ्यां हुं।	कवचाय हुँ।
श्रीकृष्णाय	कनिष्ठिकाभ्यां वौषट्।	नेत्रत्रयाय वौषट्।
स्वाहा	करतल करपृष्ठाभ्यां फट्।	अस्त्राय फट्।

ध्यानम् -

कृष्णं जगन्मोहनरूपवर्णं विलोक्य
लज्जाऽऽकुलितां स्मराढ्याम्।
माध्वीकमालायुत कृष्णदेहं विलोक्य
चालिंग्य हरिं स्मरन्तीम्॥

॥ मानस पूजनम् ॥

१. लं पृथिव्यात्मकं गन्धं श्रीप्राणेश्वर श्रीकृष्ण श्रीपादुकाभ्यां नमः

अनुकल्पयामि (अधोमुख कनिष्ठांगुष्ठ मुद्रा)।

२. हं आकाशात्मकं पुष्पं श्रीप्राणेश्वर श्रीकृष्ण श्रीपादुकाभ्यां नमः अनुकल्पयामि (अधोमुख तर्जनीअंगुष्ठ मुद्रा)।

३. यं वाय्वात्मकं धूपं श्रीप्राणेश्वर श्रीकृष्ण श्रीपादुकाभ्यां नमः अनुकल्पयामि (ऊर्ध्वमुख तर्जनी अंगुष्ठ मुद्रा)।

४. रं वह्न्यात्मकं दीपं श्रीप्राणेश्वर श्रीकृष्ण श्रीपादुकाभ्यां नमः अनुकल्पयामि (ऊर्ध्वमुख मध्यमा अंगुष्ठ मुद्रा)।

५. वं अमृतात्मकं नैवेद्यं श्रीप्राणेश्वर श्रीकृष्ण श्रीपादुकाभ्यां नमः अनुकल्पयामि (ऊर्ध्वमुख अनामा अंगुष्ठ मुद्रा)।

६. शं शक्त्यात्मकं ताम्बूलं श्रीप्राणेश्वर श्रीकृष्ण श्रीपादुकाभ्यां नमः अनुकल्पयामि (ऊर्ध्वमुख सर्वांगुलि मुद्रा)।

मन्त्र – ॐ ऐं श्रीं क्लीं प्राणवल्लभाय सौः सौभाग्यदाय श्रीकृष्णाय स्वाहा ॥

इस मन्त्र का ३००००० जप से पुरश्चरण करें।

जल समर्पण –

गुह्याति गुह्यगोप्ता त्वं गृहाणास्मत् कृतं जपम् ।
सिद्धिर्मे भवतु देव! त्वत्प्रसादान्सुरेश्वर! ॥

॥ इति श्री प्राणेश्वर श्रीकृष्ण प्रयोगः ॥

॥ बालगोपाल मन्त्र प्रयोगाः ॥

बालगोपाल के कई मन्त्र है।

१. 'कृः' (हिन्दीतन्त्रसार) 'कृं' (मेरुतन्त्रोक्त)। ऋषि नारद, छन्द गायत्री, देवता बालगोपाल। क्लीं क्लीं से न्यास करे।

ध्यानम् –

कृष्णं पद्मासनं गुञ्जत्-किङ्किणी लसत्कटिं
हस्ताभ्यां नवनीतं च पायसं चापि बिभ्रतम् ।
कण्ठदेशे व्याघ्रनखं स्वर्णपट्ट विराजितं
मेघश्यामं च परितो गोप-गोपीजनावृतम् ॥

२. कृष्ण ३. क्लीं कृष्ण - ॐ कृष्ण ४. क्लीं कृष्णाय ५ क्लीं कृष्ण क्लीं ६. कृष्णाय नमः ७. क्लीं कृष्णाय क्लीं ८. गोपालाय स्वाहा ९. क्लीं कृष्णाय नमः।

हिन्दी तन्त्रसार में ऋषि नारद कहा है, तथा मेरुतन्त्र के अनुसार **ऋषि 'काम'** बताया गया है।

१०. सप्ताक्षर - **कृष्णाय गोविन्दाय। श्रीं ह्रीं क्लीं कृष्णाय क्लीं।**

११. अष्टाक्षर - **(क) क्लीं हृषिकेशाय नमः। (ख) श्रीं ह्रीं क्लीं कृष्णाय स्वाहा। (ग) उत्तिष्ठ श्रीकृष्ण स्वाहा।**

मेरुतन्त्र के अनुसार **वामदेव ऋषि, छन्द पंक्ति, देवता विष्णु है।**

न्यास - **भीषय-भीषय ह्रु हुं हृदयाय नमः। त्रासय-त्रासय हुं शिरसे स्वाहा। प्रमर्दय प्रमर्दय हुं शिखायै वषट्। प्रध्वंसय प्रध्वंसय हुं कवचाय हुं। रक्षय रक्षय हुं नेत्रत्रयाय वौषट्।** मूल मन्त्र के बाद "हुं" जोड़कर **अस्त्राय फट्।**

दुग्धाम्भोधौ सितद्वीपं नानामणिगणैर्युतं
वनं संचिन्तयेत् तत्र सकलर्त्तु-समन्वितम् ।
न्यासोक्ताभरणैः शस्तैरुपतं दीप्त तेजसं
सुरसुरर्षि प्रमुखैः सेवितं चाप्सरोगणैः ॥

पायस व बिल्व समिधा से हवन करें।

१२. क्लीं कृष्णाय गोविन्दाय १३. दधिभक्षणाय स्वाहा १४. सुप्रसन्नात्मने नमः १५. क्लीं ग्लौं श्यामलाङ्गाय नमः १६. बालवपुषे कृष्णाय स्वाहा। १७. गोकुलनाथाय नमः १८.क्लीं कृष्णायगोविन्दाय क्लीं १९. श्रीं ह्रीं क्लीं कृष्णाय क्लीं २०. बालवपुषे क्लीं कृष्णाय स्वाहा।

ऋष्यादिन्यासः - **शिरसि नारद ऋषये नमः। मुखे गायत्री छन्दसे नमः। हृदि श्रीकृष्णाय देवतायै नमः।**

कराङ्गन्यासः - **क्लां अंगुष्ठाभ्यां नमः, क्लीं तर्जनीभ्यां स्वाहा, क्लूं मध्यमाभ्यां वषट्, क्लैं अनामिकाभ्यां हुं, क्लौं कनिष्ठाभ्यां वौषट्, क्लः करतल करपृष्ठाभ्यां फट्।** इसी तरह हृदयादि न्यास करें।

ध्यानम् -

पञ्चवर्षमति - दृप्तमङ्गने धावमानमति चञ्चलेक्षणम् ।
किङ्किणीवलय हार नूपुरैराञ्चितं नमत गोपबालकम् ॥

॥ यन्त्रपूजनम् ॥

बालगोपाल पूजन यंत्रम्

प्रथमावरणम् - यन्त्र के मध्य में **ॐ हरये नमः** से पूजा करें। फिर षट्कोण में मन्त्र के पञ्चाङ्ग न्यास करे। जैसे मंत्र '**गोकुल नाथाय नमः**' है। आग्नेयादि चारों कोणों में - **ॐ गोकु हृदयाय नमः। ॐ लना शिरसे स्वाहा। ॐ थाय शिखायै वषट्। ॐ नमः कवचाय हुँ। ॐ गोकुलनाथाय नमः सर्वदिक्षुः।**

द्वितीयावरणम् - अष्ट दल के आग्नेयादि चारों कोणों में - **ॐ वासुदेवाय नमः। ॐ सङ्कर्षणाय नमः। ॐ प्रद्युम्नाय नमः। ॐ अनिरुद्धाय नमः।** पूर्वादि दिशाओं में - **ॐ रुक्मिण्यै नमः। ॐ सत्यभामायै नमः। ॐ लक्ष्णायै नमः। ॐ जाम्बवत्यै नमः।**

तृतीयावरणम् - भूपूर में इन्द्रादि लोकपालों का एवं आयुधों का पूजन तर्पण करें। चार लक्ष जप का पुरश्चरण कर घृत, मधु, शर्करा से युक्त रक्तोत्पल द्वारा दशांश होम करें।

॥ अथ संतानगोपाल मन्त्रप्रयोगः॥

(मन्त्रमहोदधौ)

मंत्रोयथा -

ॐ देवकीसुत गोविन्द वासुदेव जगत्पते ।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥

विनियोगः - **अस्य मन्त्रस्य नारदऋषिः, अनुष्टुप् छन्दः, कृष्णो देवता, मम पुत्रकामनार्थे जपे विनियोगः।**

ऋषिन्यासः - **ॐ नारदऋषये शिरसि। अनुष्टुप् छन्दसे नमः मुखे। कृष्णदेवतायै नमः हृदि। विनियोगाय नमः सर्वाङ्गे।**

अङ्गन्यासः	करन्यासः	षडङ्गन्यासः
ॐ देवकीसुत	अंगुष्ठाभ्यां नमः।	हृदयाय नमः।
गोविन्द	तर्जनीभ्यां नमः।	शिरसे स्वाहा।

वासुदेव	मध्यमाभ्यां नमः।	शिखायै वषट्।
जगत्पते	अनामिकाभ्यां नमः।	कवचाय हुँ।
देहि मे तनयं कृष्ण	कनिष्ठाभ्यां नमः।	नेत्रत्रयाय वौषट्।
त्वामहं शरणं गतः	करतल करपृष्ठाभ्यां नमः।	अस्त्राय फट्।

ध्यानम् –

विजयेन सुतो रथस्थितः प्रसभानीय समुद्रमध्यतः ।
प्रददत्तनयनान् द्विजन्मने स्मरणीयो वसुदेवनंदनः ॥

अर्जुन के साथ रथ पर बैठे हुये हठात् समुद्र में प्रविष्ट होकर वहां से ब्राह्मण पुत्र को लाकर उसके ब्राह्मण पिता को समर्पित करते हुये भगवान वासुदेव का ध्यान करें।

॥ यंत्रावरण पूजाविधानम् ॥

सर्वतोभद्र मण्डल पर मण्डूकादि पीठ देवताओं की पूजा कर नवपीठ शक्तियों का पूजन करें – **ॐ विमलायै नमः। ॐ उत्कर्षिण्यै नमः। ॐ ज्ञानाय नमः। ॐ क्रियायै नमः। ॐ योगाय नमः। ॐ प्रह्वयै नमः। ॐ सत्यायै नमः। ॐ ईशानायै नमः।** मध्ये – **अनुग्रहायै नमः।**

संतानगोपाल यंत्रम्

भगवान की स्वर्ण मूर्ति ताम्रपात्र पर रख, पीठ पर स्थापित करें। स्वर्ण यन्त्र का अग्न्युत्तारण कर भद्रपीठ पर रखकर पुष्पादि का आसन प्रदान करें।

ॐ नमो भगवते श्रीगोपाल सर्वभूतात्मने योगपीठाय नमः। हाथ जोड़कर आवरण पूजा की आज्ञा मांगें।

ॐ संविन्मयः परोदेवः परामृतरसप्रियः ।
अनुज्ञां देहि गोपाल परिवारार्चनाय ते ॥

भगवान की पूजा करें।

आवरण पूजा में प्रत्येक नामावलि में पहिले **ॐ** फिर **नमः** लगाकर तथा अन्त में पादुकां पूजयामि तर्पयामि कहकर गंधपुष्पार्चन कर तर्पण करें।

प्रथमावरणम् – षट्कोण में (केसरेषु) आग्नेय्यादि चतुर्षुदिक्षु, मध्ये दिक्षु

च ॥१ ॥ ॐ देवकीसुत हृदयाय नमः। हृदय श्री पादुकां पूजयामि तर्पयामि नमः। इति सर्वत्र ॥२॥ ॐ गोविन्दाय शिरसे स्वाहा ॥३॥ ॐ वासुदेव शिखायै वषट् ॥४॥ ॐ जगत्पते कवचाय हुम् ॥५॥ ॐ देहि मे तनयं कृष्ण नेत्रत्रयाय वौषट् ॥६॥ ॐ त्वामहं शरणं गतः अस्त्राय फट्।

पुष्पाञ्जलि - (प्रत्येक आवरण के बाद देवे)

ॐ अभीष्ट सिद्धि मे देहि शरणागतवत्सल ।
भक्त्या समर्पये तुभ्यं (अमुक) प्रथमावरणार्चनम् ॥

द्वितीयावरणम् - अष्टदल में पूर्वादि क्रम से - **ॐ कालिन्द्यै नमः। ॐ नाग्नजित्यै नमः। ॐ मित्रविंदायै नमः। ॐ चारुहासिन्यै नमः। ॐ रोहिण्यै नमः। ॐ जाम्बवत्यै नमः। ॐ रुक्मिण्यै नमः। ॐ सत्यभामायै नमः।(इत्यष्ट महिषीः)**

तृतीयावरणम् - अष्टदल के अग्रभाग में - **ॐ ऐरावताय नमः। ॐ पुण्डरीकाय नमः। ॐ वामनाय नमः। ॐ कुमुदाय नमः। ॐ अंजनाय नमः। ॐ पुष्पदंताय नमः। ॐ सर्वाभौमाय नमः। ॐ सुप्रतीकाय नमः।**

चतुर्थावरणम् - चतुर्थ आवरण में भूपूर (परिधि) में **इन्द्रादि दिक्पालों** व **पञ्चमावरण** में उनके आयुधों की पूजा करें।

प्राकारान्तर यन्त्र पूजा (द्वितीय प्रकार)

प्रथमावरण - पूजन पूर्ववत् है।

द्वितीयावरण - (अष्टदले) - **१. ॐ रुक्मिण्यै नमः। २. ॐ सत्यभामायै नमः। ३. ॐ नाग्नजित्यै नमः। ४. ॐ कालिन्द्यै नमः। ५ ॐमित्रविन्दायै नमः। ६. ॐ लक्ष्मणायै नमः। ७. ॐ जाम्बवत्यै नमः। ८. ॐ सत्यायै नमः।**

तृतीयावरणम् - अष्टदल के अग्रभाग में - **ॐ वासुदेवाय नमः। ॐ देवक्यै नमः। ॐ नंदगोपाय नमः। ॐ यशोदायै नमः। ॐ बलभद्रायै नमः। ॐ सुभद्रायै नमः। ॐ गोपेभ्य नमः। ॐ गोपिकाभ्यो नमः।**

चतुर्थावरणम् - चतुर्थावरण में परिधि (भूपूर) में इन्द्रादि दिक्पालों एवं पञ्चमावरण में उनके आयुधों का पूजन करें।

अस्य पुरश्चरणं लक्षमंत्रात्मकम्। जपान्ते दशांशेन मधुशर्करा घृतमिश्रितै स्तिलैर्होमं कृत्वा तत्तद्दशांशेन तर्पणमार्जन ब्राह्मण भोजनानि कुर्यात्। एवं कृतो सिद्ध मंत्रो भवति।

(ग्रन्थान्तरे सन्तानगोपाल मंत्रप्रयोगः)

मूलमंत्रो यथा - ॐ क्लीं श्रीं ह्रीं जीं ॐ भूर्भुवः स्वः ॐ देवकीसुत गोविन्द वासुदेव जगत्पते। देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॐ स्वः भुवः भूः ॐ जीं ह्रीं श्रीं क्लीं ॐ। इति चतुः पञ्चाशद्वर्णात्मको मन्त्रः।

विनियोगः - ॐ अस्य श्री संतानगोपाल मन्त्रस्य नारायण ऋषिः, अनुष्टुप् छन्दः, श्रीगोपालो देवता। क्लीं बीजं, श्रीं ह्रीं शक्तिः, जीं कीलकम् संतान कामना सिद्ध्यर्थे जपे विनियोगः।

ऋषिन्यासः- ॐ नारायण ऋषये नमः शिरसि। अनुष्टुप् छन्दसे नमः मुखे। श्री गोपाल देवतायै नमः हृदि। क्लीं बीजाय नमः गुह्ये। श्रीं ह्रीं शक्तये नमः पादयोः। श्रीं कीलकाय नमः सर्वाङ्गे

करन्यासः - ॐ देवकीसुत गोविन्द अंगुष्ठाभ्यां नमः। ॐ वासुदेव जगत्पते तर्जनीभ्यां नमः। ॐ देहि मे तनयं कृष्ण मध्यमाभ्यां नमः। ॐ त्वामहं शरणंगतः अनामिकाभ्यां नमः। ॐ देवकीसुत गोविन्द देष देव जगत्पते कनिष्ठिकाभ्यां नमः। ॐ देहि मे तनयं कृष्ण त्वामहं शरणं गतः करतल करपृष्ठाभ्यां नमः॥ इसी विधि से षडङ्गन्यास करें।

ध्यानम् -

ॐ वैकुण्ठतेजसा दीप्तमर्जुनेन समन्वितम्।
समर्पयन्तं विप्राय नष्टानानीय बालकान्॥

मंत्र का पुरश्चरण कर मधुत्रय एवं तिलादि से होम करें।

॥ इति संतानगोपाल मन्त्र प्रयोगः॥

॥ वासुदेव॥

अथमंत्र - "ॐ नमो भगवते वासुदेवाय" - यह द्वादशाक्षर मंत्र कल्पतरु के समान है।

विनियोगः - ॐ अस्य श्री वासुदेव मंत्रस्य प्रजापतिः ऋषिः, गायत्री छन्दः श्री वासुदेव देवता सर्वार्थ सिद्ध्यर्थे जपे विनियोगः।

ऋषिन्यासः- शिरसि प्रजापतये ऋषये नमः, मुखे गायत्री छन्दसे नमः, हृदि वासुदेवाय देवतायै नमः।

अङ्गन्यासः - ॐ अंगुष्ठाभ्यां नमः। हृदयाय नमः। ॐ नमो - तर्जनीभ्यां नमः। शिरसे स्वाहा। भगवते - मध्यमाभ्यां नमः। शिखायै वषट्, वासुदेवाय - अनामिकाभ्यां नमः। कवचाय हुँ। मूल मंत्र से - कनिष्ठाभ्यां नमः। अस्त्राय फट्

मंत्रन्यास :- ॐ नमः मस्तके। नं नमः कपाले। मं नमःचक्षुर्द्वये। भं नमः मुखे। गं नमः कण्ठे। वं नमः बाहुद्वये। तें नमः हृदि। वां नमः उदरे। सुं नमः नाभौ। दें नमः लिङ्गे। वां नमः जानुद्वये। यं नमः पादद्वये।

व्यापकन्यासः- ॐ किरीट केयूरहारं मकरकुण्डलं शंखचक्रगदाऽम्भोज हस्तं पीताम्बरं श्री वत्सं ज्योति स्वात्मज्योतिर्द्वयं दीप्तिकराय आदित्यतेजसे नमः।

ध्यानम् -

विष्णुं शरदचन्द्र- कोटिसदृशं शङ्खं रथाङ्ग गदामम्भोजम्
दधतं सिताब्जनिलयं कान्त्या जगन्मोहनम्।
आबद्धाङ्गद- हारकुण्डल- महामौलि स्फुरत् कङ्कणम्
श्री वत्साङ्कमुदार - कौस्तुभधरं वन्दे मुनीन्द्रैः स्तुतम् ॥

॥ यंत्र पूजनम् ॥

वासुदेव यंत्र में प्रथम षट्कोण, उसके बाहर अष्टदल, फिर द्वादश दल बनावें और पश्चात् भूपूर बनावें। (विष्णु द्वादशनामाक्षर मन्त्र विधान एवं इस यंत्र पूजा में कुछ ही भिन्नता है)

वासुदेव यंत्रम्

प्रथमावरणम् - षट्कोण में अग्नि आदि चार कोणों में - ॐ हृदयाय नमः, नमः शिरसे स्वाहा, भगवते शिखायै वषट्, वासुदेवाय कवचाय हुँ, ॐ नमो भगवते वासुदेवाय से देवाग्रे पूजन करें।

द्वितीयावरणम् - अष्टदल में अग्नि आदि चार कोणों में - ॐ वासुदेवाय नमः, ॐ

सङ्कर्षणाय नमः, ॐ प्रद्युम्नाय नमः, ॐ अनिरुद्धाय नमः, पूर्वादि आदि चार दिशाओं में - **ॐ रुक्मिणयै नमः, ॐ सत्यभामायै नमः, ॐ लक्षणायै नमः, ॐजाम्बवत्यै नमः। अथवा- ॐ शान्त्यै नमः, ॐ श्रियै नमः, ॐ सरस्वत्यै नमः,ॐ रत्यै नमः** से अष्टदल के अग्नि आदि चारो कोणों में पूजन करें।

तृतीयावरणम् - द्वादशदल में पूर्वादि क्रम से - **केशव धातृभ्यां नमः। नारायण अर्यमाभ्यां नमः। मित्र सहिताय माधवाय नमः। गोविन्द वरुणाभ्यां नमः। विष्णु अंशुभ्यां नमः। भग सहिताय मधुसूदनाय नमः। विवस्वान् सहिताय त्रिविक्रमाय नमः। इन्द्र सहिताय वामनाय नमः। श्रीधरपुष्ट्याभ्यां नमः। पर्जन्य सहिताय हृषीकेशवाय नमः। सविता सहिताय पद्मनाभाय नमः। त्वष्टा सहिताय दामोदराय नमः।**

अथवा - **केशव, नारायण, माधव, गोविन्द, विष्णु, मधुसूदन, त्रिविक्रम,वामन, श्रीधर, हृषीकेश, पद्मनाभ, एवं दामोदर इन विष्णु द्वादश मूर्तियों का पूजन करें।**

चतुर्थ - पंचमावरणम् - भूपूर में इन्द्रादि दिक्पालों एवं आयुधों का पूजन करें।

बारह लाख मंत्र जप से पुरश्चरण करके होम करें । दूधवाले वृक्षो की समिधाओं से पायस होम करें।

॥ राधा ॥

राधा (षडक्षर) - **(१) रां ओं आं यं स्वाहा।**

नारद पञ्चरात्र में विस्तृत विधि दी गई है। (२।३।३८)

(२) "श्री राधायै स्वाहा"

इस मन्त्र के **नारायण ऋषि,** छन्द् गायत्री, **देवता श्रीराधा, स्त्रीं बीज तथा ह्रीं शक्ति है।**

ध्यानम् -

श्वेतचम्पक वर्णाभां शरदिन्दु समाननां
कोटिचन्द्र प्रतीकाशं शरदम्भोज लोचनाम् ।
सुकुमाराङ्गलतिकां रासमण्डलमध्यगां
वराभयकरां शान्तां शश्वत् सुस्थिरयौवनाम् ॥
रत्नसिंहसनासीनां गोपीमण्डल-नायिकां ।
कृष्णप्राणाधिकां वेदबोधितां परमेश्वरीम् ॥

॥ कामदेव ॥

कामदेव – **क्लीं। (एकाक्षर)**

ऋषिसंमोहन, छन्द गायत्री, देवता मकरध्वज कं बीजं, ईं शक्तिं है। कां कीं इत्यादि से षडङ्गन्यास करें।

अष्टाक्षर मन्त्र: – **क्लीं मनमथाय नमः। क्लीं कामदेवाय नमः।**

ध्यानम् – (शारदायाम्)

जवारुणं रत्नविभूषणाढ्यं मीनध्वजं चारुकृताङ्गरागं।
कराम्बुजैरंकुशमिक्षु चापं पुष्पास्त्र पाशौ दधतं भजामि ॥

कामदेव गायत्री – **ॐ कामदेवाय विद्महे पुष्पवाणाय धीमहि तन्नोऽनङ्ग प्रचोदयात्।**

॥ दधिवामन ॥

दधिवामन की उपासना विशेष लक्ष्मीप्रद मानी गयी है। लक्ष्मी का स्वभाव चंचल है अतः लक्ष्मी की स्थिरता के लिये साथ में पुरुषदेव विष्णु व गणेश उपासना अवश्य करनी चाहियें।

अष्टादशाक्षरो मन्त्रः– (शारदायाम्)

ॐ नमो विष्णवे सुरपतये महाबलाय स्वाहा।

विनियोगः – **ॐ अस्य श्री दधिवामन मन्त्रस्य इन्दुर्ऋषिः, विराट् छन्दः, दधिवामनो देवता, सर्वेष्टसिद्धये जपे विनियोगः।**

ऋषिन्यासः– **ॐ इन्दुऋषये नमः शिरसि। विराट छन्दसे नमः मुखे। दधिवामनदेवतायै नमः हृदि। विनियोगाय नमः सर्वाङ्गे।**

अङ्गन्यास :–

ॐ	अंगुष्ठाभ्यां नमः।	हृदयाय नमः।
नमः	तर्जनीभ्यां नमः।	शिरसे स्वाहा।
विष्णवे	मध्यमाभ्यां नमः।	शिखायै वषट्।
सुरपतये	अनामिकाभ्यां नमः।	कवचाय हुँ।
महाबलाय	कनिष्ठिकाभ्यां नमः।	नेत्रत्रयाय वौषट्।
स्वाहा	करतल करपृष्ठाभ्यां नमः।	अस्त्राय फट्।

मन्त्रवर्णन्यास :- ॐ नमः मूर्ध्नि। ॐ नं नमः भाले। ॐ मों नमो नेत्रयोः। ॐ विं नमः कर्णयोः। ॐ ष्णं नमः नासिकयो। ॐ वें नमः ओष्ठयोः। ॐ सुं नमः तालुके। ॐ रं नमः कण्ठे। ॐ पं नमः बाहुद्वये। ॐ तं नमः पृष्ठे। ॐ यें नमः हृदये। ॐ मं नमः उदरे। ॐ हां नमः नाभौ। ॐ बं नमः गुह्ये। ॐ लां नमः उरुद्वये। ॐ यं नमः जानुद्वये। ॐ स्वां नमः जंघयो। ॐ हां नमः पादयोः।

ध्यानम् –

मुक्तागौरं नवमणिलसद्भूषणं चन्द्रसंस्थम्
भृंगाकारैरलकनिकरैः शोभिवक्त्रारविन्दम्।
हस्ताब्जाभ्यां कनककलशं शुद्धतोयाभिपूर्णम्
दध्यन्नाढ्यं कनकचषकं धारयंतं भजामः ॥

अर्थात् भगवान दधिवामन मोती के समान उज्वल वर्ण के हैं, नवीनमणियों से विभूषित अलङ्कार धारण किये है और चन्द्रमण्डल में विराजमान है। भौरों के सदृश्य केशों की लटों द्वारा मुखकमल सुशोभित है। दोनों करकमलों में से एक में शुद्धजल पूर्ण स्वर्ण कलश और अन्य में दधि और अन्न से भरा स्वर्णपात्र लिए है। मैं ऐसे दधिवामन भगवान की वन्दना करता हुँ।

॥ यन्त्र पूजनम् ॥

मण्डल पर मण्डूकादि पीठदेवता तथा विमलादि नव पीठशक्तियों का पूजन करें। पूर्वादिक्रम से – ॐ विमलायै नमः, ॐ उत्कर्षिण्यै नमः, ॐ ज्ञानायै नमः, ॐ क्रियायै नमः, ॐ योगायै नमः, ॐ प्रह्वयै नमः, ॐ सत्यायै नमः, ॐ ईशानायै नमः, मध्ये – ॐ अनुग्रहायै नमः।

ॐ नमो विष्णवे

दधिवामन विष्णु पूजन यंत्र

ताम्र या रजत यन्त्र को घृत से अभ्यजन कर, दुग्ध व जलधारा से अग्न्युत्तारण

कर शुद्धकर मण्डल पर रखें तथा पूजन के लिये भगवान से आज्ञा माँगे।

ॐ नमो भगवते दधिवामनाय सर्वभूतात्मने वासुदेवाय सर्वात्म संयोग पद्म पीठात्मने नमः।

इस मन्त्र द्वारा यंत्र को पुष्पों का आसन देकर विराजमान करें, यन्त्र में मूर्ति की कल्पना करें, स्वर्णमूर्ति होवे तो यन्त्र मध्य में विराजमान कर पूजन करें फिर आवरण पूजन की आज्ञा माँगें। प्रत्येक नामावलि के साथ **पादुकां पूजयामि तर्पयामि** बोलकर प्रथमा से गंधार्चन से पूजन एवं तर्पण करें।

ॐ सविन्मयः परोदेवः परामृतरसप्रियः ।
अनुज्ञां देहि मे देव परिवारार्चनायमे ॥

प्रथमावरणम् - षट्कोण में केसरों में अग्नि आदि चारकोणों में - १. **ॐ हृदयाय नमः हृदय श्री पादुकां पूजयामि तर्पयामि। २. नमः शिरसे स्वाहा। शिरः श्री. पा. पू. त.। ३. ॐ विष्णवे शिखायै वषट्। शिखा श्री.पा. पू. त.। ४. ॐ सुरपतये कवचाय हुँ। कवच श्री. पा. पू. त.। ५. ॐ महाबलाय नेत्रत्रयाय वौषट्। नेत्र श्री. पा. पू. त.। ६. ॐ स्वाहा अस्त्राय फट्। अस्त्र श्री. पा. पू. त.।**

पुष्पाञ्जलि प्रदान करें -

ॐ अभीष्ट सिद्धिं मे देहि शरणागतवत्सल ।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥

इस तरह प्रत्येक आवरण पूजन में आवरण का नाम लेते हुये पुष्पाञ्जलि प्रदान करें।

द्वितीयावरणम् - अष्टदल में पूर्वादिक्रम से चार दिशाओं में - **ॐ वासुदेवाय नमः । ॐ संकर्षणाय नमः । ॐ प्रद्युम्नाय नमः । ॐ अनिरुद्धाय नमः ।** आग्नेयादि चारों कोणों के पत्रो में - **ॐ शान्त्यै नमः । ॐ श्रियै नमः । ॐ सरस्वत्यै नमः । ॐ रत्यै नमः ।**

तृतीयावरणम् - अष्टदल के पत्राग्रों में पूर्वादिक्रम से चारों दिशाओं में - **ॐ ध्वजाय नमः । ॐ वैनतेयाय नमः । ॐ कौस्तुभाय नमः । ॐ वनमालिकायै नमः । आग्नेयादि चार कोणों के पत्राग्रों में - ॐ शंखाय नमः । ॐ चक्राय नमः । ॐ गदायै नमः । ॐ शार्ङ्गाय नमः ।**

चतुर्थावरणम् - द्वादशदल में पूर्वादिक्रम से - **ॐ केशवाय नमः। ॐ**

नारायणाय नमः। ॐ माधवाय नमः। ॐ गोविन्दाय नमः। ॐ विष्णवे नमः। ॐ मधुसूदनायै नमः। ॐ त्रिविक्रमाय नमः। ॐ वामनाय नमः। ॐ श्रीधराय नमः । ॐ हृषीकेशाय नमः। ॐ पद्मनाभाय नमः। ॐ दामोदराय नमः।

पञ्चमावरणम् - भूपूर में पूर्वादि दिशाओं में **इन्द्रादि दशदिक्पालों का पूजन करें।**

षष्ठमावरणम् - भूपूर में **लोकपालो के वज्रादि आयुधों का पूजन करें।**

सप्तमावरणम् - भूपूर में अष्टदिशाओं में अष्टगजों का पूजन करें- **ॐ ऐरावताय नमः। ॐ पुण्डरीकाय नमः। ॐ वामनाय नमः। ॐ कुमुदाय नमः। ॐ अंजनाय नमः। ॐ पुष्पदंताय नमः। ॐ सर्वभौमाय नमः। ॐ सुप्रतीकाय नमः।**

मन्त्र के तीन लाख जप करके पुरश्चरण करें।

विधानमेतद्देवस्य कीर्तितं सुरपूजितं पायसाज्येन ।
जुहुयात्सहस्त्रं श्रियमाप्नुयात् ॥१॥
धान्य होमेन धान्याप्तिलः शतपुष्पासमुद्भवैः ।
बीजैः सहस्त्रसंख्याकैर्होमो भयविनाशनः ॥२॥
दध्योदनेन शुद्धेन हुत्वा मुच्येत दुर्गतेः ।
स्मृत्वा त्रैविक्रमं रूपं जपेन्मंत्रमनन्यधीः ॥३॥
मुक्तो बंधाद्भवेत्सद्यो नात्र कार्या विचारणा ।

यंत्र प्रयोग के लिये साध्य (देव) और साधक के कर्म सहित ॐ लिखें। अष्टदल के प्रत्येक दल में **अ आ इ ई उ ऊ** इस तरह से स्वर मातृका **अं अः** तक लिखें। इसको **"ॐ नमो भगवते वासुदेवाय"** से संवेष्टित कर द्वादश दल में एक एक अक्षर लिखें।

उसके बाहर **कं खं गं ...... हं लं क्षं** इत्यादि वर्ण लिखकर पूजन करें।

॥ इति दधिवामन प्रयोग॥

॥ लक्ष्मीनारायण (लक्ष्मीवासुदेव)॥

शारदातिलके –

चतुर्दशाक्षरो मन्त्रः – **ॐ ह्रीं ह्रीं श्रीं श्रीं लक्ष्मीवासुदेवाय नमः।**

विनियोगः – **अस्य मन्त्रस्य प्रजापतिर्ऋषिः। गायत्री छन्दः। वासुदेवो देवता। धर्मार्थकाममोक्षार्थे जपे विनियोगः।**

ऋषिन्यास :– **प्रजापतिर्ऋषये नमः शिरसि। गायत्री छन्दसे नमः मुखे। वासुदेव देवतायै नमः हृदि। विनियोगाय नमः सर्वाङ्गे।**

कराङ्गन्यास :-

ॐ ह्रीं ह्रीं	अंगुष्ठाभ्यां नमः।	हृदयाय नमः।
ॐ श्रीं श्रीं	तर्जनीभ्यां नमः।	शिरसे स्वाहा।
ॐ लक्ष्मी	मध्यमाभ्यां नमः।	शिखायै वषट्।
ॐ वासुदेवाय	अनामिकाभ्यां नमः।	कवचाय हुँ।
ॐ नमः	कनिष्ठिकाभ्यां नमः।	अस्त्राय फट्।

ध्यानम् –

विद्युच्चंद्रनिभे वपुः कमलजावैकुण्ठयोरेकताम्
प्राप्तं स्नेहवशेन रत्नविलसद्भूषाभरालंकृतम् ।
विद्यापंकज दर्पणान्मणिमयं कुम्भं सरोज गदाम्
शङ्खं चक्रममूनि विभ्रदमितां दिश्याच्छ्रियं वः सदा ॥

सर्वतोभद्रपीठ पर मण्डूकादि पीठ पूजन कर विमलादि नवपीठ शक्तियों का पूजन करें यन्त्र को शुद्ध करके पुष्पासन देकर स्थापित करें।

यन्त्रोद्धार - षट्कोण उसके बाहर अष्टदल उसके ऊपर बारह दल बनाकर उसके बाहर भूपूर (परिधि चार द्वारयुक्त) की कल्पना से यन्त्र बनायें।

देव के यन्त्रावरण देवताओं के पूजन की आज्ञा मांगें।

ॐ संविन्मयः परोदेवः परामृतरसप्रियः ।अनुज्ञां देहि मे देव परिवारार्चनायमे ॥

पुष्पाञ्जलि प्रदान करें।

प्रथमावरणम् - षट्कोण के पञ्चकोणों में पूजन करें। आग्नेयादि चार कोणों में - **ॐ ह्रीं ह्रीं हृदयाय नमः। हृदय श्री पादुकां पूजयामि तर्पयामि** इस तरह यंत्र में सभी नामावलियों के साथ पूजन तर्पण करें। **ॐ श्रीं श्रीं शिरसे**

स्वाहा। ॐ लक्ष्मी शिखायै वषट्। ॐ वासुदेवाय कवचाय हुं। सर्वदिक्षु - **ॐ नमः अस्त्राय फट्।**

प्रत्येक आवरण की पूजन समाप्ति पर पुष्पाञ्जलि प्रदान करें।

ॐ अभीष्ट सिद्धिं मे देहि शरणागतवत्सल ।
भक्त्या समर्पये तुभ्यं अमुकावरणार्चनम् ॥

लक्ष्मीनारायण यंत्रम्

द्वितीयावरणम् - अष्टदल में पूर्वादि चार दिशाओं में - **ॐ वासुदेवाय नमः। वासुदेव श्री पा. पू त.। ॐ संकर्षणाय नमः। ॐ प्रद्युम्नाय नमः। ॐ अनिरुद्धाय नमः।** आग्नेयादि चतुष्कोणे - **ॐ शान्त्यै नमः। ॐ श्रियै नमः। ॐ सरस्वत्यै नमः। ॐ रत्यै नमः।**

तृतीयावरणम् - द्वादशदल में पूर्वादि क्रम से - **ॐ केशवाय नमः। केशव श्री पादुकां पूजयामि तर्पयामि। ॐ नारायणाय नमः। ॐ माधवाय नमः। ॐ गोविन्दाय नमः। ॐ विष्णवे नमः। ॐ मधुसूदनाय नमः। ॐ त्रिविक्रमाय नमः। ॐ वामनाय नमः। ॐ श्रीधराय नमः। ॐ हृषीकेशाय नमः। ॐ पद्मनाभाय नमः। ॐ दामोदराय नमः।**

विष्णु की द्वादशमूर्ति का पूजन तर्पण करें।

चतुर्थावरणम् - चतुर्थावरणम् में भूपूर में इन्द्रादि दिक्पालों का पूजन पूर्वादि क्रम से एवं **पञ्चमावारणम्** में उनके **आयुधों का पूजन तर्पण करें।**

प्रत्येक आवरण की पूजन समाप्ति पर **ॐ अभीष्ट....** से पुष्पाञ्जलि प्रदान करें।

पुरश्चरण - इस मन्त्र का १४ लक्ष जप का पुरश्चरण है। पुरश्चरण पश्चात् दशांश

हवन करें। मधुत्रय से होम करें।

पायसेन कृतो होमो लक्ष्मीवश्य प्रदायकः ।
मधुराक्तैस्तिलै हुत्वा सर्वकार्याणि साधयेत् ॥

॥ इति लक्ष्मीनारायण मन्त्रप्रयोगः ॥

॥ लक्ष्मीनारायण वज्रपञ्जर कवचम् ॥

॥ श्रीभैरवउवाच ॥

अधुना देवी! वक्ष्यामि लक्ष्मीनारायणस्य ते ।
कवचं मंत्रगर्भं च वज्रपञ्जरकाख्यया ॥१॥
श्रीवज्रपञ्जरं नाम कवचं परमाद्भुतम् ।
रहस्यं सर्वदेवानां साधकानां विशेषतः ॥२॥
यं धृत्वा भगवान् देवः प्रसीदति परः पुमान् ।
यस्य धारण मात्रेण ब्रह्मालोक पितामहः ॥३॥
ईश्वरोऽहं शिवो भीमो वासवोऽपि दिवस्पतिः ।
सूर्यस्तेजोनिधिर्देवि! चन्द्रमास्तारकेश्वरः ॥४॥
वायुश्च बलवांल्लोके वरुणो यादसांपतिः ।
कुबेरोऽपि धनाध्यक्षो धर्मराजो यमः स्मृतः ॥५॥
यं धृत्वा सहसा विष्णुः संहरिष्यति दानवान् ।
जघान रावणादींश्च किं वक्ष्येऽहमतः परम् ॥६॥
कवचस्यास्य सुभगे! कथितोऽयं मुनिः शिवः ।
त्रिष्टुप् छन्दो देवता च लक्ष्मीनारायणो मतः ॥७॥
रमा बीजं परा शक्तिस्तारं कीलकमीश्वरि! ।
भोगापवर्ग सिद्ध्यर्थं विनियोग इति स्मृतः ॥८॥

विनियोगः- ॐ अस्य श्रीलक्ष्मीनारायणकवचस्य शिवऋषिः, त्रिष्टुप् छन्दः, श्रीलक्ष्मीनारायण देवता, श्रीं बीजं, ह्रीं शक्तिः, ॐ कीलकं, भोगापवर्ग-सिद्ध्यर्थं कवच पाठे विनियोगः।

ऋष्यादिन्यासः- श्रीशिव ऋषये नमः शिरसि, त्रिष्टुप् छन्दसे नमः मुखे, श्रीलक्ष्मी-नारायण देवतायै नमः हृदि, श्रीं बीजाय नमःगुह्ये, ह्रीं शक्तये

नमः नाभौ, ॐ कीलकाय नमः पादयोः, भोगापवर्ग-सिद्ध्यर्थं कवच-पाठे विनियोगाय नमः अञ्जलौ।

॥ ध्यानम् ॥

पूर्णेन्दु-वदनं पीतवसनं कमलासनम् ।
लक्ष्म्याश्रितं चतुर्बाहुं लक्ष्मीनारायणं भजे ॥

॥ कवचम् ॥

ॐ वासुदेवोऽवतु मे मस्तकं सशिरोरुहम् ।
ह्रीं ललाटं सदा पातु लक्ष्मीविष्णुः समन्ततः ॥१॥
हसौः नेत्रेऽवताल्लक्ष्मी-गोविन्दो जगतां पतिः ।
ह्रीं नासां सर्वदा पातु लक्ष्मीदामोदरः प्रभुः ॥२॥
श्रीं मुखं सततं पातु देवो लक्ष्मीत्रिविक्रमः ।
लक्ष्मी कण्ठं सदापातु देवो लक्ष्मीजनार्दनः ॥३॥
नारायणाय बाहू मे पातु लक्ष्मीगदाग्रजः ।
नमः पार्श्वौ सदा पातु लक्ष्मीनन्दैकनन्दनः ॥४॥
अं आं इं ईं पातु वक्षो ॐ लक्ष्मीत्रिपुरेश्वरः ।
उं ऊं ऋं ॠं पातु कुक्षिं ह्रीं लक्ष्मीगरुड़ध्वजः ॥५॥
लृं लॄं एं ऐं पातु पृष्ठं हसौः लक्ष्मीनृसिंहकः ।
ॐ ॐ अं अः पातु नाभिं ह्रीं लक्ष्मीविष्टरश्रवः ॥६॥
कं खं गं घं गुदं पातु श्रीं लक्ष्मीकैटमान्तकः ।
चं छं जं झं पातु शिश्नं लक्ष्मी लक्ष्मीश्वरः प्रभुः ॥७॥
टं ठं डं ढं कटिं पातु नारायणाय नायकः ।
तं थं दं धं पातु चोरू नमो लक्ष्मीजगत्पतिः ॥८॥
पं फं बं भं पातु जानू ॐ ह्रीं लक्ष्मीचतुर्भुजः ।
यं रं लं वं पातु जङ्घे हसौः लक्ष्मीगदाधरः ॥९॥
शं षं सं हं पातु गुल्फौ ह्रीं श्रीं लक्ष्मीरथाङ्गभृत् ।
ळं क्षः पादौ सदा पातु मूलं लक्ष्मीसहस्रपात् ॥१०॥
ङं ञं णं नं मं मे पातु लक्ष्मीशः सकलं वपुः ।
इन्द्रो मां पूर्वतः पातु वह्निर्वह्नौ सदाऽवतु ॥११॥
यमो मां दक्षिणे पातु नैर्ऋत्यां निर्ऋतिश्च माम् ।

वरुणः पश्चिमेऽव्यान्मां वायव्येऽवतु मां मरुत् ॥१२॥
उत्तरे धनद पायादैशान्यामीश्वरोऽवतु ।
वज्र-शक्ति-दण्ड-खड्ग-पाश-यष्टि-ध्वजाङ्किताः ॥१३॥
सशूलाः सर्वदा पान्तु दिगीशाः परमार्थदाः ।
अनन्तः पात्वधो नित्यमूर्ध्वे ब्रह्मावताच्च माम् ॥१४॥
दशदिक्षु सदा पातु लक्ष्मीनारायणः प्रभुः ।
प्रभाते पातु मां विष्णुर्मध्याह्ने वासुदेवकः ॥१५॥
दामोदरोऽवतात् सायं निशादौ नरसिंहकः ।
सङ्कर्षणोऽर्धरात्रेऽव्यात् प्रभातेऽव्यात् त्रिविक्रमः ॥१६॥
अनिरुद्धः सर्वकालं विश्वक्सेनश्च सर्वतः ।
रणे राजकुले द्यूते विवादे शत्रुसङ्कटे ।
ॐ ह्रीं हसौः ह्रीं श्रीं मूलं लक्ष्मीनारायणोऽवतु ॥१७॥
ॐ ॐ ॐ रण-राज-चौर-रिपुतः पायाच्च मां केशवः,
ह्रीं ह्रीं ह्रीं ह ह हा हसौः ह स ह सौ वह्नेर्वतान्माधवः ।
ह्रीं ह्रीं ह्रीं जल-पर्वताग्र-भयतः पायादनन्तो विभुः,
श्रीं श्रीं श्रीं श श शा ल लं प्रतिदिनं लक्ष्मीधवः पातु माम् ॥१८॥

॥ फलश्रुति ॥

इतीदं कवचंदिव्यं वज्रपञ्जरकाभिधम् ।
लक्ष्मीनारायणस्येष्टं चतुर्वर्ग-फलप्रदम् ॥१॥
सर्वसौभाग्य निलयं सर्वसारस्वतप्रदम् ।
लक्ष्मीसंवननं तत्त्वं परमार्थ रसायनम् ॥२॥
मन्त्रगर्भं जगत्सारं रहस्यं त्रिदिवौकसाम् ।
दशवारं पठेद्रात्रौ रतान्ते वैष्णवोत्तमः ॥३॥
स्वप्ने वरप्रदं पश्येल्लक्ष्मीनारायणं सुधीः ।
त्रिसन्ध्यं यः पठेन्नित्यं कवचं मन्मुखोदितम् ॥४॥
स याति परमंधाम वैष्णवं वैष्णवोत्तमः ।
महाचीन-पदस्थोऽपि यः पठेदात्म-चिन्तकः ॥५॥
आनन्दपूरितस्तूर्णं लभेद् मोक्षं स साधकः ।
गन्धाष्टकेन विलिखेद्रवौ भूर्जे जपन्मनुम् ॥६॥

पीतसूत्रेण संवेष्ट्य सौवर्णेनाथ वेष्टयेत् ।
धारयेद्-गुटिकां मूर्ध्नि लक्ष्मीनारायणं स्मरन् ॥७॥
रणे रिपून् विजित्याशु कल्याणी गृहमाविशेत् ।
वन्ध्या वा काकवन्ध्या वा मृतवत्सा च याङ्गना ॥८॥
सा बध्नीयात् कण्ठदेशे लभेत् पुत्रांश्चिरायुषः ।
गुरुपदेशतो धृत्वा गुरुं ध्यात्वा मनुं जपन् ॥९॥
वर्णलक्ष पुरश्चर्या फलमाप्नोति साधकः ।
बहुनोक्तेन किं देवि! कवचस्यास्य पार्वति! ॥१०॥
विनानेन न सिद्धिः स्यान्मन्त्रस्यास्य महेश्वरि! ।
सर्वागम रहस्याढ्यं तत्त्वात् तत्त्वं परात् परम् ॥११॥
अभक्ताय न दातव्यं कुचैलाय दुरात्मने ।
दीक्षिताय कुलीनाय स्वशिष्याय महात्मने ॥१२॥
महाचीन पदस्थाय दातव्यं कवचोत्तमम् ।
गुह्यं गोप्यं महादेवी! लक्ष्मीनारायण-प्रियम् ।
वज्रपञ्जरकं वर्म गोपनीयं स्वयोनिवत् ॥१३॥

॥ श्रीरुद्रयामले तन्त्रे श्रीलक्ष्मी-नारायण-कवचं ॥

॥ परमात्मा (परमब्रह्म) मन्त्र प्रयोगः॥

एकादशाक्षर मन्त्र- 'अच्युतान्त गोविन्देभ्यो नमः'।

मेरु तन्त्र के अनुसार - ऋषिशौनक, छन्द विराट् एवं देवता परमात्मा है। षडङ्गन्यास हेतु मन्त्र के प्रत्येक पद का दो-दो बार प्रयोग होगा।

द्विशताक्षर मन्त्र - ॐ क्लीं श्रीं नमः पुरुषोत्तम! अप्रतिरूप! लक्ष्मी-निवास! सकल जगत संक्षोभणः सर्वस्त्रीहृदयविदारण त्रिभुवन मदोन्मादकर सुरासुर-मनुज सुन्दरीजनमनांसि तापय तापय दीपय दीपय शोषय शोषय मारय मारय स्तंभय स्तंभय मोहय मोहय द्रावय द्रावय आकर्षय आकर्षय समस्तपरम सुभग सर्वसौभाग्यकर सर्वकामप्रद अमुकं हन हन चक्रेण गदया खड्गेन सर्ववाणैः भिन्द भिन्द पाशेन कट्ट कट्ट अङ्कुशेन ताडय ताडय कुरु कुरु किं तिष्ठसि तावत् यावत् समीहित मे सिद्धिं भवति हुं फट् नमः।

शारदा तिलके - **ऋषि जैमिनि, छन्द अमित, देवता पुरुषोत्तम है।**

ॐ पुरुषोत्तम! त्रिभुवनमदोन्मादकर पुरुषोत्तम जगतक्षोभण लक्ष्मीदयति मन्मथोत्तमांगजे कामदायिनि परमसुभग सर्वसौभाग्यदायक हुं फट् नमः॥

षड्ङ्गन्यास हेतु इस मन्त्र के छः विभाग इस प्रकार है -

॥१॥ ॐ पुरुषोत्तम! त्रिभुवनमदोन्मादकर हुं फट् नमः। (हृदयाय नमः)॥ २॥ ॐ पुरुषोत्तम जगतक्षोभण लक्ष्मीदयति हुं फट् नमः (शिरसे स्वाहा)॥३॥ ॐ मन्मथोत्तमांगजे कामदायिनि हुं फट् नमः (शिखायै वषट्)॥४॥ ॐ परमसुभग सर्वसौभाग्यदायक हुं फट् नमः (कवचाय हुँ)

इससे अस्त्रन्यास करें - **॥५॥ ॐ त्रिभुवनेश्वर सर्वजनमनांसि हन हन दारय दारय में वशमानय हुं फट् नमः (अस्त्राय फट्)॥६॥** इससे नेत्रत्रयाय न्यास करें - **ॐ सुरासुर मनुजसुन्दरी हृदय विदारण! सर्वप्रहरणधर! सर्वकामिक! हन हन हृदयं बंधनानि आकर्षय आकर्षय महाबल हुं फट् नमः (नेत्रत्रयाय वौषट्)॥**

प्रथम माला मन्त्र में अमुकं शब्द की जगह साध्य या रोगादि का नाम जोड़ लेवें तो साध्य व्यक्ति अनुकूल होवे तथा रोग का शमन होवे।

ध्यानम् -

देवं पुरुषोत्तमं कमलालया स्वाङ्कस्थया पङ्कजम्
विभ्रत्या परिबद्धमम्बुजरुचा तस्यां निबद्धेक्षणम्।
ध्यायेच्चेतसि शङ्ख पाशमूशलांश्चापेषु खड्गान् गदान्
हस्तैरंकुशमुद्वहन्तमरुणं स्मेरारविन्दननम्॥

पुरश्चरण - पुरश्चरण में चार लाख जप कर अर्द्धचन्द्राकार कुण्ड में पद्म जातिपुष्पों और यवादि से दशांश होम करें।

॥ इति परमात्मा मंत्र प्रयोग॥

॥ भगवान नृसिंह मन्त्र प्रयोगः॥

॥ अथ षडक्षर नृसिंह मन्त्रः॥

मन्त्र : - **आं ह्रीं क्ष्रों क्रौं हुं फट्।**

विनियोगः - **अस्य मन्त्रस्य ब्रह्मा ऋषिः, पंक्ति छन्दः, नरसिंहो देवता,**

सर्वेष्ट सिद्धये जपे विनियोगः।

मेरुतन्त्र में मन्त्र – आं ह्रीं त्रों क्रों ह्रां फट् है।

ऋषिन्यासः – ॐ ब्रह्मऋषये नमः शिरसि। ॐ पंक्ति छन्दसे नमः मुखे। ॐ नरसिंह देवतायै नमः हृदि। विनियोगाय नमः सर्वाङ्गे।

कराङ्गन्यासः	करन्यासः	षडाङ्गन्यासः
आं	अंगुष्ठाभ्यां नमः।	हृदयाय नमः।
ह्रीं	तर्जनीभ्यां नमः।	शिरसे स्वाहा।
क्षौं (क्ष्रौं)	मध्यमाभ्यां नमः।	शिखायै वषट्।
क्रौं	अनामिकाभ्यां नमः।	कवचाय हुँ।
हुं	कनिष्ठिकाभ्यां नमः।	नेत्रत्रयाय वौषट्।
फट्	करतल करपृष्ठाभ्यां नमः।	अस्त्राय फट्।

ध्यानम् –

कोपादालोलजिह्वं विवृतनिजमुखं सोमसूर्याग्निनेत्रम्
पादादानाभिरक्त प्रभमुपरि सितं भिन्नदैत्येंद्रगात्रम् ।
शङ्खं चक्रासिपाशाङ्कुश कुलिशगदादारुणान्युद्वहंतम्
भीमं तीक्ष्णोग्रदष्ट्रं मणिमयविविधाकल्पमीडे नृसिंहम् ॥

॥ यंत्रावरण पूजनम् ॥

विष्णु पीठ का पूजन करें। यन्त्र मध्य में प्रधान देव की मूर्ति स्थापित कर या कल्पना कर यंत्र पूजा करें। इसके बाद प्रथम आवरण की पूजा करें।

प्रथमावरणम् – षट्कोणे आग्नेयादि केसरेषु मध्ये एवं दिक्षु च। **आं हृदयाय नमः। ह्रीं शिरसे स्वाहा। क्ष्रौं शिखायै वषट्। क्रौं कवचाय हुं। हुं नेत्रत्रयाय वौषट्। फट् अस्त्राय फट्।**

षडक्षर नृसिंह यंत्रम्

द्वितीयावरणम् – तद्बहि अष्टदलेषु पूर्वादिक्रमेण – **ॐ चक्राय नमः। ॐ शङ्खाय नमः। ॐ पाशाय नमः। ॐ अङ्कुशाय नमः। ॐ वज्राय नमः। ॐ कौमदक्यै नमः। ॐ खड्गाय नमः। ॐ खेटकाय नमः।**

तृतीय आवरणम् - इस आवरण में इन्द्रादि दिक्पालों व चतुर्थावरण में उनके आयुधों का पूजन तर्पण कर पुष्पाञ्जलि प्रदान करें।

मधुत्रय, रक्तपुष्प व कमल के होम से भूमि धन-धान्य का लाभ होवे। लाजा मधुत्रय से प्रात:काल हवन करें तो कन्या अपने अभीष्ट वर को प्राप्त करें। पायस व अपामार्ग के होम से रोग एवं शत्रु का नाश होवे।

॥ इति षडक्षरनृसिंह मन्त्रप्रयोगः ॥

॥ द्वात्रिंशद्वर्णात्मको मन्त्रः ॥

ॐ उग्रंवीरं महाविष्णुं ज्वलंतं सर्वतोमुखम् ।
नृसिंहं भीषणं भद्रं मृत्युमृत्यं नमाम्यहम् ॥

मृत्युमृत्युं का अर्थ है मृत्यु की मृत्यु करने वाले आप काल के भी काल हैं। अर्थात् कालमृत्यु आपके वश में हैं, मन्त्र में ऐसी भावना रखें।

विनियोग :- **ॐ अस्य मन्त्रस्य ब्रह्मात्रृषिः, अनुष्टुप् छन्दः, श्रीनरसिंहो देवता, हं बीजम्, ईं शक्तिः सर्वेष्टसिद्ध्यर्थे जपे विनियोगः।**

विष्णु के इस स्वरूप को काल का काल स्वरूप माना है। मेरु तन्त्र में भद्रं की जगह रुद्रं है।

ऋषिन्यास :- **ॐ ब्रह्म ऋषये नमः शिरसि। अनुष्टप् छन्दसे नमः मुखे । ॐ नृसिंह देवतायै हृदि। हं बीजाय नमः गुह्ये। ईं शक्त्ये नमः पादयोः। विनियोगाय नमः सर्वाङ्गे।**

कराङ्गन्यासः	**करन्यासः**	**षडाङ्गन्यासः**
ॐ उग्रंवीरं	अंगुष्ठाभ्यां नमः।	हृदयाय नमः।
महाविष्णुं	तर्जनीभ्यां नमः।	शिरसे स्वाहा।
ज्वलंतं सर्वतोमुखं	मध्यमाभ्यां नमः।	शिखायै वषट्।
नृसिंहं भीषणं	अनामिकाभ्यां नमः।	कवचाय हुं।
भद्रंमृत्युमृत्युं	कनिष्ठिकाभ्यां नमः।	नेत्रत्रयाय वौषट्।
नमाम्यहम्	करतल करपृष्ठाभ्यां नमः।	अस्त्राय फट्।

मन्त्रन्यास :- **ॐ उं नमः शिरसि।** इस तरह प्रत्येक अक्षर के पहले **ॐ** तथा बाद में **नमः** कहकर सर्वत्र न्यास करें।

ग्रं ललाटे। वीं नेत्रयो। रं मुखे। मं दक्षिणबाहुमूले। हां दक्षंकर्पूरे। विं

दक्षिणमणिबन्धे। ष्णुं दक्षहस्तांगुलि मूले। ज्वं दक्षहस्तांगुल्यग्रे। लं वामबाहुमूले। तं वामकर्पूरे। सं वाममणिबंधे। वं वामहस्तांगुलि मूले। तों वाम हस्तांगुल्यग्रे। मुं दक्षपादमूले। खं दक्षजानुनि। नृं दक्षगुल्फे। सिं दक्षपादांगुलिमूले। हं दक्षपादांगुल्यग्रे। भीं वामपादमूले। षं वामजानुनि। णं वामगुल्फे। भं वामपादांगुलिमूले। द्रं वामपादांगुल्यग्रे। मृं दक्षिणकुक्षौ। त्युं वामकुक्षौ। मृं हृदि। त्युं गले। नं दक्षपार्श्वे। मां वामपार्श्वे। म्यं लिङ्गे। ॐ हं नमः ककुदि।

ध्यानम् –

माणिक्याद्रिसमप्रभं निजरुचा संत्रस्तरक्षोगणम्
जानुन्यस्तकराम्बुजं त्रिनयनं रत्नोल्लसद्भूषणम् ।
बाहुभ्यां धृतशङ्खचक्रमनिशं दंष्ट्राग्रवक्त्रोल्लसत्
ज्वालाजिह्वमुदग्रकेशनिचयं वन्दे नृसिंहं विभुम् ॥

भगवान से आज्ञा मांगें –

ॐ संविन्मयः परोदेवः परामृतरसप्रियः ।
अनुज्ञां देहि मे देव परिवारार्चनाय ते ॥

पुष्पाञ्जलि प्रदान करें।

॥ अथ यन्त्रपूजनम् ॥

प्रथमावरणम् – षट्कोण के अग्निआदि चार कोणों में (केसरों में) – **ॐ उग्रवीरं हृदयाय नमः। ॐ महाविष्णु शिरसे स्वाहा। ॐ ज्वलन्तं सर्वतोमुखमं शिखायै वषट्। ॐ नृसिंहं भीषणं कवचाय हुं।** मध्ये – **ॐ भद्रं मृत्युमृत्यं नेत्रत्रयाय वौषट्।** दिक्षु – **नमाम्यहं अस्त्राय फट्।**

द्वितीयावरणम् – अष्ट दले पूर्वादिदिशाओं में – **ॐ पक्षीन्द्राय गरुडाय नमः। ॐ शङ्कराय नमः। ॐ शेषाय नमः। ॐ ब्रह्मणे नमः।** अग्निआदि चारों दलों में – **ॐ श्रियै नमः। ॐ ह्रियै नमः। ॐ धृत्यै नमः। ॐ पुष्टयै नमः।**

शारदातिलक के अनुसार अष्टदल के बाद भुपूर में इन्द्रादि लोकपालों की पूजा

है। परन्तु मन्त्रमहोदधि के अनुसार अष्टदल के बाहर ३२ दल यंत्र में।

ॐ नमो विरिंचिविष्ण्वीशभेदिने परमात्मने। सर्गसंस्थिति संहार व्यापृत-व्यक्तमूर्तये॥१॥ नमश्चतुर्धाप्रोद्भूत भूतभीतात्मनो भुवः। भूरिभारार्ति संहर्त्रे भूतनाथय शूलिने ॥२॥ विश्वग्रासाय विकसत्कालकूट विषाशने। तत्कालां कांकितग्रीव नीलकण्ठाय ते नमः ॥३॥ नमो देहार्द्धकांताय दग्धदक्षाध्वराय च। चतुर्वर्गेष्ट सिद्ध्यर्थदायिने मायिनेऽणवे ॥४॥ स्थूलाय मूलभूताय शूलवारितविद्विषे। कालहंत्रे नमश्चन्द्रखण्डमण्डितमौलये ॥५॥ भस्मासक्ताय भक्ताय भुक्ति-मुक्ति प्रदायिने। सकृद्व्यक्त स्वरूपाय शंकराय नमो नमः ॥६॥ नमो अंधकांतकरिपवेऽसुरद्विषे नमोऽस्तु ते द्विरदवराभवभेदिने। विषोल्लसत्फणिकुलबद्धमूर्तये, नमः सदा वृषवरवाहनायते ॥७॥ वियन्मरुद्भुत

वहवायु कुंभनीमखेशख्यमृत मयूखमूर्तये । नमः सदा नरकायावभेदिने भवेह नो भवभयभंगकृद्विभो ॥८॥

इति रुद्रस्वतेन स्तुत्वा साष्टांगं प्रणम्य जपं कुर्यात्। अस्य पुरश्चरणं दशलक्षं जपः एवमर्चन्महादेवं पञ्चाङ्गन्यास पूर्वकम्। दशाक्षर जपासक्तो न सीदेत्स्वेष्टसाधने॥ मनोहराणिगेहानि सुंदर्योवामलोचनाः । धनमिच्छापूरणांतं लभते शिवसेवनात् ॥

॥ इति दशाक्षर रुद्रमन्त्र प्रयोगः ॥

॥ अथ त्वरित्रुद्रमन्त्र प्रयोगः॥

(हेमादिशांति रत्नेषु)

इस मन्त्र का प्रयोग सभी कामनाओं की सिद्धि हेतु तथा विघ्ननाश हेतु किया जाता है। औषधोपचार में यदि दवाकाम नहीं कर रही है तो इसके प्रयोग से मार्गदर्शन होकर रोगी को लाभ प्राप्त होगा।

मन्त्रोयथा - ॐ यो रुद्रो ऽग्नौ योऽप्सुय ओषधीषु यो रुद्रो विश्वाभुवनाविवेश तस्मै रुद्राय नमोऽस्तु॥

विनियोगः - अस्य त्वरितरुद्र मन्त्रस्य अथर्वण ऋषिः, अनुष्टुप् छन्दः, त्वरितरुद्रसंज्ञिका देवता, नमः बीजम्, अस्तु शक्तिः त्वरितरुद्र प्रीत्यर्थे जपे विनियोगः।

अङ्गन्यास	करन्यास	षडङ्गन्यास
ॐ यो रुद्रः	अंगुष्ठाभ्यां नमः।	हृदयाय नमः
अग्नौ	तर्जनीभ्यां नमः।	शिरसे स्वाहा
योऽप्सु	मध्यमाभ्यां नमः।	शिखायै वषट्
ओषधीषु	अनामिकाभ्यां नमः।	कवचाय हुँ।
यो रुद्रो विश्वा भुवना विवेश	कनिष्ठिकाभ्यां नमः।	नेत्रत्रयाय वौषट्।
तस्मै रुद्राय नमोऽस्तु	करतल करपृष्ठाभ्यां नमः।	अस्त्राय फट्।

पादादिन्यास - ॐ यः पादयोः। ॐ रुद्र जङ्घयोः। ॐ अग्नौ जानुनोः। ॐ यः ऊर्वोः। ॐ अप्सु गुल्फयोः। ॐ यः मेढ्रे। ॐ ओषधीषु नाभौ। ॐ यः उदरे। ॐ रुद्रः हृदये। ॐ विश्वाकण्ठे। ॐ भुवनामुखे। ॐ विवेश नासिकायाम्। ॐ तस्मै नेत्रयोः। ॐ रुद्राय भ्रुवोः। ॐ नमः ललाटे। ॐ अस्तु शिरसि।

मूर्द्धादिन्यास - **ॐ यः शिरसि। ॐ रुद्र ललाटे। ॐ अग्नौ नेत्रयोः। ॐ यः कर्णयो। ॐ अप्सु नासिकायाम्। ॐ यः मुखे। ॐ ओषधीषु बाह्वोः। ॐ यः हृदये। ॐ रुद्रः नाभौ। ॐ विश्वा गुह्ये। ॐ भुवना अपाने। ॐ विवेश ऊर्वोः। ॐ तस्मै जानुनोः। ॐ रुद्राय जङ्घयोः। ॐ नमः गुल्फयोः। ॐ अस्तु चरणयोः।**

इस प्रकार न्यास करके शिवजी को शुभमुद्रा दिखावें - **ॐ एषते रुद्रभागः सहस्वस्राम्बिकया तज्जुषस्व स्वाहैषतेरुद्रभाग आखुस्तेपशुः।** इत्यादि मन्त्रों से मुद्रा दिखाकर ध्यान करें।

ॐ रुद्रं चतुर्भुजं देवं त्रिनेत्रं वरदाभयम् ।
दधानमूर्ध्वं हस्ताभ्यां शूलं डमरूमेव च ॥१॥
अङ्क संस्थामुमां पद्मे दधानं च करद्वये ।
आद्ये करद्वये कुंभं मातुलुंगं च बिभ्रतम् ॥२॥

इस प्रकार ध्यान कर शिव पूजा करें। मन्त्र का पुरश्चरण २० हजार जप का है। विशेष जप २ लाख संख्या में करने चाहिये। दशांश होम, तर्पण, मार्जन, ब्राह्मण भोजन करे। जपकाल में भूमिशयन करे एक समय भोजन करें।

जपेत्त्वरितरुद्रं तु सर्वकामसमृद्धये ।
श्रीकामः शांतिकामो जपेल्लक्षमतंद्रितः ॥१॥
बिल्वसमिद्भिः श्रीकामः शांतिकामः शमीमयैः ।
जुहुयादाज्यसंमिश्रैस्तर्पण मार्जनं ततः ॥२॥
जप्त्वा लक्षं सुपुत्रार्थी पायसं जुहुयात्ततः ।
वित्तार्थी श्रीफलैर्होममायुष्कामस्तु दूर्वया ॥३॥
तिलैराज्येन संमिश्रैस्तेस्कामो घृतेन वै ।
व्रीहिभिः पशुकामस्तु राष्ट्रकामस्तु वै यवैः ॥४॥
पायसं सर्वकामेन होतव्यं शर्करान्वितम् ।
मध्वक्तान्याम्रपत्राणि तीव्रज्वरविनाशिना ॥५॥
हिमभूतज्वरार्थं तु गुडूचीभिर्हुनेद् ध्रुवम् ।
सर्वरोग विनाशाय सूर्यस्याभिमुखो जपेत् ॥६॥
अयुते द्वे जपा होमः कार्योऽर्क समिधा शुभः ।
औदुम्बैरन्नकामस्तेजस्कामस्तु बादरैः ॥७॥

अपामार्ग समिध होमात् भूतबाधा विनश्यति ।
ग्रहबाधा विनाशाय जपेत् अश्वत्थसन्निधौ ॥८॥
लवणान्वित दध्यक्तास्तीक्ष्णाग्राश्वत्थ संभवा ।
हूयंते समिधः शुष्काः स्वाहांतं मन्त्रमुच्चरेत् ॥९॥
लाजाहोमेन कन्यार्थीं कन्या प्राप्नोगति रूपिणीम् ।
लाजाश्चमधुसंमिश्राः श्वेतपुष्पाणि वा पुनः ॥१०॥
हूयंते हरिते देशे तस्य विश्वं वशेभवेत् ।
वामाङ्ग मुत्तमं कार्यं स्त्रीवशित्वे विचक्षणैः ॥११॥

होम के स्थान पर जलकुंभ रखें उसको स्पर्श करके १ हजार जप करे उसके जल से अभिषेक द्वारा व शाला को प्रोक्षण करने पर सभी अरिष्ट की शांति होती है।

लाजा होम से पुरुष वाञ्छित पत्नि व कन्या वाञ्छित पति को प्राप्त करे। वृष्टि कामना हेतु तिलों से पलाश समिध से होम करें। वास्तुपूजा, ईशान को बलिद्रव्य आदि प्रदान कर विधिवत् कार्य करें।

॥ इति त्वरितरुद्र प्रयोगः ॥

॥ श्रीकण्ठादि कलामातृका न्यासः॥

कोई भी रुद्र प्रयोग हो, मृत्युंजय प्रयोग या शिव के किसी अन्य स्वरूप का यन्त्र का प्रयोग पुरश्चरणादि, होवें तो श्रीकण्ठादि कलामातृका न्यास करने से विशेष सिद्धि प्राप्त होवें।

विनियोगः - **अस्य श्रीकण्ठादिकलान्यासस्य दक्षिणामूर्ति ऋषिः, गायत्री छन्दः, अर्द्धनारीश्वरो देवता, हलो बीजानि, स्वराः शक्तयः, चतुर्विध पुरुषार्थ सिद्ध्यर्थे न्यासे विनियोगः।**

ऋष्यादिन्यासः - **ॐ दक्षिणामूर्तये नमः शिरसि। ॐ गायत्री छन्दसे नमः मुखे। ॐ अर्द्धनारीश्वर देवतायै नमः हृदये। ॐ हल बीजाय नमः गुह्ये। स्वरशक्तयो नमः पादयोः। ॐ विनियोगाय नमः सर्वाङ्गे।**

हृदयादिन्यास - **ॐ हसां, ॐ हसीं, ॐ हसूं, ॐ ह सैं, ॐ हसौं, ॐ हसः से करन्यास, हृदयादि न्यास करें।**

ध्यानम् –

पाशाङ्कुश वराक्षस्त्रकपाणि शीतांशु शेखरम् ।
त्र्यक्षं रक्तसुवर्णाभमर्द्धनारीश्वरं भजे ॥१॥
बन्धूक काञ्चननिभं रुचिराक्षमालां,
पाशाङ्कुशौ च वरदं निजबाहुदण्डैः ।
बिभ्राणमिन्दुशकलाभरणं त्रिनेत्र-
मर्धाम्बिकेशमनिशं वपुराश्रयामः ॥२॥

॥ न्यास ॥

सभी नाम मन्त्रों के पहिले ॐ ह्सौं और बाद में **नमः** का उच्चारण करते हुये न्यास करे। यथा –

ॐ ह्सौं अं श्रीकण्ठेश पूर्णोदरीभ्यां नमः मस्तके। ॐ ह्सौं आं अनंतेश विरजाभ्यां नमः मुखवृत्ते। ॐ ह्सौं इं सूक्ष्मेश शाल्मलीभ्यां नमः दक्षिण नेत्रे। ईं त्रिमूर्ति लोलाक्षीभ्यां वामनेत्रे। उं अमरेश वर्तुलाक्षीभ्यां दक्षिणकर्णे। ॐ अर्धीश दीर्घघोणाभ्यां वामकर्णे। ऋं भारभूतेश दीर्घमुखीभ्यां दक्षनासापुटे। ॠं तिथीश गोमुखीभ्यां वामनासापुटे। लृं स्थाण्वीश दीर्घजिह्वाभ्यां दक्षगण्डे। लॄं हरेश कुण्डोदरीभ्यां वामगण्डे। एं झिण्टीशोर्ध्वकेशीभ्यां उर्ध्वोष्ठे। ऐं भौतिकेश विकृतमुखीभ्यां अधरोष्ठे। ॐ सद्योजातेश ज्वालामुखीभ्यां उर्ध्वदन्त पंक्तौ औं अनुग्राहेशोल्कामुखीभ्यां अधोदन्तपङ्क्तौ। अं अक्रूरेश श्रीमुखीभ्यां कण्ठे शिरसि। अः महासेनेश विद्यामुखीभ्यां मुखमध्ये।

कं क्रोधीश महाकालीभ्यां दक्षस्कंधे। खं चण्डेश सरस्वतीभ्यां दक्षकर्पूरे। गं पञ्चान्तकेश सर्वसिद्धि गौरीभ्यां दक्षमणिबन्धे। घं शिवोत्तमेश त्रैलोक्य विद्याभ्यां दक्षकराङ्गुलिमूले। ङं एकरुद्रेश मंत्रशक्तिभ्यां दक्षकराङ्गुल्यग्रे। चं कूर्मेशात्मशक्तिभ्यां वामस्कंधे। छं एकनेत्रेश मूलमातृकाभ्यां वामकर्पूरे। जं चतुराननेश लम्बोदरीभ्यां वाममणिबंधे। झं अजेश द्राविणीभ्यां वामकराङ्गुलिमूले। ञं सर्वेश नागरीभ्यां वामकराङ्गुल्यग्रे।

टं सोमेश खेचरीभ्यां दक्षोरुमूले। ठं लाङ्गलीश मञ्जरीभ्यां दक्षजानुनि। डं दारुकेश रूपिणीभ्यां दक्षगुल्फे। ढं अर्धनारीश वारिणीभ्यां दक्षपादाङ्गुलिमूले। णं उमाकान्तेश काकोदरीभ्यां दक्षपादाङ्गुल्यग्रे। तं आषाढीष पूतनाभ्यां वामोरुमूले। थं दण्डीश भद्रकालीभ्यां वामजानुनि। दं अत्रीश योगिनीभ्यां वामगुल्फे। धं मीनेश शंखिनीभ्यां वामपादाङ्गुलिमूले। नं मेषेश तर्जनीभ्यां

वामपादाङ्गुल्युग्रे।

पं लोहिते श कालरात्रिभ्यां दक्षपार्श्वे। फं शिखीश कुब्जिनीभ्यां वामपर्श्वे। बं छगलाण्डेश कपर्दिनीभ्यां पृष्ठे। भं द्विरण्डेश वज्राभ्यां नाभौ। मं महाकालेश जयाभ्यां जठरे। यं त्वगात्मभ्यां वालीश सुमुखेश्वरीभ्यां हृदये। रं असृगात्मभ्यां भुजगेश रेवतीभ्यां दक्षांसे। लं मासात्मभ्यां पिनाकीश माधवीभ्यां ककुंदि। मेदात्मभ्यां खड्गीश वारुणीभ्यां हृदयादि वामांसे। शं अस्थ्यात्मभ्यां केशवायवीभ्यां हृदयादि दक्षकरान्तं। षं मज्जात्मभ्यां श्वेतेश रक्षोविदारिणीभ्यां हृदयादि वामकरान्तं। सं शुक्रात्मभ्यां भृग्वीश सहजाभ्यां हृदयादि दक्षपादाग्रान्तं। हं प्राणात्मभ्यां लकुलीश लक्ष्मीभ्यां हृदयादि वामपादाग्रान्तं। लं शक्त्यात्मभ्यां शिवेश व्यापिनीभ्यां हृदयादि नाभ्यन्तम्। क्षं परमात्मभ्यां संवर्तकेश मायाभ्यां हृदयादि शिरोन्तम्।

इस प्रकार न्यास करके भगवान शिव का ध्यान करें। न्यास में शिव के स्वरूपों व उनकी की शक्तियों का आवाहन है।

अत्र रुद्राः स्मृता रक्ताघृताशूल कपालकाः ।
शक्तयो रुद्रपीठस्थः सिन्दूरारुण विग्रहाः ॥
रक्तोत्पल कपालाभ्यामलङ्कृत कराम्बुजाः ।
न्यस्तास्तिष्ठन्तु सर्वेऽपि शक्ति सौख्य विवर्धनाः ॥

॥ इति शिव कलामातृकान्यासः ॥

॥ दक्षिणामूर्ति शिव ॥

दक्षिणामूर्ति शिव को तन्त्रों का रचियता माना है। बुद्धि, विवेक व ज्ञान की अभिवृद्धि करने वाले एवं जगद्गुरु है। जिन लोगों को सद्गुरु का आश्रय नहीं मिल पा रहा है वे दक्षिणामूर्ति शिव को गुरु मानकर अपनी साधना को आगे बढा सकते हैं। यदि दीक्षित मन्त्र के अलावा अन्य मन्त्र ग्रहण करना है तो विधि इस प्रकार है।

वटवृक्ष के नीचे जाकर गणेश मातृकादि पूजन कर, प्रधानमण्डल पर दक्षिणामूर्ति यंत्र को स्थापित करे। अगर यन्त्र नहीं हो तो चावलों या रंगोली से वस्त्र पर षड्दल बनाये उसके ऊपर अष्टदल बनायें, उसके बाहर चारद्वार युक्त परिधि का भूपूर बनायें, वही रुद्रकलश रखें। भोजपत्र पर मन्त्र को लिखकर कलश में रख देवें। यंत्र व कलश पूजन कर, भोजपत्र को निकालकर मन्त्र का वाचन कर ग्रहण करें और

भावना करें कि यह मन्त्र मुझे सद्गुरु स्वरूप दक्षिणामूर्ति शिव ने प्रदान किया है।

॥ अथ द्वाविंशत्यक्षर दक्षिणामूर्ति मन्त्र ॥

मन्त्रोयथा – "ॐ नमो भगवते दक्षिणामूर्तये मह्यं मेधां प्रयच्छ स्वाहा"।

विनियोग: – ॐ अस्य दक्षिणामूर्तिमन्त्रस्य चतुर्मुख ऋषिः गायत्री छन्दः, वेदव्याख्यानतत्पर – दक्षिणामूर्ति देवता, सर्वेष्ट सिद्धये जपे विनियोगः।

ऋषिन्यास: – ॐ चतुर्मुखर्षये नमः शिरसि। गायत्री छन्दसे नमः मुखे। दक्षिणामूर्तये देवतायै नमः हृदि। विनियोगाय नमः सर्वाङ्गे।

कराङ्गन्यास – ॐ आं ॐ अंगुष्ठाभ्यां नमः। ॐ ईं ॐ तर्जनीभ्यां स्वाहा। ॐ ऊं ॐ मध्यमाभ्यां वषट्। ॐ ऐं ॐ अनामिकाभ्यां हुं। ॐ औं ॐ कनिष्ठाभ्यां वौषट्। ॐ अः ॐ करतल करपृष्ठाभ्यां फट्।

इसी तरह हृदयादि न्यास करें।

ध्यानम् –

वटवृक्षं महोच्छ्रायं पद्मरागफलोज्ज्वलम्
गारुत्मतमयैः पत्रैर्विचित्रैरूप शोभितम्।
नवरत्न महाकल्पैर्लम्ब – मानैरलंकृतम्
विचिन्त्य वटमूलस्थं चिन्तयेल्लोकनायकम् ॥१॥
स्फटिकरजतवर्णं मौक्तिकी – मक्षमाला –
ममृतकलश विद्याज्ञानमुद्रा कराब्जैः।
दधतमुरगकक्षं चन्द्रचूडं त्रिनेत्रम्
विधृत विविधभूषं दक्षिणामूर्तिमीडे ॥२॥
शङ्करं तु शरच्चन्द्र – निभम्भोजमध्यगं
गङ्गाधरं शरच्चन्द्र करोल्लासित शेखरम्।
प्रसन्नवदनाम्भोजं त्रिनेत्रं सुस्मिताननं
दिव्याम्बरधरं देवं गंधमाल्यैरलंकृतम् ॥३॥
नानारत्नमयाकल्पमनुकल्प विभूषितं
मुक्ताक्षमालां दक्षोर्ध्वे ज्ञानमुद्रामधः करे।
वामोर्ध्वे च सुधाकुंभं पुस्तकं तदधः करे
दधानं चिंतयेद् देवं मुनिवृन्दनिषेवितम् ॥४॥

॥ अथ चतुर्विंशत्यक्षर दक्षिणामूर्ति मंत्र ॥

मन्त्र - ॐ नमो भगवत दक्षिणामूर्तये मह्यं मेधां प्रज्ञां प्रयच्छ स्वाहा।

मेरुतन्त्र में इसके ऋषि ब्रह्मा, छन्दगायत्री, देवता दक्षिणामूर्ति, बीज मेधा, शक्ति स्वाहा एवं विनियोग मेधा समृद्धये कहा है।

मेरुतन्त्र में मेधा का अर्थ वाक्शक्ति एवं प्रज्ञा का अर्थ स्मरण शक्ति बताया है और शारदातिलक मे मेधा का पाठान्तर प्रज्ञा बताया है। (३२ अक्षर वाले मन्त्र में)

ध्यानम् –

व्याख्यापीठेऽतिशुभ्रं च भस्मोद्धलितविग्रहम् ।
ज्ञानमुद्राक्षमालाढ्यं वीणा पुस्तक धारिणम् ॥

॥ अथ षट्त्रिंशदक्षर मन्त्र प्रयोगः ॥

(शारदातिलके)

ॐ ह्रीं दक्षिणामूर्तये तुभ्यं वटमूलनिवासिने ।
ध्यानैकनिरतांगाय नमो रुद्राय शंभवे ह्रीं ॐ ॥

विनियोगः - **अस्य श्रीदक्षिणामूर्तिमन्त्रस्य शुकऋषिः, अनुष्टुप्छन्दः, दक्षिणामूर्तिशंभुर्देवता, चतुर्विध पुरुषार्थ सिद्धये जपे विनियोगः।**

ऋषिन्यासः - **शुकऋषये नमः शिरसि, अनुष्टुप्छन्दसे नमः मुखे, दक्षिणामूर्तिशंभुर्देवता नमः हृदि। विनियोगाय नमः सर्वाङ्गे।**

अङ्गन्यास	करन्यास	षडङ्गन्यास
ॐ ह्रीं दक्षिणामूर्ति ह्रीं ॐ	अंगुष्ठाभ्यां नमः।	हृदयाय नमः
ॐ ह्रीं तुभ्यं ह्रीं ॐ	तर्जनीभ्यां नमः।	शिरसे स्वाहा
ॐ ह्रीं वटमूलनिवासिने ह्रीं ॐ	मध्यमाभ्यां नमः।	शिखायै वषट्
ॐ ह्रीं ध्यानैकनिरतांगाय ह्रीं ॐ	अनामिकाभ्यां नमः।	कवचाय हुँ।
ॐ ह्रीं नमो रुद्राय ह्रीं ॐ	कनिष्ठिकाभ्यां नमः।	नेत्रत्रयाय वौषट्।
ॐ ह्रीं शंभवे ह्रीं ॐ	करतल करपृष्ठाभ्यां नमः।	अस्त्राय फट्।

मन्त्रवर्णन्यासः - **ॐ नमः मूर्ध्नि। ह्रीं नमः भाले। दं नमः दक्षिणनेत्रे। क्षिं नमः वामनेत्रे। णां नमः दक्षिणकर्णे। मूं नमः वामकर्णे। र्तं नमः दक्षिणगंडे। यें नमः वामगंडे। तुं नमः नासिकयोः। भ्यं नमः मुखे। वं नमः दक्षिण स्कंधे। टं नमः दक्षिणकर्पूरे। मूं नमः दक्षिण मणिबन्धे। लं नमः दक्षहस्तांगुलिमूले।**

निं नमः दक्षहस्तांगुल्यग्रे। वां नमः वामस्कंधे। सिं नमः वामकर्पूरे। नें नमः वाममणिबन्धे। ध्यां नमः वामहस्तांगुलिमूले। नै नमः वामहस्तांगुल्ग्रे। कं नमः गले। निं नमः स्तनयोः। रं नमः हृदि। तां नमः नाभौ। गां नमः कट्याम्। यं नमः गुह्ये। नं नमः दक्षिणोरु। मों नमः दक्षिण जानुनि। रूं नमः दक्षिण गुल्फे। द्रां नमः दक्षिणपादमूले। यं नमः दक्षिणपादांगुल्यग्रे। शं नमः वामोरू। भं नमः वामजानुनि। वें नमः वामगुल्फे। ह्रीं नमः पादांगुलिमूले। ॐ नमः वामपादांगुल्यग्रे।

ध्यानम् –

सजलैः स्थलजैः पुष्पैरामोदिभिरलंकृतम् ।
शृण्वद्भिर्वेदशास्त्राणि शुकवृन्दैर्निषेवितम् ॥
संसारतापविच्छेद कुशलच्छायमद्भुतम् ।
विचिंत्य तस्य मूले रत्नसिंहासने शुभे ॥
आसीनममिताकल्पं शरच्चन्द्रनिभाननम् ।
स्तूयमानं मुनिगणै दिव्यज्ञानाभिलाषिभिः ॥
संस्मरेज्जगतामाद्यं दक्षिणामूर्तिमव्ययम् ॥१॥
कैलासाद्रिनिभं शशांकशकलस्फूर्जज्जटामंडितं ।
नासालोकनतत्परं त्रिनयनं वीरासनाध्यासितम् ।
मुद्राटंक कुरंग जानु विलसत्पाणिं प्रसन्नाननं ।
कक्षाबद्धभुजंगमं मुनिवृतं वंदे महेशं परम् ॥२॥

॥ यंत्र पूजनम् ॥

यंत्र मध्य में प्रधान देव का पूजन कर यंत्रावरण की पूजा की आज्ञा माँगे -

ॐ संविन्मय परोदेव परामृतरसप्रिय ।
अनुज्ञां देहि मे देव परिवारार्चनाय ते ॥

प्रथमावरणम् - षट्कोण में आगेयादि चारों कोणों में - **ॐ आं ॐ हृदयाय नमः। ॐ ईं ॐ शिरसे स्वाहा। ॐ ऊं ॐ शिखायै वषट्। ॐ ऐं ॐ कवचाय हुँ।**

देवताग्रे - **ॐ औं ॐ नेत्रत्रयाय वौषट्। देवपश्चिमे - ॐ अः ॐ अस्त्राय फट्।** षडाङ्ग का पूजन तर्पण कर पुष्पाञ्जलि प्रदान करें।

द्वितीयावरणम् - (अष्टदले) पूर्वादिक्रमेण - **ॐ सरस्वत्यै नमः। सरस्वति**

दक्षिणा मूर्ति यंत्रम्

श्री पादुकां पूजयामि तर्पयामि नमः (इतिसर्वत्र)। ॐ ब्रह्मणेनमः। ॐ सनकाय नमः। ॐ सनन्दाय नमः। ॐ सनत्कुमाराय नमः। ॐ शुकाय नमः। ॐ व्यासाय नमः। ॐ गणेशाय नमः। पुष्पगंधार्चन तर्पण करके पुष्पाञ्जलि प्रदान करें।

ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल । भक्त्या समर्पये तुभ्यं (अमुक) द्वितीयावरणार्चनम् ॥

तृतीयावरणम् - (भूपूरे द्वारदेशे) - ॐ सिद्धाय नमः। ॐ गंधर्वाय नमः। ॐ योगीन्द्राय नमः। विद्याधराय नमः।

चतुर्थावरण में (भूपूरे) इन्द्रादि लोकपालों का तथा उनके बाहर पञ्चमावरण में उनके आयुधों की पूजा करें। सबका पूजन तर्पण कर मंत्र "ॐ अभीष्ट सिद्धिं...." से पुष्पाञ्जलि देवें।

इसका ३ लाख जप का पुरश्चरण है।

अयुतद्वय संयुक्तं गुणलक्षं जपेन्मनुम्। तद्दशांशं तिलै शुद्धैर्जहुयात् क्षीरसंयुतैः ॥ नित्यं सहस्त्रमष्टार्द्धं परं विंदति वाड्मयम्। त्रिवारं जप्तमेतेन मनुनां सलिलं पिबेत ॥ नित्यशो दक्षिणामूर्ति ध्यायन् साधकसत्तमः। शास्त्रव्याख्यान सामर्थ्यं लभते वत्सरांतरे ॥ ब्राह्मीसैंधवसिद्धार्थ वचाकुष्ठकणौत्पलैः। सुगंधि संयुतैः कल्कैः शृतं ब्राह्मीरसेघृतम्॥ मनुनानेन संजप्तमयुतं साधुसाधितम्। निपीतं कविताकांतिरक्षायुः श्रीधृतिप्रदम्।

॥ अथ मृत्युञ्जय मंत्र विविध प्रयोगः ॥

बहुधा मृत्युञ्जय प्रयोग रोग-पीड़ा निवारण में ही करते हैं। ग्रहपीड़ा शमन में भी शुभ है। शिव प्रतिमा व शिवलिङ्ग पर अलग-अलग कामना के लिये अलग-अलग अभिषेक द्रव्य हैं। अभिचार व प्रेतादि दोष में सरसों के तेल का अभिषेक, उष्णज्वर, टाईफाईड में दही की छाछ से, लक्ष्मी प्राप्ति हेतु गन्ने का रस, पुष्टि के लिए आम्ररस, ब्लडप्रेशर में मौसमी-संतरा, हृदय पीड़ा में दूर्वा रस के साथ फलों का रस, सर्वशांति हेतु बैल के श्रृंग द्वारा या ताम्र, रजत के श्रृंग द्वारा कामना द्रव्यों से अभिषेक करें। यंत्रार्चन में अधिकांशतः चतुर्लिंगतो या द्वादशलिङ्गतोभद्र मण्डल बनाते है। यंत्र का प्रचलन कम है।

मृत्युञ्जय यन्त्र के अर्चन से पूजा अधिक फलदायी है।

एकाक्षर मन्त्र - **"हौं"**। इसका प्रयोग पहले दिया जा चुका है।

त्र्यक्षरी मन्त्र - **"ॐ जूं सः"**। इति मन्त्र।

अन्य ऋषिमत से - **"हौं जूं सः"**।

विनियोगः - **ॐ अस्य श्रीत्र्यक्षरात्मक मृत्युञ्जय मंत्रस्य कहोल ऋषिः। देवी गायत्री छन्दः। श्रीमृत्युञ्जय देवता जूँ बीजं, सः शक्तिः ॐ कीलकम्। सर्वेष्टसिद्ध्यर्थे जपे विनियोगः।**

ऋषिन्यासः :- **कहोलऋषये नमः शिरसि। देवी गायत्रीछन्दसे नमः मुखेः। मृत्युञ्जयदेवतायै नमः हृदि। जूँ बीजाय नमः गुह्ये। सः शक्तये नमः पादयोः।**

करन्यासः :- **सां अंुष्ठाभ्यां नमः। सीं तर्जनीभ्यां नमः। सूं मध्यमाभ्यां नमः। सैं अनामिकाभ्यां नमः। सौं कनिष्ठिकाभ्यां नमः। सः करतलपृष्ठाभ्यां नमः।**

हृदियादिन्यास :- **सां हृदयाय नमः । सीं शिरसे स्वाहा । सूं शिखायै वषट्। सैं नेत्रत्रयाय वौषट्। सौं कवचाय हूँ। सः अस्त्राय फट्।**

न्यासं विधाय मृत्युञ्जयं ध्यायेत्-

ॐ चन्द्रार्काग्निविलोचनं स्मितमुखं पद्मद्वयान्तः स्थितं
मुद्रापाशामृगाक्षसूत्र विलसत्पाणि हिमांशुप्रभम्
कोटीरेन्दुगलंत्सुधास्नुततनुं हारादिभूषोज्ज्वलं
कान्त्याविश्वविमोहनं पशुपतिं मृत्युञ्जयं भावयेत् ॥

ॐ जूँ सः , इति मूलमंत्रं जपेत्।

यन्त्रपूजनम् - यंत्रमध्य में षट्कोण बनायें और उसके बाहर भूपुर बनायें।

यन्त्रमध्य में पूर्वादिक्रम से वामादि नवपीठ शक्तियों का पूजन करें। यथा - **ॐ वामायै नमः, ॐ ज्यैष्ठायै नमः, ॐ काल्यै नमः, ॐ कलविकरिण्यै नमः, ॐ बलविकरिण्यै नमः, ॐ बलप्रमथिन्यै नमः, ॐ सर्वभूतदमन्यै नमः, मध्ये - ॐ मनोन्मन्यै नमः।**

प्रथमावरणम् - षट्कोण में **सां सीं सूं सैं सौं सः** इत्यादि जो षडङ्गन्यास करें। उन्हे पहले आग्नेयादि चार कोणों में पश्चात् देवता के अग्र व पृष्ठभाग में हृदयादि न्यास से पूजा करे।

द्वितीयावरणम् में इन्द्रादिलोकपालों का तथा उनके बाहर उनके आयुधों की तृतीय आवरण की पूजा अर्चन तर्पण कर पुष्पाञ्जलि प्रदान करें।

चतुरक्षरी मृत्युञ्जय मंत्र - यथा ॐ हौं जूं सः।

चतुरक्षरी अमृतमृत्युञ्जय मन्त्रः यथा - ॐ वं जूं सः। इनके ऋष्यादि पूर्ववत् त्र्यक्षरी मन्त्र के समान है।

नवाक्षरी मृत्युञ्जय - यथा ॐ जूं सः पालय पालय।

दशाक्षरीमृत्युञ्जय मन्त्र यथा - ॐ जूं सः मां पालय पालय।

(मां के स्थान पर रोगी का नाम द्वितीया विभक्ति का एक वचन बनाकर जोड़ देना चाहिये)

द्वादशाक्षरीमृत्युञ्जय मन्त्रः - ॐ जूं सः पालय पालय सः जूं ॐ। इन सभी मंत्रों के ऋष्यादि त्र्यक्षरी मन्त्र के समान है।

चन्द्रार्काग्नि विलोचनं स्मितमुखं पद्मद्वयान्तः स्थितं
मुद्रापाशं मृणालसूत्र विलसत्पाणि हिमांशु प्रभम् ।
कोटीन्दु प्रगलत सुधाप्लुततनुं हारादिभूषोज्ज्वलं
कान्तै विश्वविमोहनं पशुपतिं मृत्युञ्जयं भावये ।

द्वादशाक्षरीमृत्युञ्जय यंत्रम्

अन्य साध्य प्रयोग मन्त्र –
ॐ हौं जूं सः (अमुकं) जीवय-जीवय पालय-पालय सः जूं हौं ॐ।

॥ पौराणिक मृत्युञ्जय मन्त्र ॥

ॐ मृत्युञ्जय महारुद्र त्राहि मां शरणागतम् ।
जन्ममृत्युजराव्याधिपीड़ितं कर्मबन्धनैः ॥

॥ द्वात्रिंशदक्षर त्र्यम्बक मन्त्र प्रयोगः ॥

(आयु एवं पुष्टिकर्त्ता)

मन्त्रोयथा –

ॐ त्र्यम्बकं यजामहे सुगंधिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥

द्वितीयप्रकाराः – (पतिसुख प्राप्ति में बाधा निवृत्ति हेतु)

जिन कन्याओं का विवाह नहीं हो पा रहा है अथवा पति से किसी विवाद के कारण मातापिता के घर रह रही है वे इस द्वितीय मन्त्र का जाप कर लाजा होम मधुत्रय से करे तो वाञ्छित पति को प्राप्त करें।

मन्त्रो यथा –

ॐ त्र्यम्बकं यजामहे सुगंधिं पतिवेदनम् ।
उर्वारुकमिव बन्धनादितो मुक्षीय मामुतः ॥

अर्थात् हे त्र्यम्बक! शिव आपका पूजन यजन करते हैं, जो कन्यायें विवाह नहीं होने के कारण या अन्य विवाद के कारण पतिवेदना से पीड़ित है वे वाञ्छित वर एवं उच्चकुल में उत्पन्न पुष्ट सुगंधित (यशवान) पति को प्राप्त कर मातापिता

के बंधन से मुक्त हो जाये जैसे पका हुआ खरबूजा बेल से अलग हो जाता है।

विलोमाक्षर त्र्यम्बक मंत्रः -

ॐ त्ताममायक्षीर्मुत्योमृ न् नान्धब वमिकरुर्वाउ ।
मृनर्धव ष्टिपुन्धिंगंसु हेमजाय कंम्बत्र्य ॥

इसके आगे-पीछे लोम विलोम **ॐ कार व्याहृति** आदि बीजों को लगाकर भी जप किया जा सकता है।

तांत्रिक विधानों में मन्त्रो में विशेष चैतन्यता लाने के विविध उपाय है उनमें विलोम मन्त्र का जाप भी है।

जिस प्रकार सीढ़ियों द्वारा छत के ऊपर पहुँच गये परन्तु नीचे आने के लिये पुनः छत से नीचे (विलोम क्रम) आना पड़ेगा इससे ऊपर नीचे के धरातल से पूर्ण सामञ्जस्य होगा। इसे पूर्ण एक आवृत्ति कहते है।

जिस तरह कुण्डलनी शक्ति को मूलाधार चक्र से उठाकर सहस्रार में ले जाकर पुनः सहस्रार से मूलाधार चक्र में लाना इस तरह आवृत्ति क्रम हुआ इस तरह बार-बार अभ्यास करना ही पूर्ण योगाभ्यास साधना है। ऐसा ही क्रम मन्त्र साधना में है।

इस तरह त्र्यम्बक मन्त्र के निम्न भेद हुये -

१. ३२ अक्षर के मंत्र का लोम पाठ किया जाय।

२. ३२ अक्षर के विलोमाक्षर मंत्र का जप किया जाय।

अक्षर सः विलोम करने में बाधा आती है तो विलोम के अन्य साधारण प्रयोग इस प्रकार है। -

१. पहले नींचे की पंक्ति उसके बाद उपर वाली पंक्ति पढ़ें।

२. विलोम पाद क्रम से। मन्त्र ३२ अक्षर का है। इससे ८-८ अक्षर का एक-एक पद हुआ। अतः चतुर्थ, तृतीय, द्वितीय एवं चरण को पढ़ने से पाद विलोम क्रम हुआ। मंत्र यथा -

ॐ मृत्योर्मुक्षीय मामृतात् उर्वारुकमिव बन्धनात् ।
सुगंधिं पुष्टिवर्धनं त्र्यम्बकं यजामहे ॥

३. लोम मन्त्र उसके बाद विलोम मन्त्र सहित पढ़ने से ६४ अक्षर से १ आवृत्ति हुई।

४. लोम मन्त्र उसके बाद विलोम मन्त्र पश्चात् पुनः लोम मन्त्र सहित ९६ अक्षर

पढ़ने पर एक आवृत्ति होगी।

॥ त्रि–त्रिंशदक्षर त्र्यम्बक मन्त्र प्रयोगः ॥

त्र्यम्बकं यजामहे............। ऋषा के पहले ॐ लगायें। आगे व पीछे दोनों ओर ॐ लगाने से ३४ अक्षर का मन्त्र हुआ।

विनियोगः – **ॐ अस्य त्र्यम्बक मन्त्रस्य वसिष्ठ ऋषिः, अनुष्टुप् छन्दः त्र्यम्बकपार्वतीपतिर्देवता, त्र्यं बीजं, बं शक्तिः, कं कीलकं सर्वेष्ट सिद्ध्यर्थे जपे विनियोगः।**

ऋषिन्यासः – **ॐ वसिष्ठर्षये नमः शिरसि। अनुष्टुप् छंदसे नमः मुखे। त्र्यंम्बकपार्वतीपतिर्देवतायै नमः हृदि। त्र्यं बीजाय नमः गुह्ये। बं शक्तये नमः पादयोः। कं कीलकाय नमः नाभौ। विनियोगाय नमः सर्वाङ्गे।**

अङ्गन्यास	करन्यास	षडङ्गन्यास
ॐ त्र्यंबकं	अंगुष्ठाभ्यां नमः।	हृदयाय नमः
यजामहे	तर्जनीभ्यां नमः।	शिरसे स्वाहा
सुगंधिं पुष्टिवर्धनं	मध्यमाभ्यां नमः।	शिखायै वषट्
उर्वारुकमिव बंधनान्	अनामिकाभ्यां नमः।	कवचाय हुँ।
मृत्योर्मुक्षीय	कनिष्ठिकाभ्यां नमः।	नेत्रत्रयाय वौषट्।
मामृतात्	करतल करपृष्ठाभ्यां नमः।	अस्त्राय फट्।

॥ मन्त्रवर्णन्यासः ॥

ॐ त्र्यं नमः पूर्वमुखे। ॐ बं नमः पश्चिममुखे। ॐ कं नमः दक्षिणमुखे। ॐ यं नमः उत्तरमुखे। ॐ जां नमः उरसि। ॐ मं नमः कण्ठे। ॐ हें नमः मुखे। ॐ सुं नमः नाभौ। ॐ गं नमः हृदि। ॐ धिं नमः पृष्ठे। ॐ पुं नमः कुक्षौ। ॐ ष्टिं नमः लिङ्गें। ॐ वं नमः गुदे। ॐ र्धं नमः दक्षिणोरुमूले। ॐ नं नमः वामोरुमूले। ॐ उं नमः दक्षिणोरुमध्ये। ॐ र्वां नमः वामोरुमध्ये। ॐ रूं नमः दक्षिणजानुनि। ॐ कं नमः वामजानुनी। ॐ मिं नमः दक्षिणजानुवृत्ते। ॐ वं नमः वामजानुवृत्ते। ॐ बं नमः दक्षिणस्तने। ॐ धं नमः वामस्तने। ॐ नां नमः दक्षिणपार्श्वे। ॐ मृं नमः वामपार्श्व। ॐ त्यों नमः दक्षिणपादे। ॐ र्मुं नमः वामपादे। ॐ क्षीं नमः दक्षिणकरे। ॐ यं नमः वामकरे। ॐ मां नमः दक्षनासायाम्। ॐ मृं नमः वामनासायम्। ॐ तां नमः मूर्ध्नि।

पदन्यासः – **ॐ त्र्यंबकं शिरसि। यजामहे भ्रुवोः। सुगंधिं नेत्रयोः। पुष्टिवर्धनं**

मुखे। उर्वारुकं गण्डयोः। इव हृदये। बंधनात् जठरे। मृत्योः लिङ्गे। मुक्षीय हृदये। मा जान्वोः। अमृतात् पादयोः।

मूलमन्त्र से व्यापकन्यास करें।

ध्यानम् –

हस्ताभ्यां कलशद्वयामृतरसैराप्लावयंतं शिरो
द्वाभ्यां तौ दधतं मृगाक्षवलये द्वाभ्यां वहंतं परम्।
अङ्कन्यस्तकरद्वयामृतघटं कैलाशकांतं शिवं
स्वच्छांभोजगतं नवेन्दुमुकुटं देवं त्रिनेत्रं भजे ॥

॥ यन्त्रावरण पूजनम् ॥

त्र्यंबक पूजन यंत्रम्

लिङ्गतोभद्रमण्डल या सर्वतोभद्रमण्डल पर मण्डूकादि परतत्वांत पीठ देवतायै नमः से पूजन कर शिव की नवपीठशक्तियों का पूजन करें।

पूर्वादिक्रमेण – ॐ वामायै नमः। ॐ ज्येष्ठायै नमः। ॐ रौद्रयै नमः। ॐ काल्यै नमः। ॐ कलविकरण्यै नमः। ॐ बलविकरण्यै नमः। ॐ बलप्रमथिन्यै नमः। ॐ सर्वभूतदमन्यै नमः। मध्ये – ॐ मनोन्मन्यै नमः।

स्वर्ण या ताम्र यंत्र का अग्न्युत्तारण करें, दुग्धजल धारा से शोधन का भद्रमण्डल पर – **ॐ नमो भगवते सकलगुणात्मशक्तियुक्ताय अनंताय योगपीठात्मने नमः।** इसके बाद प्रधानदेव का पूजन करें।

पुष्पाञ्जलि प्रदान करते हुये विनम्रभाव से आज्ञा मांगें।

**ॐ संविन्मयः परो देवः परामृतरसप्रियः।
अनुज्ञां शिव मे देहि परिवारार्चनाय च ॥**

यंत्र पूजा में प्रत्येक देवता की नामावलि में प्रथमा से सम्बोधन करते हुये

'**पादुकां पूजयामि तर्पयामि**' से पुष्पगंधार्चन व तर्पण करें।

प्रथमावरणम् - (षट्कोणे) - अग्निकोणे **ॐ त्र्यंबकं हृदयाय नमः। हृदये श्री पादुकां पूजयामि तर्पयामि।** (नैऋत्ये) **यजामहे शिरसे स्वाहा, शिर श्री पा.।** (वायवे) **सुगंधि पुष्टिवर्धनं शिखायै वषट् शिखा श्री पा.** (ईशाने) **उर्वारुकमिव बंधनात् कवचाय हुं, कवच श्री पा.।** (देवाग्रे) **मृत्योर्मुक्षीय नेत्रत्रयाय वौषट्, नेत्र श्री पा.।** (मध्ये) **मामृतात् अस्त्राय फट्, अस्त्र श्री पा.।** पुष्पाञ्जलि देवें।

अभीष्टसिद्धिं मे देहि शरणागतवत्सल ।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥

द्वितीयावरणम् - (अष्टदले पूर्वादिक्रमेण) - **ॐ अर्कमूर्तये नमः, अर्कमूर्ति श्री पादुकां पूजयामि तर्पयामि।** (इसी तरह सभी जगह कहते हुये गंधार्चन तर्पण करें)। **ॐ इन्द्रमूर्तये नमः। ॐ वसुधामूर्तये नमः। ॐ तोयमूर्तये नमः। ॐ वह्निमूर्तये नमः। ॐ वायुमूर्तये नमः। ॐ आकाश मूर्तये नमः। ॐ यजमान मूर्तये नमः। ॐ इत्यष्टौ मूर्तीः पूजयित्वा पुष्पाञ्जलिं च दद्यात्।**

अभिष्टसिद्धिं मे देहि शरणागतवत्सल ।
भक्त्या समर्पयेतुभ्यं (अमुकावरणार्चनम्) द्वितीयावरणार्चनम्॥

तृतीयावरणम् - (तद्वाहेऽष्टदले प्राचीक्रमेण) - **ॐ रमायै नमः, रमा श्री पादु.। ॐ राकायै नमः, राका श्री पादुका.। ॐ प्रभायै नमः, प्रभाश्री पादु.। ॐ ज्योत्स्नायै नमः, ज्योत्स्नाश्री पादु.। ॐ पूर्णायै नमः, पूर्णाश्री पादु.। ॐ उषायै नमः, उषाश्री पादु.। ॐ पूरण्यै नमः, पूरणीश्री पादु.। ॐ सुधायै नमः, सुधाश्री पादु.। इत्यष्टौ शक्तिः पूजयित्वा पुष्पाञ्जलिं च दद्यात्।**

अभीष्ट सिद्धिं..................।

चतुर्थावरणम् - (तद्वाहेऽष्टदले प्राचीक्रमेण) - **ॐ विश्वायै नमः, विश्वाश्री पादु.। ॐ विद्यायै नमः, विद्याश्री पादु.। ॐ सितायै नमः, सिताश्री पादु.। ॐ प्रह्वायै नमः, प्रह्वाश्री पादु.। ॐ सारायै (रारायै) नमः, सारा श्रीपादु.। ॐ संध्यायै नमः, संध्या श्रीपादु.। ॐ शिवायै नम, शिवाश्रीपादु.। ॐ निशायैनमः, निशा श्रीपादु.।**

ॐ इत्यष्टौ शक्तिः पूजयित्वा पुष्पाञ्जलिं च दद्यात् (अभीष्ट सिद्धिं.............।)

पञ्चमावरणम् - (तद्वाहेऽष्टदले प्राचीक्रमेण) - **ॐ आर्यायै नमः, आर्या श्रीपादु.। ॐ प्रज्ञायै नमः, प्रज्ञाश्रीपादु.। ॐ प्रभायै नमः, प्रभा श्रीपादु.। ॐ**

मेधायै नमः, मेधा श्रीपादु.। ॐ शान्त्यै नमः, शान्ति श्रीपादु.। ॐ कान्त्यै नमः, कान्ति श्रीपादु.। ॐ धृत्यै नमः, धृति श्रीपादु.। ॐ मृत्यै नमः, (अन्यत्र ॐ सत्यै नमः भी है) मृति श्रीपादु.।

इत्याष्टौ शक्तिः पूजयित्वा पुष्पाञ्जलिं च दद्यात्। (अभीष्ट सिद्धिं..................।)

षष्ठमावरणम् - (तद्बाहेऽष्टदले प्राचीक्रमेण) - **ॐ धरायै नमः, धरा श्रीपादु.। ॐ मायायै नमः (पाठान्तर उमायै नमः) माया श्रीपादु.। ॐ अवन्यै नमः, (पाठान्तर पावन्यै) अवनि श्रीपादु.। ॐ पद्मायै नमः पद्मा श्रीपादु.। ॐ शान्तायै नमः, शांता श्रीपादु.। ॐ मोघायै नमः (पाठान्तर मोघायै नमः) मोघा श्रीपादु.। ॐ जयायै नमः, जया श्रीपादु.। ॐ अमला नमः, अमलायै श्रीपादु.।**

इत्याष्टौ शक्तिः पूजयित्वा पुष्पाञ्जलिं च दद्यात्। (अभीष्ट सिद्धिं..................।)

सप्तमावरणम् - भूपूर में इन्द्रादि दिक्पालों की पूजा करें । **ॐ इन्द्राय नमः, इन्द्र श्रीपादु.। ॐ अग्नये नमः, अग्नि श्रीपादु.। ॐ यमाय नमः, यम श्रीपादु.। ॐ निर्ऋतये नमः, निरुत श्रीपादु.। ॐ वरुणाय नमः, वरुण श्रीपादु.। ॐ वायवे नमः, वायु श्रीपादु.। ॐ कुबेराय नमः, कुबेर श्रीपादु.। ॐ ईशानाय नमः, ईशान श्रीपादु.। ॐ ब्रह्मणे नमः ब्रह्मा श्रीपादु.। ॐ अनन्ताय नमः, अनन्त श्रीपादु.।**

इत्याष्टौ शक्तिः पूजयित्वा पुष्पाञ्जलिं च दद्यात्। (अभिष्ट सिद्धिं..................।)

अष्टमावरणम् - इन्द्रादि के समीप भूपूर में उनके आयुधों की पूजा करें । **ॐ वज्राय नमः। ॐ शक्तयै नमः। ॐ दण्डाय नमः। ॐ खड्गाय नमः। ॐ पाशाय नमः। ॐ अङ्कुशाय नमः। ॐ गदायै नमः। ॐ त्रिशूलाय नमः। ॐपद्माय नमः। ॐ चक्राय नमः।**

सभी का गंधाक्षत मिश्रित पुष्पों या पत्तियों से पूजन एवं तर्पण कर पुष्पञ्जलि देवें।

एक लक्ष जप कर पुरश्चरण करके दशद्रव्यों से होम करैं।

बिल्वं पलाशं खदिरं परं च तिल सर्षपौ ।
दुग्धं दधिपुनर्दुर्वा होमे तानि विदुर्बुधाः ॥

बिल्व समिद् से धन प्राप्ति, पलाश से तेजवृद्धि, खदिर से कान्ति, वटवृक्षसमिध से धनायु वृद्धि, तिल के होम से पापों से मुक्ति, सरसों के हवन से शत्रुनाश, पायस

होम से रक्षा होवे कीर्ति व कांति बढ़े। गोदुग्ध होम से कृत्या का (पिशाचोपद्रव) नाश, दहि के होम से विद्वेष व कलह दूर होवें।

अमान्न से आयुवृद्धि, पायसान्न से धनायु लाभ। दुर्वा के होम से शतायु जम्बूकाष्ठ समिद् (जामुन) से धनायु लाभ होवे। लाजा होम से कन्या को वर प्राप्ति होवे।

लाजैर्विशुद्धैजुहुयात्कन्या सैषा वराप्तये ।
क्षीरद्रुमसमिद्धोमाद्ब्राह्मणा दीन् वशं नयेत् ।
स्नात्वा सहस्त्रं प्रजपेदादित्याभिमुखो मनुम् ।
आधिव्याधि विनिर्मुक्तो दीर्घमायुरवाप्नुयात् ।

सूर्य के सम्मुख जप करने से दीर्घायु होवें।

॥ मृत्युञ्जय के भेद ॥

मृत्युञ्जयस्त्रिधा प्रोक्त आद्यो मृत्युञ्जयः स्मृतः ।
मृतसञ्जीवनी चैव महामृत्युञ्जयस्तथा ॥
मृत्युञ्जयः केवलः स्यात् पुटितो व्याहृतित्रयैः ।
तारं त्रिबीजं व्याहृत्य पुटितो मृतसञ्जीवनी ॥
तारं त्रिबीजं व्याहृत्य पुटितैस्तैस्त्र्यम्बकः ।
महामृत्युञ्जयः प्रोक्तः सर्वमन्त्रविशारदैः ॥

उक्त उद्धार मन्त्रों के अनुसार '**त्र्यम्बक यजामहे..**' ऋचा को आद्य व अन्त में व्याहृति '**भू भुर्वः स्वः**' से संपुटित करने पर मन्त्र को '**मृत्युञ्जय**' कहा गया है। त्रिबीज - **हौं जूं सः** एवं व्याहृति त्रय से संपुटित मन्त्र को '**मृतसञ्जीवनी**' मंत्र कहा है।

इस मृतसञ्जीवनी मन्त्र में त्रिबीज और व्याहृति त्रय के प्रत्येक अक्षर के पहले ॐ लगाया जाता है। यही महामृत्युञ्जय मन्त्र कहा है जिसे शुक्राचार्य द्वारा आराधित माना जाता है।

॥ भेद ॥

१. अतः केवल मृत्युञ्जय मन्त्र :- (४८ अक्षरात्मक)

ॐ भूः ॐ भुर्वः ॐ स्वः ॐ त्र्यम्बकं यजामहे .... ॐ स्वः ॐ भुवः ॐ भूः।

२. मृतसञ्जीवनी मन्त्र :- (५२ अक्षरात्मक)

ॐ हौं जूं सः ॐ भूर्भुवः स्वः ॐ त्र्यम्बकं यजामहे .... ॐ स्वः भुवः भूः ॐ सः जूं हौं ॐ।

कहीं-कहीं हौं रेफ अर्थात् अग्नि तत्व "र" युक्त है अर्थात् **ह्रौं जूं सः** भी है।

३. महामृत्युञ्जय मन्त्र :- (६२ अक्षरात्मक) शुक्राराधित

ॐ हौं ॐ जूं ॐ सः ॐ भूः ॐ भुवः ॐ स्वः ॐ त्र्यम्बकं यजामहे .... (ऋचा)ॐ स्वः ॐ भुवः ॐ भूः ॐ सः ॐ जूं ॐ हौं ॐ स्वाहा।

कहीं-कहीं स्वाहा का प्रयोग नहीं लिखा है अतः जि ा मन्त्र के अन्त में स्वाहा नहीं हो वह ६० अक्षर का होगा।

४. महामृत्युञ्जय मन्त्र :- (५० अक्षरात्मक)

मन्त्र महोदधि में ५० अक्षर का अन्य मन्त्र बताया गया है, उसे ही महामृत्युञ्जय कहा गया है। इस मन्त्र के ऋषि वामदेव कहोल वशिष्ठ ही है।

ॐ हौं ॐ जूं सः भूर्भुवः स्वः ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बंधनान् मृत्योर्मुक्षीय मामृतात् भूर्भुवः स्वरों जूं सः हौं ॐ ॥

५. भिन्नपादमृत्युञ्जय -

आगम शास्त्रों में मन्त्रों के प्रत्येक पाद के बाद **ॐ या ऐं, ह्रीं, श्रीं, क्लीं** कोई भी बीजाक्षर कामनाभेद से लगाकर जपने से श्रेष्ठफल की प्राप्ति कहा है, अर्थात् प्रत्येक पाद के बाद बीजाक्षर लगाने से उसको स्तम्भ रूपी आधार की प्राप्ति होती है एवं मन्त्र स्फुरित होता है। जैसा कि -

भिन्नपादा तु गायत्री ब्रह्महत्यां व्यपोहति ।
अच्छिन्नपादा तु गायत्री ब्रह्महत्यां प्रयच्छति ॥

अर्थात् पादभिन्न बिना गायत्री मन्त्र जपने से ब्रह्महत्या लगती है, वस्तुतः ऐसा अर्थ नहीं समझना चाहिये भावार्थ यह है कि उस साधक (ब्राह्मण) को बहुत न्यून फल मिलता है, परिश्रम व्यर्थ रहता है एवं पादभिन्न करके गायत्री मन्त्र जपने से अधिक फल मिलता है जिससे साधक की कान्ति व ओज बढ़ता है जो ब्रह्म हत्या के प्रभाव को दूर करता है।

ऐसा एक दृष्टांत 'स्वामी मूर्खानन्दजी' का है उनका एक शिष्य १०० माला गायत्री की करता था तो भी उसमें ब्रह्मराक्षस का आवेश रहता था जिस दिन से

भिन्नपाद् गायत्री जप प्रारम्भ कराया ब्रह्मराक्षस का आवेश कम होता चला गया।

भिन्नपाद मृत्युञ्जय एवं मृत्युञ्जय मन्त्र –

ॐ त्र्यम्बकं यजामहे ॐ सुगन्धिं पुष्टिवर्धनम् ।
ॐ उर्वारुकमिव बंधनान् ॐ मृत्योर्मुक्षीय मामृतात् ॐ ॥

कामना भेद से ॐ की जगह विद्याप्राप्ति हेतु **ऐं**, लक्ष्मीप्राप्ति हेतु **श्रीं**, सर्वकामना व ऐश्वर्य हेतु **ह्रीं** आकर्षण व शत्रुनाश हेतु **क्लीं** बीजाक्षर लगाये जा सकते है।

श्रीविद्यार्णव तन्त्रोक्त त्रिपुरसुन्दरी मन्त्रेण भिन्नपाद रुद्रमन्त्राः

१. शिव मन्त्र – (प्रासाद मन्त्र) – ॐ हौं हसकल ह्रीं ह्रीं हसकहल ह्रीं नमः सकल ह्रीं शिवाय।

विनियोग एवं न्यास :– **शिरसि वामदेवाय नमः, मुखे पंक्तिछन्दसे नमः, हृदये श्रीसदाशिवाय देवतायै नमः, गुह्ये हं बीजाय नमः, पादयोः श्रीशक्तये नमः सर्वाङ्गे सर्वाभीष्टसिद्धये विनियोगः।**

ध्यानम् –

सिन्दूरपुञ्जशोणाङ्गं स्मेरवक्त्रं त्रिलोचनम् ।
मणिमौलि लसच्चन्द्रकलालंकृत मस्तकम् ॥
दक्षिणोर्ध्वकरे टङ्कं दधानं तदधोवरम् ।
वामोर्ध्वहस्ते हरिणं तदधोऽभयमादरात् ॥
पीनवृत्तघनोत्तुङ्गस्तनाग्रे विविवेश्य च ।
वामाङ्के सिनिविष्टायाः प्रियाया रक्तपङ्कजे ।
दधत्या दक्षिणे हस्ते वासिनं रक्तपङ्कजे ।
नानाभरणसंदीप्तं दिव्यगन्धस्त्रगम्बरम् ॥

हां, हीं, हूं, हैं, हौं, हः से करांगन्यास करें।

२. भिन्नपाद पाशुपतास्त्रमन्त्रः – ॐ श्लीं हसकलह्रीं पशु हसकहलह्रीं हुं सकल ह्रीं फट्।

ध्यानम् –

पञ्चवक्त्रं दशभुजं प्रतिवक्त्रं त्रिलोचनम् ।
अग्निज्वालानिभश्मश्रुसंयुतं भीमदंष्ट्रकम् ॥
खड्गं-बाणनक्षसूत्रं शक्तिं परशुमेव च ।

दधानं दक्षिणैर्हस्तैरुर्ध्वादिक्रमतो गुरुम् ॥
खेटचापौ कुण्डिकां च त्रिशूलं ब्रह्मदण्डयुक् ।
वामहस्तैश्च बिभ्राणां मध्याह्नार्क समप्रभम् ॥
नानाभरण सन्दीप्तं पन्नगेन्द्रैरलंकृतम् ।
स्फटिकौघनिभं शान्तं सर्वरक्षाकरं स्मरेत् ॥

विनियोग - इस मन्त्र के **वामदेव ऋषि, पंक्तिछन्द** एवं **पशुपति देवता है।**

न्यास - **ॐ हुं फट्, श्लीं हुं फट्, प हुं फट्, शु हुं फट्, हुं हुं फट्, फट् हुं, फट् इन विभागों से करन्यास करें।**

मन्त्र जप में यह भावना रखनी चाहिये कि शिव पशुता (अज्ञानता, जड़ता, भय, अंधकार क्लेश एवं दु:ख) का नाश करने वाले हैं एवं शिवता (कल्याण) के कारक होकर साधक को अभय प्रदान करते है।

इस मन्त्र के प्रयोग से परमन्त्र परतन्त्र प्रयोग एवं महामारी का शमन भी होता है।

३. भिन्नपाद दक्षिणामूर्तिशिव मन्त्र - **ॐ ह्रीं दक्षिणामूर्तये तुभ्यं हसकल ह्री वटमूल निवासने हसकहलह्रीं ध्यानैकनिरताङ्गाय सकलह्रीं नमो रुद्राय शंभवे ह्रीं ॐ।**

विनियोगन्यास - **शिरसि शुकाय ऋषये नमः, मुखे गायत्री छन्दसे नमः, हृदये दक्षिणामूर्तये दैवतायै नमः, गुह्ये ॐ बीजाय नमः, पादयोः ह्रीं शक्तये नमः, सर्वाङ्गे ममाभीष्टसिद्धये विनियोगः।**

ध्यानम् -

वटविटपिसमीपे भूमिभागे निषण्णं, सकलमुनिजनानां ज्ञानदातारमारात्।
त्रिभुवनगुरुमीशं दक्षिणामूर्तिरूपं, जननमरणदुःखच्छेददक्षं नमामि ॥

जिस मन्त्र की साधक को दीक्षा प्राप्त नहीं हुई हो वह दक्षिणामूर्तिशिव को सद्गुरु मानकर अपनी तन्त्रसाधना को आगे बढ़ा सकता है।

४. रुद्रमन्त्र - **''ॐ हसकलह्रीं नमो हसकहलह्रीं भगवते सकलह्रीं रुद्राय''।**

विनियोगन्यास - **शिरसि ब्रह्मणे ऋषये नमः, मुखे विराटछन्दसे नमः, हृदये सदाशिव देवतायै नमः, सर्वाङ्गे ममाभीष्टसिद्धये विनियोगः।**

ध्यानम् -

आकीर्णं दिव्यभोगैरमरदितिसुतैरर्चितं शैलकन्या
देहार्धं धारयन्तं स्फटिकमणिनिभं व्याघ्रचर्मोत्तरीयम् ।

द्वैपीं कृत्तिं वसानं हिमकिरणकलाशेखरं नीलकण्ठं
हृष्टं व्याप्तं कलाभिर्धृतकपिलजटं भावयेऽहं महेशम् ॥

५. त्र्यक्षरीमृत्युञ्जयमन्त्र - ॐ हसकलह्रीं जूं हसकहलह्रीं सः सकलह्रीं।

विनियोगन्यास - शिरसि कहोलायऋषये नमः, मुखे निचृद्गायत्रीछन्दसे नमः, हृदये श्रीमृत्युञ्जयाय देवतायै नमः, गुह्ये ॐ बीजाय नमः, पादयो सः शक्तये नमः, नाभौ जूं कीलकाय नमः, सर्वाङ्गे ममाभीष्टसिद्धये विनियोगः।

ध्यानम् -

शुद्धस्फटिकसंकाशं शुभ्रपद्मासनस्थितम् ।
कपर्दमौलिविलसच्चन्द्र - खण्डाच्युतामृतैः ॥
अभिषिक्त - समस्ताङ्गमर्केन्द्रनललोचनम् ।
दक्षिणोर्ध्वकरे मुद्रां ज्ञानाख्यं तदधः करे ।
अक्षमालां च वामोर्ध्व पाशं वेदमघः करे ।
दधानं चिन्तये देवं मृत्युरोगभयापहम् ॥

६. त्र्यम्बकमृत्युञ्जयमन्त्र -

ॐ त्र्यम्बकं यजामहे हसकलह्रीं सुगन्धिं पुष्टिवर्धनम् ।
हसकहलह्रीं उर्वारुकमिव बंधनान् सकलह्रीं मृत्योर्मुक्षीय मामृतात् ॥

विनियोगन्यास - वशिष्ठर्षये नमः शिरसि। अनष्टुप् छन्दसे नमः मुखे। त्र्यम्बकपार्वतीपतिर्देवतायै नमः हृदि। त्र्यं बीजाय नमः गुह्ये। बं ॐ शक्तये नमः पादयो। कं कीलकाय नमः नाभौ। विनियोगाय नमः सर्वाङ्गे।

कराङ्गन्यास, ध्यान पूर्व में दिये गये है। ३२-३३ अक्षरीय मन्त्र के साथ दिये गये है, वे कर सकते है।

भिन्नपादमन्त्र में कामराजपूजिता त्रिपुरसुन्दरी से संपुटित करे तो मन्त्र इस प्रकार होगा -

ॐ त्र्यम्बकं यजामहे कएईलह्रीं सुगन्धिं पुष्टिवर्धनम् ।
हसकहलह्रीं उर्वारुकमिव बंधनान् सकलह्रीं मृत्योर्मुक्षीय मामृतात् ॥

गायत्री मन्त्र से भिन्नपाद मन्त्र शुक्रोपासिता मृतसंञ्जीवनी विद्या में बताया गया है, उसे अवलोकन करें।

॥ अथ शताक्षरी मृत्युञ्जय प्रयोगः॥

विनियोगः – **ॐ अस्य श्री शताक्षरी गायत्रीमन्त्रस्य विश्वामित्र मरीचि कश्यप वसिष्ठ ऋषयो गायत्री त्रिष्टुप् अनुष्टुपछन्दासि सवितृ जातवेदस्त्र्यम्बका देवता गायत्र्यक्षराणि बीजानि अनुष्टुबक्षराणि शक्तयस्त्रिष्टुबक्षराणि कीलकानि ममारिष्टशान्तये जपे विनियोगः।**

ऋष्यादिन्यास – **विश्वामित्र मरीचि कश्यप वसिष्ठ ऋषियो नमः शिरसि। गायत्रीत्रिष्टुबनुष्टुप छन्दोभ्यो नमः मुखे। सवितृ जातवेदस्त्रम्बकदेवेभ्यो हृदये। गायत्र्यक्षरेभ्यो बीजेभ्यो नमः गुह्ये। अनुष्टुबक्षरेभ्यो शक्तिभ्यो नमः पादयोः। त्रिष्टुबक्षरेभ्यः कीलकेभ्यो नमः नाभौ विनियोगाय नमः सर्वाङ्गे।**

करन्यास – **ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि, अंगुष्ठाभ्यां नमः। ॐ धियो यो नः प्रचोदयात्, तर्जनीभ्यां नमः। ॐ जातवेदसे सुनवाम सोममराभतीयतो निदहाति वेदः, मध्यमाभ्यां नमः। ॐ स नः पर्षदति दुर्गाणि विश्वनावेव सिन्धुं दुरितात्यग्निः, अनामिकाभ्यां नमः। ॐ त्र्यम्बकं यजामहे सुगंधिं पुष्टिवर्धनम्। कनिष्ठिकाभ्यां नमः। ॐ उर्वारुकमिव बन्धनान् मृर्त्योमुक्षीय मामृतात्, करतल करपृष्ठाभ्यां नमः।**

अङ्गन्यास – **ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि, हृदयाय नमः। ॐ धियो यो नः प्रचोदयात्, शिरसे स्वाहा। ॐ जातवेदसे सुनवाम सोममराभतीयतो निदहाति वेदः, शिखायै वषट्। ॐ स नः पर्षदति दुर्गाणि विश्वनावेत सिन्धुं दुरितात्यग्निः, कवचाय हुँ। ॐ त्र्यम्बकं यजामहे सुगंधिं पुष्टिवर्धनम्, नेत्रत्रयाय वौषट्। ॐ उर्वारुकमिव बन्धनान् मृर्त्योमुक्षीय मामृतात्, अस्त्राय फट्।**

ध्यानम् –

स्मर्तव्या ऽखिलालोकवर्ति सततं यज्जङ्गमस्थावरं
व्याप्तं येन च यत्प्रपञ्चविहितं मुक्तिर्यतः सिद्ध्यति ।
यद्वास्यात् प्रणवत्रिभेदगहनं श्रुत्वा च यद्गीयते ।
तद्वस्तु स्थितिसिद्ध्येस्तु वरदं ज्योतिस्त्रयोत्यं महः ॥

संपूर्णमूलमन्त्र –

ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।धियो यो नः प्रचोदयात् ॥
ॐ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः।

स नः पर्षदहि दुर्गाणि विश्वानावेव सिन्धुं दुरितात्यग्निः ॥
ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बंधनान् मृत्योर्मुक्षीय माऽमृतात् ॥

इस मन्त्र के पांच प्रकार है - १. गायत्रीत्र्यम्बक जातवेद - पापशांति हेतु। २. त्र्यम्बक, जातवेद, गायत्री। ३. त्र्यम्बकगायत्री एवं जातवेद - दोनों ही आयुष्यवृद्धि हेतु। ४. जातवेद, त्र्यम्बक और गायत्री ५. जातवेद गायत्री और त्र्यम्बक - दोनों ही शत्रुनाश हेतु जप करें।

॥ सहस्राक्षरमृत्युञ्जयमालामन्त्र ॥

ॐ नमो भगवते सदाशिवाय सकलतत्त्वात्मकाय सर्वमन्त्रस्वरूपाय सर्वयन्त्राधिष्ठिताय सर्वतन्त्रस्वरूपाय सर्वतत्त्वविदूराय ब्रह्मरुद्रावतारिणे नीलकण्ठाय पार्वतीप्रियाय सोमसूर्याग्निलोचनाय भस्मोद्धूलितविग्रहाय महामणिमुकुटधारणाय माणिकभूषणाय सृष्टिस्थितिप्रलयकालरौद्रावताराय दक्षाध्वरसंकाय महाकाल भेदकाय मूलाधारैकनिलयाय तत्त्वातीताय गङ्गाधराय सर्वदेवाधिदेवाय षडाश्रयाय वेदान्तसाराय त्रिवर्गसाधनायानेक - कोटिब्रह्माण्डनायकाय अनन्त वासुकि तक्षक कर्कोटक खङ्ग कुलिक पद्ममहापद्मेत्यष्टनागकुलभूषणाय प्रणवस्वरूपाय चिदाकाशायाकाशादि स्वरूपाय ग्रहनक्षत्रमालिने सकलाय कलङ्करहिताय सकललौकैककर्त्रे सकललोकैकसंहर्त्रे सकललोकैकभर्त्रे सर्वलोकैकसाक्षिणे सकलनिगमगुह्याय सकलवेदान्तपारगाय सकललोकैकवरप्रदाय सकललौकैकशङ्कराय शशाङ्कशेखराय शाश्वतनिजावासाय निराभासाय निरामयाय निर्मलाय निर्लोभाय निर्मोहाय निर्मदाय निश्चिन्ताय निरहङ्काराय निराकुलाय निष्कलङ्काय निर्गुणाय निष्कामाय निरुपप्लवाय निरवद्याय निरन्तराय निष्कारणाय निरातङ्काय निष्प्रपञ्चाय निस्सङ्गाय निर्द्वन्द्वाय निराधाराय निरोगाय निष्क्रोधाय निर्गमाय निष्पापाय निर्भयाय निर्विकल्पाय निर्भेदाय निष्क्रियाय निस्तुलाय निस्संशयाय निरञ्जनाय निरुपमविभवाय नित्यशुद्धबुद्ध - परिपूर्ण सच्चिदानन्द अदृश्याय परमशान्तस्वरूपाय तेजोरूपाय तेजोमयाय जय जय महारौद्र भद्रावतार महाभैरव कालभैरव कल्पान्तभैरव कपालमालाधर खट्वाङ्ग-खड्ग-पाशाङ्कुश डमरु-त्रिशूलचापवाणगदा-शक्ति-भिन्दिपाल-तोमर मुसलमुद्गर-पट्टिशपरशुपरिध भुशुण्डी शघ्नी चक्राद्यायुध भीषण

करसहस्त्रमुखदंष्ट्रा करालविकटाट्टहास विस्फारित-ब्रह्माण्ड मण्डल नागेन्द्रकुण्डल नागेन्द्रहार नागेन्द्रवलय नागेन्द्रचर्मधर मृत्युञ्जय त्र्यम्बक त्रिपुरान्तक विरूपाक्ष विश्वेश्वर विश्वरूप वृषवाहन विश्वतोमुख सर्वतो मां रक्ष रक्ष। ज्वल ज्वल महामृत्युभयमपमृत्युभयं नाशय नाशय रोगभयमुत्साद योत्सादय विषसर्पभयं शमय शमय चौरान् मारय मारय मम शत्रून् उच्चाटयोच्चाटय त्रिशूलेन विदारय विदारय कुठारेण भिन्धि भिन्धि खड्गेन छिन्धि छिन्धि खट्वाङ्गेन विपोथय विपोथय मुसलेन निष्पेषय २ बाणैः सन्ताडय २ रक्षांसि भीषय भीषय भूतानि विद्रावय २ कूष्माण्ड वेताल मारीच ब्रह्मराक्षसगणान् संत्रासय २ मामऽभयं कुरु कुरु वित्रस्तं मामाश्वासय नरकभयाद् मामुद्धरोद्धर संजीवय २ क्षुतृड्भ्यां मामाप्याययाप्यायय दुःखातुरं मामनन्दयानन्दय शिवकवचेन मामाच्छादयाच्छादय मृत्युञ्जय त्र्यम्बक सदाशिव नमस्ते नमस्ते नमस्ते स्वाहा।

॥ वृहद्महामृत्युञ्जयमालामन्त्र ॥

यह मालामन्त्र सूर्य, ब्रह्मा, विष्णु एवं त्र्यम्बक का समष्टि मन्त्र है। एवं इसके साथ चतुष्पाद गायत्री का संयोजन करके प्रभाव को विशेष ओजोमय बना दिया है।

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं ॐ तत्सवितुर्वरेण्यं ॐ घृणिः सूर्य आदित्य ॐ तत्सत् ॐ हंसात्मको यो अपामग्रेस्तेजसा दीप्यमानः स नो मृत्योस्त्रायतां नमो ब्रह्मणे विश्वनाभिः हाहि हाहि हाहि हावु हावु हावु ॐ ह्रीं हंसः सोहं स्वाहा ॐ भुवः भर्गो देवस्य धीमहि ॐ नमो नारायणाय ॐ उग्रं वीरं महाविष्णु ज्वलन्तं सर्वतोमुखं नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहं भ्राजा भ्राजा भ्राजा वव्रेववायवों आधारतोरण्याय वर्यो सहस्त्र ज्वालिनी मृत्युनाशिनी स्वाहा। ॐ स्वः धियो यो नः प्रचोदयात् आमद्य ॐ ह्रीं ॐ नमः शिवाय त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् उर्वारुकमिव बन्धनान् मृत्योर्मुक्षीय मामृतात्। ववावं वववं ववं वेवं ववं वस जझ्रदौं झ ह्रीं अरे वं वं मेवरयु धावया दं जं ॐ जूं सः स्वौं हंसः मां पालय पालय ह्लादय ह्लादय मृत्योर्मोचय मोचय सोहं स्वौं ईं हंसः जूं ॐ ईं स्वौ हंसः मां पालय पालय ह्लादय ह्लादय मृत्योर्मोचय मोचय सोहं स्वौं ईं सः जूं ॐ परो रजसे सावदों आपोज्योतीरसोऽमृतं ब्रह्म भूर्भुवः स्वरोम्।

॥ महामृत्युञ्जय (मृत संजीवनी) मंत्रस्य विधानम् ॥

विनियोग :- ॐ अस्य श्री मृतसंजीवनी महामृत्युञ्जय मन्त्रस्य वामदेव, कहोल वसिष्ठऋषिः पंक्ति, गायत्री अनुष्टुप् छन्दः श्रीमहामृत्युञ्जयरुद्रो देवताः, हौं बीजं, जूं शक्ति, सः कीलकं श्रीमृत्युञ्जय देवता प्रीत्यर्थे जपे विनियोगः।

ऋष्यादिन्यासः :- वामदेव कहोल वसिष्ठ ऋषये नमः शिरसि। पंक्ति गायत्री अनुष्टुपछन्दसे नमः मुखे। श्रीमहामृत्युञ्जय रुद्रदेवतायै नमः हृदये। हौं बीजाय नमः गुह्ये। जूं शक्तये नमः पादयोः। सः कीलकाय नमः नाभौ। विनियोगाय नमः सर्वाङ्गेषु।

षडङ्गन्यास - ॐ हौं जूं सः ॐ भूर्भुवः स्वः ॐ त्र्यंम्बकं अंगुष्टाभ्यां नमः। (हदयाय नमः)॥ ॐ हौं जूं सः ॐ भूर्भुवः स्वः ॐ यजामहे तर्जनीभ्यां नमः। (शिरसे स्वाहा) ॥ ॐ हौं जूं सः ॐ भूर्भुवः स्वः ॐ सुगंधिं पुष्टिवर्धनम् मध्यमाभ्यां नमः। (शिखायै वषट्)॥ ॐ हौं जूं सः ॐ भूर्भुवः स्वः ॐ उर्वारुकमिव बन्धनात् अनामिकाभ्यां नमः (कवचाय हुँ)॥ ॐ हौं जूं सः ॐ भूर्भुवः स्वः ॐ मृर्त्योर्मुक्षीय कनिष्ठिकाभ्यां नमः (नेत्रत्रयाय वौषट्॥) ॐ हौं जूं सः ॐ भूर्भुवः स्वः ॐ मामृतात् करतलकरपृष्ठाभ्यां नमः (अस्त्राय फट्)॥

ध्यानम् –

चन्द्रार्काग्नि विलोचनं स्मितमुखं पद्मद्वयान्तः स्थितं ।
मुद्रापाशमृगाक्षसूत्र विलसत् पाणिं हिमांशुप्रभम् ॥
कोटिरेन्दुगलत् सुधाप्लुत तनुं हारादि भूषोज्वलं ।
कान्त्या विश्व विमोहनं पशुपतिं मृत्युञ्जये भावये ॥

मन्त्र :- ॐ हौं जूं सः ॐ भूर्भुवः स्वः ॐ त्र्यम्बकं यजामहे सुगंधिं पुष्टिवर्धनम् । उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् । ॐ स्वः भुवः भूः ॐ सः जूं हौं ॐ ॥

॥ श्रीमहामृत्युञ्जय यन्त्र पूजन ॥

मृत्युञ्जय यन्त्र भिन्न-भिन्न है। सामान्य यन्त्र में पञ्चकोण, अष्टदल, वृत्तचतुष्टय भूपूर होते है। प्रस्तुत यन्त्र विस्तृत है उसमें पञ्चकोण, अष्टदल, वृत्त, चतुष्टय तदोपरि पुनः अष्टदल, वृत्तत्रय, ततोपुनः अष्टदल एवं भूपूर होता है। विस्तृत यंत्र नहीं कर सके तो सामान्य यंत्र में ही पूजा करें। प्रत्येक नामावलि के बाद पादुकां

पूजयामि नमः तर्पयामि से गंधाक्षत पुष्प अर्पण करे व पञ्चामृत अर्घजल मिश्रित जल से तर्पण करें।

महामृत्युञ्जय यंत्रम्

प्रथमावरणम् - (बिन्दु मध्ये) - मूल मंत्र से **ॐ त्र्यंबकाय श्री पादुकां पूज. नमः तर्पयामि।**

तत्रैव - **ॐ श्रीं ह्रीं मृत्युञ्जये भगवति चैतन्य चन्द्रे हंस संजीवनी स्वाहा। श्री अमृतेश्वरी देव्यै नमः श्री पादुकां पूजयामि तर्पयामि** (शिव के वाम भाग में)।

गुरुमण्डल पूजनम् - **ॐ दिव्यौघ गुरुभ्यो श्री पा. पू न. त.। ॐ सिद्धौघ गुरुभ्यो श्री पा. पू न. त.। ॐ मानवौघगुरुभ्यो श्री पा. पू न. त.।**

स्वगुरुक्रम - **ॐ अमुक स्वगुरुनाथ सशक्तिं श्री पा. पू न. त.। ॐ परमगुरुभ्यो श्री पा. पू न. त.। ॐ परात्परगुरुभ्यो श्री पा. पू न. त.। ॐ परमेष्ठीगुरुभ्यो श्री पा. पू न. त.।**

पुष्पाञ्जलि -

ॐ अभीष्ट सिद्धिं मे देहि शरणागत वत्सले ।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥

पुष्पाञ्जलि प्रदान करें। पूजिताः तर्पिताः सन्तुः कहकर अर्घपात्र जल से तृप्त करें।

अथ द्वितीयावरणम् - (बिन्दु समीपे) - **ॐ त्र्यम्बकं हृदयाय नमः श्री पा. पू न. त.। ॐ यजामहे शिरसे स्वाहा श्री पा. पू न. त.। ॐ सुगंधि पुष्टिवर्धनम् शिखायै वषट् श्री पा. पू न. त.। ॐ उर्वारुकमिव बन्धनात् कवचाय हुँ श्री पा. पू न. त.। ॐ मृत्योर्मुक्षीय नेत्रत्रयाय वौषट श्री पा. पू न. त.। ॐ मामृतात् अस्त्रायफट् श्री पा. पू न. त.।**

ॐ अभिष्ट.......द्वितीयावरणार्चनम्॥ पुष्पाञ्जलि प्रदान करें पूजिताः तर्पिताः सन्तुः कहकर अर्घपात्र जल से तृप्त करें।

अथ तृतीयावरणम् - पञ्चकोणे - प्रत्येक नाममंत्रों के बाद श्री पादुकां पूज. नमः तर्पयामि कहें। ईशाने - **सद्योजाताय श्री पादुकां पूज. नमः तर्पयामि।** पूर्वे - **वामदेवाय.**। अग्निकोणे - **ईशानाय.**। नैऋत्ये - **तत्पुरुषाय.**। वायवे - **अघोराय.**।

ॐ अभीष्ट.......ततृीयावरणार्चनम्॥ पुष्पाञ्जलि प्रदान करें। पूजिताः तर्पिताः सन्तुः कहकर अर्घपात्र जल से तृप्त करें।

अथ चतुर्थावरणम् - (अष्टदले) - प्रत्येक नाममंत्र के बाद श्री पादुकां पूजयामि नमः तर्पयामि कहकर गंधाक्षत पुष्प अर्पण कर तर्पण करें। **ॐ अर्कमूर्तये श्री पा. पू न. त.। ॐ इन्द्रमूर्तये.। वसुधामूर्तये.। तोयमूर्तये.। वह्निमूर्तये.। वायुमूर्तये.। आकाशमूर्तये.। यजमानमूर्तये.।**

दलाग्रे - **अं आं इं ईं ......अं अः मातृकायै श्री पा. पू न. त.। कं .... ङ मातृकायै.। चं .... ञं मातृकायै.। टं ... ङं मातृकायै.। तं ... न. मातृकायै.। पं .... मं मातृकायै.। यं ... वं मातृकायै.। सं ... क्षं मातृकायै श्री पा. पू न. त.।**

ॐ अभीष्ट.......चतुर्थावरणार्चनम्॥ पुष्पाञ्जलि प्रदान करें। पूजिताः तर्पिताः सन्तुः कहकर अर्घपात्र जल से तृप्त करें।

अथ पञ्चमावरणम् - (वृत्तचतुष्कये) -**ॐ भवदेव श्री पा. पू न. त.। शर्वदेव.।ईशानदेव.।पशुपतिदेव.।रुद्रदेव.।उग्रदेव.।भीमदेव.।महान्तदेव.।**

ॐ अभीष्ट.......पञ्चमावरणार्चनम्॥ पुष्पाञ्जलि प्रदान करें। पूजिताः तर्पिताः सन्तुः कहकर अर्घपात्र जल से तृप्त करें।

अथ षष्ठमावरणम् - (अष्टदले) अगर वृहद यंत्र नहीं बनाया हो तो सामान्य यंत्र के अष्टदल में ही पूजा करें। **ॐ रमायै श्री नमः श्री पा. पू त.। ॐ शकायै.। ॐ प्रभायै.। ॐ ज्योत्स्नायै.। ॐ पूर्णायै.। ॐ उषायै.। ॐ सुधायै.।** (अष्टदलाग्रे) - **ॐ विश्वायै नमः श्री पा. पू. त.। विद्यायै.। सितायै.। प्रह्वायै.। सारायै.। संध्यायै.। शिवायै.। मिशायै.।**

ॐ अभीष्ट....... षष्ठमावरणार्चनम्॥ पुष्पाञ्जलि प्रदान करें। पूजिताः तर्पिताः सन्तुः कहकर अर्घपात्र जल से तृप्त करें।

अथ सप्तमावरणम् :- वृक्त्रये - (अगर वृहद यंत्र नहीं बनाया हो तो पूर्व के चारों वृत्तों मे से ३ वृत्तों में पूजन करें।) **१. ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं ...... प्रचोदयात् श्री सविता देवी श्री पा. पू न. त.। २. ॐ जातवेद से सुनवाम सोम मरातीयतो निदहाति वेदः ।सनः पर्षदति दुर्गाणि विश्वानावेव**

सिन्धु दुरितात्यग्निः श्री दुर्गा देवता श्री पा. पू न. त.। ३. ॐ त्र्यम्बकं यजामहे .... मामृतात्। ॐ त्र्यम्बकं श्री पा. पू न. त.।

ॐ अभीष्ट.......सप्तामावरणार्चनम्॥ पुष्पाञ्जलि प्रदान करें। पूजिताः तर्पिताः सन्तुः कहकर अर्घपात्र जल से तृप्त करें।

अथ अष्टमावरणम् - (द्वितीय अष्टदले) या पूर्व के अष्टदल में ही 'केसरों' में पूजन करें। **ॐ आर्यायै श्री पा. पू न. त.। प्रज्ञायै.। प्रभायै.। मेधायै.। शान्त्यै.। कान्त्यै.। धृत्यै.। सत्यै.।**

ॐ अभिष्ट.......अष्टमावरणार्चनम्॥ पुष्पाञ्जलि प्रदान करें। पूजिताः तर्पिताः सन्तुः कहकर अर्घपात्र जल से तृप्त करें।

अथ नवमावरणम् - अष्टदलमध्ये - **ॐ धरायै श्री पा. पू न. त.। मायायै.। अविन्यै.। पद्मायै.। शांतायै.। मोघायै.। जयायै.। अमलायै.।**

ॐ अभीष्ट.......नवमावरणार्चनम्॥ पुष्पाञ्जलि प्रदान करें। पूजिताः तर्पिताः सन्तुः कहकर अर्घपात्र जल से तृप्त करें।

अथ दशमावरणम् - अष्टदलाग्रे - **ॐ ज्यैष्ठायै नमः श्री पा. पू त.। श्रेष्ठायै.। रुद्रायै.। कालायै.। कलविकरणायै नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय.। सर्वभूतदमनाय.। मनोन्मनाय.। भवोदभवाये.।**

ॐ अभीष्ट.......दशमावरणार्चनम्॥ पुष्पाञ्जलि प्रदान करें। पूजिताः तर्पिताः सन्तुः कहकर अर्घपात्र जल से तृप्त करें।

अथ एकादशमावरणम् - अष्टदले कर्णिका समीपे - **अष्टनाग पूजा पूर्वादिक्रमेण। अनन्ताय नमः श्री पा. पू त.। वासुकीये नमः.। शेषाय नमः.। पद्मनाभाय नमः.। कंबलाय नमः.। शंखपालाय नमः.। धृतराष्ट्राय नमः.। तक्षकायनमः.। मध्ये - कालीये नमः।**

ॐ अभीष्ट.......एकादशमावरणार्चनम्॥ पुष्पाञ्जलि प्रदान करें। **पूजिताः तर्पिताः सन्तुः** कहकर अर्घपात्र जल से तृप्त करें।

अथ द्वादशमावरणम् - (अष्टदले कर्णिका वहिः) - **पूर्वादि क्रमेण अष्टभैरवान् सम्पूज्य। ॐ असितांगभैरवाय सशक्तिं श्री पा. पू. न. त.। रुरुवभैरवाय सशक्तिं.। चण्डभैरवाय सशक्तिं.। क्रोधभैरवाय सशक्तिं.। उन्मत्तभैरवाय सशक्तिं.। कपालिभैरवाय सशक्तिं.। भीषणभैरवाय सशक्तिं.। संहारभैरवाय सशक्तिं श्री पा. पू. न. त.।**

ॐ अभीष्ट.......द्वादशमावरणार्चनम्॥ पुष्पाञ्जलि प्रदान करें। पूजिता: तर्पिता: सन्तु: कहकर अर्घपात्र जल से तृप्त करें।

अथ त्रयोदयशमावरणम् - भूपूरे - वैसे भूपूर में अष्टसिद्धि, ग्रह, उपग्रह, पीठ, उपपीठ एवं दिक्पालादि का पूजा विधान है। (नरपतिजयचर्या) **अष्टसिद्धिं - अणिमा सिद्धि श्री पा. पू. न. त.। लघिमा.। महिमा.। ईशित्व सिद्धि.। वशित्व सिद्धि.। प्राकाम्य सिद्धि.। भुक्ति सिद्धि.। इच्छा सिद्धि.।**

ॐ अभीष्ट....... त्रयोदशमावरणार्चनम्॥ पुष्पाञ्जलि प्रदान करें। पूजिता: तर्पिता: सन्तु: कहकर अर्घपात्र जल से तृप्त करें।

अथ चतुर्दशमावरणम् - (भूपूरे) - **इन्द्राय नमः श्री पा. पू. त.। अग्नये नमः. । यमाय नमः. । निर्ऋत्ये नमः. । वरुणाय नमः. । वायवे नमः. । कुबेराय नमः. । ईशानाय नमः. । ब्रह्मणे नमः. । अनन्ताय नमः श्री पा. पू. त.।**

ॐ अभीष्ट....... चतुर्दशावरणार्चनम्॥ पुष्पाञ्जलि प्रदान करें। पूजिता: तर्पिता: सन्तु: कहकर अर्घपात्र जल से तृप्त करें।

अथ पञ्चदशावरणम् - (भूपुरे) - **वज्राय नमः श्री पा. पू. त.। शक्तये नमः. । दण्डाय नमः. । खड्गाय नमः. । पाशाय नमः. । अङ्कुशाय नमः. । गदाय नमः. । त्रिशूलाय नमः.। पद्माय नमः.। चक्राय नमः.।**

ॐ अभीष्ट सिद्धिं मे देहि शरणागत वत्सले ।
भक्त्या समर्पये तुभ्यं पञ्चदशावरणार्चनम् ॥

पुष्पाञ्जलि देवें। पूजिता: तर्पिता: सन्तु: से अर्घेन संतृप्त। फिर धूप दीप नैवेद्य अर्पण कर नीरांजन करे।

॥ द्वितीय प्रकारा: (५२ अक्षरात्मक)॥

मन्त्र - "ॐ हौं ॐ जूं सः भूर्भुवः स्वः त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनम्॥ उर्वारुकमिव बंधनान् मृत्योर्मुक्षीय मामृतात् भूर्भुवः स्वरों जूं सः हौं ॐ "॥१॥

अन्यत् च ॐ हौं, जूं सः ॐ भूर्भुवः स्वः ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टि वर्धनम्। उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् ॐ स्वः भुवः भू ॐ सः जूं हौं ॐ

संकल्प करके गुरु गणपति व इष्टदेव का स्मरण करके अङ्गन्यास व अक्षर

न्यास करके जप करे।

विनियोगः - ॐ अस्य श्रीमहामृत्युंजयमंत्रस्य वामदेवकहोलवसिष्ठा ऋषयः। पंक्तिगायत्र्यनुष्टुभश्छंदांसि। सदाशिवमहामृत्युंजयरुद्रा देवताः। श्रीं बीजम्। ह्रीं शक्तिः। मम शरीरे ज्वराद्यमुकरोगनिरासनद्वारा सद्यः आरोग्यार्थ ममुककामासिद्ध्यर्थं वा श्रीमहामृत्युंजयदेवता प्रीत्यर्थममुकसंख्यापरिमित-श्रीमहामृत्युंजयजपं करिष्ये।

ऋष्यादिन्यासः - ॐ वामदेवकहोलवसिष्ठऋषिभ्यो नमः शिरसि ॥ १ ॥ पंक्तिगायत्र्यनुष्टुप्छंदोभ्यो नमः मुखे ॥ २ ॥ सदाशिव-महामृत्युंजयरुद्रदेवताभ्यो नमः हृदि ॥ ३ ॥ श्रींबीजाय नमः गुह्ये ॥ ४ ॥ ह्रीं शक्तये नमः पादयोः ॥ ५ ॥ विनियोगाय नमः सर्वाङ्गे ॥ ६ ॥

करन्यासः - ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः त्र्यंवकं ॐ नमो भगवते रुद्राय शूलपाणये स्वाहा अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः यजामहे ॐ नमो भगवते रुद्राय अमृतमूर्तये मां जीवय जीवय तर्जनीभ्यां नमः ॥ २ ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः सुगंधिं पुष्टिवर्धनम् ॐ नमो भगवते रुद्राय चन्द्रशिरसे जटिने शिखायै वषट् ॥ ३ ॥ ॐ हौं ॐ जूसः भूर्भुवः स्वः उर्वारुकमिव बंधनात् ॐ नमो भगवते रुद्राय त्रिपुरांतकाय हां हीं अनामिकाभ्यां नमः ॥ ४ ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः मृत्योर्मुक्षीय ॐ नमो भगवते रुद्राय त्रिलोचनाय ऋग्यजुः साममंत्राय कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः मामृतात् ॐ नमो भगवते रुद्राय ॐ अग्नित्रयाय ज्वल ज्वल मां रक्ष रक्ष अघोरास्त्राय करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥

अङ्गन्यास - ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः त्र्यंबकं ॐ नमो भगवते रुद्राय शुलपाणये हृदयायः नमः ॥ १ ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः यजामहे ॐ नमो भगवते रुद्राय अमृतमूर्तये मां जीवय शिरसे स्वाहा ॥ २ ॥ ॐ हौं ॐ जूं सः भूर्भुवः स्वः सुगंधिं पुष्टिवर्धनम् ॐ नमो भगवते रुद्राय चन्द्रशिरसे जटिने शिखायै वषट् ॥ ३ ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः उर्वारुकमिव बंधनात् ॐ नमो भगवते रुद्राय त्रिपुरांतकाय हां हीं कवचाय हुँ ॥ ४ ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः मृत्योर्मुक्षीय ॐ नमो भगवते रुद्रायत्रिलोचनाय ऋग्यजुः साममंत्राय नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः मामृतात् ॐ नमो भगवते रुद्राय अग्नित्रयाय ज्वल ज्वल मां रक्ष रक्ष अघोरास्त्राय फट् ॥६ ॥

वर्णन्यास - ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः त्र्यं नमः पूर्वमुखे ॥ १ ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः बं नमः पश्चिममुखे ॥ २॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः कं नमः दक्षिणमुखे ॥ ३ ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः यं नमः उत्तरमुखे ॥ ४ ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः जां नमः उरसि ॥ ५ ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः मं नमः कंठे ॥ ६ ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवःस्वः हें नमः मुखे ॥ ७ ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः सुं नमः नाभौ ॥ ८ ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः गं नमः हृदि ॥ ९ ॥ ॐ हौं ॐ जूं सः भूर्भुवः हौं ॐ भूर्भुवः स्वः धिं नमः पृष्ठे ॥ १० ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः पुं नमः कुक्षौ ॥ ११ ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः ष्टिं नमः लिंगे ॥ १२ ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः वं नमः गुदे ॥ १३ ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः र्धं नमः दक्षिणोरुमूले ॥ १४ ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः नं नमः वामोरुमूले ॥ १५ ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः उं नमः दक्षिणोरुमध्ये ॥ १६ ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः र्वां नमः वामोरुमध्ये ॥ १७ ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः रुं नमः दक्षिणजानुनि ॥१८ ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः कं नमः वामजानुनि ॥ १९ ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः मिं नमः दक्षिणजानुवृत्ते ॥ २० ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वःवं नमः वामजानुवृन्ते ॥ २१ ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः बं नमः दक्षिणस्तने ॥ २२ ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः धं नमः वामस्तने ॥ २३ ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः नों नमः दक्षिणपार्श्वे ॥ २४ ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः मृंनमः वामपार्श्वे ॥ २५ ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः त्यों नमः दक्षिणपादे ॥ २६ ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः मुं नमः वामपादे ॥ २७ ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः क्षीं नमः दक्षकरे ॥ २८ ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः यं नमः वामकरे ॥ २९ ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः मां नमः दक्षनासायाम् ॥ ३० ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः मृं नमः वामनासायाम् ॥ ३१ ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः तां नमः मूर्ध्नि ॥ ३२ ॥

पदन्यासः- ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः त्र्यंबकं नमः शिरसि ॥ १ ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः यजामहे भ्रुवौः ॥ २ ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः सुगंधिं नेत्रयौः ॥ ३ ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः पुष्टिवर्धनं मुखे ॥ ४ ॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः उर्वारुकं गंडयोः ॥

५॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः इव हृदये ॥ ६॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः बंधनात् जठरे ॥ ७॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः मृत्योः लिंगे ॥ ८॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः मुक्षीय ऊर्वोः ॥ ९॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः मां जान्वोः ॥ १०॥ ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः अमृतात् पादयोः ॥११॥

॥ अथ मृत्युञ्जय यंत्रार्चनम् ॥

अथ ध्यानम् :–

हस्तांभोजयुगस्थकुंभयुगलादुद्दत्य तोयं शिरः सिचंतं
करयोर्युगेन दधतं स्वांके सकुंभौ करौ ।
अक्षस्त्रङ्मृगहस्तमंबुजगतं मूर्द्धस्थचन्द्रस्त्रवत्पीयूषोन्नतनुं
भजे सगिरिजं मृत्युजयं त्र्यंबकम् ॥

नव पीठादौ रचिते सर्वतोभद्रमण्डले लिंगतोभद्रमण्डले वा यन्त्रमध्ये ॐ **मं मंडूकादिपरतत्त्वांतपीठदेवताभ्यो** नमः इति पीठदेवताः संपूज्य **नव पीठशक्तीः पूजयेत्** ।

महामृत्युञ्जय पूजन

तद्यथा। पूर्वादिक्रमेण। ॐ **वामायै नमः** ॥ १ ॥ ॐ **ज्येष्ठायै नमः** ॥ २ ॥ ॐ **रौद्र्यै नमः** ॥ ३ ॥ ॐ **काल्यै नमः** ॥ ४ ॥ ॐ **कलविकरिण्यै नमः** ॥ ५ ॥ ॐ **बलविकरिण्यै नमः** ॥ ६ ॥ ॐ **बलप्रमथिन्यै नमः** ॥ ७ ॥ ॐ **सर्वभूतदमन्यै नमः** ॥ ८ ॥ **मध्ये** ॐ **मनोन्मन्यै नमः** ॥ ९ ॥ इति पूजयेत्।

ततः स्वर्णादिनिर्मितं यंत्रं मूर्ति वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेणाशोष्य **''ॐ नमो भगवते सकलगुणात्मकशक्तियुताय अनन्ताय योगपीठात्मने नमः॥''** इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा पुनर्ध्यात्वा मूलेन मूर्ति

प्रकल्प्य पाद्यादिपुष्पां तैरुपचारैः संपूज्य देवाज्ञया आवरणपूजां कुर्य्यात्।

तद्यथा-पुष्पांजलिमादाय "**सचिनमयः परो देवः परामृतरसप्रियः॥ अनुज्ञां शिव मे देहि परिवारार्चनाय ते ॥ १॥**" इत्याज्ञां गृहीत्वा पुष्पांजलिं च दत्त्वा आवरणपूजाकुर्य्यात् ॥

पंचकोणे। ऐशान्याम् - "**ॐ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपति ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम्॥**" **ॐ ईशानाय नमः। ईशानश्रीपादुकां पूजयामि तर्पयामि नमः ॥ इति सर्वत्रा ॥ १॥** पूर्वे - "**ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि॥ तन्नो रुद्र प्रचोदयात्**" **ॐ तत्पुरुषाय नमः। तत्पुरुषश्रीपा० ॥ २॥** दक्षिणे - "**ॐ अघोरेभ्योऽथ घोरभ्यो घोरघोरतरेभ्यः॥ सर्वेभ्यः सर्व्वशर्व्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः॥ 'ॐ अधोराय नमः। अधोरश्रीपा० ॥ ३॥** पश्चिमे -"**ॐ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः॥**" **ॐ वामदेवाय नमः। वामदेवश्रीपा० ॥ ४॥** उत्तरे - "**ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः। भवे भवे नातिभवे भवस्व मां भवोद्भवाय नमः ॥**" **ॐ सद्योजाताय नमः। सद्योजातश्रीपा० ॥ ५॥** (इति पंचमूर्तीः पूजयेत्)॥

ततः पुष्पांजलिमादाय मूलमुच्चार्य्य '**अभीष्टसिद्धिं मे देहि शरणागतवत्सल॥ भवत्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १॥** इतिपठित्वा पुष्पांजलि च दत्त्वा विशेषार्घाद्रिंदुं निःक्षिप्य **पूजितास्तर्पिताः संतु** इति वदेत्। (इति प्रथमावरणम्) ॥ १॥

ततः पंचकोणाग्रेषु ऐशान्यादिक्रमेण। **ॐ निवृत्त्यै नमः। निवृत्तिश्रीपा० ॥ १॥ ॐ प्रतिष्ठायै नमः । प्रतिष्ठाश्रीपा० ॥ २॥ ॐ विद्यायै नमः विद्याश्रीपा० ॥ ३॥ ॐ शांत्यै नमः । शांतिश्रीपा० ॥ ४॥ ॐ शांत्यतीतायै नमः । शांत्यतीताश्रीपा० ॥ ५॥** इति पूजयित्वा पुष्पांजलिं च दद्यात्। (इति द्वितीयावरणम्) ॥ २॥

ततोऽष्टदले - **पूज्य पूजकयोरंतराले प्राचीं तदनुसारेण अन्या दिशः प्रकल्प्य** प्राचीक्रमेण। **ॐ सूर्य्यमूर्तये नमः। सूर्य्यमूर्तिश्रीपा० ॥ १ ॐ इन्दुमूर्तये नमः इन्दुमूर्तिश्रीपा० ॥ २॥** ॐ क्षितिमूर्तये नमः । क्षितिमूर्तिश्रीपा० ॥ ३॥ **ॐ तोयमूर्तये नमः। तोयमूर्तिश्रीपा० ॥ ४॥** ॐ अग्निमूर्तये नमः। अग्निमूर्तिश्रीपा०

॥ ५ ॥ ॐ पवनमूर्तये नमः। पवनमूर्तिश्रीपा० ॥ ६ ॥ ॐ आकाशमूर्तये नमः। आकाशमूर्तिश्रीपा० ॥ ७ ॥ ॐ यज्ञमूर्तये नमः। यज्ञमूर्तिश्रीपा० ॥ ८ ॥ इत्यष्टौ मूर्तीः पूजयित्वा पुष्पांजलिं च दद्यात्। (इति तृतीयावरणम्) ॥३॥

तद्बहिरष्टदले - प्राचीक्रमेण ॐ रमायै नमः। रमाश्रीपा० ॥१॥ ॐ राकायै नमः। राकाश्रीपा० ॥ २ ॥ ॐ प्रभायै नमः। प्रभाश्रीपा० ॥ ३ ॥ ॐ ज्योत्स्नायै नमः। ज्योत्स्तनाश्रीपा० ॥ ४ ॥ ॐ पूर्णायै नमः । पूर्णाश्रीपा० ॥ ५ ॥ ॐ पूषायैनमः। पूषाश्रीया० ॥ ६ ॥ ॐ पूर्ण्यै नमः। पूर्णाश्रीपा० ॥ ७ ॥ ॐ सुधायै नमः॥ सुधाश्रीपा० ॥ ८ ॥ इति पूजयित्वा पुष्पांजलिं च दद्यात्॥ (इति चतुर्थावरणम्) ॥ ४ ॥

तद्बहिरष्टदले - प्राचीक्रमेण। ॐ विश्वायै नमः। विश्वाश्रीपा० ॥ १ ॥ ॐ वंद्यायै नमः। वंद्याश्रीपा० ॥ २ ॥ ॐ सितायै नमः । सिताश्रीपा० ॥ ३ ॥ ॐ प्रह्लायै नमः। प्रह्लाश्रीपा० ॥ ४ ॥ ॐ सारायै नमः। साराश्रीपा० ॥ ५ ॥ ॐ संध्यायै नमः। संध्याश्रीपा० ॥ ६ ॥ ॐ शिवायै नमः। शिवाश्रीपा० ॥ ७ ॥ ॐ निशायै नमः। निशाश्रीपा० ॥ ८ ॥ इत्यष्टौ पूजयित्वा पुष्पांजलिं च दद्यात् ॥ (इति पंचमावरणम्) ॥ ५ ॥

तद्बहिरष्टदलेप्राचीक्रमेण। ॐ आर्य्यायै नमः । आर्य्याश्रीपा० ॥ १ ॥ ॐ प्रज्ञायै नमः। प्रज्ञाश्रीपा० ॥ २ ॥ ॐ प्रभायै नमः। प्रभाश्रीपा०॥ ३ ॥ ॐ धृत्यै नमः। धृतिश्रीपा० ॥ ३ ॥ ॐ मेधायै नमः। मेधाश्रीपा० ॥ ४ ॥ ॐ शांत्यै नमः। शांतिश्रीपा० ॥ ५ ॥ ॐ कांत्यै नमः। कांतिश्रीपा० ॥ ६ ॥ ॐ धृत्यै नमः । धृतिश्रीपा०॥ ७ ॥ ॐ मत्यै नमः। मतिश्रीपा०॥ ८ ॥ इत्यष्टौ पूजयित्वा पुष्पांजलिं च दद्यात्। (इति षष्ठावरणम्) ॥ ६ ॥

तद्बहिरष्टदले-प्राचीक्रमेण। ॐ धरायै नमः। धराश्रीपा० ॥ १ ॥ ॐ उमायै नमः। उमाश्रीपा० ॥ २ ॥ ॐ पावन्यै नमः। पावनीश्रीपा० ॥ ३ ॥ ॐ पद्मायै नमः। पद्माश्रीपा० ॥ ४ ॥ ॐ शांतायै नमः। शांताश्रीपा० ॥ ५ ॥ ॐ अमोघायै नमः। अमोघाश्रीपा० ॥ ६ ॥ ॐ जयायै नमः। जयाश्रीपा० ॥ ७ ॥ ॐ अमलायै नमः। अमलाश्रीपा० ॥ ८ ॥ इत्यष्टो पूजायित्वा पुष्पांजलिं च दद्यात्॥ (इति सप्तमावरणम्) ॥ ७ ॥

तद्बहिरष्टदले प्राचीक्रमेण। ॐ अनंताय नमः। अनंतश्रीपा० ॥ १ ॥ ॐ सूक्ष्मसंज्ञय नमः। सूक्ष्मसंज्ञश्रीपा० ॥२॥ ॐ शिवोत्तमाय नमः शिवोत्तमश्रीपा० ॥ ३ ॥ एकनेत्राय नमः। एकनेत्रश्रीपा० ॥ ४ ॥ ॐ एकरुद्राय नमः।

एकरुद्रश्रीपा० ॥५॥ ॐ त्रिमूर्तये नमः। त्रिमूर्तिश्रीपा० ॥६॥ ॐ श्रीकंठाय नमः । श्रीकंठश्रीपा०॥ ७॥ ॐ शिखंडिने नमः। शिखंडिश्री० ॥ ८॥ इत्यष्टौ पूजयित्वा पुष्पांजलिं च दद्यात् ॥ (इत्यष्टमावरणम्) ॥ ८॥

तद्बहिरष्टदले उत्तरामारभ्य ॐ उमायै नमः। उमाश्रीपा० ॥ १॥ ॐ चण्डेश्वराय नमः। चण्डेश्वरश्रीपा० ॥ २॥ ॐ नंदिने नमः। नंदिश्रीपा०॥ ३॥ ॐ महाकालाय नमः। महाकालश्रीपा० ॥ ४॥ ॐ गणेशाय नमः। गणेशश्रीपा० ॥ ५॥ ॐ वृषभाय नमः। वृषभश्रीपा० ॥ ६॥ भृंगिरिटये नमः। भृंगिरिटिश्रीपा०॥ ७॥ ॐ स्कंदाय नमः। स्कंदश्रीपा० ॥ ८॥ इत्यष्टौ पूजयित्वा पुष्पांजलिं च दद्यात्। (इति नवमावरणम्) ॥ ९॥

तद्बहिरष्टदले प्राचीक्रमेण। ॐ ब्राह्मयै नमः। ब्राह्मीश्रीपा० ॥ १॥ ॐ माहेश्वर्य्यै नमः। माहेश्वरीपा० ॥ २॥ ॐ कौमार्यै नमः। कौमारीश्रीपा० ॥ ३॥ ॐ वैष्णव्यै नमः। वैष्णवीश्रीपा० ॥ ४॥ ॐ वाराह्यै नमः। वाराहीश्रीपा० ॥ ५॥ ॐ इन्द्राण्यै नमः। इन्द्राणीश्रीपा० ॥ ६॥ ॐ चामुंडायै नमः। चामुण्डाश्रीपा० ॥ ७॥ ॐ महालक्ष्म्यै नमः। महालक्ष्मीश्रीपा० ॥ ८॥ इत्यष्टौ पूजयित्वा पुष्पांजलिं च दद्यात्॥ (इति दशमावरणम्)

तद्बाह्ये भूपुरे पूर्वादिक्रमेण – इन्द्रादिदशदिक्पालान् वज्राद्यायुधानि च पूजयित्वा पुष्पांजलिं दद्यात्। इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतां संपूज्य कृतांजलिः प्रार्थयेत् –

ॐ मृत्युंजय महारुद्रत्राहिमां शरणागतम् ।
जन्ममृत्यु-जरारोगैः पीडितं कर्मबंधनैः ॥१॥
तावकस्त्वद्गत-प्राणास्त्वच्चित्तोऽहं सदा मृड ।
इति विज्ञाप्य देवेशं जपेनमृत्युंजयं परम् ॥२॥

इति संप्रार्थ्य जपं कुर्य्यात्

अस्य पुरश्चरणमेकलक्षजपः। जपांति दशांशतो दशद्रव्यैर्होमः। होमदशांशेन मंत्रांते ॐ मृत्युंजयं तर्पयामीत्युक्ता दुग्धमिश्रितजलेन तर्पयेत्। ततस्तर्पणदशांशे मंत्रांते आत्मानमभिषिंचामि नमः इति यजमानमूर्द्धन्यभिषेकः॥ होमतर्पणाभिषेकाशक्तौ तत्स्थाने तत्तद्द्विगुणो जपः कार्यः। ततोऽभिषेकदशांशतोऽष्टोत्तरशतसंख्यातो वा ब्राह्मणभोजनं कुर्य्यात्। एवं कृते मंत्रः सिद्धो भवति।

दशद्रव्यैः – प्रजुहुयात्तानि बिल्वफलं तिलाः ॥ १॥ पायसं सर्वर्ष दुग्धं

दधि दूर्वा च सप्तमी ॥ वटात्पलाशात्ख दिरात्समिधो मधुरप्लुताः ॥ २ ॥ एवं कृते प्रयोगार्हो जायतेऽयं महामनुः ॥ जन्मभे दशमे तस्मात्पुनश्चैकोनविंशके ॥ ३ ॥ जुहुयाद्यः सुधावल्याः समिधश्चतुरंगुलाः ॥ स रोगान् सकलाञ्शत्रून् पराभूय श्रिया युतः ॥ ४ ॥ मोदते पुत्रपौत्राद्यैः शतवर्षाणि साधकः ॥ समिद्भिः श्रीफलोत्थाभिर्होमः संपत्तिसिद्ध्ये ॥ ५ ॥ पलाशतरुजाभिस्तु ब्रह्मवर्चस सिद्धये ॥ वटोत्थभिर्धनप्राप्त्यै खादिरीभिस्तु कांतये ॥ ६ ॥ तिलैरधर्मनाशाय सर्षपैः शत्रुनष्टये ॥ पायसेन कृतो होमः कांति श्रीकीर्तिदायकः ॥ ७ ॥ कृत्वा मृत्युक्षयारोग्यं दध्ना संवादसिद्धिदः ॥ होमसंख्या तु सर्वत्रायुतमानेन कीर्तिता ॥ ८ ॥ अष्टोत्तरशतं दूर्वात्रिकहोमाद्रुजां क्षयः ॥ स्वजनमदिउवसे यस्तु प्रायसैर्मधुरान्वितैः ॥ ९ ॥ जुहोति तस्य वर्द्ध । कुलमारोग्यकीर्तयः ॥ गुडूचीबकुलोत्थभिः समिद्धिर्हवनं नृणाम् ॥ १० ॥ जन्मतापत्रयं रोगान् मृत्युं चापि विनाशयेत् ॥ प्रत्यहं जुहुयाद्दूर्वा अपमृत्युविनष्टये ॥ ११ ॥ किं बहूक्तेन सर्वेष्टं प्रयच्छति शिवो नृणाम् ॥ अपामार्गसमिद्धिश्च सिद्धान्नैर्ज्वर नष्टये ॥ दुग्धाक्तैरमृताखंडैर्मासं होमोऽखिलाप्तये ॥''

॥ इति महामृत्युंजयमंत्रप्रयोगः मंत्रमहौदधि ॥

॥ अथ महामृत्युञ्जय मन्त्र प्रयोगः ॥

(शुक्रोपासिता)

विनियोगः - ॐ अस्य श्री महामृत्युञ्जय मन्त्रस्य महर्षि भृगु ऋर्षि, पंक्ति गायत्री, अनुष्टुप् छन्दः , सदाशिव महामृत्युञ्जय रुद्रो देवता, श्रीं बीजं, ह्रीं शक्तिं ममाभीष्ट सिद्धये जपे विनियोगः ।

षडाङ्गन्यास - ॐ हौं ॐ जूं ॐ सः ॐ भूः ॐ भुवः ॐ स्वः ॐ त्र्यम्बकं नमो भगवते रुद्राय शूलपाणये स्वाहा हृदयाय नमः । ॐ हौं ॐ जूं ॐ सः ॐ भूः ॐ भुवः ॐ स्वः ॐ यजामहे ॐ नमो भगवते रुद्राय अमृतमूर्तये मां जीवय शिरसे स्वाहा । ॐ हौं ॐ जूं ॐ सः ॐ भूः ॐ भुवः ॐ स्वः ॐ सुगन्धिंम पुष्टिवर्धनम् ॐ नमो भगवते रुद्राय चन्द्रशिरसे जटिने स्वाहा - शिखायै वषट् । ॐ हौं ॐ जूं ॐ सः ॐ भूः ॐ भुवः ॐ स्वः ॐ उर्वारुकमिव बन्धनान् ॐ नमो भगवते रुद्राय त्रिपुरान्तकाय कवचाय हुं। ॐ हौं ॐ जूं ॐ सः ॐ भूः ॐ भुवः ॐ स्वः ॐ मृर्त्योमुक्षीय ॐ नमो भगवते रुद्राय त्रिलोचनाय ऋग्यजुः साम मन्त्राय नेत्रत्रयाय वौषट् । ॐ हौं

ॐ जूं ॐ सः ॐ भूः ॐ भुवः ॐ स्वः ॐ मामृतात् ॐ नमो भगवते रुद्राय अग्नित्रयाय ज्वल-ज्वल मां रक्ष रक्ष ॐ अघोरास्त्राय नमः अस्त्राय फट्।

इसी तरह कराङ्गन्यास करें। ध्यान व यन्त्रार्चन पूर्व में दिये गये पूजन प्रयोगों के अनुसार ही जाने।

॥ शुक्रोपासिता भिन्नपाद मृतसञ्जीवनी विद्या॥

शुक्राचार्य उपासित ६२ अक्षरात्मक महामृत्युञ्जय मन्त्र का उल्लेख पूर्व में किया जा चुका है।

यह मन्त्र भिन्नपाद मृत्युञ्जय मन्त्र है जो कि पूर्व में श्रीविद्याणर्व तंत्र के अनुसार ललिता त्रिपुर सुन्दरी के मन्त्र से पुटित भिन्नपाद मन्त्र बताया जा चुका है।

यह मन्त्र गायत्री मन्त्र से भिन्नपाद मन्त्र बनता है। यथा -

वेदादि-भूरादिपदत्रयं च मध्ये कृतं मृत्युहरं त्रियम्बकम् ।
जपेत् फलार्थी विधिवत् प्रजप्य प्रासादबीजं मृत्युञ्जयसंपुटेत् ॥

मन्त्र - ॐ हौं जूं सः ॐ भूर्भुवः स्वः ॐ तत्सवितुर्वरेण्यं त्र्यम्बकं यजामहे भर्गो देवस्य धीमहि सुगन्धिं पुष्टिवर्धनम् धियो यो नः प्रचोदयात् उर्वारुकमिव बन्धनान् मृत्योर्मुक्षीय मामृतात् स्वः भुवः भूः ॐ सः जूं हौं ॐ।

अन्यकल्पों में दूसरा मन्त्र भेद स्वरूप में है।

ॐ हौं जूं सः ॐ भूर्भुवः स्वः ॐ त्र्यम्बकं यजामहे तत्सवितुर्वरेण्यं सुगन्धिं पुष्टिवर्धनम् भर्गो देवस्य धीमहि उर्वारुकमिव बन्धनान् धियो यो नः प्रचोदयात् मृत्योर्मुक्षीय मामृतात् स्वः भुवः भूः ॐ सः जूं हौं ॐ।

॥ मृत्युञ्जय श्रीचक्रपूजा ॥

त्रैलोक्य चिन्तामणि, दीक्षावल्लभ में शिवात्मक श्रीचक्र का वर्णन है।

श्रीचक्र में श्रीत्रिपुरसुन्दरी का पूजन अपने शिव कामेश्वर के साथ किया जाता है, उसी तरह मृत्युञ्जय के साथ उनकी शक्ति अमृतेश्वरी का पूजन करना चाहिये।

यंत्रोद्धार -

बिन्दु त्रिकोण षट्कोण वृत्ताष्टदलमण्डितम् ।
वृत्तत्रयं धरासद्म श्रीचक्रं शिवमीरितम् ॥

इसके अनुसार बिन्दु त्रिकोण षट्कोण वृत्त अष्टदल, वृत्तत्रय चक्र और भूपूर से यह यन्त्र बनता है।

इसका यन्त्र श्रीयन्त्र की तरह ही यन्त्रार्चन चक्र पूजा करें। विशेष विधान मृत्युञ्जय पटल में देखें।

मृत्युञ्जय श्री यंत्रम्

प्रथमावरणम् - बिन्दु में भगवान मृत्युञ्जय का ध्यान करें। उसके वामभाग में उनकी शक्ति अमृतेश्वरी का आवाहन करें।

ॐ ह्रीं श्रीं मृत्युञ्जये भगवति चैतन्य चन्द्रे हंस संजीवनी स्वाहा। इहागच्छ इहतिष्ठ। गुरुचतुष्टय का ध्यान करें। ॐ गुरवे नमः। परम गुरवे नमः। परात्पर गुरवे नमः। परमेष्ठी गुरवे नमः।

द्वितीयावरणम् - (त्रिकोणे) **सं सत्वाय नमः। रं रजसे नमः। तं तमसे नमः। तद्वाह्वये तत्रैव। वामायै नमः। जेष्ठायै नमः। रौद्रयै नमः।**

तृतीयावरणम् - (षट्कोणे) मृत्युञ्जय मन्त्र के षडाङ्ग न्यास करते हैं, उन मन्त्रों से करें। अथवा सामान्य क्रम में - **ॐ मृत्युञ्जयाय हृदयशक्तये नमः। शिरो शक्तये नमः। शिखा शक्तये नमः। कवच शक्तये नमः। नेत्रत्रयाय शक्तये नमः। अस्त्र शक्तये नमः।**

चतुर्थावरणम् - (अष्टदले) **ॐ अर्कमूर्तये नमः। इन्द्रमूर्तये नमः। वसुधामूर्तये नमः। तोयमूर्तये नमः। वह्निमूर्तय नमः। वायुमूर्तये नमः। आकाशमूर्तये नमः। यजमानमूर्तये नमः।**

पञ्चमावरणम् - (अष्टदले) **ॐ रमायै नमः। राकायै नमः। प्रभायै नमः। ज्योत्स्नायै नमः। पूर्णायै नमः। उषायै नमः। पूरण्यै नमः। सुधायै नमः।**

षष्टमावरणम् - (अष्टदले) **ॐ विश्वायै नमः। विद्यायै नमः। सितायै नमः। प्रह्वायै नमः। सारायै नमः। सन्ध्यायै नमः। शिवायै नमः। निशायै नमः।**

सप्तमावरणम् - (अष्टदले) **ॐ आर्यायै नमः। प्रज्ञायै नमः। प्रभायै नमः। मेधायै नमः। शान्त्यै नमः। कान्त्यै नमः। धृत्यै नमः। सत्यै नमः।**

अष्टमावरणम् - (अष्टदले) **ॐ धरायै नमः। उमायै नमः। पाविन्यै नमः। पद्मायै नमः। शान्तायै नमः। मोघायै नमः। जयायै नमः। अमलायै नमः।**

नवमावरणम् - (अष्टदले) **ॐ भवायै नमः। शर्वायै नमः। पशुपतये नमः। ईशानाय नमः। उग्राय नमः। रुद्राय नमः। भीमाय नमः। महते नमः।**

दशमावरणम् - (अष्टदले) **ॐ भवान्यै नमः। शर्वाण्यै नमः। पशुपत्यै नमः। ईशान्यै नमः। उग्रायै नमः। रुद्राण्यै नमः। भीमायै नमः। महत्यै नमः।**

एकादशावरणम् - प्रथमवृत्त में गायत्री मन्त्र से सविता का आवाहन करे। द्वितीय वृत्त में -

ॐ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वानावेव सिन्धु दुरितात्यग्नि ॥
ॐ जातवेदसे दुर्गायै नमः।

तृतीय वृत्त में - **ॐ त्र्यम्बकं यजामहे.......। त्र्यम्बकायै नमः।**

द्वादशावरणम् - (भूपूरे) पूर्वादिक्रमेण - **ॐ ज्येष्ठायै नमः। श्रेष्ठाय नमो रुद्राय नमः। कालायै नमः। कलविकरणाय नमो बलविकरणाय नमः। बलाय नमो बलप्रमथनाय नमः। सर्वभूतदमनाय नमः। मनोन्मनाय नमः। भवोद्भवाय नमः।**

त्रयोदशावरणम् - (भूपूरे) पूर्वादिक्रमेण - **ॐ ब्रह्मयै नमः। माहेश्वर्यै नमः। कौमार्यै नमः। वैष्णव्यै नमः। वाराह्यै नमः। इन्द्राण्यै नमः। चामुण्डायै नमः। महालक्ष्म्यै नमः।**

चतुर्दशावरणम् - (भूपूरे) इन्द्रादि लोकपालों का आवाहन करें।

पञ्चदशामावरणम् - (भूपूरे) इन्द्रादि दिक्पालों के वज्रादि आयुधों का पूजन करें।

॥ विविध देवस्य आयुष्यकर मृत्युञ्जय मन्त्र ॥

वैरिञ्चकल्प में ब्रह्मा, नृसिंहविष्णु एवं त्र्यम्बकरुद्र के तीन वैदिक मन्त्र दिये हैं। व्यास एवं धर्मराज के भी आयुष्यमन्त्र उपलब्ध है। यथा -

॥ ब्रह्मा ॥

ॐ हंसात्मको यो अपामग्रेस्तेजसा दीप्यमानः ।
स नो मृत्योस्त्रायतां नमो ब्रह्मणे विश्वनाभिः ॥

॥ नृसिंहविष्णु ॥

ॐ उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतोमुखम् ।
नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम् ॥

त्र्यम्बकं - **ॐ त्र्यम्बकं यजामहे ....॥ (पूर्ण ऋचा)**

॥ व्यासमन्त्र ॥

मन्त्रमहोदधि में कहा गया है कि -

मृत्युञ्जयेन पुटितं यो व्यासस्य मन्त्रं जपेत् ।
सर्वोपद्रव सन्त्यक्तो लभते वाञ्छितं फलम् ॥

प्रायः कई बार ऐसी परिस्थिति बनती है कि विभिन्न वैद्य, डॉक्टरों का इलाज लंबे समय तक चलने पर भी रोग का शमन नहीं होता है तो उस समय मृत्युञ्जय मन्त्र संपुटित व्यासमन्त्र का जप करने से महर्षि वेदव्यास स्वयं सद्बुद्धि देकर रोगी की रक्षा के लिये मार्गदर्शन करते है एवं वातावरण अनुकूल बनने लगता है।

मन्त्र - '' ॐ जूं सः व्यां वेदव्यासाय नमः सः जूं ॐ''।

विनियोग - **ॐ अस्य श्रीव्यासमन्त्रस्य ब्रह्मा ऋषिः, अनुष्टुप छन्दः, सत्यवती सुतो देवता व्यां बीजं, नमः शक्तिः, मम रोगज्ञान पूर्वकं सर्वारिष्टनिवृत्तये मृत्युञ्जय संपुटित व्यास मन्त्र जपे विनियोगः।**

ऋषिन्यास - **ब्रह्मणे ऋषये नमः शिरसि, अनुष्टुप् छन्दसे नमः मुखे, सत्यवतीसुतो देवता हृदये, व्यां बीजं नमः गुह्ये, नमः शक्तिं नमः पादयो विनियोगाय नमः सर्वाङ्गे।**

मन्त्र	**करन्यास**	**अंगन्यास**
व्यां	अंगुष्ठाभ्यां नमः।	हृदयाय नमः
व्यीं	तर्जनीभ्यां नमः।	शिरसे स्वाहा
व्यूं	मध्यमाभ्यां नमः।	शिखायै वषट्
व्यैं	अनामिकाभ्यां नमः।	कवचाय हुँ।
व्यौं	कनिष्ठिकाभ्यां नमः।	नेत्रत्रयाय वौषट्।
व्यः	करतल करपृष्ठाभ्यां नमः।	अस्त्राय फट्।

ध्यानम् -

व्याख्यामुद्रिकया लसत्करतलं सद्योगपीठस्थितं
वामे जानुतले दधानमपरं हस्तं सुविद्यानिधिम् ।

विप्रव्रातवृतं प्रसन्नमनसं पाथोरुहाङ्गद्युतिं
पाराशर्यमतीव पुण्यचरितं व्यासं भजे सिद्धये ॥

॥ व्यासयन्त्र पूजनम् ॥

यन्त्र के मध्य में षट्कोण उसके बाहर अष्टदल उसके बाहर भूपूर (परिधि) युक्त हैं। मध्यबिन्दु में (यन्त्रमध्य) में महर्षि व्यास का आवाहन करे।

व्यास पूजन यंत्र

प्रथमावरण पूजनम् - (षट्कोणे) **व्यां हृदयाय नमः आग्नेये। व्यीं शिरसे स्वाहा नैर्ऋत्ये। व्यूं शिखायै वषट् वायव्ये। व्यैं कवचाय हुं ऐशान्ये व्यौं नेत्रत्रयाय वौषट् अग्रे। व्यः अस्त्राय फट् सर्व दिक्षु** (पश्चिमे)।

द्वितीयावरण पूजनम् - (अष्टदले) **ॐ पैलाय नमः पूर्वे। ॐ वैशम्पायनाय नमः दक्षिणे। ॐ जैमिन्यै नमः पश्चिमे। ॐ सुमन्तवे नमः दक्षिणे।**

आग्नेयादि चारों कोणों में - (अष्टदले) **ॐ श्री शुकाय नमः आग्नेये। ॐ रोमहर्षणाय नमः नैर्ऋत्ये। ॐ उग्रश्रवसे नमः वायव्ये। ॐ अन्यमुनीन्द्रेभ्यो नमः ऐशान्ये॥**

तृतीयावरणम् - (भूपूरे) **इन्द्रादि दश दिक्पालों का पूजन करें।**

चतुर्थावरणम् - (भूपूरे वाह्ये) **पूर्वादिक्रमेण वज्रादि आयुधों की पूजा करें।**

॥इति व्यास मन्त्र प्रयोगः॥

॥ सर्वरोगनाशक धर्मराज मन्त्र विधानम् ॥

(मन्त्रमहोदधि ग्रन्थ में इसका संक्षिप्त विधान है।)

संकल्प - **मम सकलापदां विनाशनाय सर्वरोगाणां प्रशमनार्थे श्रीधर्मराज मन्त्र जपमहं करिष्ये।**

करन्यास - हृदयादि न्यास की तरह करें। **ॐ क्रों ह्रीं हृदयाय नमः। ॐ आं वैं शिरसे स्वाहा। ॐ वैवस्वताय शिखायै वषट्। ॐ धर्मराजाय कवचाय हुं। ॐ भक्तानुग्रहकृते नेत्रत्रयाय वौषट्। ॐ नमः अस्त्राय फट्।**

मन्त्र - **ॐ क्रों ह्रीं आं वैं वैतवस्ताय धर्मराजाय भक्तानुग्रहकृते नमः।**

ध्यानम् –

पाथः संयुतमेघसन्निभतनुः प्रद्योतनस्यात्मजो
नृणां पुण्यकृतां शुभावहवपुः पापीयसां दुःखकृत् ।
श्रीमद्दक्षिणदिक्पति र्महिषगो भूषाभरालंङ्कृतो
ध्येयः संयमनीपतिः पितृगण स्वामी यमो दण्डभृत् ॥

॥ इति धर्मराज प्रयोग ॥

॥ अरिष्टनाशक यन्त्रादिभिषेक प्रयोगः ॥

रोगोपचार हेतु निम्नलिखित यन्त्र बनाये। मण्डल बनाये। मध्य में साध्यनाम (रोगी का नाम लिखे)। बाहर षट्कोण में षडङ्गों की पूजा करें। उसके बाहर **पञ्चदल में ईशानादि देवों का नाम** लिखें। उसके बाहर **अष्टदल में त्र्यम्बक मन्त्र** के आठ भाग लिखें। **अ......... अं अः। क वर्गादि आठवर्गो को लिखें,** लिखना असंभव हो तो कल्पना करें। उसके बाहर भूपूर परिधि में इन्द्रादि देवों का आयुध सहित पूजन करें।

मण्डल के मध्य में कलश रखें उसमें सतावरी व अन्य औषधियों डालें। शिवार्चन व यन्त्रार्चन करे एवं उस जल से रोगी का अभिषेक करें।

उपरोक्त तरह के दो यन्त्र भोजपत्र पर लोहे की कलम से लिखें। जिस शत्रु का भय हो उस शत्रु का नाम मध्य में लिखें। यन्त्र का उत्तराभिमुख होकर अर्चन करें। एक यन्त्र ताबीज में भरकर स्वयं के बांध लेवें। एवं दूसरा यन्त्र एक शिला पर रखकर दूसरी भारी शिला से दाब देवें तो शत्रु अनुकूल होगा।

अगर विशेष भय होवे तो स्वयं के पास रखने वाला यंत्र तो गंध व लोहे की कलम से लिखें परन्तु शिला के नीचे दबानें वाला यन्त्र गंध व भस्म से आक व धत्तूर के रस में कौवे के पंख की कलम से लिखें।

॥ रणदीक्षा और वीराभिषेक ॥

नरपतिजयचर्या के शान्त्याध्याय में अभिषेक विधि मृत्युञ्जय कवच न्यासादि दिये गये हैं। यथा -

अभिषेकात् परं पूजा कर्तव्या पूर्व मण्डले ।
मृत्युञ्जयेन मन्त्रेण पूर्वोक्तविधिना ततः ।

"ॐ जूं सः"

पश्चात् समर्पयेन्मन्त्रं रणदीक्षा भवेदियम् ।
तया समन्वितो वीरस्त्रिदशैरपि दुर्जयः ॥

इसके अनुसार युद्ध में विजय का इच्छुक मृत्युञ्जय दीक्षा लेवें। शुद्ध भूमि पर एक अष्टदल बनायें उसके बाहर ३ परिधी (तीन रंगों में - सत, रज, तम युक्त बनायें) बनायें।

अष्टदल में मृत्युयन्त्र के अष्टदल में ६४ देवों का यन्त्रार्चन करें। एवं एक-एक पत्र में ८-८ देवों का अर्चन करें।

पद्मपत्रे लिखेद् देवांश्चतुः षष्टिप्रमाणतः ।
एकैकपद्मपत्रेषु वसुसंख्या दले दले ॥
भैरवी भैरवा सिद्धिर्ग्रहा नागा उपग्रहाः ।
पीठोपपीठ संयुक्ता दिक्पालैश्च समन्विता ॥
कर्णिकायां न्यसेद देवं साङ्गं सहस्त्रकम् ।
प्रणवादिनमोऽन्तैश्च नाममन्त्रैस्ततो ऽर्चयेत् ॥

अर्थात् भैरवी-भैरव, सिद्धियां, ग्रह, नाग, उपग्रह, पीठ, उपपीठ का अर्चन करें। भूपूर में दिक्पाल व आयुधों का अर्चन करें, अथवा पूर्व में बताई गयी यन्त्र पूजा में भैरव, नाग, अष्टसिद्धि की पूजा वाला यन्त्र काम में लेवें।

यन्त्र मध्य में कुम्भ स्थापित करे उसमें सर्वोषधी शतावरी दूर्वा अक्षत पल्लव युक्त करें।

यन्त्रार्चन बाद कुछ दूरी पर अष्टदल के मण्डल युक्त आसन पर वीर पुरुष को बैठाकर उस कुम्भ के जल से मृत्युञ्जय कवचादि मन्त्रों से अभिषेक कर मृत्युञ्जय मन्त्र की दीक्षा प्रदान करें।

॥ अमृतेश्वरी मन्त्र प्रयोगः॥

पुरुष देवता के साथ उसकी शक्ति देवता का पूजन करने से पूर्णाङ्ग होता है। स्त्री देवता के साथ पुरुष देवता का पूजन-अर्चन भी आवश्यक है।

यदि पुरुष देवता के एक लक्ष जप किये जाये तो उसके दशांश जप (दस हजार) उसकी स्त्री देवता के करने आवश्यक है। अतः मृत्युञ्जय प्रयोग के साथ अमृतेश्वरी देवी का पूजन अर्चन व जप किया जाय तभी पूर्णाङ्ग होगा।

श्रीभुवनेश्वरी महास्तोत्र में श्रीपृथ्वीधराचार्य ने मन्त्रोद्धार इस प्रकार किया है।

श्रीमृत्युञ्जयनामधेय भगवच्चैतन्य चन्द्रात्मिके
ह्रींङ्कारि प्रथमा तमांसि दलय त्वं हंससञ्जीविनि ।
जीवं प्राणविजृम्भमाण हृदयग्रंथिस्थितं मे कुरु
त्वां सेवे निजबोधलाभरभसा स्वाहा भजामीश्वरीम् ॥

मन्त्र - ॐ श्रीं ह्रीं मृत्युञ्जये भगवति चैतन्य चन्द्रे हंससञ्जीवनी स्वाहा।

ध्यानम् –

जाग्रद बोधसुधामयूखनिचयैराप्लाव्य सर्वादिशो,
यस्याः कापि कला कलङ्करहिता षट्चक्रमाक्रामति ।
दैन्यध्वान्तविदारणैकचतुरा वाचं परां तन्वती,
या नित्या भुवनेश्वरी विहरतां हंसीव मन्मानसे ॥

यही पृथ्वीधराचार्य ने यन्त्रोद्धार दिया है -

व्योमेन्दो रसनार्णकर्णिकमचां द्वन्द्वै स्फुरत्केसरं,
पत्रान्तर्गत पञ्चवर्ग यशलार्णादि त्रिवर्ग क्रमात् ।
आशास्वस्त्रिषु लान्तलाङ्गलियुजा क्षोणीपुरेणावृतं,
वर्णाब्जं शिरसि स्थितं विषगद प्रध्वंसि मृत्युञ्जयेत् ॥

उपरोक्त यन्त्र में वर्णादि लिखकर पूजाकर धारण करने से शुभ रहे।

॥ चित्रविद्या अमृतेश्वरी प्रयोगः॥

मृत्युञ्जय प्रयोग के साथ इसका प्रयोग करने से प्रयोग सफल होकर लाभ मिलता है।

विनियोगः - **ॐ अस्य श्री चित्रविद्या अमृतेश्वरी मंत्रस्य संवर्त्तकऋषिः, शक्करी छन्दः, चित्रविद्या अमृतेश्वरी देवता, ठं बीजं, सूं शक्ति, इष्ट सिद्धयर्थे जपे विनियोगः।**

षडङ्गन्यासः - **ठां, ठीं, ठूं, ठें, ठौं, ठः से क्रमशः न्यास करें।**

ध्यानम्–

अमलकमलमध्ये चन्द्रपीठे निषण्णाम-
मृतकलश वीणा भिन्न मुद्राग्र हस्ताम् ।
प्रणतशिरसि पूरं संस्त्रवन्तीं सुधायाः
शरणमह्मुपैमि श्री शिवां चित्रविद्याम् ॥

मंत्र- वं सं ज्झूं ज्झूं जूँ ठं ह्रीं श्रीं श्री भगवति चित्रविद्ये महामाये अमृतेश्वरि एहयेहि वरे वरदे प्रसन्न वदने अमृतं स्त्रावय स्रावय अनलं शीतल कुरु कुरु सर्वविष- नाशय नाशय सर्वताप ज्वरं हन हन सर्वपैत्योन्मादं मोचय मोचय

आज्योस्ष्ठ शमय शमय सर्वजनं मोहय मोहय मां पालय पालय श्रीं ह्रीं ठं जूं ज्झूं ज्झूं सं वं स्वाहा।

ह्रीं श्रीं का मन में स्मरण कर साध्य का ध्यान करें एवं अमृतकलश से सिञ्चित होने का ध्यार करें।

किसी के पैत्योन्माद होवे तो साध्यनाम की जगह यंत्र में उसका नाम लिखे। मूल मंत्र के दस हजार जप करें। यंत्र को गुड़ की गुटिका बनाकर खिला देवे। प्रधान देव की पूजा में रखें अमृतकलश से साध्य का सिंचन करे लाभ होवे। जब कामना हेतु प्रयोग नहीं करना होवे तो साध्यनाम बिना लिखे यंत्र का पूजन जप करें।

॥ मृत्युञ्जयमन्त्र होम द्रव्याणी ॥

दशद्रव्यैः (मन्त्रमहोदधौ)

प्रजुहुयात्तानि बिल्वफलं तिलाः॥ १॥ पायसं सर्षपा दुग्धं दधि दूर्वा च सप्तमी॥ वटात्पलाशात्खदिरात्समिधो मधुरप्लुताः॥ २॥ एवं कृते प्रयोगार्हो जायतेऽयं महामनुः॥ जन्मभे दशमे तस्मात्पुनश्चैकोनविंशके ॥ ३॥ जुहुयाद्यः सुधावल्याः समिधश्चतुरंगुलाः ॥ स रोगान् सकलाच्छशत्रून् पराभूय श्रिया युतः ॥ ४॥ मोदते पुत्रपौत्राद्यैः शतवर्षाणि साधकः॥ समिद्भिः श्रीफलोत्थाभिर्होमः संपत्तिसिद्ध्ये ॥५॥ पलाशतरुजाभिस्तु ब्रह्मवर्चससिद्धये॥ वटोत्थाभिर्धनप्राप्त्यै खादिराभिस्तु कांतये ॥ ६॥ तिलैरधर्मनाशाय सर्षपैः शत्रुनष्टये ॥ पायसेन कृतो होमः कांति श्रीकीर्तिदायकः ॥ ७॥ कृत्वा मृत्युक्षयाकरो दध्ना संवादसिद्धिदः॥ होमसंख्या तु सर्वत्रायुतमानेन कीर्तिता ॥ ८॥ अष्टोत्तरशतं दूर्वात्रिकहोमाद्रुजां क्षयः ॥ स्वजन्मदिवसे यस्तु प्रायसैर्मधुरान्वितैः ॥ ९॥ जुहोति तस्य वर्द्धन्ते कुमलारोग्यकीर्तयः॥ गुडूचीबकुलोत्थभिः समिद्भिर्हवनं नृणाम् ॥ १०॥ जन्मतारात्रयेरोगं मृत्युं चापि विनाशयेत्॥ प्रत्यहं जुहुयाद्दूर्वा अपमृत्युविनष्टये ॥ ११॥ किं बहूक्तेन सर्वेष्टं प्रयच्छति शिवो नृणाम् ॥ अपामार्गसमिद्भिश्च सिद्धान्नैर्ज्वरनष्टये ॥ दुग्धाक्तैरमृताखंडैर्मासं होमोऽखिलाप्तये॥''

सुधावल्ली - (गुडूची, कश्मरी एवं बकुल) की चार अंगुल की समिधाओं का हवन पुरश्चरण में अथवा अपने जन्म नक्षत्र से १० वें या २१ वें नक्षत्र में करें तो रोग, शोक शत्रु का नाश होकर सम्पत्ति को प्राप्त करता है। वंश वृद्ध होवे। तीन पत्तों वाली दूर्वा के होम से आयुवृद्धि होवे। धनप्राप्ति हेतु श्रीफल बिल्वफल एवं

बरगद की समिधाओं से हवन करें। पलाश समिध सें वाक्सिद्धि, ब्रह्मवर्चस् वृद्धि, खदिर समिध से कान्तिवृद्धि, सरसों के होम से शत्रुनाश, तिलों के होम सें अधर्मनाश व शत्रुनाश होवे।

खीर के होम से कांन्ति कीर्ति व लक्ष्मी की प्राप्ति होवें। दही के होम से शत्रुकृत प्रेतादिविघ्ननाश होवे तथा अपमृत्युनाश होवें। त्रिमधु (घी, मधु, शर्करा) मिश्रित खीर के होम से आरोग्य कीर्ति व लक्ष्मी का विस्तार होवे। अपामार्ग के होम से ज्वर नाश होवे तथा अभिलषित प्राप्ति हेतु दुग्ध में डुबोये गये गिलोय के टुकड़ों से एक मास पर्यन्त हवन करना चाहिये।

॥ महामृत्युञ्जय कवचम् ॥

विनियोग: :- ॐ **अस्य श्रीमहामृत्युञ्जय कवचस्य श्रीभैरवऋषि: गायत्री छन्द: श्रीमृत्युञ्जय रुद्रो देवता ॐ बीजं जूं शक्ति: स: कीलकं हौमिति तत्त्वं श्री चतुर्वर्गफल साधनाय पाठे विनियोग:।**

ऋष्यादिन्यास: :- **श्रीभैरव ऋषये नम: (शिरसि), गायत्रीछन्दसे नम: (मुखे), श्रीमृत्युञ्जयरुद्र देवतायै नम: (हृदये), ॐ बीजाय नम: (गुह्ये), जूं शक्तये नम: (पादयो:), स: कीलकाय नम: (नाभौ), हौंतत्त्वाय नम: (हृदि), विनियोगाय नम: (सर्वाङ्गे)।**

कर षडङ्गादिन्यास: :- **ॐ हौं जूं स:** इस मंत्र से कर एवं हृदयादि षड़ङ्गन्यास करे।

ध्यानम् :–

चन्द्रमण्डल मध्यस्थे रुद्रमाले विचित्रिते ।
तत्रस्थं चिन्तयेत् साध्यं मृत्यु प्राप्तोऽपि जीवति ॥१॥

॥ स्तोत्रम् ॥

ॐ जूं स: हौं शिर: पातु देवो मृत्युञ्जयो मम ।
श्रीशिवो वै ललाटं च ॐ हौं भ्रुवौ सदाशिव: ॥२॥
नीलकण्ठोऽवतान्नेत्रे कपर्द्दी मेवताच्छ्रुती ।
त्रिलोवनोऽवताद् गण्डौ नासां मे त्रिपुरान्तक: ॥३॥
मुखं पीयूषघटभृदोष्ठौ मे कृत्तिकाम्बर: ।
हनुं मे हाटकेशानो मुखं बटुकभैरव: ॥४॥

कन्धरां कालमथनो गलं गणप्रियोऽवतु।
स्कन्धौ स्कन्दपिता पातु हस्तौ मे गिरिशोऽवतु ॥५॥

नखान् मे गिरिजानाथः पायादङ्गुलिसंयुतान् ।
स्तनौ तारापतिः पातुः वक्षः पशुपतिर्मम ॥६॥

कुक्षि कुबेरवरदः पार्श्वौ मे मारशासनः ।
शर्वः पातु तथा नाभिं शूली पृष्ठं ममावतु ॥७॥

शिश्नं मे शङ्करः पातु गुह्यं गुह्यकवल्लभः ।
कटिं कालान्तकः पायादूरू मेऽन्धकघातकः ॥८॥

जागरूकोऽवताज्जानू जङ्घे मे कालभैरवः ।
गुल्फौ पायाज्जटाधारी पादौ मृत्युञ्जयोऽवतु ॥९॥

पादादिमूर्धपर्यन्तं सद्योजातो ममावतु ।
रक्षाहीनं नामहीनं वपुः पात्वमृतेश्वरः ॥१०॥

पूर्वं बलविकरणो दक्षिणे कालशासनः ।
पश्चिमे पार्वतीनाथ उत्तरे मां मनोन्मनः ॥११॥

ऐशान्यामीश्वरः पायादाग्नेय्यामग्निलोचनः ।
नैर्ऋत्यां शम्भुरव्यान्मां वायव्यां वायुवाहनः ॥१२॥

ऊर्ध्वे बलप्रमथनः पाताले परमेश्वरः ।
दश दिक्षु सदा महामृत्युञ्जयश्च माम् ॥१३॥

रणे राजकुले द्यूते विषये प्राणसंशये ।
पायादों जूं महारुद्रो देवदेवो दशाक्षरः ॥१४॥

प्रभाते पातु मां ब्रह्मा मध्याह्ने भैरवोऽवतु ।
सायं सर्वेश्वरः पातु निशायां नित्यचेतनः ॥१५॥

अर्द्धरात्रे महादेवो निशान्ते मां महोदयः ।
सर्वदा सर्वतः पातु ॐ जूं सः हौं मृत्युञ्जयः ॥१६॥

॥ फलश्रुति ॥

इतीदं कवचं पुण्यं त्रिषु लोकेषु दुर्लभम् ।
सर्वमन्त्रमयं गुह्यं सर्वतन्त्रेषु गोपितम् ॥१७॥

पुण्यं पुण्यप्रदं दिव्यं देवेदेवाधिदैवतम् ।
य इदं च पठेन्मन्त्रं कवचं वाचयेत्ततः ॥१८॥

तस्य हस्ते महादेवि! त्र्यम्बकस्याष्टसिद्धयः ।
रणे धृत्वा चरेद् युद्धं हत्वा शत्रून् जयं लभेत् ॥१९॥
जयं कृत्वा गृहं देवि! स प्राप्स्यति सुखं पुनः ।
महाभये महारोगे महामारी भये तथा ॥२०॥
दुर्भिक्षे शत्रुसंहारे पठेत् कवचमादरात् ।

॥ इति महामृत्युञ्जय कवचम् ॥

॥ श्रीमहामृत्युञ्जय सहस्त्रनाम स्तोत्रम् ॥

विनियोग :- अस्य श्रीमहामृत्युञ्जय सहस्त्रनाम स्तोत्रस्य भैरवऋषिरुष्णिक् छन्दः श्रीमहामृत्युञ्जयरुद्रो देवता। ॐ बीजं जूं शक्तिः सः कीलकं मम सर्वविधरोगादिशमनपूर्वकं दीर्घायुः प्राप्तये पाठे विनियोगः।

ऋष्यादिन्यास :- भैरवऋषये नमः (शिरसि), उष्णिक्छन्दसे नमः (मुखे), श्रीमहामृत्युञ्जयरुद्रदेवतायै नमः (हृदये), ॐ बीजाय नमः (गुह्ये), जूं शक्तये नमः (पादयोः), सः कीलकाय नमः (नाभौ) विनियोगाय नमः सर्वाङ्गे।

कर-हृदयादिन्यासः :- ॐ (अंगु० हृदयाय नम०), जूं (तर्जनी० शिरसे०), सः (मध्यमा० शिखायै०) ॐ (अना० कवचाय०), जूं (कनि० नेत्र०), सः (कर० अस्त्राय०)

ध्यानम् :-

उद्यच्चन्द्र समानदीप्तिममृतानन्दैकहेतुं शिवं,
ॐ जूं सः भुवनैकसृष्टिप्रलयोद् भूतैकरक्षाकरम् ।
श्रीमत्तारदशार्णमण्डिततनुं त्र्यक्षं द्विबाहुं परं,
श्रीमृत्युञ्जयमीड्य विक्रमगुणैः पूर्ण हृदयाब्जे भजे ॥

॥ भैरव उवाच ॥

ॐ जूं सः हौं महादेवो मन्त्रोशो मन्त्रनायकः ।
मानी मनोरमाङ्गश्च मनस्वी मानवर्धनः ॥१॥
मायाकर्ता मल्लरूपो मल्लमारान्तको मुनिः ।
महेश्वरो महामान्यो मन्त्री मन्त्रजनप्रियः ॥२॥

मारुतो मरुतां श्रेष्ठो मासिकः पाक्षिकोऽमृतः ।
मातङ्गो मात्तचित्तो मत्तचिन्मत्तभावनः ॥३॥
मानवेष्टप्रदो मेशो मानकीपति वल्लभः ।
मानकायो मधुस्तेयी मारयुक्तो जितेन्द्रियः ॥४॥
जयो विजयदो जेता जयेशो जयवल्लभः ।
डामरेशो विरूपाक्षो विश्वभक्तो विभावसुः ॥५॥
विश्वेशो विश्वतातश्च विश्वसूर्विश्वनायकः ।
विनीतो विनयी वादी वान्तदो वाग्भवो वटुः ॥६॥
स्थूलः सूक्ष्मश्चलो लोलो ललज्जिह्वाकरालकः ।
वीरध्येयो विरागीणो विलासी लास्यलालसः ॥७॥
लोलाक्षो ललधीर्धर्मी धनदो धनदार्चित्तः ।
धनी ध्येयोऽप्यध्येयश्च धर्मी धर्ममयोदयः ॥८॥
दयावान् देवजनको देवसेव्यो दयापतिः ।
दुर्णिचक्षुर्दरीवासो दम्भी देवदयात्मकः ॥९॥
कुरूपः कीर्तिदः कान्तः क्लीबः क्लीबात्मकः कुजः ।
बुधो विद्यामयः कामी कामकालान्धकान्तकः ॥१०॥
जीवो जीवप्रदः शुक्रः शुद्धः शर्मप्रदोऽनघः ।
शनैश्चरो वेगगतिर्वाचालो राहुरव्ययः ॥११॥
केतु राकापतिः कालः सूर्योऽमितपराक्रमः ।
चन्द्रो भद्रप्रदो भास्वान् भाग्यदो भर्गरूपभृत् ॥१२॥
कूर्तो धूर्तो वियोगी च संगी गङ्गाधरो गजः ।
गजाननप्रियो गीतो ज्ञानी स्नानार्चनः प्रियः ॥१३॥
परमः पीवराङ्गश्च पार्वती बल्लभो महान् ।
परात्मको विराड्वास्यो वानरोऽमितकर्मकृत् ॥१४॥
चिदानन्दी चारुरूपो गारुडो गरुडप्रियः ।
नन्दीश्वरो नयो नागो नागालङ्कारमण्डितः ॥१५॥
नागहारो महानागी गोधरो गोपतिस्तपः ।
त्रिलोचनस्त्रिलोकेश स्त्रिमूर्तिस्त्रिपुरान्तकः ॥१६॥

त्रिधामयो लोकमयो लोकैकव्यसनापहः ।
व्यसनी तोषितः शम्भुस्त्रिधारूपस्त्रिवर्णभाक् ॥१७॥
त्रिज्योतिस्त्रिपुरीनाथस्त्रिधाशान्तिस्त्रिधा गतिः ।
त्रिधा गुणी विश्वकर्ता विश्वभर्ता त्रिपुरुषः ॥१८॥
उमेशो वासुकिर्वीरो वैनतेयो विचारकृत् ।
विवेकाक्षो विशालाक्षो विधिर्विधिरनुत्तमः ॥१९॥
विद्यानिधिः सरोजाक्षो निःस्मरः स्मरशासनः ।
स्मृतिदः स्मृतिमान् स्मार्तो ब्रह्मा ब्रह्मविदां वरः ॥२०॥
ब्राह्मी व्रती ब्रह्मचारी चतुरश्चतुराननः ।
चलाचलोऽचलगतिर्वेगी वीराधिपोऽपरः ॥२१॥
सर्ववासः सर्वगतिः सर्वमान्यः सनातनः ।
सर्वव्यापी सर्वरूपः सागरश्च समेश्वरः ॥२२॥
समनेत्रः समद्युतिः समकायः सरोवरः ।
सरस्वान् सत्यवाक् सत्यः सत्यरूपः सुधीः सुखी ॥२३॥
स्वराट् सत्यः सत्यमती रुद्रो रुद्रवपुर्वसुः ।
वसुमान् वसुधानाथो वसुरूपो वसुप्रदः ॥२४॥
ईशानः सर्वदेवानामीशानः सर्वबोधिनाम् ।
ईशोऽवशेषोऽवयवी शेषशायी श्रियः पतिः ॥२५॥
इन्द्रश्चन्द्रावतंसी च चराचरजगत्पतिः ।
स्थिरः स्थाणुरणुः पीनः पीनवक्षाः परात्परः ॥२६॥
पीनरूपो जटाधारी जटाजूटसमाकुलः ।
पशुरूपः पशुपतिः पशुज्ञानी पयोनिधिः ॥२७॥
वेद्यो वैद्यो वेदमयो विधिज्ञो विधिमान् मृदुः ।
शूली शुभङ्कर शोभ्यः शुभकर्ता शचीपतिः ॥२८॥
शशाङ्कधवलः स्वामी वज्री शङ्खी गदाधरः ।
चतुर्भुजश्चाष्टभुजः सहस्रभुज मण्डित ॥२९॥
स्रुवहस्तो दीर्घकेशो दीर्घो दम्भविवर्जितः ।
देवो महोदधिर्दिव्यो दिव्यकीर्तिर्दिवाकरः ॥३०॥

उग्ररूपश्चोग्रपतिरुग्र - वक्षास्तपोमयः ।
तपस्वी जटिलस्तापी तापहा तापवर्जितः ॥३१॥
हरिद्धयो हयपतिर्हयदो हरिमण्डितः ।
हरिवाही महौजस्को नित्यौ नित्यात्मकोऽनलः ॥३२॥
समानी संसृतिस्त्यागी सङ्गी सन्निधिरव्ययः ।
विद्याधरो विमानी वैमानिक वरप्रदः ॥३३॥
वाचस्पति वमासारी वामाचारी बलन्धरः ।
वाग्भवो वासवो वायुर्वासनाबीजमण्डितः ॥३४॥
वाग्मी कौलश्रुतिर्दक्षो दक्षयज्ञविनाशनः ।
दक्षो दौर्भाग्यहा दैत्यमर्दनो भोगवर्धनः ॥३५॥
भोगी रोगहरो योगी हारी हरिविभूषणः ।
बहुरूपो बहुमतिर्वङ्गवित्ती विचक्षणः ॥३६॥
नृत्तकृच्चित्तसन्तोषी नृत्यगीतविशारदः ।
शरदवर्णविभूषाढ्यो गलदग्धोऽघनाशनः ॥३७॥
लागी नागमयोऽनन्तोऽनन्तरूपः पिनाकभृत् ।
नटलो कारकेशानो वरीयान् वै विवर्णभृत् ॥३८॥
साङ्कारष्टङ्कहस्तश्च पाशीशार्ङ्गः शशिप्रभः ।
सहस्त्ररूपी समगुः साधूनामभयप्रदः ॥३९॥
साधुसेव्यः साधुगतिः सेवाफलप्रदो विभुः ।
स्वमहो मध्यमो मत्तो मन्त्रमूर्तिः सुमन्तकः ॥४०॥
कीलालीलाकरो लूतो भवबन्धैकमोचनः ।
रेचिष्णुर्विच्युतरतोऽमूतनो नूतनो नथः ॥४१॥
न्यग्रोधरूपो भयदो भयहारीतिधारणः ।
धरणीधरसेव्यश्च धराधरसुतापतिः ॥४२॥
धराधरोऽन्धकरिपुर्विज्ञानी मोहवर्जितः ।
स्थाणुः केशो जटी ग्राम्यो ग्रामारामो रमाप्रियः ॥४३॥
प्रियकृत प्रियरूपश्च विप्रयोगी प्रतापनः ।
प्रभाकर प्रभादीप्तो मनुमान् मानवेश्वरः ॥४४॥

तीक्ष्णबाहुस्तीक्ष्णकरस्तीक्ष्णांशुस्तीक्ष्णलोचनः ।
तीक्ष्णचित्तस्त्रयीरूपस्त्रयीमूर्तिस्त्रयी तनुः ॥४५॥
हविर्भुग् हविषां ज्योतिर्हालाहलो हलीपतिः ।
हविष्मल्लोचनो हालामयो हरिणरूपभृत् ॥४६॥
भ्रदिमाभ्रमयो वृक्षो हुताशो हुतभुग् गुणी ।
गुणज्ञो गरुडो गानतत्परो विक्रमी गुणी ॥४७॥
क्रमेश्वरः क्रमकरः कृमिकृत् क्लान्तमानसः ।
महातेजा महामारी मोहितो मोहवल्लभः ॥४८॥
मनस्वी त्रिदशो बालो वाल्यापतिरघापहः ।
बाल्यो रिपुहरो हार्यो गविर्गविमतो गुणः ॥४९॥
सगुणो वित्तराट् गेयो विरोचनो विभावसुः ।
मालामयो माधवश्च विकर्तनोऽविकत्थनः ॥५०॥
मानकृन्मुक्तिदोऽमूल्यः साध्यः शत्रुभयङ्करः ।
हिरण्यरेताः शुभगः सतीनाथः सुरापतिः ॥५१॥
मेढ़ो मैनाकभगिनीपतिरुत्तमरूपभृत् ।
आदित्यो दितिजेशानो दितिपुत्रः क्षयङ्करः ॥५२॥
वासुदेवो महाभाग्यो विश्वावसुर्वसुप्रियः ।
समुद्रोऽमिततेजश्च खगेन्द्रो विशिखी शिखी ॥५३॥
गुरुत्मान् वज्रहस्तश्च पौलोमीनाथ ईश्वरः ।
यज्ञिपेयो वाजपेयः शतिक्रतुः शताननः ॥५४॥
प्रतिष्ठस्तीव्रविस्रम्भी गम्भीरो भाववर्धनः ।
मायिष्ठो मधुरालापो मधुमत्तश्च माधवः ॥५५॥
मायात्मा भोगिनां त्राता नाकिनामिष्टदायकः ।
नाकेन्द्रो जनको जन्यस्तम्भनो रम्भनाशनः ॥५६॥
ईशान ईश्वर ईशः शर्वरीपति शेखरः ।
लिङ्गाध्यक्षः सुराध्यक्षो वेदाध्यक्षो विचारकः ॥५७॥
भव्योऽनर्घो नरेशानो नरकान्तकरूवितः ।
चतुरो भविता भावी विरामो रात्रिवल्लभः ॥५८॥

मङ्गलो धरणीपुत्रो धन्यो बुद्धि विवर्धनः ।
जयो जीवेश्वरो जारो जाठरो जह्नुतापनः ॥५९॥
जह्नुकन्याधरः कल्पो वासगे मास एव च ।
कर्तुर्ऋभुसुताध्यक्षो विहारो विहगापतिः ॥६०॥
शुक्लाम्बरो नीलकण्ठः शुक्लो भृगुसुतो भगः ।
शान्तः शिवप्रदो भव्यो भेदकृच्छान्तकृत्पतिः ॥६१॥
नाथो दान्तो भिक्षुरूपो धन्यश्रेष्ठो विशाम्पतिः ।
कुमारः क्रोधनः क्रोधी विरोधि विग्रही रसः ॥६२॥
नीरसः सुरसः सिद्धो वृषणी वृषघातनः ।
पञ्चास्यः षण्मुखश्चैव विमुखः सुमुखी प्रियः ॥६३॥
दुर्मुखो दुर्जयो दुःखी सुखी सुखविलासदः ।
पात्री पौत्री पवित्रश्च भूतोक्त पूतनान्तकः ॥६४॥
अक्षरं परमं तत्त्वं बलवान् बलघातनः ।
भल्ली मौलिभवाभावो भावाभावविमोचनः ॥६५॥
नारायणो युक्तकेशो दिग्देवो धर्मनायकः ।
कारामोक्षप्रदो जेयो महाङ्ग सामगायनः ॥६६॥
उत्सङ्गमो नामकारी चारी स्मरनिषूदनः ।
कृष्णः कृष्णाम्बरः स्तुत्यस्तारावर्णस्त्रयाकुलः ॥६७॥
त्रियामा दुर्गतित्राता दुर्गमो दुर्गघातकः ।
महानेत्रो महाधाता नानाशस्त्रविचक्षणः ॥६८॥
महामूर्धा महादन्तो महाकर्णो महोरगः ।
महाचक्षुर्महानाशो महाग्रीवो दिगालयः ॥६९॥
दिग्वासा दितिजेशानो मुण्डी मुण्डाक्षसूत्रधृत् ।
स्मशाननिलियो रागी महाकटिरनूतनः ॥७०॥
पुराणपुरुषः पारम्परमात्मा महाकरः ।
महालस्यो महाकेशो महेशो मोहनो विराट् ॥७१॥
महासुखो महाजङ्घो मण्डली कुण्डली नटः ।
असपत्यः पत्रकरः पत्रहस्तश्च पाटवः ॥७२॥

लालसः सालसः सालः कल्पवृक्षश्च कल्पितः ।
कल्पहा कल्पनाहारी महाकेतुः कठोरकः ॥७३॥
अनलः पवनः पाठः पीठस्थ पीठरूपकः ।
पाठीनः कुलसी पीनो मेरुधामा महागुणी ॥७४॥
महातूणीरसंयुक्तो देवदानवदर्पहा ।
अथर्वशेषः सौम्यास्य ऋक्सहस्रामितेक्षणः ॥७५॥
यजुः साममुखो गुह्यो यजुर्वेदविचक्षणः ।
याज्ञिको यज्ञरूपश्च यज्ञो वै धरणीपतिः ॥७६॥
जङ्गमी भङ्गदी भासा दक्षाभिगमदर्शनः ।
अगम्यः सुगमः खर्व खेटी खेटाननो नयः ॥७७॥
अमोघार्थः सिन्धुपतिः सैन्धवः सानुमध्यगः ।
विकालज्ञः सगणकः पुष्करस्थः परोपकृत् ॥७८॥
उपकर्ताऽपकर्ता च घृणी रणभयप्रदः ।
धर्मा चर्माम्बरश्चारूरूपश्चारु विभूषणः ॥७९॥
नक्तञ्चरः कायवशी वशी वशिवशो वशः ।
वश्या वश्यकरो भस्मशायी भस्मविलेपनः ॥८०॥
भस्माङ्गी मलिनाङ्गश्च मालामण्डितमूर्धजः ।
गणकार्यः कुलाचारः सर्वाचारः सखा समः ॥८१॥
मकरो गोत्रभिद् गोप्ता भीमरूपो भयानकः ।
अरुणश्सचैकवित्तश्च त्रिशङ्कुः शङ्कुधारणः ॥८२॥
आश्रमी ब्राह्मणो वज्री क्षत्रियः कार्यहेतुकः ।
वैश्यः शूद्रः कपोतस्थस्त्वरुष्टोऽथ रुषाकुलः ॥८३॥
रोगी रोगापहा शूरः कपिलः कपिनायकः ।
पिनाकीचाष्टमूर्तिश्च क्षितिमान् धृतिमांस्तथा ॥८४॥
जलमूर्तिर्वायुमूर्तिर्गताशः सोममूर्तिमान् ।
सूर्यदेवो यजमान आकाशः परमेश्वरः ॥८५॥
भवहा भवमूर्तिश्च भूतात्मा भूतभावनः ।
भवः शर्वस्तथा रुद्रः पशुनाथश्च शङ्करः ॥८६॥

गिरिजो गिरिजानाथो गिरिन्द्रश्च महेश्वरः ।
भीम ईशान भीतिज्ञः खण्डपश्चण्डविक्रमः ॥८७॥
खण्डभृत् खण्डपरशुः कृत्तिवासा वृषापहः ।
कङ्काल कलनाकार श्रीकण्ठो नीललोहितः ॥८८॥
गुणीश्वरो गुणी नन्दी धर्मराजौ दुरन्तकः ।
भृङ्गरीटी रसासारी दयालु रूपमण्डितः ॥८९॥
अमृतः कालरुद्रश्च कालाग्निः शशिशेखरः ।
त्रिपुरान्तक ईशानस्त्रिनेत्रः पञ्चवक्त्रकः ॥९०॥
कालहृत् केवलात्मा च ऋग्यजु सामवेदवान् ।
ईशानः सर्वभूतानामीश्वरः सर्वरक्षसाम् ॥९१॥
ब्रह्मणोऽधिपतिर्ब्रह्म ब्रह्मणोऽधिपतिस्था ।
ब्रह्मा शिवः सदानन्दी सदानन्दः सदाशिवः ॥९२॥
मेषस्वरूपश्चार्वङ्गो गायत्रीरूपधारणः ।
अघोरेभ्योऽथ घोरेभ्यां घोरघोरतराय च ॥९३॥
सर्वतः सर्वसर्वेभ्यो नमस्ते रुद्र रूपिणे ।
वामदेवस्तथा ज्येष्ठः श्रेष्ठः कालकराकलः ॥९४॥
महाकालो भैरवेशो वेशा कलविकारणः ।
बलविकारणो बालो बलप्रमथनस्तथा ॥९५॥
सर्वभूतादिदमनो देवदेवो मनोन्मनः ।
सद्योजातं प्रपद्यामि सद्योजाताय वै नमः ॥९६॥
भवे भवेनातिभवे भवस्व मां भवोद्भवः ।
भवनो भावनो भाव्यो बलकारी परःपदम् ॥९७॥
परः शिवः परो ध्येयः परं ज्ञानं परात्परः ।
परावरः पलाशी च मांसाशी वैष्णवोत्तमः ॥९८॥
ॐ ऐं श्रीं हसौं देवः ॐ ह्रीं हैं भैरवोत्तमः ।
ॐ ह्रां नमः शिवायेति मन्त्रो वटुवरायुधः ॥९९॥
ॐ ह्रौं सदाशिवः ॐ ह्रीं आपदुद्धारणो मतः ।
ॐ ह्रीं महाकरालास्य ॐ ह्रीं बटुकभैरवः ॥१००॥

भर्गस्त्रियम्बक ॐ ह्रीं ॐ ह्रीं चन्दार्धशेखरः ।
ॐ ह्रीं सं जटिलो धूम्र ॐ ऐं त्रिपुरघातकः ॥१०१॥
ह्रां ह्रीं हं हरिवामाङ्ग ॐ ह्रीं हं ह्रीं त्रिलोचनः ।
ॐ वेदरूपो वेदज्ञ ऋग्यजुः सामरूपवान् ॥१०२॥
रुद्रो घोररवो घोर ॐ क्षं हं ह्रीं अघोरकः ।
ॐ जूं सः पीयूषसक्तोऽमृताध्यक्षोऽमृतालसः ॥१०३॥
ॐ त्र्यम्बकं यजामहे सुगंधिम् पुष्टिवर्धनम् ।
उर्व्वारुकमिव बन्धनान् मृत्योर्मुक्षीय माऽमृतात् ॥१०४॥
ॐ ह्रौं जूं सः ॐ भूर्भुवः स्वः ॐ जूं सः मृत्युञ्जयः ।
पातु मा सर्वदेवेशो मृत्युञ्जय सदाशिवः ॥१०५॥

॥ अथ सदाशिव कवचम् ॥

॥ श्रीदेव्युवाच ॥

भगवन्देवदेवेश सर्वाम्नाय प्रपूजित ।
सर्वं मे कथितं देव कवचं न प्रकाशितम् ॥१॥
प्रासादाख्यस्य मंत्रस्य कवचं मे प्रकाशय ।
सर्वरक्षाकरं देव यदि स्नेहोस्ति मां प्रति ॥२॥

विनियोगः- अस्य श्री प्रासादमंत्र कवचस्य वामदेव ऋषिः। पंक्तिच्छन्दः। सदाशिवो देवता। साधकाभीष्टसिद्धये जपे विनियोगः।

शिरो मे सर्वदा पातु प्रासादाख्यः सदाशिवः ।
षडक्षरस्वरूपो मे वदनं तु महेश्वरः ॥३॥
पञ्चाक्षरात्मा भगवान्भुजौ मे परिरक्षतु ।
मृत्युंजयस्त्रिबीजात्मा आस्यं रक्षतु मे सदा ॥४॥
वटमूलं समासीनो दक्षिणामूर्तिरव्ययः ।
सदा मां सर्वदः पातु षट्त्रिंशार्णस्वरूपधृक् ॥५॥
द्वाविंशार्णात्मको रुद्रो दक्षिणः परिरक्षतु ।
त्रिवर्णात्मा नीलकण्ठः कण्ठं रक्षतु सर्वदा ॥६॥

चिन्तामणि बीजरूपो ह्यर्द्धनारीश्वरो हरः ।
सदा रक्षतु मे गुह्ये सर्वसम्पत्प्रदायकः ॥७॥
एकाक्षर स्वरूपात्मा कूटव्यापी महेश्वरः ।
मार्तण्डभैरवो नित्यं पादौ मे परिरक्षतु ॥८॥
तुम्बुराख्यो महाबीजस्वरूपस्त्रिपुरान्तकः ।
सदा मां रणभूमौ च रक्षतु त्रिदशाधिपः ॥९॥
ऊर्ध्वमूर्द्धानमीशानो मम रक्षतु सर्वदा ।
दक्षिणास्यं तु तत्पुरुषोऽव्यान्मे गिरिनायकः ॥१०॥
अघोराख्यो महादेवः पूर्वास्यं परिरक्षतु ।
वामदेवः पश्चिमास्यं सदा मे परिरक्षतु ॥११॥
उत्तरास्यं सदा पातु सद्योजातस्वरूपधृक् ।
इत्थं रक्षाकरं देवि कवचं देवदुर्लभम् ॥१२॥
प्रातः काले पठेद्यस्तु सोभीष्टं फलमाप्नुयात् ।
पूजाकाले पठेद्यस्तु कवचं साधकोत्तमः ॥१३॥
कीर्तिश्रीकान्तिमेधायुः सहितो भवति ध्रुवम् ।
कण्ठे यो धारयेदेतत्कवचं मत्स्वरूपकम् ॥१४॥
युद्धे च जयमाप्नोति द्यूते वादे च साधकः ।
कवचं धारयेद्यस्तु साधको दक्षिणे भुजे ॥१५॥
देवा मनुष्यगंधर्वा वश्यास्तस्य न संशयः ।
कवचं शिरसा यस्तु धारयेद्यतमानसः ॥१६॥
करस्थास्तस्य देवेशि अणिमाद्यष्टसिद्धयः ।
भूर्जपत्रे त्विमां विद्यां शुक्लपट्टेन वेष्टिताम् ॥१७॥
रजतोदरसंविष्टां कृत्वा वा धारयेत्सुधीः ।
सम्प्राप्य महतीं लक्ष्मीमन्ते मद्देहरूपभाक् ॥१८॥
यस्मै कस्मै न दातव्यं न प्रकाश्यं कदाचन ।
शिष्याय भक्तियुक्ताय साधकाय प्रकाशयेत् ॥१९॥
अन्यथा सिद्धिहानिः स्योत्सत्यमेतन्मनोरमे ।
तवस्नेहान्महादेवि कथितं कवचं शुभम् ॥२०॥

न देयं कश्यचिद्भद्रदे यदीच्छेदात्मनो हितम् ।
योऽर्चयेद् गंधपुष्पाद्यैः कवचं मन्मुखोदितम् ।
तेनार्चिता महादेवि सर्वे देवा न संशयः ।

(इति भैरवतंत्रे सदाशिव कवचं समाप्तम्)

॥ अथ शतनाम स्तोत्रम् ॥

ॐ शिवो महेश्वरः शम्भुः पिनाकी शशिशेखरः ।
वामदेवो विरूपाक्षः कपर्दी नीललोहितः ॥१॥
शंकरः शूलपाणिश्च खट्वाङ्गी विष्णुवल्लभः ।
शिपिविष्टोम्बिकानाथः श्रीकण्ठो भक्तवत्सलः ॥२॥
भवः सर्वस्त्रिलोकेशः शितिकण्ठः शिवाप्रियः ।
उग्रः कपाली कामारिरन्धकासुरसूदनः ॥३॥
गंगाधरो ललाटाक्षः कालकालः कृपानिधिः ।
भीमः परशुहस्तश्च मृगपाणिर्जटाधरः ॥४॥
कैलासवासी कवची कठोरस्त्रिपुरान्तकः ।
वृषाङ्को वृषभारूढो भस्मोद्धूलितविग्रहः ॥५॥
सामप्रियः स्वरमयस्त्रयीमूर्तिरनीश्वरः ।
सर्वज्ञः परमात्मा च सोमसूर्याग्निलोचनः ॥६॥
हविर्यज्ञमयः सोमः पञ्चवक्त्रः सदाशिवः ।
विश्वेश्वरो वीरभद्रो गणनाथः प्रजापतिः ॥७॥
हिरण्यरेता दुर्द्धर्षो गिरिशो गिरिशोऽनघः ।
भुजङ्गभूषणो भर्गो गिरिधन्वा गिरिप्रियः ॥८॥
कृत्तिवासाः पुरारातिर्भगवान्प्रमथाधिपः ।
मृत्युंजयः सूक्ष्मतनुर्जगद्व्यापी जगद्गुरुः ॥९॥
व्योमकेशो महासेनो जनकश्चारुविक्रमः ।
रुद्रो भूतपतिः स्थाणुरहिर्बुध्न्यो दिगम्बरः ॥१०॥
अष्टमूर्तिरनेकात्मा सात्त्विकः शुद्धविग्रहः ।
शाश्वतः खण्डपरशुरजः पाशविमोचकः ॥११॥

मृडः पशुपतिर्देवो महादेवोऽव्ययः प्रभुः ।
पूषदन्तभिदव्यग्रो दक्षाध्वर हरो हरः ॥१२॥
भगनेत्रभिदव्यक्तः सहस्त्रक्षः सहस्त्रपात् ।
अपवर्गप्रदोऽनन्तस्तारकः परमेश्वरः ॥१३॥
इमानि दिव्यनामानि जप्यन्ते सर्वदा मया ।
नामकल्पलतेयं मे सर्वाभीष्ट प्रदायिनी ॥१४॥
नामान्येतानि सुभगे शिवदानि न संशयः ।
वेदसर्वस्वभूतानि नामान्येतानि वस्तुतः ॥१५॥
एतानि यानि नामानि तानि सर्वार्थदान्यतः ।
जप्यन्ते सादरं नित्यं मया नियमपूर्वकम् ॥१६॥
वेदेषु शिवनामानि श्रेष्ठान्यघहराणि च ।
सन्त्यनन्तानि सुभगे वेदेषु विविधेष्वपि ॥१७॥
तेभ्यो नामानि संगृह्य कुमाराय महेश्वरः ।
अष्टोत्तर सहस्त्रं तु नाम्नामुपदिशत्पुरा ॥१८॥

॥ इति शिवाष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ॥

॥ श्रीशिव मालामन्त्रः॥

ॐ नमो भगवते सदाशिवाय। त्र्यम्बक सदाशिव! नमस्ते नमस्ते् । ॐ ह्रीं ह्लीं लूं अः अं एं ऐं महाघोरेशाय नमः। ह्लीं ॐ ह्रौं शं नमो भगवते सदाशिवाय।

सकल तत्त्वात्मकाय, आनन्द-सन्दोहाय, सर्वमन्त्र स्वरूपाय, सर्वयन्त्राधिष्ठिताय , सर्वतन्त्रप्रेरकाय, सर्वतत्त्वविदूराय, सर्व तत्त्वाधिष्ठिताय, ब्रह्मरुद्रावतारिणे, नीलकण्ठाय, पार्वतीमनोहरप्रियाय, महारुद्राय, सोमसूर्याग्नि लोचनाय, भस्मोद्धूलित-विग्रहाय अष्टगन्धादि गन्धोप शोभिताय शेषाधिपमुकुटभूषिताय, महामणिमुकुट धारणाय , सर्पालङ्काराय, माणिक्यभूषणाय, सृष्टिस्थितिप्रलय काल रौद्रावताराय, दक्षाध्वर ध्वंसकाय, महाकाल भेदनाय, महाकालाधिकालोग्र रूपाय, मूलाधारैकनिलयाय।

तत्त्वातीताय, गङ्गाधराय, महाप्रपात विषभेदनाय, महाप्रलयान्तनृत्या धिष्ठिताय, सर्वदेवाधिदेवाय, षडाश्रयाय, सकलवेदान्त साराय, त्रिवर्गसाधनायानन्त-कोटि -ब्रह्माण्ड नायकायानन्त वासुकि तक्षक कर्कोटक शङ्ख कुलिक

पद्ममहापद्मेत्यष्ट महानागकुल भूषणाय प्रणवस्वरूपाय। ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः, हां हीं हूं हैं हौं हः।

चिदाकाशायाकाशादि दिक् स्वरूपाय, ग्रहनक्षत्रादि सर्वप्रपञ्च मालिने, सकलाय, कलङ्क रहिताय, सकललोकैक-कर्त्रे, सकल लोकैक-भर्त्रे,सकल लोकैक-संहर्त्रे, सकल लोकैक-गुरवे,सकल लोकैक-साक्षिणे, सकलनिगम गुह्याय, सकलवेदान्त पारगाय, सकल लोकैकवरप्रदाय, सकल-लोकैक सर्वदाय, शर्मदाय, सकललोकैक शङ्कराय।

शशाङ्कशेखराय, शाश्वत निजावासाय, निराभासाय, निराभयाय, निर्मलाय, निर्लोभाय, निर्मदाय, निश्चिन्ताय, निरहङ्काराय, निरंकुशाय, निष्कलङ्काय, निर्गुणाय, निष्कामाय, निरुपलवाय, निरवद्याय, निरन्तराय, निष्कारणाय, निरातङ्काय, निष्प्रयप्रकाय, निःसङ्गाय, निर्द्वन्द्वाय, निराधाराय, नीरागाय, निष्क्रोधाय, निर्मलाय, निष्पापाय, निर्भयाय, निर्विकल्पाय, निर्भेदाय, निष्क्रियाय, निस्तुलाय, निःसंशयाय निरञ्जनाय, निरुपमविभवाय, नित्यशुद्ध बुद्धपरिपूर्ण सच्चिदानन्दाद्वयाय ॐ हसौं ॐ हसौः ह्रीं सौं क्षमलक्लीं क्षमलइस्फ्रिं ऐं क्लीं सौः क्षां क्षीं क्षूं क्षैं क्षौं क्षः।

परमशान्तस्वरूपाय, सोहं तेजोरूपाय, हंसतेजोमयाय, सच्चिदेकं ब्रह्ममहामन्त्र स्वरूपाय, श्रीं ह्रीं क्लीं नमो भगवते विश्वगुरवे, स्मरण मात्रसन्तुष्टाय, महाज्ञान प्रदाय, सच्चिदानन्दात्मने महायोगिने सर्वकामफलप्रदाय, भवबन्धप्रमोचनाय, क्रों सकलविभूति दाय, क्रीं सर्वविश्वाकर्षणाय।

जय जय रुद्र, महारौद्र, वीरभद्रावतार, महाभैरव, कालभैरव, कल्पान्त भैरव, कपालमालाधर, खट्वाङ्ग खड्ग चर्म पाशांकुश डमरुशूल चाप वाण गदा शक्ति भिन्दिपालतोमर मुसल मुद्गर पाश वज्र परिघ भुशुण्डी शतघ्नी ब्रह्मास्त्र पाशुपतास्त्रादि महास्त्र चक्रायुधाय।

भीषणकर, सहस्त्रमुख दंष्ट्राकराल वदन, विकटाट्टहास, विस्फारित ब्रह्माण्डमण्डल, नागेन्द्रकुण्डल, नागेन्द्रहार, नागेन्द्रवलय, नागेन्द्रचर्मधर, मृत्युञ्जय, त्र्यम्बक, त्रिपुरान्तक, विश्वरूप, विरूपाक्ष, विश्वम्भर, विश्वेश्वर, वृषभवाहन, वृषविभूषण, विश्वतोमुख! सर्वतो मां रक्ष रक्ष, ज्वल ज्वल, प्रज्वल प्रज्वल, स्फुर स्फुर, आवेशय आवेशय, मम हृदये प्रवेशय प्रवेशय, प्रस्फुर प्रस्फुर।

महामृत्युमपमृत्युभयं नाशय नाशय, चोरभयमुत्सादयोत्सादय, विषसर्पभयं

शमय शमय, चौरान् मारय् मारय्, मम शत्रूनुच्चाटयोच्चाटय, मम क्रोधादि सर्व सूक्ष्म तमात् स्थूलतम पर्यन्त स्थितान् शत्रूनुच्चाटयोच्चाटय, त्रिशूलेन विदारय विदारय, कुठारेण भिन्धि भिन्धि, खड्गेन छिन्धि छिन्धि खट्वाङ्गेन विपोथय विपोथय, मुसलेन निष्पेषय निष्पेषय बाणैः सन्ताडय सन्ताडय, रक्षांसि भीषय भीषय, अशेष भूतानि विद्रावय विद्रावय, कूष्माण्ड वेताल मारीच गण ब्रह्मराक्षस गणान् सन्त्रासय सन्त्रासय, सर्वरोगादि महाभयान्ममाभयं कुरु कुरु, वित्रस्तं मामाश्वासयाश्वासय, नरक महाभयान्मामुद्धरोद्धर, सञ्जीवय सञ्जीवय, क्षुत् तृषा ईर्ष्यादि विकारेभ्यो मामाप्याययाप्यायय, दुःखातुरं मामानन्दयानन्दय, शिव कवचेन मामाच्छादयाच्छादय।

मृत्युञ्जय, त्र्यम्बक, सदाशिव! नमस्ते, नमस्ते, शं ह्रीं ॐ ह्रों।

॥ महाकाल स्तोत्रम् ॥

कैलास शिखरे रम्ये, सुखासीनं जगद्गुरुं ।
प्रणम्य परया भक्त्या, पार्वती परिपृच्छति ॥

॥ श्रीपार्वत्युवाच ॥

त्वत्तः श्रुतं पुरा देव, भैरवस्य महात्मनः ।
नाम्नामष्टोत्तरं शतं, ककरादिमभीष्टदम् ॥
गुह्याद् गुह्यतरं गुह्यं, सर्वाभीष्टार्थ साधकम् ।
तन्मे वदस्व देवेश! यद्यहं तव वल्लभा ।

॥ श्रीशिवोवाच ॥

लक्षवार-सहस्राणि, वारिताऽसि पुनः पुनः ।
स्त्री स्वभावान्महा देवि! पुनस्तत्वं त्वं पृच्छसि ॥
रहस्याति रहस्यं च, गोप्याद् गोप्यं महत्तरम् ।
तत्ते वक्ष्यामि देवेशि! स्नेहात्तव शुचिस्मिते ॥
कूर्चयुग्मं महाकाल, प्रसीदेति पदद्वयम् ।
लज्जायुग्मं वह्निजाया, राजराजेश्वरो महान् ॥

अथ मन्त्रः – हूँ हूँ महाकाल! प्रसीद प्रसीद ह्रीं ह्रीं स्वाहा।

मन्त्रग्रहण मात्रेण, भवेत्सत्यं महाकविः ।

गद्य-पद्य मयी वाणी, गङ्गा निर्झरिणी यथा ॥

विनियोग :- ॐ अस्य श्रीराजराजेश्वर श्रीमहाकाल ककाराद्यष्टोत्तर शतनाम माला मन्त्रस्य श्रीदक्षिणा कालिका ऋषिः, विराट् छन्दः, श्रीमहाकालः देवता, हूँ बीजं, ह्रीं शक्तिः, स्वाहा कीलकं, सर्वार्थ साधने पाठे विनियोगः।

ऋष्यादिन्यास :- शिरसि श्रीदक्षिणा कालिका ऋषये नमः। मुखे विराट् छन्दसे नमः। हृदि श्रीमहाकाल देवतायै नमः। गुह्ये हूँ बीजाय नमः। पादयोः ह्रीं शक्तये नमः। नाभौ स्वाहा कीलकाय नमः। सर्वाङ्गे सर्वार्थ साधने पाठे विनियोगाय नमः।

करन्यास :- ह्रां अंगुष्ठाभ्यां नमः। ह्रीं तर्जनीभ्यां नमः। ह्रूं मध्यमाभ्यां नमः। ह्रैं अनामिकाभ्यां नमः। ह्रौं कनिष्ठिकाभ्यां नमः। ह्रः करतल करपृष्ठाभ्यां नमः।

षडङ्गन्यास :- ह्रां हृदयाय नमः। ह्रीं शिरसे स्वाहा। ह्रूं शिखायै वषट्। ह्रैं कवचाय हुम्। ह्रौं नेत्रत्रयाय वौषट्। ह्रः अस्त्राय फट्।

ध्यानम् :-

कोटि कालानलाभासं, चतुर्भुजं त्रिलोचनं ।
श्मशा ाष्टक मध्यस्थं, मुण्डाष्टक विभूषितम् ॥
पञ्चप्रेत स्थितं देवं, त्रिशूलं डमरुं तथा ।
खड्गं च खर्परं चैव, वाम दक्षिण योगतः ॥
विभ्रतं सुन्दरं देहं, श्मशान भस्म भूषितम् ।
नानाशबैः क्रीडमानं, कालिका हृदय स्थितम् ॥
लालयन्तं रतासक्तं, घोरचुम्बन तत्परम् ।
गृध्र गोमायु संयुक्तं, फेरवीगण संयुतम् ॥
जटापटल शोभाढ्यं सर्वशून्यालय स्थितम् ।
सर्वशून्यं मुण्ड भूषं, प्रसन्न वदनं शिवम् ॥

॥ अथ स्तोत्रम् ॥

ॐ कूं कूं कूं कूं शब्दरतः, क्रूं क्रूं क्रूं क्रूं परायणः ।
कविकण्ठ स्थितः कै ह्रीं, हूँ कँ कँ कवि पूर्णदः ॥
कपाल कज्जल समः, कज्जल प्रिय तोषणः ।

कपालमालाऽऽभरणः, कपालकर भूषणः ॥
कपाल पात्र सन्तुष्टः, कपालार्घ्य परायणः ।
कदम्ब पुष्पसम्पूज्यः, कदम्ब पुष्प होमदः ॥
कुलप्रियः कुलधरः, कुलाधारः कुलेश्वरः ।
कौलव्रतधरः कर्म, कामकेलि प्रियः क्रतुः ॥
कलह ह्रीं मन्त्रवर्णः, कलह ह्रीं स्वरूपिणः ।
कङ्काल भैरवो देवः, कङ्काल भैरवेश्वरः ॥
कादम्बरी पानरतः, तथा कादम्बरीकलः ।
कराल भैरवानन्दः, कराल भैरवेश्वरः ॥
करालः कलनाधारः, कपर्दीश वर प्रदः ।
करवीर प्रिय प्राणः, करवीर प्रपूजनः ॥
कलाधरः कालकण्ठः, कूटस्थः कोटराश्रयः ।
करुणः करुणावासः, कौतुकी कालिका पतिः ॥
कठिनः कोमलः कर्णः, कृत्तिवास कलेवरः ।
कलानिधिः कीर्तिनाथः, कामेन हृदयङ्गमः ॥
कृष्णः काशीपतिः कौलः, कूलचूडामणिः कुलः ।
कालांजन समाकारः, कालांजन निवासिनः ॥
कौपीनधारी कैवर्तः, कृतवीर्यः कपिध्वजः ।
कामरूपः कामगतिः, कामयोग परायणः ॥
काम सम्मर्दनरतः, कामगेह निवासिनः ।
कालिका रमणः कालि-नायकः कालिका-प्रियः ॥
कालीशः कालिकाकान्तः, कल्पद्रुम लता मतः ।
कुलटालाप मध्यस्थः, कुलटासङ्ग तोषितः ॥
कुलटाचुम्बनोद्युक्तः, कुलटाकुच मर्दनः ।
केरलाचार निपुणः, केरलेन्द्र ग्रह स्थितः ॥
कस्तूरी तिलकानन्दः, कस्तूरी तिलकप्रियः ।
कस्तूरी होम सन्तुष्टः, कस्तूरी तर्पणोद्यतः ॥
कस्तूरी मार्जनोद्युक्तः, कस्तूरी कुण्डमज्जनः ।

कामिनी पुष्पनिलयः, कामिनी पुष्पभूषणः ॥
कामिनी कुण्ड संलग्नः, कामिनी कुण्ड मध्यगः ।
कामिनी मानसाराध्यः, कामिनी मान तोषितः ॥
काममञ्जीर रणितः, कामदेव प्रियातुरः ।
कर्पूरामोद रुचिरः, कर्पूरामोदधारिणः ॥
कर्पूरमालाऽऽभरणः, कर्पूरार्णव मध्यगः ।
क्रकसः क्रकसाराध्यः, कलाप पुष्परूपिणः ॥
कुशलः कुशलाकर्णी, कुक्कुरासङ्ग तोषितः ।
कुक्कुरालय मध्यस्थः, काश्मीर करवीरभृत् ॥
कूटस्थः क्रूर दृष्टिश्च, केशवासक्त मानसः ।
कुम्भीनस विभूषाढ्यः, कुम्भीनस वधोद्यतः ॥

॥ फलश्रुति ॥

नाम्नामष्टोत्तर शतं, स्तुत्वा महाकाल देवम् ।
ककारादि जगद्वन्द्यं, गोपनीयं प्रयत्नतः ॥
य इदं पठते प्रातः, त्रिसन्ध्यं वा पठेन्नरः ।
वाञ्छितं समवाप्नोति, नात्र कार्या विचारणा ॥
लभते ह्यचलां लक्ष्मीं, देवानामपि दुर्लभाम् ।
पूजाकाले जपान्ते च, पठनीयं विशेषतः ॥
यः पठेत्साधकाधीशः, काली रूपो हि वर्षतः ।
पठेद्वा पाठयेद्वापि शृणोति श्रावयेदपि ॥
वाचकं तोषयेद्वापि, स भवेद् भैरवी तनुः ।
पश्चिमाभि मुखं लिङ्गं, वृषशून्यं शिवालयम् ॥
तत्र स्थित्वा पठेन्नाम्नां, सर्वकामाप्तये शिवे ।
भौमवारे निशीथे च, अष्टम्यां वा निशामुखे ॥
माषभक्त बलिं छागं, कृसरान्नं च पायसं ।
मद्यं मीनं शोणितं च, दुग्धं मुद्रागुडार्द्रकम् ॥
बलिं दत्वा पठेत्तत्र, कुबेरादधिको भवेत् ।
पुरश्चरणमेतस्य, सहस्त्रावृत्तिरुच्यते ॥

महाकालसमो भूत्वा, यः पठे न्निशि निर्भयः ।
सर्वं हस्तगतं भूयान्नात्र कार्या विचारणा ॥
मुक्तकेशो दिशावासः, ताम्बूल पूरिताननः ।
कुजवारे मध्यरात्रौ, होमं कृत्वा श्मशानके ॥
पृथ्वीशाकर्षणं कृत्वा, नात्र कार्या विचारणा ।
ब्रह्माण्ड गोले देवेशि! या काचिज्जगती तले ॥
समस्ता सिद्धयो देवि! वाचकस्य करे स्थिता ।
भस्माभिमन्त्रितं कृत्वा, ग्रहग्रस्ते विलेपयेत् ॥
भस्म संलेपनाद् देवि! सर्वग्रह विनाशनम् ।
वन्ध्या पुत्रप्रदं देवि! नात्र कार्या विचारणा ॥
गोपनीयं गोपनीयं, गोपनीयं प्रयत्नतः ।
स्वयोनिरिव गोप्तव्यं, न देयं यस्य कस्यचित् ॥

विशेषः- यह स्तोत्र केवल अभिषिक्त साधकों के द्वारा पठनीय है। अतः अन्य लोग इससे विरक्त ही रहे, यहीं उत्तम होगा।

॥इति श्रीभैरवागमे श्रीशिव पार्वति सम्वादे श्रीमहाकाल ककाराद्यष्टोत्तर शतनाम स्तोत्रम् ॥

॥ पार्थिवशिव पूजन ॥

सूखी शुद्धमिट्टी को '**ॐ हराय नमः**' से गीली करें। '**ॐ महेश्वराय नमः**' से शिवलिङ्ग का निर्माण करें। '**ॐ शूलपाणये नमः**' से शिवलिङ्ग को पूजा पात्र में रखें और उसके चारों ओर आठ पार्थिव मूर्तियां बनाकर रखें।

वैसे पुत्रकामेष्ठि प्रयोग हेतु सवालाख छोटे-छोटे शिवलिङ्ग बनाकर उनका षोडशोपचार पूजन किया जाता है।

ध्यानम् :-

**ध्याये नित्यं महेशं रजतगिरि निभं चारु चन्द्रावतंसम् ।
रत्नाकल्पोज्ज्वलाङ्गं परशु मृगवराऽभीति हस्तं प्रसन्नम् ॥
पद्मासीनं समन्तात् स्तुतिममर गणैर्व्याघ्र कृत्तिं वसानं ।
विश्वाद्यं विश्ववन्द्यं निखिल भय हरं पञ्चवक्त्रं त्रिनेत्रम् ॥**

प्राण प्रतिष्ठा :- **ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हौं हंसः शूलपाणे ।** इह सर्वेन्द्रियाणि वाङ्मनश्चक्षुःश्रोत्रं घ्राण प्राणा यदादीनि सर्वेन्द्रियाणिं सहितं

इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा। ॐ क्षं लं सं हंसः ह्रीं ॐ।

पुष्पाञ्जलि :- स्वामिन्! सर्वजगन्नाथ! यावत् पूजाऽवसानकम्। तावत् त्वं प्रीति भावेन, लिङ्गेऽस्मिन् सन्निधौ भव।

सहस्त्रार्जुन कस्यापि मंत्रा येऽन्ये हनूमतः ।
ये ते ह्यदेया देवेश तेऽपि मह्यं समर्पिताः ॥१२॥
किं बहूक्तेन गिरिश प्रेमयंत्रित चेतसा ।
अर्धाङ्गमपि मह्यं ते दत्तं किं ते वदाम्यहम् ।
स्त्रीरूपं मम जीवेश पूर्वं तु न विचारितम् ॥१३॥
शिव उवाच- सत्यं सत्यं वरारोहे सर्वं दत्तं मया तव ।
परं तु गिरिजे तुभ्यं कथ्यते शृणु सांप्रतम् ॥१४॥
कलौ पाखण्ड बहुला नानावेषधरा नराः ।
ज्ञानहीना लुब्धकाश्च वर्णाश्रम बहिष्कृताः ॥१५॥
वैष्णवत्वेन विख्याताः शैवत्वेन वरानने ।
शाक्तत्वेन च देवेशि सौरत्वेनेनरे जनाः ॥१६॥
गाणपत्येन गिरिजे शास्त्रज्ञानबहिष्कृता ।
गुरुत्वेन समाख्याता विचरिष्यन्ति भूतले ॥१७॥
ते शिष्य संग्रहं कर्तुमुद्युक्ता यत्र कुत्रचित् ।
मंत्राद्युच्चारणे तेषां नास्ति सामर्थ्यमम्बिके ॥१८॥
तच्छिष्याणां च गिरिजे तथापि जगतीतले ।
पठन्ति पाठयिष्यन्ति विप्रद्वेषपराः सदा ॥१९॥

द्विजद्वेषपराणां हि नरके पतनं ध्रुवम् ।
प्रकृतं वच्मि गिरिजे यन्मयापूर्वमीरितम् ॥२०॥
नानारूपमिदं नानाकूटमण्डितविग्रहम् ।
तत्रोत्तरं महेशानि श्रृणु यत्नेन सांप्रतम् ॥२१॥
तुभ्यं मया यदा देवि वक्तव्यं कवचं शुभम् ।
नानाकूटमयं पश्चात् त्वयाऽपि प्रेमतः प्रियम् ॥२२॥
वक्तव्यं कुत्रचित्तत्तु भुवने विचरिष्यति ।
विश्वांतः पातिनां भद्रे यदि पुण्यवतां सताम् ॥२३॥
सत्संप्रदाय शुद्धानां दीक्षामंत्रवतां प्रिये ।
ब्राह्मणाः क्षत्रिया वैश्या विशेषेण वरानने ॥२४॥
उच्चारणे समर्थानां शास्त्रनिष्ठावतां सदा ।
हस्तागतं भवेद्भद्रे तदा ते पुण्यमुत्तमम् ॥२५॥
अन्यथा शूद्र जातीनां पूर्वोक्तानां महेश्वरि ।
मुखशुद्धि विहीनानां दांभिकानां सुरेश्वरि ॥२६॥
यदा हस्तगतं तस्यात् तदा पापं महत्तव ।
तस्माद्विचार्य देवेशि ह्यधिकारिणमम्बिके ॥२७॥
वक्तव्यं नात्र संदहो ह्यन्यथा निरयं व्रजेत् ।
किं कर्त्तव्यं मया तुभ्यमुच्यते प्रेमतः प्रिये ॥२८॥
त्वयापीदं विशेषेण गोपनीयं स्वयोनिवत् ।

कवच प्रारंभते - ॐ **पञ्चवदनायाञ्जनेयाय नमः।**

विनियोग - **ॐ अस्य श्री पंचमुखी हनुमद् मन्त्रस्य ब्रह्मा ऋर्षिः गायत्री छन्दः पंचमुखी हनुमान देवता ह्रीं बीजम्, श्रीं शक्तिम्, क्रौं किलकम्, क्रूं कवचं, क्रैं अस्त्राय फट्, इति दिग्वधः सर्वाऽभीष्ट सिद्धये आत्मनो रक्षणार्थे सर्वशत्रुक्षयार्थे जपे विनियोगः।**

॥ श्री गरूड़ उवाच ॥

अथ ध्यानं प्रवक्ष्यामि श्रृणु सर्वाङ्गसुन्दरि ।
यत्कृतं देवदेवेन ध्यानं हनुमतः प्रियम् ॥

ध्यानम्–

पञ्चवक्त्रं महाभीमं त्रिपंचनयनैर्यतुम् ।
बाहुभिर्दशभियुक्तं सर्वकामार्थ सिद्धिदम् ॥
पूर्वं तु वानरं वक्त्रं कोटिसूर्यसमप्रभम् ।
दष्ट्राकरालवदनं भृकुटिकुटिलेक्षणम् ॥१॥
अस्यवै दक्षिणं वक्त्रं नारसिंह महाद्भुतम् ।
अत्युग्रतेजोवपुषं भीषणं भय नाशनम् ॥२॥
पश्चिमं गारूडं पक्त्रं वक्रतुण्डं महाबलम् ।
सर्वनागप्रशमनं विषभूतादिकृंतनम् ॥३॥
उत्तरं सौकरं वक्त्रं कृष्णदीप्त नमोपमम् ।
पातालसिंह वेताल ज्वररोगादिकृंतनम् ॥४॥
उर्ध्वं हयाननं घोरं दावान्तकरं परम् ।
सेन वक्त्रेण विपेन्द्र तारकाख्यं महासुरम् ॥५॥
जघानशरणं तस्यात्सर्वशत्रुहरं परम् ।
ध्यायेत्पंचमुखं रूद्रं हनुमंतं दयानिधम् ॥६॥
खड्ग त्रिशुलं खट्वाङ्गं पाशमंकुशपर्वतम् ।
मुष्टिं कौमोदकीं वक्षं धारयंतं कमण्डुलम् ॥७॥
भिन्दिपालं ज्ञानमुद्रां दशभिमुनिपुंगव ।
एतान्यायुधजालानि धारयंतं भजाम्यहम् ॥८॥
प्रेतासनोपविष्टं तं सर्वाभरणभूषितम् ।
दिव्यमालांबरधरं दिव्यगंधानुलेपनम् ॥९॥
सर्वाश्चर्यमयं देवं हनुमद्विश्वतोमुखम् ।
पंचास्यमच्युतमनेक विचित्रवर्णं वक्त्रं
शशांकशिखरं कपिराजवर्यम् ॥१०॥
पीताम्बरादिमुकुटैरूप शोभिताङ्गं
पिङ्गाक्षमाद्यमनिशं मनसा स्मरामि ॥११॥
मर्कटेश महोत्साह सर्वशत्रुहरः परः ।
शत्रुं संहर मां रक्ष श्रीमन्नापद उद्धर ॥१२॥

ॐ हरिमर्कट मर्कटमंत्रमियंपरिलिख्यति लिख्यति वामतले।
यदि नश्यति नश्यति शत्रुकुलं यदि
मुञ्चति मुञ्चति वामलता ॥१३॥

इत ध्यात्वा कवचं पठेत् - ॐ हरिमर्कटमर्कटाय स्वाहा॥१॥ ॐ नमो भगवते पंचवदनाय पूर्वकपिमुखाय सकलशत्रु संहारणाय स्वाहा॥२॥ ॐ नमो भगवते पंचदनाय दक्षिणमुखाय करालवदनाय नरसिंहाय सकलभूत मथनाय स्वाहा॥३॥ ॐ नमो भगवते पंचवदनाय पश्चिममुखाय गरूडाननाय सकलविषहराय स्वाहा॥४॥ ॐ नमो भगवते पंचवदनायोत्तर मुखायादि वराहाय सकलसंपतकराय स्वाहा॥५॥ ॐ नमो भगवते पंचवदनाय उर्ध्वमुखाय हयग्रीवाय सकलजन वशंकराय स्वाहा॥६॥

ये सभी मंत्र हनुमानजी के प्रत्येक स्वरूप के है इनका अलग अलग मंत्र जप प्रयोग भी हो सक़ता़ है।

विनियोग: - ॐ अस्य पंचमुख हनुमद्कवच मंत्रस्य श्रीरामचन्द्र ऋर्षि:, अनुष्टुप् छन्द:, पंचमुखवीरहनुमान्देवता, हनुमान बीजं, वायुपुत्र शक्ति, अंजनी सुत कीलकं, श्रीरामदूत हनुमत्प्रसाद सिद्धयर्थे जपे विनियोग:।

ऋषिन्यास: - ॐ रामचन्द्र ऋषये नम: शिरसि, अनुष्टुप छन्द से नम: मुखे, पंचमुखीवीरहनुमाद्देवतायै नम: हृदि, हनुमानिति बीजाय नम: गुह्ये, वायुपुत्र इति शक्तये नम: पादयो:, अंजनीसुत कीलकाय नम: नाभौ, विनियोगाय नम:सर्वाङ्गे।

षडङ्गन्यास - ॐ अंजनीसुताय अङ्गुष्ठाभ्यां नम:। ॐ रूद्र मूर्तय तर्जनीभ्यां नम:। ॐ वायुपुत्राय मध्यमाभ्यां नम:। ॐ अग्निगर्भाय अनामिकाभ्यां नम:। ॐ रामदूताय कनिष्ठाभ्यां नम:। ॐ पंचमुख हनुमते करतल कर पृष्ठाभ्यां नम:।

पुन:- ॐ अंजनी सुताय हृदयाय नम:। ॐ रूद्रमूर्तये शिरसे स्वाहा। ॐ वायुपुत्राय शिखायै वषट्। ॐ अग्नि गर्भाय कवचाय हुं। ॐ रामदुताय नेत्रत्रयाय वौषट्। ॐ पंचमुखहनुमतेऽस्त्राय फट्।

ध्यानम्-

वन्दे वानरनारसिंह - खगराट् क्रोडाश्ववक्त्रान्वितं
दिव्यालंकरणं त्रिपंचनयनं देदीप्यमानं रूचा ।

हस्ताब्जैरसिरखेटपुस्तक सुधाकुंभांकुशाद्रीन्हलम् ।
खट्वाङ्गं फणिभूरूहं दशभुजं सर्वारिवीरापहम् ॥

विनियोगः -ॐ रामदूतायञ्जनेयाय वायुपुत्राय महाबलपराक्रमाय सीतादुःखनिवारणाय लंकादहनकारणाय, महाबलप्रचण्डाय फाल्गुनसखाय कोलाहल सकलब्रह्माण्ड विश्वरूपाय सप्तसमुद्र नीरालंघनाय पिङ्गल नयनाया ऽमित विक्रमाय सूर्यबिम्बफलसेवनाय दुष्टनिबर्हणाय दृष्टिनिरालंकृताय संजीवनी संजीविताङ्गद लक्ष्मण-महाकपिसैन्यप्राणदाय दशकण्ठविध्वंसनाय रामेष्टाय फाल्गुनमहासखाय सीतासहित रामवरप्रदाय षट् प्रयोगागम पंचमुखवीरहनुमन्मंत्र जपे विनियोगः।

ॐ हरिमर्कटमर्कटाय वँ वँ वँ वँ वँ वौषट् स्वाहा ॥१॥ ॐ हरिमर्कट मर्कटाय फँ फँ फँ फँ फँ फट् स्वाहा ॥२॥ ॐ हरिमर्कटमर्कटाय खें खें खें खें खें मारणाय स्वाहा ॥३॥ ॐ हरिमर्कटमर्कटाय लुँ लुँ लुँ लुँ लुँ आकर्षित सकल संपतकराय स्वाहा ॥४॥ ॐ हरिमर्कटमर्कटाय धँ धँ धँ धँ धँ शत्रुस्तंभनाय स्वाहा ॥५॥ ॐ हरिमर्कटमर्कटाय ठँ ठँ ठँ ठँ ठँ कूर्ममूर्तये पंचमुख वीरहनुमते परयंत्र परतंत्रोच्चाटनाय स्वाहा ॥६॥ ॐ कं खं गं घं चं छं जं झं ञं टं ठं डं ढं नं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं हं लं क्षं स्वाहा ॥७॥ ॐ पूर्वकपिमुखाय पंचमुखहनुमते ठं ठं ठं ठं ठं सकल शत्रु संहारणाय स्वाहा ॥८॥ ॐ दक्षिणमुखाय पंचहनुमते करालवदनाय नरसिंहाय ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः सकलभूतप्रेतदमनाय स्वाहा ॥९॥ ॐ पश्चिममुखाय गरूडाननाय पंचमुखहनुमते मँ मँ मँ मँ मँ सकल विष हराय स्वाहा ॥१०॥ ॐ उत्तरमुखायादिवराहाय लँ लँ लँ लँ लँ नृसिंहाय नीलकण्ठमूर्तये पंचमुख हनुमते स्वाहा ॥११॥ॐ उर्ध्वमुखाय हयग्रीवाय रूँ रूँ रूँ रूँ रूँ रूद्रमूर्तये सकलप्रयोजन निर्वाहकाय स्वाहा ॥११॥ ॐ अंजनीसुताय वायुपुत्राय महाबलाय सीताशोकनिवारणाय श्रीरामचन्द्र कृपा पादुकाय महावीर्य प्रमथनाथ ब्रह्माण्डनाथाय कामदाय पंचवीर हनुमते स्वाहा ॥१२॥

॥ फलश्रुति ॥

कवचं तु पठित्वेदं महाकवचं पठेन्नरः ।
एकवारं जपेत्स्त्रोत्रं सर्वशत्रु निवारणम् ॥१॥
द्विवारं तु पठेन्नित्यं पुत्रपौत्र प्रवर्धनम् ।
त्रिवारं च पठेन्नित्यं सर्वसंपत्करं शुभम् ॥२॥

चतुर्वारं पठेन्नित्यं च सर्वरोगनिवारणम् ।
पंचवारं पठेन्नित्यं सर्वलोकवशंकरम् ॥३॥
षडवारं च पठेन्नित्यं सर्वदेववशंकरम् ।
सप्तवारं पठेन्नित्यं सर्वसौभाग्यदायकम् ॥४॥
अष्टवारं पठेन्नित्यमिष्ट कामार्थ सिद्धिदम् ।
नववारं पठेन्नित्यं राजभोगमवाप्नुयात् ॥५॥
दशवारं पठेन्नित्यं त्रैलोक्यं ज्ञानदर्शनम् ।
रूद्रावृत्ती पठेन्नित्यं सर्वसिद्धिर्भवेद् ध्रुवम् ॥६॥
कवचं स्मरणेनैव महाबलमवाप्नुयात् ॥७॥

एक से अधिक बार पढ़ने के समय में बार बार न्यास व फलश्रुति पढ़ने की आवश्यकता नहीं होती है। प्रारंभ में न्यास ध्यान तथा उत्तरार्धपाठ के साथ फल श्रुति पढते है यही सर्वत्र नियम है।

॥ इति श्री सुदर्शन संहितायां श्रीरामचन्द्र सीता प्रोक्तं श्री पंचमुख हनुमत् कवचं सम्पूर्णं ॥

॥ सप्तमुख हनुमत्कवचम् ॥

विनियोगः – ॐ **अस्य श्री सप्तमुखवीर हनुमत्कवच स्तोत्र मंत्रस्य नारद ऋषिः अनुष्टुप् छन्दः, श्रीसप्तमुखीकपिः परमात्मा देवता, ह्रां बीजम्, ह्रीं शक्तिः, ह्रूं कीलकं मम सर्वाभीष्ट सिद्ध्यर्थे जपे विनियोगः।**

अंगन्यास–

ॐ ह्रां	अंगुष्ठाभ्यां नमः।	हृदयाय नमः
ॐ ह्रीं	तर्जनीभ्यां नमः।	शिरसे स्वाहा
ॐ ह्रूं	मध्यमाभ्यां नमः।	शिखायै वषट्
ॐ ह्रैं	अनामिकाभ्यां नमः।	कवचाय हुं
ॐ ह्रौं	कनिष्ठिकाभ्यां नमः।	नेत्रत्रयाय वौषट्
ॐ ह्रः	करतल करपृष्ठाभ्यां नमः।	अस्त्राय फट्

करन्यास की तरह ही हृदयादि न्यास करें।

ध्यानम्–

वन्दे वानर-सिंह-सर्परिपु वाराहाऽश्व-गौ मानुषै-
र्युक्तं सप्तमुखैः करैर्द्रुमगिरि चक्रं गदां खेटकम् ।

खट्वाङ्गंहलमङ्कुशं फणिसुधा कुम्भौ शराब्जाभयान्
शूलं सप्तशिखं दधानममरः सेव्यं कपिं कामदम् ॥

॥ ब्रह्मोवाच ॥

सप्तशीर्ष्णः प्रवक्ष्यामि कवचं सर्वसिद्धिदम् ।
जप्त्वा हनुमतो नित्यं सर्वपापैः प्रमुच्यते ॥१॥
सप्तस्वर्गपतिः पायाच्छिखां मे मारुतात्मजः ।
सप्तमूर्धाशिरोऽव्यान्मे सप्तार्चिर्भालदेशकम् ॥२॥
त्रिः सप्तनेत्रो नेत्रेऽव्यात् सप्तस्वर गतिः श्रुति ।
नासां सप्तपदार्थोऽव्यान्मुखं सप्तमुखोऽवतु ॥३॥
सप्तजिह्वस्तु रसनां रदान् सप्तहयोऽवतु ।
सप्तच्छन्दो हरिः पातु कण्ठं बाहू गिरिस्थितः ॥४॥
करौ चतुर्दशकरो भूधरोऽव्यान्ममाङ्गुलोः ।
सप्तर्षिध्यातो हृदयमुदरं कुक्षि सागरः ॥६॥
सप्तद्वीपपतिश्चित्तं सप्तव्याहृतिरूपवान् ।
कटिं मे सप्तसंस्थार्थ दायकः सक्थिनी मम ॥६॥
सप्तग्रहस्वरूपी मे जानुनी जङ्घयोस्तथा ।
सप्तधान्यप्रियः पादौ सप्तपाताल धारकः ॥७॥
पशून् धनं च धान्यं च लक्ष्मीं लक्ष्मीप्रदोऽवतु ।
दारान् पुत्रांश्च कन्याश्च कुटुम्बं विश्वपालकः ॥८॥
अनुक्तस्थानमपि मे पायाद् वायुसुतःसदा ।
चौरेभ्यो व्यालदंष्ट्रिभ्यः शृङ्गिभ्यो भूतराक्षसात् ॥९॥
दैत्येभ्योऽप्यथ यक्षेभ्यो ब्रह्मराक्षसजाद् भयात् ।
दंष्ट्राकराल वदनो हनुमान् मां सदाऽवतु ॥१०॥
परशस्त्र-मंत्रतंत्र-यंत्राऽग्नि- जलविद्युतः ।
रुद्रांशः शत्रुसंग्रामात् सर्वावस्थासु सर्वभृत् ।
ॐ नमो भगवते सप्तवदनाय आद्यकपिमुखाय वीर हनुमते ।
सर्वशत्रु संहारणाय ठं ठं ठं ठं ठं ठं ठं ॐ नमः स्वाहा ॥१२॥
ॐ नमो भगवते सप्तवदनाय द्वितीय नारसिंहास्याय
अत्युग्रतेजोवपुषे भीषणाय भयनाशनाय

हं हं हं हं हं हं हं ॐ नमः स्वाहा ॥१३॥
ॐ नमो भगवते सप्तवदनाय तृतीय
गरुडवक्त्राय वज्रदंष्ट्राय महाबलाय
सर्वरोग विनाशनाय मं मं मं मं मं मं मं ॐ नमः स्वाहा ॥१४॥
ॐ नमो भगवते सप्तवदनाय चतुर्थक्रोडतुण्डाय
सौमित्रि रक्षकायपुत्राद्यभिवृद्धि कराय
लं लं लं लं लं लं लं ॐ नमः स्वाहा ॥१५॥
ॐ नमो भगवते सप्तवदनाय पञ्चमाश्व वदनाय
रुद्रमूर्तये सर्ववशीकरणाय सर्वागम स्वरूपाय
रुं रुं रुं रुं रुं रुं रुं ॐ नमः स्वाहा ॥१६॥
ॐ नमो भगवते सप्तवदनाय षष्ठगोमुखाय
सूर्यरूपाय सर्वरोग हराय मुक्तिदात्रे
ॐ ॐ ॐ ॐ ॐ ॐ ॐ नमः स्वाहा ॥१७॥

ॐ नमो भगवते सप्तवदनाय सप्तमानुषमुखाय रुद्रावतराय अंजनीसुताय सकलदिग्यशो विस्तारकाय वज्रदेहाय सुग्रीवसाह्यकराय उदधिलङ्घनाय सीताशुद्धिकराय लङ्कादहनाय अनेकराक्षसान्तकराय रामानन्ददायकाय अनेकपर्वतोत्पाटकाय सेतुबन्धकाय कपिसैन्यनायकाय रावणान्तकाय ब्रह्मचर्याश्रमिणे कौपीनब्रह्मसूत्रधारकाय रामहृदयाय सर्वदुष्टग्रह निवारणाय शाकिनीडाकिनी-वेताल ब्रह्मराक्षस-भैरवग्रह-यक्षग्रह-पिशाचग्रह-ब्रह्मग्रह-क्षत्रियग्रह-वैश्यग्रह-शूद्रग्रहान्त्यजग्रह म्लेच्छग्रह -सर्पग्रहोच्चाटकाय मम सर्वकार्य साधकाय सर्वशत्रु संहारकाय सिंहव्याघ्रादि दुष्टसत्वाकर्षकाय ऐकाहिकादि त्रिविध ज्वरच्छेदकाय परयंत्रमंत्रतंत्र-नाशकाय सर्वव्याधि-निकृन्तकाय सर्पादि-सर्वस्थावर जङ्गमविषस्तंभनकराय सर्वराजभय चोरभयाऽग्निभय-प्रशमनाय आध्यात्मिकाऽऽधिदैविक अधिभौतिक तापत्रय निवारणाय सर्वविद्या सर्वसंपत् सर्वपुरुषार्थ दायकाय असाध्यकार्य साधकाय सर्ववरप्रदाय सर्वाऽभीष्टकराय ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ॐ नमः स्वाहा ॥१८॥

॥ फलश्रुति ॥

य इदं कवचं नित्यं सप्तास्यस्य हनूमतः ।
त्रिसंध्यं जपते नित्यं सर्वशत्रु विनाशनम् ॥१९॥

पुत्रपौत्रप्रदं सर्वं संपद-राज्यप्रदं परम् ।
सर्वरोगहरं चाऽऽयुः कीर्तिदं पुण्यवर्धनम् ॥२०॥
राजानं स वशं नीत्वा त्रैलोक्य विजयीभवेत् ।
इदं हि परमं गोप्यं देयं भक्तियुताय च ॥२१॥
न देयं भक्तिहीनाय दत्त्वा स रिरयं व्रजेत् ॥२२॥
नामानि सर्वाण्यपवर्गदानि रूपाणि विश्वानि च यस्य सन्ति ।
कर्माणि देवैरपि दुर्घटानि तं मारुतिं सप्तमुखं प्रपद्ये ॥२३॥

॥ इति अथर्वणरहस्योक्त सप्तमुखहनुमत् कवचं सम्पूर्णम् ॥

॥ अथैकादशमुख हनुमत्कवचम् ॥

॥ लोपामुद्रोवाच ॥

कुम्भोद्भव दयासिंधो श्रुतं हनुमतः परम् ।
यंत्र मंत्रादिकं सर्वं त्वन्मुखोदीरितं मया ॥१॥
दयां कुरु मयि प्राणनाथ वेदितुमुत्सहे ।
कवचं वायुपुत्रस्य एकादशमुखात्मनः ॥२॥
इत्येवं वचनं श्रुत्वा प्रियायाः प्रश्रयान्वितम् ।
वक्तुं प्रचक्रमे तत्र लोपामुद्रापतिः प्रभुः ॥३॥

॥ अगस्त्य उवाच ॥

नमस्कृत्वा रामदूतं हनुमंतं महामतिम् ।
ब्रह्मप्रोक्तं तु कवचं शृणु सुन्दरि सादरम् ॥४॥
सनन्दनाय सुमहत् चतुराननभाषितम् ।
कवचं कामदं दिव्यं सर्वरक्षोनिबर्हणम् ॥५॥
सर्वसंपत्प्रदं पुण्यं मर्त्यानां मधुर स्वरे ॥६॥

विनियोगः - ॐ अस्य श्रीमदेकादशमुख हनुमत्कवचस्य सनन्दन ऋषिः। अनुष्टुप् छन्दः। प्रसन्नात्मा हनुमान्देवता। वायुपुत्रेति बीजम्। मुख्यः प्राण शक्तिः। सर्वकामार्थ सिद्ध्यर्थ जपे विनियोगः।

ॐ स्फ्रें बीजं शक्ति धृक् पातु शिरो मे पवनात्मजः ।
क्रौं बीजात्मनयनयोः पातु मां वानरेश्वरः ॥१॥

क्षं बीजरूपी कर्णौ में सीताशोक विनाशनः ।
ग्लौं बीजवाच्यो नासां लक्ष्मणप्राण दायकः ॥२॥
वं बीजार्थश्च कण्ठं में पातु चाक्षय्यकारकः ।
ऐं बीजावाच्यो हृदयं पातु मे कपिनायकः ॥३॥
वं बीज कीर्तितः पातु बाहू मे चाञ्जनीसुतः ।
ह्रां बीजो राक्षसेन्द्रस्य दर्पहा पातु चोदरम् ॥४॥
ह्सौं बीजमयो मध्यं पातु लंकाविदाहकः ।
ह्रीं बीजधरो मां पातु गुह्यं देवेन्द्र वन्दितः ॥५॥
रं बीजात्मा सदा पातु चोरुवारिलंघनः ।
सुग्रीव सचिवः पातु जानुनी मे मनोजवः ॥६॥
पादौ पादतले पातु द्रोणाचलधरो हरिः ।
आपादमस्तकं पातु रामदूतो महाबलः ॥७॥
पूर्वे वानरवक्त्रो मामाग्नेयां क्षत्रियान्तकृत् ।
दक्षिणे नारसिंहस्तु नैऋत्यां गणनायकः ॥८॥
वारुण्यां दिशि मामव्यात्खगवक्त्रो हरीश्वरः ।
वायव्यां भैरवमुखः कौबेर्यां पातु मां सदा ॥९॥
क्रोडास्यः पातु मां नित्यमीशान्यां रुद्ररूपधृक् ।
उर्ध्वं हयाननः पातु त्वधः शेषमुखस्तथा ॥१०॥
रामास्यः पातु सर्वत्र सौम्यरुपी महाभुजः ।
इत्येवं रामदूतस्य कवचं प्रपठेत्सदा ॥११॥

॥ फलश्रुति ॥

एकादश मुखस्यैतद् गोप्यं वै कीर्तितं मया ।
रक्षोघ्नं कामदं सौम्यं सर्वसंपद्विधायकम् ॥१२॥
पुत्रदं धनदं चोग्रशत्रु संघविमर्द्दनम् ।
स्वर्गापवर्गदं दिव्यं चिंतितार्थ प्रदं शुभम् ॥१३॥
एतत्कवचमज्ञात्वा मंत्रसिद्धिर्न जायते ।
चत्वारिंशत्सहस्त्राणि पठेच्छुद्धात्मना नरः ॥१४॥
एकवारं पठेन्नित्यं कवचं सिद्धिदं पुमान् ।
द्विवारं वा त्रिवारं वा पठन्नायुष्यमाप्नुयात् ॥१५॥

क्रमादेकादशादेवमावर्तन जपात्सुधी ।
वर्षान्ते दर्शनं साक्षाल्लभते नात्र संशयः ॥१६॥
यं यं चितयते चार्थं तं तं प्राप्नोति पुरुषः ।
ब्रह्मोदीरितमेतद्धि तवाग्रे कथितं महत् ॥१७॥
इत्येव मुक्त्वा वचनं महर्षिस्तूष्णीं बभूवेन्दुमुखीं निरीक्ष्य ।
संहृष्टचेता हि तदा तदीयौ पादौ ननामातिमुदा स्वभर्तुः ॥१८॥

॥ इति अगस्त्यसार संहितायामेकादशमुख हनुमत्कवचं सम्पूर्णम् ॥

॥ अथ हनुमत्सहस्रनामस्तोत्रम् ॥

॥ ऋषय ऊचुः॥

ऋषे लोहगिरिं प्राप्तः सीताविरहकातरः ।
भगवान् किं व्यधाद्रामस्तत्सर्वं ब्रूहि सत्वरम् ॥१॥

॥ वाल्मीकिरुवाच ॥

मायामानुषदेहोऽयं ददर्शाग्रे कपीश्वरम् ।
हनुमन्तं जगत्स्वामी बालार्कसमतेजसम् ॥२॥
स सत्वरं समागम्य साष्टांग प्रणिपत्य च ।
कृताञ्जलिपुटो भूत्वा हनुमान् राममब्रवीत् ॥३॥

॥ श्रीहनुमानुवाच ॥

धन्योऽस्मि कृतकृत्योऽस्मि दृष्ट्वा त्वत्पादपंकजम् ।
योगिनामप्यगम्यं च संसारभयनाशनम् ॥४॥
पुरुषोत्तमदेवेश कर्तव्यं तन्निवेद्यताम् ।

॥ श्रीराम उवाचः॥

जनस्थानं कपिश्रेष्ठकोऽप्यागत्य विदेहजाम् ॥५॥
दृतवान्विप्रसंवेषो मारीचानुगते मयि ।
गवेष्यः साम्प्रतं वीर जानकीहरणे परः ॥६॥
त्वयाऽगम्यो न को देशस्त्वं च ज्ञानवतां वरः ।
सप्तकोटिमहामंत्रमंत्रितावयवः प्रभुः ॥७॥

॥ ऋषय ऊचुः॥

को मंत्रः किं च तद्ध्यान तन्नो ब्रूहि यथार्थतः ।
तथा सुधारसं पीत्वा न तृप्यामः परंतप ॥८॥

॥ वाल्मीकिरुवाच ॥

मंत्रं हनुमतो विद्धि भुक्तिमुक्ति प्रदायकम् ।
महारिष्टमहापापमहादुःख निवारणम् ॥९॥

ॐ ऐं ह्रीं हनुमते रामदूताय लंकाविध्वंसनायाञ्जनीगर्भ संभूताय शाकिनीडाकिनी ध्वंसनायकिलिकिलिबुबुकारेण विभीषणायहनुमद्देवाय ''ॐ ह्रीं श्रीं ह्रौं ह्रां फट् स्वाहा॥''

अन्यं हनुमतो मंत्रं सहस्त्रनामसंज्ञकम् ।
जानंति ऋषयः सर्वे महादुरितनाशनम् ॥१०॥
अस्य संस्मरणात्सीता लब्धा राज्यमकण्टकम् ।
विभीषणाय च ददावात्मानं लब्धवान्मया ॥११॥

॥ ऋषय ऊचुः॥

सहस्त्रनामसन्मंत्रं दुःखाघौघनिवारणम् ।
वाल्मीके ब्रूहि नस्तूर्णं शुश्रूषामः कथां पराम् ॥१२॥

॥ वाल्मीकिरुवाच ॥

शृण्वंतु ऋषयः सर्वे सहस्त्रनामकं स्तवम् ।
स्तवानामुत्तमं दिव्यं सदर्थस्य प्रदायकम् ॥१३॥

॥ अथ पाठः॥

विनियोगः - ॐ अस्य श्री हनुमत्सहस्त्रनामस्तोत्रमंत्रस्य श्रीरामचन्द्र ऋषिः। अनुष्टुप् छन्दः। श्रीहनुमन्महारुद्रो देवता। ह्रीं श्रीं ह्रौं ह्रां बीजम्। श्रीं इति शक्तिः। किलिकिलिबुबुकारेणेति कीलकम्। लंकाविध्वंसनेति कवचम्। मम सर्वोपद्रव शांत्यर्थे सर्वकर्मसिद्ध्यर्थे पाठे विनियोगः।

ऋष्यादिन्यासः - श्रीरामचन्द्र ऋषये नमः शिरसि॥१॥ अनुष्टुप् छन्दसे नमः मुखे॥२॥ श्रीहनूमन्महारुद्र देवतायै नमः हृदि॥३॥ ह्रीं श्रीं ह्रौं ह्रां बीजाय नमः गुह्ये॥४॥ श्रीं इति शक्तये नमः पादयोः॥५॥ किलिकिलि बुबुकारेणेति कीलकाय नमः नाभौ॥६॥ लंकाविध्वंसनेति कवचाय नमः बाहुद्वये॥७॥ विनियोगाय नमः सर्वाङ्गे॥८॥ इति ऋष्यादि न्यासः॥

करन्यासः - ॐ ऐं हनुमते अंगुष्ठाभ्यां नमः ॥१॥ ॐ लंकाविध्वंसनाय तर्जनीभ्यां नमः ॥२॥ ॐ अञ्जनीगर्भसम्भूताय मध्यमाभ्यां नमः ॥३॥ ॐ शाकिनीडाकिनीविध्वंसनाय अनामिकाभ्यां नमः ॥४॥ ॐ किलिकिलि बुबुकारेण विभीषणाय हनुमद्देवाय कनिष्ठिकाभ्यां नमः ॥५॥ ॐ ह्रीं श्रीं ह्रौं ह्रां फट् स्वाहा करतल करपृष्ठाभ्यां नमः ॥६॥ इति करन्यासः ।

हृदयादिषडंगन्यासः - ॐ हनुमते हृदयाय नमः ॥१॥ ॐ लंकाविध्वंस नाय शिरसे स्वाहा ॥२॥ ॐ अञ्जनीगर्भसम्भूताय शिखायै वषट् ॥३॥ ॐ शाकिनीडाकिनीविध्वंसनाय कवचाय हुम् ॥४॥ ॐ किलिकिलिबुबुकारेण विभीषणाय हनुमद्देवाय नेत्रत्रयाय वौषट् ॥५॥ ॐ ह्रीं श्रीं ह्रौं ह्रां फट् स्वाहा अस्त्राय फट् ॥६॥ इति हृदयादि षडंगन्यासः ॥

प्रतप्तस्वर्णवर्णाभं संरक्तारुणलोचनम् ।
सुग्रीवादियुतं ध्यायेत्पीताम्बरसमावृतम् ॥१४॥
गोष्पदीकृतवारीशं पुच्छमस्तकमीश्वरम् ।
ज्ञानमुद्रां च बिभ्राणं सर्वालंकारभूषितम् ॥१५॥

॥ श्रीरामचन्द्र उवाच ॥

ॐ हनुमान् श्रीपदोवायुपुत्रो रुद्रोऽनघोऽजरः ।
अमृत्युर्वीरवीरश्चग्रामवासो जनाश्रयः ॥१६॥
धनदो निर्गुणः कायो वीरो निधिपतिर्मुनिः ।
पिंगाक्षो वरदो वाग्मी सीताशोक विनाशनः ॥१७॥
शिवः सर्वः परोऽव्यक्तो व्यक्ताव्यक्तो रसाधरः ।
पिंगरोमः पिंगकेशः श्रुतिगम्यः सनातनः ॥१८॥
अनादिर्भगवान् देवो विश्वहेतुर्निरामयः ।
आरोग्यकर्ताविश्वेशो विश्वनाथो हरीश्वरः ॥१९॥
भर्गो रामो रामभक्तः कल्याणप्रकृतिः स्थिरः ।
विश्वंभरो विश्वमूर्तिर्विश्वाकारोऽथ विश्वदः ॥२०॥
विश्वात्मा विश्वसेव्योऽथ विश्वो विश्वहरो रविः ।
विश्वचेष्टो विश्वगम्यो विश्वध्येयः कलाधरः ॥२१॥
प्लवंगमः कपिश्रेष्ठो ज्येष्ठो विद्यावनेचरः ।
बालो वृद्धो युवा तत्वं तत्वगम्य उदग्रजः ॥२२॥

अञ्जनीसूनुरव्यग्रो ग्रामख्यातो धराधरः ।
भूर्भुवः स्वर्महर्लोको जनलोकस्तपोऽव्ययः ॥२३॥
सत्यमोंकारगम्यश्च प्रणवो व्यापकोऽमलः ।
शिवधर्म्मप्रतिष्ठाता रामेष्टः फाल्गुनप्रियः ॥२४॥
गोष्पदीकृतवारीशः पूर्णकामो धरापतिः ।
रक्षोघ्नः पुण्डरिकाक्षः शरणागतवत्सलः ॥२५॥
जानकीप्राणदाता च रक्षः प्राणापहारकः ।
पूर्णः सत्यः पीतवासा दिवाकरसमप्रभः ॥२६॥
देवोद्यानविहारी च देवताभय भंजनः ।
भक्तोदयो भक्तलब्धो भक्तपालनतत्परः ॥२७॥
द्रोणहर्ता शक्तिनेता शक्तिराक्षसमारकः ।
रक्षोघ्नो रामदूतश्च शाकिनीजीवहारकः ॥२८॥
बुबुकारहनारातिर्गर्व पर्वतमर्दनः ।
हेतुस्त्वहेतुः प्रांशुश्च विश्वभर्ता जगद्गुरुः ॥२९॥
जगन्नेता जगन्नाथो जगदीशो जनेश्वरः ।
जगद्धितो हरिः श्रीशो गरुडस्मय भंजनः ॥३०॥
पार्थध्वजो वायुपुत्रोऽमितपुच्छोऽमितप्रभः ।
ब्रह्मपुच्छः परं ब्रह्म पुच्छो रामेष्ट एव च ॥३१॥
सुग्रीवादियुतोज्ञानी वानरो वानरेश्वरः ।
कल्पस्थायी चिरंजीवी प्रसन्नश्च सदाशिवः ॥३२॥
सन्नतः सद्गतिर्भक्तिमुक्तिदः कीर्तिनायकः ।
कीर्तिः कीर्तिप्रदश्चैव समुद्रः श्रीपदः शिवः ॥३३॥
भक्तोदयो भक्तगम्यो भक्तभाग्यप्रदायकः ।
उदधिक्रमणो देवः संसारभयनाशकः ॥३४॥
बलिबंधनकृद्विश्वजेता विश्वप्रतिष्ठितः ।
लंकारि कालपुरुषो लंकेशगृहभंजनः ॥३५॥
भूतावासो वासुदेवो वसुस्त्रिभुवनेश्वरः ।
श्रीरामरुपः कृष्णास्तु लंकाप्रासादभंजकः ॥३६॥

कृष्णा कृष्णस्तुतः शान्तः शान्तिदो विश्वपावनः ।
विश्वभोक्ताऽथ मारघ्नो ब्रह्मचारी जितेन्द्रियः ॥३७॥
ऊर्द्धगोलांगुली माली लांगूलाहतराक्षसः ।
समीरतनुजो वीरो वीरमारो जयप्रदः ॥३८॥
जगन्मंगलदः पुण्यः पुण्यश्रवणकीर्तनः ।
पुण्यकीर्तिः पुण्यगतिर्जगत्पावनपावनः ॥३९॥
देवेशो जितमारोऽथ रामभक्ति विधायकः ।
ध्याता ध्येयो भगः साक्षी चेता चैतन्यविग्रहः ॥४०॥
ज्ञानदः प्राणदः प्राणो जगत्प्राणसमीरणः ।
विभीषण प्रियः शूरः पिप्पलायनसिद्धिदः ॥४१॥
सिद्धिः सिद्धाश्रयः कालः कालभक्षकभञ्जनः ।
लंकेशनिधन स्थायी लंकादाहक ईश्वरः ॥४२॥
चन्द्रसूर्याग्निनेत्रश्च कालाग्निः प्रलयान्तकः ।
कपिलः कपिशः पुण्यराशिर्द्वादशराशिगः ॥४३॥
सर्वाश्रयोऽप्रमेयात्मा रेवत्यादिनिवारकः ।
लक्ष्मणप्राणदाता च सीताजीवनहेतुकः ॥४४॥
रामध्येयो हृषीकेशो विष्णुभक्तो जटी बलिः ।
देवारिदर्पहा होता धाता कर्ता जगत्प्रभुः ॥४५॥
नगरग्रामपालश्च शुद्धो बुद्धो निरंतरः ।
निरंजनो निर्विकल्पो गुणातीतो भयंकरः ॥४६॥
हनुमांश्च दुराराध्यस्तपः साध्यो महेश्वरः ।
जानकीघनशोकोत्थतापहर्ता परात्परः ॥४७॥
वाङ्मयः सदसद्रूपकारणं प्रकृतेः परः ।
भाग्यदो निर्मलो नेता पुच्छलंकाविदाहकः ॥४८॥
पुच्छबद्धयातुधानो यातुधानरिपुप्रियः ।
छायापहारी भूतेशो लोकेशः सद्गतिप्रदः ॥४९॥
ल्पवंगमेश्वरः क्रोधः क्रोधसंरक्तलोचनः ।
सौम्यो गुरुः काव्यकर्ता भक्तानां च वरप्रदः ॥५०॥

भक्तानुकम्पी विश्वेशः पुरुहूतः पुरन्दरः ।
क्रोधहर्ता तापहर्ता भक्ताभयवरप्रदः ॥५१॥
अग्निर्विभावसुर्भानुर्यमो निर्ऋतिरेव च ।
वरुणो वायुगतिमान् वायुः कुबेर ईश्वरः ॥५२॥
रविश्चन्द्रः कुजः सौम्यो गुरुः काव्यः शनैश्चरः ।
राहुः केतुर्मरुद्धाता धर्ता हर्ता समीरजः ॥५३॥
मशकीकृतदेवारिदेत्यारिर्मधुसूदनः ।
कामः कपिः कामपालः कपिलो विश्वजीवनः ॥५४॥
भागीरथीपदाम्भोजः सेतुबन्धविशारदः ।
स्वाहा स्वधा हविः कव्यहव्यवाह प्रकाशकः ॥५५॥
स्वप्रकाशो महावीरो लघुरमितविक्रमः ।
भंजनो दानगतिमान् सद्गतिः पुरुषोत्तमः ॥५६॥
जगदात्मा जगद्योनिर्जगदंतो ह्यनंतकः ।
विपाप्मा निष्कलंकोऽथ महात्मा हृदयंकृतिः ॥५७॥
खं वायुः पृथिवी रामो वह्निर्दिक्पाल एव च ।
क्षेत्रज्ञः क्षेत्रहर्ता च पल्वलीकृतसागरः ॥५८॥
हिरणमयः पुराणश्च खेचरो भूचरो मनुः ।
हिरण्यगर्भः सूत्रात्मा राजराजो निशांपतिः ॥५९॥
वेदान्तवेद्य उद्गीथो वेदवेदांगपारगः ।
प्रतिग्रामस्थितिः सद्यः स्फूर्तिदातागुणाकरः ॥६०॥
नक्षत्रमाली भूतात्मा सुरभिः कल्पपादपः ।
चिंतामणिर्गुणनिधिः प्रजाधारो ह्यनुत्तमः ॥६१॥
पुण्यश्लोकः पुरारातिर्ज्योतिष्मान् शर्वरीपतिः ।
किलिकिलिरावसंत्रस्त भूतप्रेतपिशाचकः ॥६२॥
ऋणत्रयहरः सूक्ष्मः स्थूलः सर्वगतिः पुमान् ।
अपस्मारहरः स्मर्ता श्रुतिर्गाथास्मृतिर्मनुः ॥६३॥
स्वर्गद्वारप्रजाद्वार मोक्षद्वारपतीश्वरः ।
नादरुपः परं ब्रह्म ब्रह्म ब्रह्मपुरातनः ॥६४॥

एकोऽनेको जनः शुक्लः स्वयंज्योतिरनाकुलः ।
ज्योतिर्ज्योतिरनादिश्च सात्त्विको राजसस्तमः ॥६५॥
तमोहर्ता निरालम्बो निराहारो गुणाकरः ।
गुणाश्रयो गुणमयो बृहत्कर्मा बृहद्यशाः ॥६६॥
बृहद्धनुर्बृहत्पादो बृहन्मूर्धा बृहत्स्वनः ।
बृहत्कायो बृहन्नासो बृहद्बाहुर्बृहत्तनुः ॥६७॥
बृहद्यत्नो बृहत्कामो बृहत्पुच्छो बृहत्करः ।
बृहद्गतिर्बृहत्सेव्यो बृहल्लोकफलप्रदः ॥६८॥
बृहच्छक्तिर्बृहद्वाञ्छाफलदो बृहदीश्वरः ।
बृहल्लोकनुतो द्रष्टाविद्यादाता जगद्गुरुः ॥६९॥
देवाचार्य्यः सत्यवादी ब्रह्मवादी कलाधरः ।
सप्तपातालगामी च मलयाचलसंश्रयः ॥७०॥
उत्तराशास्थितः श्रीदो दिव्यौषधिवशः खगः ।
शाखामृगः कपीन्द्रोऽथ पुराणः प्राणचंचुरः ॥७१॥
चतुरो ब्राह्मणो योगी योगगम्यः परावरः ।
अनादिनिधिदो व्यासो वैकुण्ठः पृथिवीपतिः ॥७२॥
अपराजितो जितारातिः सदानन्दो गिरीशजः ।
गोपाली गोपतिर्योद्धा कलिकालपरात्परः ॥७३॥
मनोवेगी सदायोगी संसारभयनाशनः ।
तत्त्वदाताऽथ तत्त्वज्ञस्तत्त्वं तत्त्वप्रकाशकः ॥७४॥
शुद्धो बुद्धो नित्ययुक्तो भक्तराजो जगद्रथः ।
प्रलयोऽमितमायश्च मायातीतो विमत्सरः ॥७५॥
मायाभर्जितरक्षाश्च मायानिर्मितविष्टपः ।
मायाश्रयश्च निर्लेपो मायानिर्वर्तकः सुखम् ॥७६॥
सुखी सुखप्रदो नागो महेशकृतसंस्तवः ।
महेश्वरः सत्यसंघः शरभ कलिपावनः ॥७७॥
रसो रसज्ञः संमानो रूपं चक्षुः श्रुतीरवः ।
घ्राणो गंधः स्पर्शनं च स्पर्शोऽहंकारमानगः ॥७८॥

नेतिनेतीतिगम्यश्च वैकुण्ठभजनप्रियः ।
गिरीशो गिरिजाकांतो दुर्वासाः कविरंगिराः ॥७९॥

भृगुर्वशिष्ठश्च्यवनो नारदस्तुम्बरुर्बलः ।
विश्वक्षेत्रो विश्वबीजो विश्वनेत्रश्च विश्वपः ॥८०॥

याजको यजमानश्च पावकः पितरस्तथा ।
श्रद्धा बुद्धिः क्षमा तंत्रो मंत्रो मंत्रपिता सुरः ॥८१॥

राजेन्द्रो भूपती रुण्डमालीसंसारसारथिः ।
नित्य सम्पूर्णकामश्च भक्तकामधुगुत्तमः ॥८२॥

गणपः केशवो भ्राता पिता माताऽथ मारुतिः ।
सहस्त्रमूर्द्धा सहस्त्रास्यः सहस्त्राक्ष सहस्त्रपात् ॥८३॥

कामजित्कामदहनः कामी कामफलप्रदः ।
मुद्रापहारी रक्षोघ्नः क्षितिभारहरो बलः ॥८४॥

नखदंष्ट्रायुधो विष्णुर्भक्ताभयवरप्रदः ।
दर्पहा दर्पदो दंष्ट्राशतमूर्तिरमूर्तिमान् ॥८५॥

महानिधिर्महाभागो महाभर्गो महर्द्धिदः ।
महाकारो महायोगी महातेजा महाद्युतिः ॥८६॥

महाकर्मा महानादो महामन्त्रो महामतिः ।
महागमो महोदारो महादेवात्मको विभुः ॥८७॥

रुद्रकर्मा कृतकर्मा रत्नाभः कृतागमः ।
अम्भोधिलंघनः सिंहः सत्यधर्मप्रमोदनः ॥८८॥

जितामित्रो जयः सोमो विजयो वायुवाहनम् ।
जीवो धाता सहस्त्रांशुर्मुकुन्दो भूरिदक्षिणः ॥८९॥

सिद्धार्थः सिद्धिदः सिद्धसंकल्पः सिद्धिहेतुकः ।
सप्तपातालचरणः सप्तर्षिगणवंदितः ॥९०॥

सप्ताब्धिलंघनो वीरः सप्तद्विपोरुमण्डलः ।
सप्तांगराज्यसुखदः सप्तमातृनिषेवितः ॥९१॥

सप्तस्वर्लोकमुकुटः सप्तहोत्रस्वराश्रयः ।
सप्तच्छन्दोनिधिः सप्तच्छन्दः सप्तजनाश्रयः ॥९२॥

सप्तसामोपगीतश्च सप्तपातालसंश्रयः ।
मेघादः कीर्तिदः शोकहारी दौर्भाग्यनाशनः ॥९३॥
सर्ववश्यकरो गर्भदोषहा पुत्रपौत्रदः ।
प्रतिवादिमुखस्तंभो रुष्टचित्तप्रसादनः ॥९४॥
पराभिचारशमनो दुःखहा बन्धमोक्षदः ।
नवद्वारपुराधारो नवद्वारनिकेतनः ॥९५॥
नरनारायणस्तुल्यो नवनाथमहेश्वरः ।
मेखली कवची खड्गी भ्राजिष्णुर्जिष्णुसारथिः ॥९६॥
बहुयोजनविस्तीर्णपुच्छः पुच्छहतासुरः ।
दुष्टग्रहनिहंता च पिशाचग्रहघातकः ॥९७॥
बालग्रहविनाशी च धर्मनेता कृपाकरः ।
उग्रकृत्य उग्रवेग उग्रनेत्रः शतक्रतुः ॥९८॥
शतमन्युस्तुतः स्तुत्यः स्तुतिः स्तोता महाबलः ।
समग्रगुणशाली च व्यग्रो रक्षोविनाशनः ॥९९॥
रक्षोऽग्निदाहो ब्रह्मेशः श्रीधरो भक्तवत्सलः ।
मेघनादो मेघरूपो मेघवृष्टिनिवारकः ॥१००॥
मेघजीवनहेतुश्च मेघश्यामः परात्मकः ।
समीरतनयो योद्धा तत्त्वविद्याविशारदः ॥१०१॥
अमोघो मोघदृष्टिश्च दिष्टदोऽरिष्टनाशनः ।
अर्थोऽनर्थापहारी च समर्थो रामसेवकः ॥१०२॥
अर्थिवन्द्यो सराराति: पुण्डरीकाक्ष आत्मभूः ।
संकर्षणो विशुद्धात्मा विद्याराशिः सुरेश्वरः ॥१०३॥
अचलोद्धारको नित्यः सेतुकृद्रामसारथिः ।
आनन्दः परमानन्दो मत्स्यः कूर्मो निधीशयः ॥१०४॥
वाराहो नारसिंहश्च वामनो जमदग्निजः ।
रामः कृष्णः शिवो वृद्धः कल्की रामश्च मोहनः ॥१०५॥
नन्दी शृंगी च चण्डी च गणेशो गणसेवितः ।
कर्माध्यक्षः सुरारामो विश्रामो जगतीपतिः ॥१०६॥

जगन्नाथः कपीशश्च सर्वावासः सदाश्रयः ।
सुग्रीवादिस्तुतो दांतः सर्वकर्मा प्लवंगमः ॥१०७॥
नखदारितरक्षाश्च नखयुद्धविशारदः ।
कुशलः सुधनः शेषो वासुकिस्तक्षकस्तथा ॥१०८॥
स्वर्णवर्णो बलाढ्यश्च पुरजेताऽघनाशनः ।
कैवल्यदीपः कैवल्यो गरुडः पन्नगो गुरुः ॥१०९॥
क्लिक्लिरावहतारातिर्गर्व पर्वतभेदनः ।
वज्रांगो वज्रवज्रश्च भक्तवज्रनिवारकः ॥११०॥
नखायुधो मणिग्रीवो ज्वालामाली च भास्करः ।
प्रौढप्रतापस्तपनो भक्ततापनिवारकः ॥१११॥
शरणं जीवनं भोक्ता नानाचेष्टोऽथ चंचलः ।
स्वस्थस्त्वस्वास्थ्यहा दुःखशातनः पवनात्मजः ॥११२॥
पावनः पवनः कांतो भक्तागः सहनो बली ।
मेघनादरिपुर्मेघनाद संहतराक्षसः ॥११३॥
क्षरोऽक्षरो विनीतात्मा वानरेशः सतां गतिः ।
श्रीकण्ठः शितिकण्ठश्च सहायोऽसहनायकः ॥११४॥
अस्थूलस्त्वनणुर्भर्गो दिव्यः संसृतिनाशनः ।
अध्यात्मविद्यासारश्चाप्यध्यात्मकुशलः सुधीः ॥११५॥
अकल्मषः सत्यहेतुः सत्यदः सत्यगोचरः ।
सत्यगर्भः सत्यरुपः सत्यः सत्यपराक्रमः ॥११६॥
अंजनीप्राणलिंगश्च वायुवंशोद्वहः श्रुतिः ।
भद्ररूपो रुद्ररूपः सुरुपश्चित्ररूपधृक् ॥११७॥
मैनाकवंदितः सूक्ष्मदशनो विजयोऽजयः ।
क्रांतदिङ्मण्डलो रुद्रः प्रकटीकृतविक्रमः ॥११८॥
कंबुकण्ठः प्रसन्नात्मा ह्रस्वनासो वृक्रोदरः ।
लंबोष्ठः कुण्डली चित्रमाली योगविदां वरः ॥११९॥
विपश्चित्कविरानन्द - विग्रहोऽनल्पशासनः ।
फल्गुनीसूनुरव्यग्रो योगात्मा योगतत्परः ॥१२०॥

योगविद्योगकर्ता च योगयोनिर्दिगम्बरः ।
अकारादिक्षकारांतवर्ण - निर्मितविग्रहः ॥१२१॥
उलूखलमुखः सिद्धसंस्तुतः प्रमथेश्वरः ।
श्लिष्टजंघः श्लिष्टजानुः श्लिष्टपाणिः शिखाधरः ॥१२२॥
सुशर्माऽमितशर्मा च नारायणपरायणः ।
जिष्णुर्भविष्णू रोचिष्णुर्ग्रसिष्णुः स्थाणुरेव च ॥१२३॥
हरिरुद्रानुकृद्दक्षकंपनो भूमिकंपनः ।
गुणप्रवाहः सूत्रात्मा वीतरागस्तुतिप्रियः ॥१२४॥
नागकन्याभयध्वंसी ऋतुपर्णः व पालभृत् ।
अनुकूलोऽक्षयोऽपायोऽनपायो वेदपारगः ॥१२५॥
अक्षरः पुरुषो लोकनाथ ऋक्षप्रभुर्दृढः ।
अष्टांगयोगफलभूः सत्यसंघः पुरुष्टुतः ॥१२६॥
श्मशानस्थाननिलयः प्रेतविद्रावणक्षमः ।
पंचाक्षरपरः पंचमातृको रंजनध्वजः ॥१२७॥
योगिनीवृन्दवंद्यश्रीः शत्रुघ्नोऽनंतविक्रमः ।
ब्रह्मचारीन्द्रियरिपुर्धृतदण्डो दशात्मकः ॥१२८॥
अप्रपंचः सदाकारः शूरसेनो विदारकः ।
वृद्धः प्रमोद आनन्दः सप्तजिह्वपतिर्धरः ॥१२९॥
नवद्वारपुराधारः प्रत्यग्रः सामगायकः ।
षट्चक्रधामा स्वर्लोकभयहृन्मानदोऽमद्रः ॥१३०॥
सर्ववश्यकरः शक्तिरनंतोऽनंतमंगलः ।
अष्टमूर्तिर्नयोपेतो विरुपः सुरसुन्दरः ॥१३१॥
धूमकेतुर्महाकेतुः सत्यकेतुर्महारथः ।
नन्दिप्रियः स्वतन्त्रश्च मेखली डमरु प्रिय ॥१३२॥
लोहांगः सर्वविद्धन्वी खण्डलः शर्व ईश्वरः ।
फलभुक् फलहस्तश्च सर्वकर्मफलप्रदः ॥१३३॥
धर्माध्यक्षो धर्मफलो धर्मो धर्मप्रदोऽर्थदः ।
पंचविंशतितत्त्वज्ञस्तारको ब्रह्मतत्परः ॥१३४॥

त्रिमार्गवसतिर्भीमः सर्वदुष्टनिबर्हणः ।
ऊर्जस्वान्निष्कलः शूली मौलिर्गर्जन्निशाचरः ॥१३५॥
रक्तांबरधरो रक्तोरक्तमालाविभूषणः ।
वनमाली शुभांगश्च श्वेतः श्वेतांबरो युवा ॥१३६॥
जयोऽजयपरीवारः सहस्रवदनः कपिः ।
शाकिनीडाकिनीयक्ष रक्षोभूतप्रभंजकः ॥१३७॥
सद्योजातः कामगतिर्ज्ञानमूर्तिर्यशस्करः ।
शंभुतेजाः सार्वभौमो विष्णुभक्तः प्लवंगमः ॥१३८॥
चतुर्नवतिमंत्रज्ञः पौलस्त्यबलदर्पहा ।
सर्वलक्ष्मीप्रदः श्रीमानंगदप्रिय ईतिनुत् ॥१३९॥
स्मृतिबीजं सुरेशानः संसारभयनाशनः ।
उत्तमः श्रीपरीवारः श्रितरुद्रश्च कामधुक् ॥१४०॥

॥ वाल्मीकिरुवाच ॥

इति नाम्नां सहस्रेण स्तुतो रामेण वायुभूः ।
उवाच तं प्रसन्नात्मा संधायात्मानमव्ययम् ॥१४१॥

॥ श्रीहनुमानुवाच ॥

ध्यानास्पदमिदं ब्रह्म मत्पुरः समुपस्थितम् ।
स्वामिन्कृपानिधे राम ज्ञातोऽसि कपिना मया ॥१४२॥
त्वद्ध्याननिरता लोकाः किं मां जपसि सादरम् ।
तवागमनहेतुश्च ज्ञातो ह्यत्र मयाऽनघ ॥१४३॥
कर्तव्यं मम किं राम तथा ब्रूहि च राघव ।
इति प्रचोदितो रामः प्रहृष्टात्मेदमब्रवीत् ॥१४४॥

॥ श्रीराम उवाच ॥

दुर्जयः खलु वैदेहीं गृहीत्वा कोऽपि निर्गतः ।
हत्वा तं निर्घृणं वीरमानय त्वं कपीश्वर ॥१४५॥
मम दास्यं कुरु सखे भव विश्वसुखंकरः ।
तथा कृते त्वया वीर मम कार्यं भविष्यति ॥१४६॥
ओमित्याज्ञां तु शिरसा गृहीत्वा स कपीश्वरः ।
विधेयं विधिवत्तत्र चकार शिरसा स्वयम् ॥१४७॥

इदं नाम्नां सहस्त्रं तु योऽधीते प्रत्यहं नरः ।
दुःखौघो नश्यते तस्य सम्पतिर्वर्धतेऽचिरम् ॥१४८॥
वश्यं चतुर्विधं तस्य भवत्येव न संशयः ।
राजानो राजपुत्राश्च राजकीयाश्च मंत्रिणः ॥१४९॥
अश्वत्थमूले जपतां नास्ति वैरिकृतं भयम् ।
त्रिकालपठनात्तस्य सिद्धिः स्यात्करसंस्थिता ॥१५०॥
ब्राह्मे मुहूर्ते चोत्थाय प्रत्यहं यः पठेन्नरः ।
ऐहिकामुष्मिकं सोऽपि लभते नात्र संशयः ॥१५१॥
संग्रामे सन्निविष्टानां वैरिविद्रावणं परम् ।
ज्वरापस्मारशमनं गुल्मादीनां निवारणम् ॥१५२॥
साम्राज्यसुखसंपत्तिदायकं जायते नृणाम् ।
स्वर्गं मोक्षं समाप्नोति रामचन्द्रप्रसादतः ॥१५३॥
य इदं पठते नित्यं श्रावयेद्वा समाहितः ।
सर्वान्कामानवाप्नोति वायुपुत्रप्रसादतः ॥१५४॥

॥ इति श्री ब्रह्माण्डपुराणे उत्तरखण्डे श्रीरामकृतं हनुमत्सहस्त्रनामस्तोत्रं सम्पूर्णम् ॥

॥ विविधकामना हेतु अनुष्ठान प्रयोग: ॥

१. **हनुमान चालीसा के सौ पाठ** - हनुमान चालीसा के सौ पाठ ४१ दिन पर्यन्त नित्य करे। अनुष्ठान घर मन्दिर या पीपल के पेड़ के नीचे करें । समापन के दिन हनुमानजी के चोला चढ़ावे, हनुमान चालीसा व श्रीराम नाम से तिल,गुग्गुलादि से हवन करे, ब्राह्मण को भोजन कराये ५-७ या ११ बच्चों को भोजन करायें।

२. **हनुमान चालीसा का लोम-विलोम पाठ** - पहली चौपाई से ४० तक पढ़े फिर ४०-३९-३८ -३७........२..१ इस तरह पहली चौपाई तक पढ़ने पर एक पाठ हुआ। इस तरह के ५- ११ या २१ पाठ नित्य जब तक कार्य पूरा नहीं हो तब तक करें। शत्रु बाधा आपत्ति विपत्ति निवारण में यह प्रयोग विशेष काम करता है । विलोम पाठ चौपाई की विलोम संख्या से भी कर सकते है एवं अन्तिम पंक्ति से प्रथम पंक्ति तक भी कर सकते हैं। हमने दोनों ही क्रम में सफलता देखी है, जैसा सुगम लगे वैसे पाठ करें।

३. **तेलाभिषेक प्रयोग**- हनुमानजी के सामने सुन्दरकाण्ड, हनुमानचालीसा एवं रामरक्षास्तोत्र के पाठ करे। एक ताम्रपात्र में बारीक छेदकर ऊपर से प्रतिमा पर लटका देवें, उसमें शत्रुनाश हेतु सरसों का तैल, सर्वकामनासिद्धि हेतु तिलों का तैल, धनयशवृद्धि हेतु सौभाग्य हेतु चमेली का तैल डालकर अभिषेक करें। तैल का संग्रह करके शाम को उससे दीपक जला देवें, रोगी लगावे तो आरोग्य लाभ होवे। अनुष्ठान समापन पर हनुमान जी को चोला चढ़ावे, शृंगार करे भोग लगावें।

४. **संकट निवारण हेतु** - तुलसी के पत्तों पर केसर चन्दन से रामनाम लिखे उनकी माला बनाकर पहिनावे अथवा लौंग की माला बनाकर माला पहिनाने से भी क्रूर ग्रहों की दशा शान्त होती है।

गुग्गल व जायफल के होम से भी संकट निवारण होता है।

५. **हनुमत् सहस्त्रनाम प्रदक्षिणा** - हनुमान सहस्त्रनाम पढते हुये १००८ या एक हजार बार परिक्रमा करने से संकट दूर होवे। सहस्त्रनाम नही पढ़ सके तो हनुमानचालीसा पढ़ते हुये परिक्रमा करे।

६. **कठिन कार्य में** हनुमानजी के चोला नख से शिर तक चढ़ाते है फिर कार्य सिद्ध होने पर पुनः शिर से पैर तक सिन्दूर लगाकर शृंगार कर होमादि करे।

७. **राज्य में विजय हेतु व** क्रूर ग्रहों की दशा में हनुमानजी के शृंगारादि करके **''ध्वजापताका ''** चढ़ावे।

८. **शत्रु पर विजय एवं रोग निवारण हेतु** - हनुमानजी की प्रतिमा के सामने विभीषण कृत हनुमद् बडवानल स्तोत्र या शत्रुञ्जय हनुमत् स्तोत्र का ११-२१-३१ पाठ प्रतिदिन करे।

९. **सर्वसिद्धिप्रद**-

दीनानुबन्धि मेधावि प्रेमाब्धि रामबल्लभ ।
यद्येवं मारुते वीर! मेऽभीष्टं देहि सत्त्वरम् ॥

इस मन्त्र का एक लाख जप का पुरश्चरण करें।

१०. **हनुमानचालीसा या सुन्दरकाण्ड के निम्न मंत्र का सम्पुट लगाकर पाठ करें**-

आपदामपहर्तारं दातारं सर्वसम्पदाम् ।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥

इस मंत्र के भी ५१००० या १ लाख जप करने से आपद नष्ट होवे।

११. राजकुल-शत्रुकुलनाशनार्थे - ॐ ऐं श्रीं ह्रां हं हं ह्स्फें ख्फ्रें ह्सौं ह्स्ख्फ्रें ह्सौं नमो हनुमते त्रैलोक्याक्रमणपराक्रम श्रीरामभक्त मम परस्य च शत्रूंश्चतुर्वर्ण सम्भवान् पुं. स्त्रीं नपुंसकान् भूतभविष्यद् वर्तमानान् दूरस्थान् समीपस्थान् नानानामध्येयान् नानासङ्करजातीयान् कलत्र-पुत्र-मित्र-भृत्य- बन्धु-सुहृत्समेतान् प्रभुशक्तिसहितान् धनधान्यादि संपत्तिसंयुतान् रात्रपुत्रसेवकान् मंत्रिसचिव सखीनात्यन्तिकान् क्षणेन त्वरया एतद् दिनावधि नानोपायैर्मारय मारय शस्त्रैच्छेदय छेदय अग्निनाज्वालय ज्वालय दाहय दाहय अक्षकुमारवत्पादतलाक्रमणेन शिलातले आत्रोटय आत्रोटय घातय घातय बन्धय बन्धय भूतससंघैः सह भक्षय भक्षय क्रुद्धचेतसा नखैर्विदारय विदारय देशादस्मादुच्चाटय उच्चाटय पिशाचवद् भ्रंशय भ्रंशय भ्रामय भ्रामय भयातुरान् विसंज्ञांस्तान् सद्यः कुरु कुरु भस्मीभूतानुद्धूलय उद्धूलय भक्तजनवत्सल सीताशोकापहारक सर्वत्र मामेन च रक्ष रक्ष हा हा हा हुं हुं हुं घे घे घे हुं फट् स्वाहा विधि विधान सहित इस तीन सौ इकतालीस वर्ण वाले मंत्र का जप कार्य सिद्धि तक करते रहे।

१२. शत्रुनाशक प्रयोग- ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं ह्स्फें ख्फ्रें ह्सौं ह्स्ख्फ्रें ह्सौं नमो हनुमते राक्षसकुल-दावानल द्वादशार्क-कोट्यर्क प्रभज्वलत्-तनूरुह भीमनाद मम परस्य च दुष्टदुर्जन-महापकारक वादि-विवादिद्वेषकारक कार्यभञ्जनक क्रूरप्रकृतिके प्रवृद्धकोपावेशकहन्तुकामुकादीन् दूरस्थान समीपस्थान् भूत-भविष्यद्-वर्तमानान् पुं-स्त्री-नपुंसकांश्चातुर्वण्यान् क्षणेन सत्त्वरं हन हन दह दह संहारय संहारय मारय मारय मर्दय मर्दय द्वेषय द्वेषय मार्जारमूषकवत्सद्यः प्राणैर्वियोजय वियोजय विध्वंसय विध्वंसय हिल्लि हिल्लि मूकय मूकय जारय जारय वर्धय वर्धय जृंभय जृंभय पातय पातय मम परस्य च पादतलाक्रमितान् कुरु कुरु दासीभूतान् संपादय संपादय हा हा हा हुं हुं हुं घे घे घे हुं फट् स्वाहा।

१३. सर्पभय एवं विषनाशक (झाड़ने का) मन्त्र - ॐ ऐं श्रीं ह्रां ह्रीं हं ह्सौं ख्फ्रें ह्सौं ह्स्ख्फ्रें ह्सौं नमो हनुमते मम परस्य च महाभयानि सर्प-व्याघ्र-तस्कर जलाग्नि-विषजङ्गमस्थावर-सहज कृत्रिमोपविष महासंग्रामारण्यवाद विवाद शस्त्राऽस्त्राग्न्यादिकानि संहर संहर विनाशय

विनाशय दुःखं संग्रासय संग्रासय त्रोटय त्रोटय भंज भंज भंजय भंजय स्तंभय स्तंभय कुण्ठय कुण्ठय मोचय मोचय वानर-ऋक्ष महावीर मामेनं च रक्ष रक्ष हा हा हा हूं हूं हूं घे घे घे हूं फट् स्वाहा।

१४. भूतप्रेत (झाड़ने का) निवारण मंत्र - **ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं स्फ्रें ख्फ्रें ह्सौं ह्स्ख्फ्रें ह्सौं ॐ नमो हनुमते महाबल पराक्रम मम परस्य च भूतप्रेतपिशाच शाकिनी डाकिनी-यक्षिणी -पूतना-मारी महामारी-कृत्या यक्ष राक्षस भैरव वेतालग्रह ब्रह्मग्रह ब्रह्मराक्षसादिकजात-क्रूरबाधान् क्षणेन हन हन जृंभय जृंभय निरासय निरासय वारय वारय बन्धय बन्धय नुद नुद सूद सूद धुनु धुनु मोचय मोचय मामेनं च रक्ष रक्ष रक्ष महामाहेश्वर रुद्रावतार हूं हूं हूं हुं हुं हुं घे घे घे हूं फट् स्वाहा।**

इसे एकसौ इकहत्तर वर्ण अक्षर वाले मंत्र से अभिमंत्रित जल पिलाने, सरसों छिड़कने से व झाड़ा देने से भूतप्रेतादि क्रूर बाधायें नष्ट होती है।

१५. सर्वरोगनाशक मंत्र - **ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं स्फ्रें ख्फ्रें ह्सौं ह्सौं ॐ नमो हनुमते मम परस्य च क्षय कुष्ठ गुण्डमाला स्फोटकं क्षतज्वरमैकाहिकं द्व्याहिकं त्र्याहिकं चातुर्थिकं संतत ज्वरं सान्निपातिक ज्वरं भूतज्वरं मन्त्र ज्वरं शूलभगन्दर मूलकृच्छ कपालशूल-कर्णशूलाऽक्षिशूलोदशूल हस्तशूल पादशूलादीन् सर्वव्याधीन् क्षणेन् भिन्धि भिन्धि छिन्धि छिन्धि नाशय नाशय निकृन्तय निकृन्तय छेदय छेदय भेदय भेदय महावीर हनुमन् हां हां घे घे हीं हीं हूं हूं फट् स्वाहा।**

इस १७० वर्ण अक्षर वाले मंत्र से झाड़ा देने पर उपरोक्त सभी रोग नष्ट होते है।

१६. गुदभ्रंश निवारक (काँच निकालने का) प्रयोग - गुन्दीवृक्ष की जड़ को हनुमानजी के उपरोक्त मंत्र से अभिमंत्रित करके रोगी की कमर में बांधने से निश्चय लाभ होवे। बाद में हनुमानजी के घी तैल सिन्दूर प्रसाद चढ़ावे।

१७. विजय पताका - युद्ध में शत्रुओं पर जीतने की इच्छा रखने वाले राजा को विजय पताका यंत्र धारण करना चाहिये। लालवस्त्र पर कोयल के पंख से अष्टगंध से हनुमानजी की मूर्ति द्रोणगिरि व पताका ध्वजा सहित बनायें। शत्रु के नाम सहित हनुमानजी का अष्टादशाक्षर मंत्र पताका में लिखें। यथा-
नमो भगवते आञ्जनेयाय महाबलाय अमुकं स्वाहा। ग्रहण के समय मातृका मंत्रों सहित जप करें। अर्थात् **अं...मंत्र अं। आं मंत्र आं। इं मंत्र इं।** इस तरह ५२ मातृकाओं पर मंत्र की आवृतियाँ करें।

तिलमिश्रित सरसों से हवन करे। ध्वज को अपने रथ या हाथी पर लगावे तो ध्वज को देखकर शत्रु दल भयभीत होकर भागने लगे।

पुनः यही मंत्र यदि पूंछ जैसे आकार के वस्त्र पर हनुमानजी की मूर्ति सहित लिखें। एवं राजा उसे अपने सिर पर बांध कर जाये तो विजय प्राप्त करे।

१८. **बन्दी विमोचन** - हनुमानजी की पार्थिव प्रतिमा बनाये। बन्दी व्यक्ति के नाम के आगे द्वितीयान्त (अमुकं) पद लिखकर उसके बाद विमोचय विमोचय पद लिखें (अमुकं विमोचय विमोचय)। यह मंत्र प्रतिमा पर नहीं लिख सके तो भोजपत्र पर लिखकर हनुमानजी के चरणों के पास रखें। उस मूर्ति पर "**नमो भगवते आंजनेयाय महाबलाय अमुकं विमोचय विमोचय स्वाहा**" मंत्र पढ़ते हुए बांये हाथ से कुश जल द्वारा कम से कम १०८ या १००८ बार मार्जन करें पश्चात् मूर्ति का विसर्जन करे। इस तरह १०८ बार प्रतिमा बनाकर पूजन मार्जन एवं विसर्जन करने से बन्दी कारागार से मुक्त हो जाता है।

१९. **अन्य कार्यों हेतु विशेष** - स्तंभन प्रयोग में हनुमानजी के मंत्र का दशांश हवन ताजाजव, पीपल का फल, हल्दी, तिल, शल्लकीफल, सेमर का फूल, एवं मधुत्रय से होम करें। उच्चाटन में लिसौड़े के फूल से, वशीकरण में सरसों अंगूर,मधूक व गुग्गल से हवन करे। विद्वेषण में - करवीर (कनेर) पत्र व लकड़ी से लसेड़ा के पत्र व काष्ठ से जीरा, कालीमिर्च, कडुवा तेल, मिश्रित राई से हवन करें। सभी तरह के ज्वर व शूलवेदना तथा मगन्दर इत्यादि रोगों में दूर्वा, गुड़ची (गिलोय), दूध, दही, नागफणी, रेंड की लकड़ी, कुबेराक्ष, निर्गुण्डी की समिधा व तिल के तेल से होम करें।

उत्तम फल प्राप्ति हेतु सुगंधित पुष्य चढ़ावे। विद्वेषण व मारण में धत्तूरा व राई के पुष्प चढ़ावे। गीद्ध, उल्लू, व कौवा के पंखों का नमक युक्त कड़वे तेल से होम करे। आकर्षण में तिलादि होम को राई व नमक सहित (सामान्य मात्रा में) हवन करें। मोहन में-धत्तूरे का फूल व उसकी समिध से होम करें। अन्न-धान्य के होम से अन्नादि की प्राप्ति। तेल, घी, दूध, दही, बिल्वफल व उसकी समिद्, खेर व उदुम्बर समिध होने से सर्वकार्य सिद्ध होवे, अर्थ की प्राप्ति होवें।

॥ हनुमद्व्रतकथा एवं उद्यापन विधानम्॥

(भविष्योत्तर पुराणे)

कथा - एक समय गंगातट पर शौनकादि ऋषियों ने पुराणप्रवक्ता सूतजी से कहा कि हे सूतजी! आपने वासुदेव कथा के प्रसंग में अनेक व्रत विधान बताये आप अब किसी अन्य व्रत का विधान बताइए।

सूतजी ने कहा - मैं अब आपको कपीश्वर हनुमान् का अतिपवित्र व्रत विधान बताता हुँ जो चारों वर्णों के करने योग्य है। यह व्रत मांगलिक है तथा संसार में अतिगुप्त है धन, आयु, आरोग्य,ऐश्वर्यादि तथा पुत्र पौत्रादि को देने वाला है।

एक समय भगवान व्यासजी अचानक द्वैतवन में युधिष्ठर के पास पहुँचे तो युधिष्ठर ने आदर पूर्वक उन्हे सिंहासन पर बैठाकर उनका पूजन किया। व्यासजी ने युधिष्ठर से कुशलक्षेम और अर्जुन के पाशुपतास्त्रादि शस्त्र प्राप्ति के विषय में पूछा। तत्पश्चात् व्यासजी ने युधिष्ठर से कहा कि अब मैं आपको हनुमानजी का उत्तम व्रत बतलाता हुँ जिसके करने से निश्चय ही नष्ट राज्य पुन: शीघ्र प्राप्त होता है।

युधिष्ठर ने कहा प्रभु। मैं इस समय भाईयों सहित बहुत दु:खी हुँ आप इस व्रत का महात्म्य एवं पूजन विधि बताइए तथा यह व्रत कब करना चाहिऐ यह भी बताये। हनुमानजी का स्मरण करते हुए व्यासजी ने कहा -

पूर्व समय में पाञ्चाली द्रौपदी के आग्रह पर श्रीकृष्ण ने हनुमद् व्रत का निरूपण किया। उसी व्रत के विधान से तुमने समस्त सम्पतियाँ प्राप्त की थी। किसी समय में हनुमद् व्रत के डोरे को द्रौपदी के गले में देखकर अर्जुन ने कहा की तुमने यह डोरा व्यर्थ ही गले में क्यों धारण कर रखा है?। तत्पश्चात् द्रौपदी ने मधुर वचनों से हनुमद् व्रत का महत्व बताकर कहा कि यह उत्तम डोरा उसी व्रत का है जिसे मैने धारण कर रखा है। द्रौपदी के वचन सुनकर ऐश्वर्याभिमान में चूर अर्जुन ने कहा कि अरे! यह बन्दर तो सेवक की भाँति मेरे ध्वज पर लटका रहता है क्या जंगलीफल खाने वाला वानर सम्पत्ति प्रदान कर सकता है?। उस कपटी कृष्ण ने तुम्हें ठग लिया और हास्यवश इस व्रत का डोरा बांधने के लिये कह दिया। परन्तु तुम मुझे इस तरह के व्रतों से ठग नहीं सकती तुम तो पतिव्रता एवं सतीसाध्वी हो तुम्हे अपने पति के पुरुषार्थ पर विश्वास करना चाहिये, दूसरे की शरण आश्रय व्रतादि से क्या प्रयोजन? एतदर्थ इस डोरे का तुम शीघ्र ही परित्याग कर दो।

इस प्रकार अर्जुन के कठोर वचनों को सुनकर भयभीत द्रौपदी ने डोरे को अपने कण्ठ से उतार कर फेंका नहीं अपितु बगीचे के मध्य में सुरक्षित रख दिया। **हे युधिष्ठर!** उस डोरे के परित्याग के कारण ही आपने अनायास वनवास प्राप्त किया। तेरह ग्रंथि युक्त इस डोरे का अपमान करने से तेरह वर्ष पर्यंत वनवास व्यतीत करना पड़ा। यदि इसे धारण किये हुए होते तो तेरह वर्ष पर्यन्त अवश्यमेव सुख का उपभोग करते। इस प्रकार व्यासजी की बात सुनकर द्रौपदी को उस व्रत का स्मरण हो आया और अपने पांचों पतियों से कहा की उक्त बात सत्य है।

पुनः व्यासजी ने कहा - हे युधिष्ठर हनुमद् व्रत का एक और इतिहास आपसे कहता हुँ उसे ध्यान पूर्वक श्रवण करो। एक समय मर्यादा पुरुषोत्तम भगवान श्रीरामचन्द्र सीता की खोज करते हुऐ लक्ष्मण के साथ ऋष्यमूकपर्वत पर आये उस समय हनुमानजी ने उनकी सुग्रीव से मित्रता करवायी।

प्रसंगवश हनुमानजी ने कहा हे महाबाहु राम। मैं वास्तविकता में तो आपके कार्य करने में अत्यन्त आतुर एवं परम भक्त हूँ परन्तु मेरी एक बात आप ध्यान पूर्वक श्रवण कीजिये।

किसी समय देवराज इन्द्र ने मेरी हनु (ठोड़ी) पर वज्र प्रहार किया जिससे मैं मूर्च्छित हो गया, उस समय मेरे पिता वायु को बहुत क्रोध आया और कहने लगे जिसने मेरे पुत्र को मारा है मैं उसे अवश्य नष्ट करुंगा। उस समय ब्रह्मादि देव गणों ने आकर मुझे अनेक वर एवं अस्त्रादि दिये और कहा कि तुम अमित पराक्रमी बनो चिरंजिवी हो और हे कपीश्वर वानरराज! वायुपुत्र! तुम अपने व्रत के आज से नायक होते हुए राम के समस्त कार्यों को सिद्ध करो। उन समस्त देवगणों ने इस प्रकार वरदान भी दिया कि तुम्हारे इस पुनीत व्रत को जो भी करेगा उसके सभी मनोरथ निश्चय ही सिद्ध होंगे। और यह भी कहा कि इस व्रत को कार्यार्थी राघव ने भी किया था। अतः हे स्वामी! देवताओं ने मुझसे पहले ही कहा है कि तुम राम के समस्त कार्य सिद्ध करो। हे नाथ! आप इस व्रत को व्यर्थ न समझें अपितु सत्य ही मानें। हे प्रभु! यदि आपके मन में अपनी कार्य सिद्धि अभीष्ट हो तो आप इस व्रत को अवश्य कीजिये। उस समय देवताओं ने भी आकाशवाणी द्वारा इस व्रत की पुष्टि की एवं श्रीराम ने व्रत संकल्प का निश्चय करके हनुमानजी से उस व्रत का विधान बताने को कहा।

उस समय मारुती नन्दन ने इस प्रकार कहा - मार्गशीर्ष (अगहन) शुक्ल पक्ष में त्रयोदशी तेरह घड़ी युक्त हो तथा अभिजित नक्षत्र भी हो तो उस दिन तेरह

गांठ युक्त पीले डोरे को कलश में रखकर **''ॐ नमो भगवते वायुनन्दनाय''** इस मंत्र से आह्वान कर पीले गंध, पुष्प व अन्यान्य पूजन सामग्री से मेरा पूजन करे।

साधक षोडशोपचार से मेरा पूजन करे। गेहूं के आटे का तथा तेरह मालपुए, ताम्बूल, दक्षिणा ब्राह्मण को देवें। तेरह ब्राह्मणों को भोजन करायें। इस व्रत को १३ वर्ष तक करना चाहिये। प्रतिवर्ष मंगसर शुक्ला त्रयोदशी को नया डोरा धारण कर पुराने का विसर्जन करना चाहिये। १३ वर्ष उपरांत व्रत का उद्यापन करना चाहिये।

हे युधिष्ठर! राम ने लक्ष्मण, सुग्रीव, विभीषण सहित इस व्रत को किया एवं उनके कार्य की सिद्धि हुई।

हे युधिष्ठर! इस व्रत को करने वाले प्राणी की हनुमानजी सभी तरह से सहायता कर अभीष्ट की सिद्धि करते हैं। अत: इसी मास में यदि तुम इस व्रत को करो तो निश्चित् ही तुम्हे अपना खोया हुआ राज्य प्राप्त होगा।

इस प्रकार व्रत करने से एक वर्ष के भीतर ही युधिष्ठर ने अपना राज्य पुन: प्राप्त कर लिया। पश्चात् उन महर्षियों ने भी उत्तम व्रत को धारण किया।

फलश्रुति - इस व्रत को करने वाले के हनुमानजी सभी कार्य सिद्ध करते है, रोगी रोग मुक्त होवे, कैदी बंधन मुक्त होवें, राजा को अपना खोया हुआ या नष्ट राज्य पुन: प्राप्त होवे। पुत्रार्थी को पुत्रलाभ होवे। मोक्षार्थी को मोक्ष, धनार्थी को धन प्राप्त होवे।

''ॐ नमो भगवते वायुनन्दनाय'' इस मंत्र से अभिमंत्रित गंध का तिलक लगाने से राजा तथा प्रजा का वशीकरण होवे। यात्रा में विजय होवे, राजद्वार, युद्ध, तथा सभा में विजय एवं सम्मान मिले। व्याघ्र सर्प चौरादि भय नष्ट होवे। तेरह गांठ वाले हनुमद् व्रत के डोरे को कण्ठ या दाहिने हाथ में धारण करने से सभी कार्यों की सिद्धि होती है।

॥ हनुमद् व्रत विधानम् ॥

व्रत करने वालों को मार्गशीर्ष शुक्ला द्वादशी के दिन जितेन्द्रिय एवं ब्रह्मचर्य का पालन कर त्रयोदशी के दिन प्रात: नदी तीर पर जाकर **''पम्पा सरोवर''** का पूजन करना चाहिये। बंधु बांधवों के साथ गाजे बाजे सहित समीप की नदी पर पम्पा पूजन करना चाहिये।

संकल्प - **तत्राऽऽदौ हनुमद्व्रतं कर्त्तुमारंभमाण आचाराऽनुसारेण विशिष्टाचार परम्पराप्राप्तां यथा शक्तिद्रव्यै पम्पा पूजनं करिष्ये।**

नदी में स्नान करके अघमर्षण मंत्र से अपने को शुद्ध कर पितृ तर्पण संध्यावंदन करके पंपा पूजन करना चाहिये।

नदी में पम्पानदि का आह्वान करे-

हेमकूटगिरिप्रान्त जनानां गिरिसानुगाम् ।
पम्पामावाहयाम्यस्यां नद्यां हृद्यां प्रयत्नतः ॥

आसनम् - तरङ्गशत-कल्लोलेरिङ्गत्ताम - रसोज्ज्वले ।
पम्पानदि! नमस्तुभ्यं गृहाणासनमुत्तमम् ॥

पाद्यम् - हृद्यं सुगंधसंपन्नं शुद्धं शुद्धाम्बुसत्कृतम् ।
पाद्यं गृहाण पम्पाख्ये महानदि! नमोऽस्तुते ।

अर्घ्यम् - भागीरथि! नमस्तुभ्यं सलिलेन सुशोभने ।
अनर्घ्यमर्घ्यमनद्ये! गृह्यतामिदमुत्तमम् ॥

उसके बाद आचमन, पंचामृतस्नान, शुद्धस्नान,वस्त्र, यज्ञोपवीत प्रदान करे। गंध, अक्षत, कुंकुम चढ़ाकर नेत्राञ्जन करे-

कज्जलं त्रिजगद्वन्द्ये महापुष्प-तरङ्गिणि ।
नेत्रयोः पादममघं गृह्यतां सरितांवरे ॥

पुष्प चढ़ावें -

शतपत्रैश्च कल्हारैः कुमुदैर्बकुलैरपि ।
मल्लिकाः जाति-पुन्नागैः केवलैश्चाऽपि चम्पकैः ॥१ ॥
तुलसीदामभिश्चापि तथा बिल्वदलैरपि ।
पूजयामि महापुण्ये पंपानदि नमोस्तुते ॥२ ॥

पंपा नदी की अंग पूजा गंध, पुष्पाक्षत चढ़ाते हुये करे।

जयाभिपापहारिण्यै नमः, जङ्घे पूजयामि। सुभ्रुवे नमः, जानुनी पूजयामि। उरुतरङ्गिण्यै नमः, उरू पूजयामि। तडिदुज्ज्वलजवायै नमः, कटिं पूजयामि। अम्बुशोभिन्ये नमः नितम्बं पूजयामि॥ अणुमध्यायै नमः, मध्यं पूजयामि। सुस्तनायै, नमः स्तनौपूजयामि। कंबुकंठायैनमः, कण्ठं पूजयामि। ललितबाहुतरङ्गायै नमः,बाहू पूजयामि। दीर्घवेण्यैनमः, वेणीं पूजयामि। सुवक्त्रायै नमः, वक्त्रं पूजयामि। दुर्वारवारिपूरायै नमः, शिरः पूजयामि।

सहस्त्रमुखायै नमः, सर्वाङ्गं पूजयामि।

इसके बाद धूप दीप नेवैद्यादि अन्य उपचार करे आरति कर प्रदक्षिणा की भावना कर प्रार्थना करे-

पंपानदि! महापुण्य तरङ्गिणि! नमोऽस्तु ते ।
त्वत्तीरे हनुमत्पूजा कृता रामेण धीमता ॥१॥
मनोरथफलाऽवाप्तिस्तस्याऽभीष्टं न संशयः ।
सुग्रीवेण च तीरेऽस्मिन् कपिवर्यपतेर्व्रतम् ॥२॥
सत्कृतं च मनोवाञ्छा सद्यस्तस्य बभूव सा ।
अतस्त्वन्नीरपुलिने कृते हनुमतो व्रते ॥३॥
श्रेयांसि मम सर्वाणि न विघ्नानि भवन्त्विह ।
इति संप्रार्थ्य पम्पाख्यां नदीं शुभतरङ्गिणीम् ॥४॥

इस प्रकार शुभ तरंग वाली पंपा नदी से प्रार्थना करते हुए तथा कलश में श्रद्धापूर्वक पंपा का जल लेकर व्रती अपने घर आवे। हनुमत्पीठ की रचना करें उस पर कलश रखें। पूर्णपात्र रखे पीठ पर हनुमानजी की मूर्ति रखें। स्वस्तिक, शंख, पद्म आदि रंगोली से बनायें। तेरह पत्रों का एक पदा (कमल), बनायें उन पर चावलों की ढेरी रखकर १३ कलश रखे उनमें शुद्ध जल (पम्पानदी का जल) भरे।

आचमन प्राणायाम करके हनुमद्व्रत पूजा का संकल्प करे अपने अभीष्ट की कामना करे। गणेश पूजन, भू शुद्धि, भूतशुद्धि, मातृका, नवग्रह, रुद्रकलशादि का पूजन करे। पश्चात् हनुमत् पीठ की पूजा करे।

पीठस्याऽधोभागे - **अतलाय नमः। वितलाय नमः। सुतलाय नमः। रसातलाय नमः। तलाऽतलाय नमः। महातलाय नमः। सप्तपातालाय नमः।**

तत्राऽगाध- **सर्वतो शब्दात्मने नमः।** तत्र कमले- **कमठाय नमः।** तदुपरि- **सहस्त्रमणि-फणाप्रकाशमान शेषाय नमः। अष्टदिग्गजेभ्यो नमः।** तदुपरि- **भूमण्डलाय नमः।** तदुपरि- **भूर्लोकाय नमः। भुवर्लोकाय नमः। स्वर्लोकाय नमः। जनलोकाय नमः। तपोलोकाय नमः। महर्लोकाय नमः। सत्यलोकाय नमः। अष्टदिक्पालकेभ्यो नमः।** तन्मध्ये- **मेरवे नमः।** मेरोर्दक्षिणदिग्भागे- **कस्मैचिद्द्रोणशैलाय नमः।** तन्मध्ये - **सुतरवे नमः।** तन्मूले- **सुवर्णवेदिकायै नमः।** वेद्यां वृक्षस्य पूर्वभागे- **नवरत्नखचित चारुरत्नपीठाय नमः।**

प्रधान कलश में जल भरे पूर्णपात्र रखे, पीताम्बर रखें।

कमल के तेरह पत्तों में "**ॐ नमो भगवते वायुनन्दनाय नमः**" के प्रत्येक वर्ण को लिखें। हल्दी आदि मांगलिक द्रव्यों से युक्त तेरह गांठ वाले नवीन डोरे को उस कलश पर प्रतिष्ठित करे। हनुमानजी की प्रतिमा पीठ पर रखे। उत्तराभिमुख बैठकर सीता सहित श्रीरामचन्द्रजी का मानसिक ध्यान करते हुए पवनपुत्र श्री हनुमानजी का आह्वान करे प्रतिष्ठा मंत्रों से आह्वान करें। पश्चात् हनुमानजी का आसन, पाद्य, अर्घ्य, आचमन, स्नानं, वस्त्र, कौपीन, यज्ञोपवीत, गंध, अक्षत, पुष्प चढ़ावें।

ग्रंथिपूजा - नवीन डोरे की १३ ग्रंथियों (गाठों का) का इस प्रकार पूजन करें-

अञ्जनीसूनवे नमः, प्रथमग्रंथिं पूजयामि। हनुमते नमः, द्वितीयग्रंथीं पूजयामि। वायुपुत्राय नमः, तृतीयग्रंथीं पूजयामि। महाबलाय नमः, चतुर्थग्रंथीं पूजयामि। रामेष्टाय नमः, पञ्चमग्रंथीं पूजयामि। फाल्गुनसखाय नमः, षष्ठग्रंथीं पूजयामि। पिङ्गाक्षाय नमः, सप्तमग्रंथीं पूजयामि। अमित विक्रमाय नमः, अष्टमग्रंथीं पूजयामि। कपीश्वराय नमः, नवमग्रंथीं पूजयामि। सीताशोक विनाशनाय नमः, दशमग्रंथीं पूजयामि। लक्ष्मणप्राणदात्रे नमः, एकादश ग्रंथीं पूजयामि। दशग्रीवदर्पघ्नाय नमः, द्वादश ग्रंथीं पूजयामि। भविष्यद् ब्रह्मणे नमः, त्रयोदश ग्रंथीं पूजयामि।

इसके बाद हनुमानजी की अङ्ग पूजा करे-

हनुमते नमः पादौ पूजयामि। सुग्रीवसखाय नमः, गुल्फौ पूजयामि। अङ्गद मित्राय नमः, जङ्घे पूजयामि। रामदासाय नमः, उरु पूजयामि। अक्षघ्नाय नमः, कटिं पूजयामि। लङ्कादहनाय नमः, बालं पूजयामि। राममणिदाय नमः, नाभिं पूजयामि। सागरोल्लंघनाय नमः, मध्यं पूजयामि। लङ्कामर्दनाय नमः, केशावलिं पूजयामि। संजीवनहर्त्रे नमः, स्तनौ पूजयामि। सौमित्रिप्राणदाय नमः, वक्षः पूजयामि। कुण्ठितदशकण्ठाय नमः, कण्ठं पूजयामि। रामाभिषेक कारिणे नमः, हस्तौ पूजयामि। मंत्र रचित रामायणाय नमः, वक्त्रं पूजयामि। प्रसन्न वदनाय नमः, वदनं पूजयामि। पिङ्गनेत्राय नमः, नेत्रे पूजयामि। श्रुतिपारणाय नमः, श्रुतिं पूजयामि। उर्ध्वपुण्ड्रधारिणे नमः, कपोलं पूजयामि। मणिकण्डमालिने नमः, शिरः पूजयामि। सर्वाभीष्टप्रदाय नमः, सर्वाङ्ग पूजयामि।

इसके बाद गुग्गुलादि दशांश धूप दीप नैवेद्यादि उपचार करें।

आरती प्रदक्षिणा कर पुष्पाञ्जलि प्रदान कर प्रार्थना करें-

नमस्तेऽस्तु महावीर! नमस्ते वायुनन्दन ।
विलोक्य कृपया नित्यं त्राहि मां भक्तवत्सल ॥

तेरह ग्रंथि वाला डोरा बांधते समय कहे-

ये पुत्र- पौत्रादि-समस्तभाग्यं वाञ्छन्ति वायोस्तनयं प्रपूज्य।
त्रयोदशग्रंथियुतं तदङ्गं बध्नन्ति हस्ते वरदोरसूत्रम् ॥
अञ्जनीगर्भ संभूत! रामकार्यार्थसंभव ।
वरदोरकृताभासारक्ष मां प्रतिवत्सरम् ॥

पुराना डोरा उतारते समय प्रार्थना करे-

अनेन भगवन् कार्यं प्रतिपादकविग्रहम् ।
हनूमान् प्रीणयित्वा च प्रार्थितो हृदि तिष्ठतु ॥

॥ हनुमद्व्रतोद्यापन विधानम् ॥

सर्वतोभद्र या लिङ्गतोभद्र मण्डल बनायें। पीठ देवताओं का पूजन करें- ॐ मं मण्डूकादि परतत्वांत पीठदेवताभ्यो नमः। पीठ शक्तियों का पूजन करें - (पूर्वादिक्रमेण) ॐ वामायै नमः। ॐ जैष्ठायै नमः। ॐ रौद्रये नमः। ॐ काल्यै नमः। ॐ कलविकरण्यै नमः। ॐ बलविकरण्यै नमः। ॐ

बलप्रमथिन्यै नमः। ॐ सर्वभूतदमन्यै नमः। मध्ये - ॐ मनोन्मन्यै नमः।

पीठशक्तियों का पूजन करें। स्वर्ण निर्मित यन्त्र-मूर्ति का घी से अभ्यञ्जन करें दुग्ध धारा व जलधारा देवें। स्वच्छ वस्त्र से पोंछ कर भद्रपीठ पर आसीन करें।

प्राणप्रतिष्ठा करें। उसके बाद पूजन करें तथा यन्त्रार्चन करें। पुष्पाक्षत लेकर ध्यान करें। गंधाक्षत व पुष्पों से अर्चन करें तथा तर्पण भी करते रहें।

ॐ गांगेयपात्रं डमरुं त्रिशूलं वरं करैः संदधतं त्रिनेत्रम् ।
देव्यायुति तप्तसुवर्णवर्णं स्वर्णाकृतिं भैरवमाश्रयामि ॥१॥

मन्दारद्रुममूलभाजि सुमहामाणिक्यसिंहासने
संविष्टोदरभिन्नपङ्कजरुचा देव्या कृतालिङ्गनः ।
भक्तेभ्यः कररत्नपात्रभरितं स्वर्णं ददानोऽनिशं
स्वर्णाकर्षणभैरवो विजयते स्वर्गापवर्गैकभूः ॥२॥

पञ्चोपचार पूजन करें, आवरण पूजा के लिये आज्ञा माँगें।

पुष्पाञ्जलि प्रदान करें -

ॐ संविन्मयः परो देवः परामृतरसप्रियः ।
अनुज्ञां देहि वटुक परिवारार्चनाय मे ॥

स्वर्णाकर्षण भैरव यन्त्रम्

प्रथमावरणम् - (अङ्गपूजनम्) देव के साथ अष्टदलों में अष्टदिशा की कल्पना करते हुये अष्टदल में अङ्गपूजन करें।

पूर्वादिक्रमेण - **ॐ आकाशाय नमः। मूर्ध्नि पूजयामि ॥१॥ ॐ समीरणाय नमः। मुखे पूजयामि ॥२॥ ॐ दक्षाय नमः। बाह्वोः पूजयामि ॥३॥ ॐ वैवर्ताय नमः। हृदि पूजयामि ॥४॥ ॐ विश्वंभराय नमः। उदरे पूजयामि ॥५॥ ॐ ब्रह्मणे नमः। कटौ पूजयामि ॥६॥ ॐ जनार्द्दनाय नमः। जानुनोः पूजयामि ॥७॥ ॐ इन्द्राय नमः। पादयोः पूजयामि ॥८॥**

प्रत्येक आवरण पूजन पश्चात् पुष्पाञ्जलि देवें।

ॐ अभीष्ट सिद्धिं मे देहि शरणागतवत्सल ।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥

विशेषार्घ से जल छोड़ें - **ॐ सर्वे देवा पूजितास्तर्पिताः सन्तु।**

द्वितीयावरणम् - (त्रिकोणे) - पूर्वकोणे - **ॐ वटुकभैरवाय नमः। वटुक श्री पादुकां पूजयामि तर्पयामि॥** ईशानकोणे - **ॐ कालभैवाय नमः। कालभैरव श्री पा. प. त.॥** अग्निकोणे - **ॐ क्षेत्रपालभैरवाय नमः। क्षेत्रपाल श्री पा. पू. त.॥**

पुष्पाञ्जलि देवें - **अभीष्टसिद्धिं........द्वितीयावरणार्चनम्॥ ॐ पूजितास्तर्पिता** सन्तु से जल छोड़ें।

तृतीयावरणम् (षट्कोणे) - अग्निकोणे - **ॐ आपदुद्धारणाय नमः श्री पा.पू.त.। नैर्ऋत्यकोणे - ॐ अजामलबद्धाय नमः श्री पा.पू.त.। वायुकोणे - ॐ लोकेश्वराय नमः श्री पा.पू.त.। ऐशान्ये - ॐ स्वर्णाकर्षण भैरवाय नमः श्री पा.पू.त.। प्राच्याम् - ॐ ममदारिद्र्यविद्वेषणाय नमः श्री पा.पू.त.। पश्चिमे - श्री महाभैरवाय नमः श्री पा.पू.त.।**

पुष्पाञ्जलि देवें - अभीष्टसिद्धिं........ तृतीयावरणार्चनम्॥ ॐ पूजितास्तर्पिता सन्तु से जल छोड़ें।

चतुर्थावरणम् (अष्टदले) पूर्वादिक्रमेण - **ॐ असिताङ्ग भैरवाय ब्राह्मीशक्ति सहिताय नमः श्री पा.पू.त.। ॐ रुरु भैरवाय माहेश्वरीशक्ति सहिताय नमः श्री पा.पू.त.। ॐ चण्डभैरवाय कौमारीशक्ति सहिताय नमः श्री पा.पू.त.। ॐ क्रोधभैरवाय वैष्णवीशक्ति सहिताय नमः श्री पा.पू.त.। ॐ उन्मत्तभैरवाय वाराहीशक्ति सहिताय नमः श्री पा.पू.त.। ॐ कपालभैरवाय नारसिंहीशक्ति सहिताय नमः श्री पा.पू.त.। ॐ भीषणभैरवाय चामुण्डाशक्ति सहिताय नमः श्री पा.पू.त.। ॐ संहारभैरवाय चण्डिकाशक्ति सहिताय नमः श्री पा.पू.त.।**

पुष्पाञ्जलि देवे - अभीष्टसिद्धिं........चतुर्थावरणार्चनम्॥ ॐ पूजितास्तर्पिता सन्तु से जल छोड़ें।

पञ्चमावरणम् (अष्टदले) पूर्वे - **ॐ आदित्याय स्वशक्ति सहिताय नमः** श्री पा.पू.त.। **ॐ सोमाय स्वशक्ति सहिताय नमः** श्री पा.पू.त.। **ॐ भौमाय स्वशक्ति सहिताय नमः** श्री पा.पू.त.। **ॐ बुधाय स्वशक्ति सहिताय नमः** श्री पा.पू.त.। **ॐ जीवाय स्वशक्ति सहिताय नमः** श्री पा.पू.त.। **ॐ शुक्राय स्वशक्ति सहिताय नमः** श्री पा.पू.त.। **ॐ शनैश्चराय स्वशक्ति सहिताय नमः** श्री पा.पू.त.। **ॐ राहवे केतवे स्वशक्ति सहिताय नमः** श्री पा.पू.त.।

पुष्पाञ्जलि देवें - अभीष्टसिद्धिं........पञ्चमावरणाचर्नम्॥ ॐ पूजितास्तर्पिताः सन्तु से जल छोड़ें।

षष्टमावरणम् - भूपूर के अन्दर देव के दक्षिण भाग में - **ॐ पूजाविधिसिद्ध्यै नमः श्री पा.पू.त.। ॐ रससिद्ध्यै नमः श्री पा.पू.त.। ॐ स्वर्णसिद्ध्यै नमः श्री पा.पू.त.।**

पुष्पाञ्जलि देवें - ॐ अभीष्टसिद्धिं........षष्टमावरणार्चनम्॥ ॐ पूजितास्तर्पिताः सन्तु से जल छोड़ें।

सप्तमावरणम् - भूपूर के बाहर देवता के वाम भाग में - **ॐ भूतप्रेतपिशाच वेतालासुरेभ्योनमः श्री पा.पू.त.।**

पुष्पाञ्जलि देवे - ॐ अभीष्टसिद्धिं........सप्तमावरणार्चनम्॥ ॐ पूजितास्तर्पिताः सन्तु से जल छोड़ें।

अष्टमावरणम् - भूपूर में पूर्वादिक्रम से। पूर्वे - **वज्रसहित इन्द्र श्री पा.पू.त.।** आग्नेये - **शक्ति सहित अग्नि श्री पा.पू.त.।** दक्षिणे - **दण्ड सहित यम श्री पा.पू.त.।** नैऋत्ये - **खड्ग सहित नैऋति श्री पा.पू.त.।** पश्चिमे - **पाश सहित वरुण श्री पा.पू.त.।** वायव्ये - **अङ्कुश सहित वायव्ये श्री पा.पू.त.।** उत्तरे - **गदा सहित कुबेर श्री पा.पू.त.।** ईशाने - **त्रिशूल सहित ईशान श्री पा.पू.त.।** ईशानपूर्वमध्ये - **पद्म सहित ब्रह्मा श्री पा.पू.त.।** निऋति पश्चिममध्ये - **चक्र सहित अनन्त श्री पा.पू.त.।**

पुष्पाञ्जलि देवे - ॐ अभीष्टसिद्धिं........अष्टमावरणार्चनम्॥ ॐ पूजितास्तर्पिताः सन्तु से जल छोड़ें।

धूप दीप नेवैद्यादि अर्पण कर नमस्कार करें। एक लक्ष जप कर पुरश्चरण करें। दशांश हवन करें। पायस होम करें।

ब्राह्मणान्भोजयेत्पश्चान्मन्त्र सिद्धिर्नसंशयः ।
एवं सिद्धे कृते मन्त्रे अयुतं प्रजपेन्मनुम् ॥
दारिद्र्यं दूरमुत्क्षिप्य जायते धनदोपमः ।
करवीरैर्जाति पुष्पैर्जपादाद्रिम संभवैः ॥
रक्तप्रसूनैर्जुहुयात्सौभाग्यं च समश्नुते ।
सिद्धद्रव्येण जुहुयाल्लभ्यते चाष्टसिद्धयः ॥
पायसेनापि जुहुयाल्लभ्यते सकलं फलम् ।
आज्यं च जुहुयाद्देवि ऐहिकामुष्मिकं फलम् ॥
मन्त्रसिद्धिं च लभते चन्दनादींधनैः क्रमात् ॥

॥ अथ स्वर्णाकर्षणस्तोत्रम् ॥

विनियोगः – ओम् अस्य श्री स्वर्णाकर्षण भैरव स्तोत्रमन्त्रस्य ब्रह्मात्रृषिः, अनुष्टुप् छन्दः, स्वर्णाकर्षण भैरवो देवता, ह्रीं बीजं, क्लीं शक्तिः, सः कीलकं ममदरिद्रयनाशार्थे सर्व कार्य सिद्धयर्थे पाठे विनियोगः।

ऋष्यादिन्यासः – ब्रह्मऋषये नमः शिरसि। अनुष्टुप् छन्दसे नमः मुखे। स्वर्णाकर्षण भैरव देवताय नमः हृदि। ह्रीं बीजाय नमः गुह्ये। क्लीं शक्तये नमः पादयोः। सः कीलकाय नमः नाभौ। विनियोगाय नमः सर्वाङ्गे।

करन्यासः – ह्रां अंगुष्ठाभ्यां नमः, ह्रीं तर्जनीभ्यां नमः, ह्रूं मध्यमाभ्यां नमः, ह्रैं अनामिकाभ्यां नमः, ह्रौं कनिष्ठकाभ्यां नमः, ह्रः करतल कर पृष्ठाभ्यां नमः।

हृदयादिन्यासः – ह्रां हृदयाय नमः। ह्रीं शिरसे स्वाहा। ह्रूं शिखायै वषट्। ह्रैं कवचाय हुम्। ह्रौं नेत्रत्रयाय वौषट्। ह्रः अस्त्राय फट्।

॥ अथ स्तोत्रम् ॥

ओम् नमस्ते भैरवाय ब्रह्मविष्णु शिवात्मने ।
नमस्त्रैलोक्य वन्द्याय वरदाय वरात्मने ॥
रत्नसिंहासनस्थाय दिव्याभरण शोभिने ।
दिव्यमाल्य विभूषाय नमस्ते दिव्यमूर्तये ॥
नमस्तेऽनेकहस्ताय अनेक शिरसे नमः ।
नमस्तेऽनेकनेत्राय अनेक विभवे नमः ॥

नमस्तेऽनेक कण्ठाय अनेकांशाय ते नमः ।
नमस्तेऽनेक पार्श्वाय नमस्ते दिव्य तेजसे ॥
अनेकायुधयुक्ताय अनेक सुर सेविने ।
अनेकगुण युक्ताय महादेवाय ते नमः ॥
नमो दारिद्र्यकालाय महासम्पद् प्रदायिने ।
श्री भैरवी संयुक्ताय त्रिलोकेशाय ते नमः ॥
दिगम्बर नमस्तुभ्यं दिव्याङ्गाय नमो नमः ।
नमोऽस्तु दैत्यकालाय पापकालाय ते नमः ॥
सर्वज्ञाय नमस्तुभ्यं नमस्ते दिव्य चक्षुषे ।
अजिताय नमस्तुभ्यं जितामित्राय ते नमः ॥
नमस्ते रुद्ररूपाय महावीराय ते नमः ।
नमोऽस्त्वनन्तवीर्याय महाघोराय ते नमः ॥
नमस्ते घोर-घोराय विश्वघोराय ते नमः ।
नमः उग्रायशान्ताय भक्तानांशान्तिदायिने ॥
गुरवे सर्वलोकानां नमः प्रणवरूपिणे ।
नमस्ते वाग्भवाख्याय दीर्घकामाय ते नमः ॥
नमस्ते कामराजाययोषित कामाय ते नमः ।
दीर्घमायास्वरूपाय महामाया ते नमः ॥
सृष्टिमाया स्वरूपाय विसर्गसमयाय ते ।
सुरलोक-सुपूज्याय आपदुद्धारणाय च ॥
नमो-नमो भैरवाय महादारिद्र्य नाशिने ।
उन्मूलने कर्मठाय-अलक्ष्म्याः सर्वदा नमः ॥
नमो अजामिलबद्धाय नमो लोकेश्वराय ते ।
स्वर्णाकर्षणशीलाय भैरवाय नमो नमः ॥
ममदारिद्र्य विद्वेषणाय लक्ष्याय ते नमः ।
नमो लोकत्रयेशाय स्वानन्द निहिताय ते ॥
नमः श्रीबीजरूपाय सर्वकाम प्रदायिने ।
नमो महाभैरवाय श्रीभैरव नमो नमः ॥

धनाध्यक्ष नमस्तुभ्यं शरण्याय नमो नमः ।
नमः प्रसन्नरूपाय सुवर्णाय नमो नमः ॥
नमस्ते मन्त्ररूपाय नमस्ते मन्त्ररूपिणे ।
नमस्ते स्वर्णरूपाय सुवर्णाय नमो नमः ॥
नमः सुवर्णवर्णाय महापुण्याय ते नमः ।
नमः शुद्धाय बुद्धाय नमः संसार तारिणे ॥
नमो देवाय गुह्याय प्रचलाय नमो नमः ।
नमस्ते बालरूपाय परेशां बलनाशिने ॥
नमस्ते स्वर्ण संस्थाय नमो भूतलवासिने ।
नमः पातालवासाय अनाधाराय ते नमः ॥
नमो नमस्ते शान्ताय अनन्ताय नमो नमः ।
द्विभुजाय नमस्तुभ्यं भुजत्रयसुशोभिने ॥
नमोऽनमादि-सिद्धाय स्वर्णहस्ताय ते नमः ।
पूर्णचन्द्र-प्रतीकाशवदनाम्भोज शोभिने ॥
नमस्तेऽस्तु स्वरूपाय स्वर्णालङ्कार शोभिने ।
नमः स्वर्णाकर्षणाय स्वर्णाभाय नमो नमः ॥
नमस्ते स्वर्णकण्ठाय स्वर्णाभाम्बर धारिणे ।
स्वर्णसिंहासनस्थाय स्वर्णपादाय ते नमः ॥
नमः स्वर्णाभपादय स्वर्णकाञ्ची सुशोभिने ।
नमस्ते स्वर्णजङ्घाय भक्तकामदुधात्मने ॥
नमस्ते स्वर्णभक्ताय कल्पवृक्ष स्वरूपिणे ।
चिन्तामणि स्वरूपाय नमो ब्रह्मादि सेविने ॥
कल्पद्रुमाद्यः संस्थाय बहुस्वर्ण-प्रदायिने ।
नमो हेमाकर्षणाय भैरवाय नमो नमः ॥
स्तवेनान सन्तुष्टो भव लोकेश भैरव ।
पश्यमाम् करुणादृष्ट्या शरणागतवत्सल ॥

॥ फलश्रुतिः ॥

श्री महाभैरवस्येदं स्तोत्रमुक्तं सुदुर्लभम् ।
मन्त्रात्मकं महापुण्यं सर्वैश्वर्यप्रदायकम् ॥

यः पठेन्नित्यमेकाग्रं पातकैः स प्रमुच्यते ।
लभते महतीं लक्ष्मीमष्टैश्वर्यमवाप्नुयात् ॥
चिन्तामणिमवाप्नोति धेनुं कल्पतरुं ध्रुवम् ।
स्वर्णराशिं वाप्नोति शीघ्रमेव स मानवः ॥
त्रिसन्ध्यं यः पठेत् स्तोत्रं दशावृत्या नरोत्तमः ।
स्वप्ने श्रीभैरवस्तस्य साक्षाद् भूत्वा जगद्गुरुः ॥
स्वर्णाराशिं ददात्यस्मै तत्क्षणं नास्ति संशयः ।
अष्टावृत्या पठेत् यस्तु सन्ध्यायां वा नरोत्तमः ॥
सर्वदा यः पठेत् स्तोत्रं भैरवस्य महात्मनः ॥
लोकत्रयं वशीकुर्यादचलां श्रियमाप्नुयात् ।
न भयं विद्यते नवापि विषभूतादि-सम्भवम् ॥
अष्ट पञ्चाशद् वर्णाढ्यो मन्त्रराजः प्रकीर्तितः ।
दारिद्रय दुःख शमनः स्वर्णाकर्षण कारकः ॥
य एन सञ्जपेद् धीमान स्तोत्रं वा प्रयठेत् सदा ।
महाभैरव सायुज्यं सो अन्तकाले लभेद् ध्रुवम् ॥

॥ इतिश्री रूद्रायमल तन्त्रे स्वर्णाकिर्षण भैरव स्तोत्रं सम्पूर्ण ॥

॥ अथ श्रीवटुकभैरव ब्रह्मकवचम् ॥

(रुद्रयामले)

॥ श्रीदेव्युवाच ॥

भगवन्सर्ववेत्ता त्वं देवानां प्रीतिदायकम् ।
भैरवं कवचं ब्रूहि यदि चास्ति कृपा मयि ॥१॥
प्राणत्यागं करिष्यामि यदि नो कथयिष्यसि ।
सत्यं सत्यं पुनः सत्यं सत्यमेव न संशयः ॥२॥
इत्थं देव्या वचःश्रुत्वा प्रहस्यातिशयं प्रभुः ।
उवाच वचनं तत्र देवदेवो महेश्वरः ॥३॥

॥ ईश्वर उवाच ॥

वटुकं कवचं दिव्यं शृणु मत्प्राणवल्लभे ।
चण्डिकातन्त्रसर्वस्वं वटुकस्य विशेषतः ॥४॥
तत्र मंत्राद्यक्षरं तु वासुदेवस्वरूपकम् ।
शङ्खवर्णऽद्वयो ब्रह्मा वटुकश्चन्द्रशेखरः ॥५॥
आपदुद्धारणो देवो भैरवः परिकीर्तितः ।
प्रवक्ष्यामि समासेन चतुर्वर्गप्रसिद्धये ॥६॥
प्रणवः कामदं विद्याल्लज्जाबीजं च सिद्धिदम् ।
बटुकायेति विज्ञेयं महाप [illegible]कनाशनम् ॥७॥
आपदुद्धारणायेति त्वापदुद्धारणं नृणाम् ।
कुरुद्वयं महेशानि मोहने परिकीर्तितम् ॥८॥
वटुकाय महेशानि स्तम्भने परिकीर्तितम् ।
लज्जाबीजं तथा विधान्मुक्तिद परिकीर्तितम् ॥
द्वाविंशत्यक्षरो मन्त्रः क्रमेण जगदीश्वरि ॥९॥

॥ स्तोत्रम् ॥

विनियोगः – ॐ अस्य श्रीबटुकभैरव ब्रह्मकवचस्य भैरवऋषिः। अनुष्टुप् छन्दः। श्री बटुकभैरवो देवता। मम श्रीबटुकभैरव प्रसादसिद्ध्यर्थे जपे विनियोगः।

ॐ पातु नित्यं शिरसि पातु ह्रीं कंठदेशके ।
वटुकाय पातु नाभौ चापदुद्धारणाय च ॥
कुरुद्वयं लिंगमूले त्वाधारे वटुकाय च ।
सर्वदा पातु ह्रीं बीजं वाह्वोर्युगलमेव च ॥
षडङ्गसहितो देवो नित्यं रक्षतु भैरवः ।
ॐ ह्रीं वटुकाय सततं सर्वांगं मम सर्वदा ॥
ॐ ह्रीं पादौ महाकालः पातु वीरासनो हृदि ।
ॐ ह्रीं कालः शिरः पातु कंठदेशे तु भैरवः ॥
गणराट् पातु जिह्वायामष्टभिः शक्तिभिः सह ।
ॐ ह्रीं दंडपाणिर्गुह्यमूले भैरवीसहितस्तथा ॥

ॐ ह्रीं विश्वनाथः सदा पातु सर्वांगं मम सर्वदाः।
ॐ ह्रीं अन्नपूर्णा सदा पातु चांसौ रक्षतु चण्डिका ॥
असितांगः शिरः पातु ललाटं रुरुभैरवः।
ॐ ह्रीं चण्डभैरवः पातु वक्त्रं कंठं श्रीक्रोधभैरवः ॥
उन्मत्तभैरवः पातु हृदयं मम सर्वदा।
ॐ ह्रीं नाभिदेशे कपाली च लिंगे भीषणभैरवः।
संहारभैरवः पातु मूलाधारं च सर्वदा ॥
ॐ ह्रीं बाहुयुग्मं सदा पातु भैरवो मम केवलम्।
हंसबीजं पातु हृदि सोऽहं रक्षतु पादयोः ॥
ॐ ह्रीं प्राणापानौ समानं च उदानं व्यानमेव च।
रक्षतु द्वारमूले च दश दिक्षु समंततः ॥
ॐ ह्रीं प्रणवः पातु सर्वाङ्गं लज्जाबीजं महाभये।
इतिब्रह्मकवचं भैरवस्य प्रकीर्तितम् ॥
चतुवर्गप्रदं नित्यं स्वयं देव प्रकाशितम्।
यः पठेच्छृणुयान्नित्यं धारयेत्कवचोत्तमम् ॥
सदानन्दमयो भूत्वा लभते परमं पदम्।
य इदं कवचं देवि चिन्तयेन्मन्मुखोदितम् ॥
कोटिजन्मार्जितं पापं तस्यनश्यति च तत्क्षणात्।
जलमध्येऽग्निमध्ये वा दुर्ग्रहे शत्रुसंकटे।
कवचस्मरणाद्देवि सर्वत्र विजयी भवेत् ॥
भक्तियुक्तेन मनसा कवचं पूजयेद्यदि।
कामतुल्यस्तु नारीणां रिपूणां च यमोपमः ॥
तस्य पादांबुजद्वंद्वं राज्ञां मुकुटभूषणम्।
तस्य भूतिं विलोक्यैव कुबेरोऽपि तिरस्कृतः ॥
यस्य विज्ञान मात्रेण मन्त्रसिद्धिर्नसंशयः।
इदं कवचमज्ञात्वा यो जपेद्बटुकं नरः ॥
न चाप्नोति फलं तस्य परं नरकमाप्नुयात्।
मन्वंतरत्रयं स्थित्वा तिर्यग्योनिषु जायते ॥

इहलोके महारोगी दारिद्र्येणातिपीडितः ।
शत्रूणां वशगो भूत्वा करपात्री भवेज्जडः ॥
देयं पुत्राय शिष्याय शांताय प्रियवादिने ।
कार्पण्यरहितायालं बटुभक्तिरताय च ॥
योऽपरागे प्रदाता वै तस्य स्यादतिसत्वरम् ।
आयुर्विद्या यशो धर्मं बलं नश्यत्यसंशयम् ॥
इति ते कथितं देवि गोपनीयं स्वयोनिवत् ।

॥ इति श्रीरुद्रयामलोक्तं श्री वटुकभैरवब्रह्मकवचं संपूर्णम् ॥

॥ अथ श्रीवटुकभैरवसहस्त्रनामस्तोत्रम् ॥

विनियोगः - ॐ अस्य श्रीवटुकभैरव सहस्त्रनामात्मकस्तोत्रस्य दुर्वासा ऋषिः। अनुष्टुप् छन्दः। भैरवो वटुकनाथो देवता। मम सर्वकार्यसिद्ध्यर्थं सर्वशत्रुनिवारणार्थं वटुकसहस्त्रनामपाठे विनियोगः।

ॐ नमो भैरवरूपाय भैरवाय नमो नमः ।
नमो भद्रस्वरूपाय जयदाय नमो नमः ॥१॥
नमः कल्पस्वरूपाय विकल्पाय नमो नमः।
नमः शुद्धस्वरूपाय सुप्रकाशाय ते नमः ॥२॥
नमः कङ्कालरूपाय कालरूप नमोऽस्तु ते ।
नमस्त्र्यंबकरूपाय महाकालाय ते नमः ॥३॥
नमः संसारसाराय शारदाय नमो नमः ।
नमो भैरवरूपाय भैरवाय नमो नमः ॥४॥
नमः क्षेत्रनिवासाय क्षेत्रपालाय ते नमः ।
क्षेत्राक्षेत्रस्वरूपाय क्षेत्रकर्त्रे नमो नमः ॥५॥
नमो नामविनाशाय भैरवाय नमो नमः ।
नमो मातङ्गरूपाय भाररूप नमोस्तु ते ॥६॥
नमः सिद्धस्वरूपाय सिद्धिदाय नमो नमः ।
नमो बिन्दुस्वरूपाय बिन्दुसिन्धुप्रकाशिने ॥७॥
नमो मङ्गलरूपाय मङ्गलाय नमो नमः ।
नमः सङ्कटनाशाय शंकराय नमो नमः ॥८॥

नमो धर्मस्वरूपाय धर्मदाय नमो नमः ।
नमोऽनंतस्वरूपाय एकरूप नमोऽस्तु ते ॥९॥
नमो वृद्धिस्वरूपाय वृद्धिकामिन्नमोऽस्तु ते ।
नमो मोहनरूपाय मोक्षरूपाय ते नमः ॥१०॥
नमो जलदरूपाय सामरूप नमोऽस्तु ते ।
नमः स्थूलस्वरूपाय शुद्धरूपाय ते नमः ॥११॥
नमो नीलस्वरूपाय रंगरूपाय ते नमः ।
नमो मण्ड़लरूपाय मण्ड़लाय नमो नमः ॥१२॥
नमो रुद्रस्वरूपाय रुद्रनाथाय ते नमः ।
नमो ब्रह्मस्वरूपाय ब्रह्मवक्त्रे नमो नमः ॥१३॥
नमस्त्रिशूलधाराय धाराधारिन्नमोऽस्तु ते ।
नमः संसारबीजाय वीररूपाय ते नमः ॥१४॥
नमो विमलरूपाय भैरवाय नमो नमः ।
नमो जङ्गमरूपाय जलजाय नमो नमः ॥१५॥
नमः कालस्वरूपाय कालरुद्राय ते नमः ।
नमो भैरवरूपाय भैरवाय नमो नमः ॥१६॥
नमः शत्रुविनाशाय भीषणाय नमो नमः ।
नमः शांताय दांताय भ्रमरूपिन्नमोऽस्तु ते ॥१७॥
न्यायगम्याय शुद्धाय योगिध्येयाय ते नमः ।
नमः कमलकांताय कालवृद्धाय ते नमः ॥१८॥
नमो ज्योतिःस्वरूपाय सुप्रकाशाय ते नमः ।
नमः कल्पस्वरूपाय भैरवाय नमो नमः ॥१९॥
नमो जयस्वरूपाय जगज्जाड्यनिवारिणे ।
महाभूताय भूताय भूतानां पतये नमः ॥२०॥
नमो नन्दाय वृन्दाय वादिने ब्रह्मवादिने ।
नमो वादस्वरूपाय न्यायगम्याय ते नमः ॥२१॥
नमो भवस्वरूपाय मायानिर्माणरूपिणे ।
विश्ववंद्याय वंद्याय नमो विश्वंभराय ते ॥२२॥

नमो नेत्रस्वरूपाय नेत्ररूपिन्नमोऽस्तु ते ।
नमो वरुणरूपाय भैरवाय नमो नमः ॥२३॥

नमो यमस्वरूपाय वृद्धरूपाय ते नमः ।
नमः कुबेररूपाय कालनाथाय ते नमः ॥२४॥

नमः ईशानरूपाय अग्निरूपाय ते नमः ।
नमो वायुस्वरूपाय विश्वरूपाय ते नमः ॥२५॥

नमः प्राणस्वरूपाय प्राणाधिपतये नमः ।
नमः संहाररूपाय पालकाय नमो नमः ॥२६॥

नमश्चन्द्रस्वरूपाय चण्डरूपाय ते नमः ।
नमो मन्दारवासाय वासिने सर्वयोगिनाम् ॥२७॥

योगिगम्याय योग्याय योगिनांपतये नमः ।
नमो जङ्गमवासाय वामदेवाय ते नमः ॥२८॥

नमः शत्रुविनाशाय नीलकण्ठाय ते नमः ।
नमो भक्तिविनोदाय दुर्भागाय नमो नमः ॥२९॥

नमो मान्यस्वरूपाय मानदाय नमो नमः ।
नमो भूतिविभूषाय भूषिताय नमो नमः ॥३०॥

नमो रजःस्वरूपाय सात्त्विकाय नमो नमः ।
नमस्तामसरूपाय तारणाय नमो नमः ॥३१॥

नमो गङ्गाविनोदाय जटासंधारिणे नमः ।
नमो भैरवरूपाय भयदाय नमो नमः ॥३२॥

नमः संग्रामरूपाय संग्रामजयदायिने ।
संग्रामसाररूपाय यौवनाय नमो नमः ॥३३॥

नमो वृद्धिस्वरूपाय वृद्धिदाय नमो नमः ।
नमस्त्रिशूलहस्ताय शूलसंहारिणे नमः ॥३४॥

नमो द्वंद्वस्वरूपाय रूपदाय नमो नमः ।
नमः शत्रुविनाशाय शत्रुबुद्धिविनाशिने ॥३५॥

महाकालाय कालाय कालनाथाय ते नमः ।
नमो भैरवरूपाय भैरवाय नमो नमः ॥३६॥

नमः शंभुस्वरूपाय शंभुरूपिन्नमोऽस्तु ते ।
नमः कमलहस्ताय डमरुहस्ताय ते नमः ॥३७॥
नमः कुक्कुरवाहाय वहनाय नमो नमः ।
नमो विमलनेत्राय त्रिनेत्राय नमो नमः ॥३८॥
नमः संसाररूपाय सारमेयाय वाहिने ।
संसारज्ञानरूपाय ज्ञाननाथाय ते नमः ॥३९॥
नमो मङ्गलरूपाय मङ्गलाय नमो नमः ।
नमो न्यायविशालाय मन्त्ररूपाय ते नमः ॥४०॥
नमो यंत्रस्वरूपाय यंत्रधारिन्नमोऽस्तु ते ।
नमो भैरवरूपाय भैरवाय नमो नमः ॥४१॥
नमः कलंकरूपाय कलंकाय नमो नमः ।
नमः संसारपाराय भैरवाय नमो नमः ॥४२॥
रुण्डमालाविभूषाय भीषणाय नमो नमः ।
नमो दुःखनिवाराय विहाराय नमो नमः ॥४३॥
नमो दण्डस्वरूपाय क्षणरूपाय ते नमः ।
नमो मुहूर्तरूपाय सर्वरूपाय ते नमः ॥४४॥
नमो मोदस्वरूपाय श्रोणरूपाय ते नमः ।
नमो नक्षत्ररूपाय क्षेत्ररूपाय ते नमः ॥४५॥
नमो विष्णुस्वरूपाय बिन्दुरूपाय ते नमः ।
नमो ब्रह्मस्वरूपाय ब्रह्मचारिन्नमोऽस्तु ते ॥४६॥
नमः कंथानिवासाय पटवासाय ते नमः ।
नमो ज्वलनरूपाय ज्वलनाथ नमो नमः ॥४७॥
नमो वटुकरूपाय धूर्तरूपाय ते नमः ।
नमो भैरवरूपाय भैरवाय नमो नमः ॥४८॥
नमो वैद्यस्वरूपाय वैद्यरूपिन्नऽमोस्तु ते ।
नमः औषधरूपाय औषधाय नमो नमः ॥४९॥
नमो व्याधिनिवाराय व्याधिरूपिन्नमो नमः ।
नमो ज्वरनिवाराय ज्वररूपाय ते नमः ॥५०॥

नमो रुद्रस्वरूपाय रुद्राणां पतये नमः ।
विरूपाक्षाय देवाय भैरवाय नमो नमः ॥५१॥

नमो ग्रहस्वरूपाय ग्रहाणां पतये नमः ।
नमः पवित्रधाराय परशुधाराय ते नमः ॥५२॥

यज्ञोपवीतिदेवाय देवदेव नमोऽस्तु ते ।
नमो यज्ञस्वरूपाय यज्ञानां फलदायिने ॥५३॥

नमो रुद्रप्रतापाय तापनाय नमो नमः ।
नमो गणेशरूपाय गणरूपाय ते नमः ॥५४॥

नमो रश्मिस्वरूपाय रश्मिरूपाय ते नमः ।
नमो मलयरूपाय रश्मिरूपाय ते नमः ॥५५॥

नमो विभक्तिरूपाय विमलाय नमो नमः ।
नमो मधुररूपाय मधुपूर्णकलापिने ॥५६॥

कालेश्वराय कालाय कालनाथाय ते नमः ।
नमो विश्वप्रकाशाय भैरवाय नमो नमः ॥५७॥

नमो योनिस्वरूपाय भ्रातृरूपाय ते नमः ।
नमो भगिनिरूपाय भैरवाय नमो नमः ॥५८॥

नमो वृषस्वरूपाय कर्मरूपाय ते नमः ।
नमो वेदान्तवेद्याय वेदसिद्धांतसारिणे ॥५९॥

नमः शाखाप्रकाशाय पुरुषाय नमो नमः ।
नमः प्रकृतिरूपाय भैरवाय नमो नमः ॥६०॥

नमो विश्वस्वरूपाय शिवरूपाय ते नमः ।
नमो ज्योतिःस्वरूपाय निर्गुणाय नमो नमः ॥६१॥

निरञ्जनाय शान्ताय निर्विकाराय ते नमः ।
निर्मायाय विमोहाय विश्वनाथाय ते नमः ॥६२॥

नमः कण्ठप्रकाशाय शत्रुनाशाय ते नमः ।
नमो आशाप्रकाशाय आशापूरकृते नमः ॥६३॥

नमो मत्स्यस्वरूपाय योगरूपाय ते नमः ।
नमो वाराहरूपाय वामनाय नमो नमः ॥६४॥

नमः आनन्दरूपाय आनन्दाय नमो नमः ।
नमोऽस्त्व अनर्घ्यकेशाय ज्वलत्केशाय ते नमः ॥६५॥
नमः पापविमोक्षाय मोक्षदाय नमो नमः ।
नमः कैलासनाथाय कालनाथाय ते नमः ॥६६॥
नमो बिन्ददबिन्दाय बिन्दुभाय नमो नमः ।
नमः प्रणवरूपाय भैरवाय नमो नमः ॥६७॥
नमो मेरुनिवासाय भक्तवासाय ते नमः ।
नमो मेरुस्वरूपाय भैरवाय नमो नमः ॥६८॥
नमो भद्रस्वरूपाय भद्ररूपाय ते नमः ।
नमो योगिस्वरूपाय योगिनां पतये नमः ॥६९॥
नमो मैत्रस्वरूपाय मित्ररूपाय ते नमः ।
नमो ब्रह्मनिवासाय काशीनाथाय ते नमः ॥७०॥
नमो ब्रह्माण्डवासाय ब्रह्मवासाय ते नमः ।
नमो मातङ्गवासाय सूक्ष्मवासाय ते नमः ॥७१॥
नमो मातृनिवासाय भ्रातृवासाय ते नमः ।
नमो जगन्निवासाय जलावासाय ते नमः ॥७२॥
नमः कौलनिवासाय नेत्रवासाय ते नमः ।
नमो भैरववासाय भैरवाय नमो नमः ॥७३॥
नमः समुद्रवासाय वह्निवासाय ते नमः ।
नमश्चन्द्रनिवासाय चन्द्रावासाय ते नमः ॥७४॥
नमः कलिङ्गवासाय कलिङ्गाय नमो नमः ।
नमः उत्कलवासाय शक्रवासाय ते नमः ॥७५॥
नमः कर्पूरवासाय सिद्धिवासाय ते नमः ।
नमः सुन्दरवासाय भैरवाय नमो नमः ॥७६॥
नमः आकाशवासाय वासिने सर्वयोगिनाम् ।
नमो ब्रह्मणवासाय शूद्रवासाय ते नमः ॥७७॥
नमः क्षत्रियवासाय वैश्यवासाय ते नमः ।
नमः पक्षिनिवासाय भैरवाय नमो नमः ॥७८॥

नमः पातालमूलाय मूलावासाय ते नमः ।
नमो रसातलस्थाय सर्वपातालवासिने ॥७९॥

नमः कङ्कालवासाय कङ्कवासाय ते नमः ।
नमो मन्त्रनिवासाय भैरवाय नमो नमः ॥८०॥

नमोऽहंकार रूपाय रजोरूपाय ते नमः ।
नमः सत्त्वनिवासाय भैरवाय नमो नमः ॥८१॥

नमो नलिनरूपाय नलिनाङ्गप्रकाशिने ।
नमः सूर्यस्वरूपाय भैरवाय नमो नमः ॥८२॥

नमो दुष्टनिवासाय साधूपायनरूपिणे ।
नमो नम्रस्वरूपाय स्तंभनाय नमो नमः ॥८३।

पञ्चयोनिप्रकाशाय चतुर्योनिप्रकाशिने ।
नवयोनि प्रकाशाय भैरवाय नमो नमः ॥८४॥

नमः षोडशरूपाय नमः षोडशधारिणे ।
चतुःषष्ठिप्रकाशाय भैरवाय नमो नमः ॥८५॥

नमो बिन्दुप्रकाशाय सुप्रकाशाय ते नमः ।
नमो गणस्वरूपाय मुखरूप नमोऽस्तुते ॥८६॥

नमश्चाम्बररूपाय भैरवाय नमो नमः ।
नमो नानास्वरूपाय सुखरूप नमोऽस्तुते ॥८७॥

नमो दुर्गस्वरूपाय दुःखहर्त्रे नमोऽस्तुते ।
नमो विशुद्धदेहाय दिव्यदेहाय ते नमः ॥८८॥

नमो भैरवरूपाय भैरवाय नमो नमः ।
नमः प्रेतनिवासाय पिशाचाय नमो नमः ॥८९॥

नमो निशाप्रकाशाय निशारूप नमोऽस्तुते ।
नमः सोमार्धरामाय धराधीशाय ते नमः ॥९०॥

नमः संसारभाराय भारकाय नमो नमः ।
नमो देहस्वरूपाय अहयदेहाय नमो नमः ॥९१॥

देवदेहाय देवाय भैरवाय नमो नमः ।
विश्वेश्वराय विश्वाय विश्वधारिन्नमोऽस्तुते ॥९२॥

स्वप्रकाशप्रकाशाय भैरवाय नमा नमः ।
स्थितिरूपाय नित्याय स्थितीनां पतये नमः ॥९३॥
सुस्थिराय सुकेशाय केशवाय नमो नमः ।
स्थविष्ठाय गरिष्ठाय प्रेष्ठाय परमात्मने ॥९४॥
नमो भैरवरूपाय भैरवाय नमो नमः ।
नमः पारदरूपाय पवित्राय नमो नमः ॥९५॥
नमो वेधकरूपाय अनिंदाय नमो नमः ।
नमः शब्दस्वरूपाय शब्दातीताय ते नमः ॥९६॥
नमो भैरवरूपाय भैरवाय नमो नमः ।
नमो निंदास्वरूपाय अनिंदाय नमो नमः ॥९७॥
नमो विशदरूपाय भैरवाय नमो नमः ।
नमः शरणरूपाय शरण्यानां सुखाय ते ॥९८॥
नमः शरण्यरक्षाय भैरवाय नमो नमः ।
नमः स्वाहास्वरूपाय स्वधारूपाय ते नमः ॥९९॥
नमो वौषट्स्वरूपाय भैरवाय नमो नमः ।
अक्षराय नमस्तुभ्यं त्रिधा मात्रास्वरूपिणे ॥१००॥
नमोऽक्षराय शुद्धाय भैरवाय नमो नमः ।
अर्धमात्राय पूर्णाय संपूर्णाय नमो नमः ॥१०१॥
नमो भैरवरूपाय भैरवाय नमो नमः ।
नमोऽष्टचक्ररूपाय ब्रह्मरूपाय ते नमः ॥१०२॥
नमो भैरवरूपाय भैरवाय नमो नमः ।
नमो भैरवरूपाय सृष्टिकर्त्रे महात्मने ॥१०३॥
नमः पाल्यस्वरूपाय भैरवाय नमो नमः ।
सनातनाय नित्याय निर्गुणाय गुणाय ते ॥१०४॥
नमः सिद्धाय शान्ताय भैरवाय नमो नमः ।
नमो धारास्वरूपाय स्वखड्गहस्ताय ते नमः ॥१०५॥
नमस्त्रिशूलहस्ताय भैरवाय नमो नमः ।
नमः कुण्डलवर्णाय शवमुण्डविभूषिणे ॥१०६॥

महाक्रुद्धाय चण्डाय भैरवाय नमो नमः ।
नमो वासुकिभूषाय सर्वभूषाय ते नमः ॥१०७॥

नमः कपालहस्ताय भैरवाय नमो नमः ।
पानपात्रप्रमत्ताय मत्तरूपाय ते नमः ॥१०८॥

नमो भैरवरूपाय भैरवाय नमो नमः ।
माध्वाकारसुपर्णाय माधवाय नमो नमः ॥१०९॥

नमो माङ्गल्यरूपाय भैरवाय नमो नमः ।
नमः कुमाररूपाय स्त्रीरूपाय नमो नमः ॥११०॥

नमो गंधस्वरूपाय भैरवाय नमो नमः ।
नमो दुर्गंधरूपाय सुगन्धाय नमो नमः ॥१११॥

नमः पुष्पस्वरूपाय पुष्पभूषण ते नमः ।
नमः पुष्पप्रकाशाय भैरवाय नमो नमः ॥११२॥

नमः पुष्पविनोदाय पुष्पपूजाय ते नमः ।
नमो भक्तिनिवासाय भक्तदुःख निवारिणे ॥११३॥

भक्तप्रियाय शान्ताय भैरवाय नमो नमः ।
नमो भक्तिस्वरूपाय रूपदाय नमो नमः ॥११४॥

नमो भैरवरूपाय भैरवाय नमो नमः ।
नमो वासाय भद्राय वीरभद्राय ते नमः ॥११५॥

नमः संग्रामसाराय भैरवाय नमो नमः ।
नमः खट्वाङ्गहस्ताय कालहस्ताय ते नमः ॥११६॥

नमोऽघोराय घोराय घोराघोरस्वरूपिणे ।
घोरधर्माय घोराय भैरवाय नमो नमः ॥११७॥

घोरत्रिशूलहस्ताय घोरपानाय ते नमः ।
घोररूपाय नीलाय भैरवाय नमो नमः ॥११८॥

घोरवाहनगम्याय ह्यगम्याय नमो नमः ।
घोरब्रह्मस्वरूपाय भैरवाय नमो नमः ॥११९॥

घोरशब्दाय घोराय घोरदेहाय ते नमः ।
घोरद्रव्याय घोराय भैरवाय नमो नमः ॥१२०॥

घोरसंगाय सिंहाय सिद्धिसिंहाय ते नमः ।
नमः प्रचण्डसिंहाय सिंहरूपाय ते नमः ॥१२१॥

नमः सिंहप्रकाशाय सुप्रकाशाय ते नमः ।
नमो विजयरूपाय जयदाय नमो नमः ॥१२२॥

नमो भार्गवरूपाय गर्भरूपाय ते नमः ।
नमो भैरवरूपाय भैरवाय नमो नमः ॥१२३॥

नमो मेध्याय शुद्धाय मायाधीशाय ते नमः ।
नमो मेघप्रकाशाय भैरवाय नमो नमः ॥१२४॥

दुर्जेयाय दुरंताय दुर्लभाय दुरात्मने ।
भक्तिलभ्याय भव्याय भाविताय नमो नमः ॥१२५॥

नमो गौरवरूपाय गौरवाय नमो नमः ।
नमो भैरवरूपाय भैरवाय नमो नमः ॥१२६॥

नमो विघ्ननिवाराय विघ्नराशिन्नमोऽस्तु ते ।
नमो विघ्नविद्रावणायैव भैरवाय नमो नमः ॥१२७॥

नमः किंशुकरूपाय रजोरूपाय ते नमः ।
नमो नीलस्वरूपाय भैरवाय नमो नमः ॥१२८॥

नमो गणस्वरूपाय गणनाथाय ते नमः ।
नमो विश्वविकासाय भैरवाय नमो नमः ॥१२९॥

नमो योगिप्रकाशाय योगिगम्याय ते नमः ।
नमो हेरम्बरूपाय भैरवाय नमो नमः ॥१३०॥

नमस्त्रिधास्वरूपाय रूपदाय नमो नमः ।
नमः स्वरस्वरूपाय भैरवाय नमो नमः ॥१३१॥

नमः सरस्वतीरूप बुद्धिरूपाय ते नमः ।
नमो वैद्यस्वरूपाय भैरवाय नमो नमः ॥१३२॥

नमस्त्रिविक्रमरूपाय त्रिस्वरूपाय ते नमः ।
नमः शशाङ्करूपाय भैरवाय नमो नमः ॥१३३॥

नमो व्यापकरूपाय व्याप्यरूपाय ते नमः ।
नमो भैरवरूपाय भैरवाय नमो नमः ॥१३४॥

नमो विशदरूपाय भैरवाय नमो नमः ।
नमः सत्त्वस्वरूपाय भैरवाय नमो नमः ॥१३५॥

नमः सूक्तस्वरूपाय शिवदाय नमो नमः ।
नमो गङ्गास्वरूपाय यमुनारूपिणे नमः ॥१३६॥

नमो गौरीस्वरूपाय भैरवाय नमो नमः ।
नमो दुःख विनाशाय दुःखमोक्षणरूपिणे ॥१३७॥

महाचलाय वंद्याय भैरवाय नमो नमः ।
नमो नन्दस्वरूपाय भैरवाय नमो नमः ॥१३८॥

नमो नन्दिस्वरूपाय स्थिररूपाय ते नमः ।
नमः केलिस्वरूपाय भैरवाय नमो नमः ॥१३९॥

नमः क्षेत्रनिवासाय वासिने ब्रह्मवादिने ।
नमः शान्ताय शुद्धाय भैरवाय नमो नमः ॥१४०॥

नमो नर्मदरूपाय जलरूपाय ते नमः ।
नमो विश्वविनोदाय जयदाय नमो नमः ॥१४१॥

नमो महेन्द्ररूपाय महनीयाय ते नमः ।
नमः संसृतिरूपाय शरण्याय च ते नमः ॥१४२॥

नमस्त्रिबन्धुवासाय बालकाय नमो नमः ।
नमः संसारसाराय सरसां पतये नमः ॥१४३॥

नमस्तेजः स्वरूपाय भैरवाय नमो नमः ।
नमः कारुण्यरूपाय भैरवाय नमो नमः ॥१४४॥

नमो गोकर्णरूपाय ब्रह्मवर्णाय ते नमः ।
नमः शङ्करवर्णाय हस्तिकर्णाय ते नमः ॥१४५॥

नमो विष्टरकर्णाय यज्ञकर्णाय ते नमः ।
नमः शंबुककर्णाय भैरवाय नमो नमः ॥१४६॥

नमो दिव्यसुकर्णाय कालकर्णाय ते नमः ।
नमो भयदकर्णाय भैरवाय नमो नमः ॥१४७॥

नमः आकाशवर्णाय कालकर्णाय ते नमः ।
नमो दिग्रूपकर्णाय भैरवाय नमो नमः ॥१४८॥

नमो विशुद्धकर्णाय विमलाय नमो नमः ।
नमः सहस्त्रकर्णाय भैरवाय नमो नमः ॥१४९॥
नमो नेत्रप्रकाशाय सुनेत्राय नमो नमः ।
नमो वरदनेत्राय जयनेत्राय ते नमः ॥१५०॥
नमो विमलनेत्राय योगिनेत्राय ते नमः ।
नमः सहस्त्रनेत्राय भैरवाय नमो नमः ॥१५१॥
नमः कलिंदरूपाय कलिंदाय ते नमो नमः ।
नमो ज्योतिःस्वरूपाय ज्योतिषाय नमो नमः ॥१५२॥
नमस्तारप्रकाशाय तारूपिन्नमोऽस्तु ते ।
नमो नक्षत्रनेत्राय भैरवाय नमो नमः ॥१५३॥
नमश्चन्द्रप्रकाशाय चन्द्ररूप नमोऽस्तु ते ।
नमो रश्मिस्वरूपाय भैरवाय नमो नमः ॥१५४॥
नमः आनन्दरूपाय जगदानन्दरूपिणे ।
नमो द्रविडरूपाय भैरवाय नमो नमः ॥१५५॥
नमः शङ्खनिवासाय शङ्कराय नमो नमः ।
नमो मुद्राप्रकाशाय भैरवाय नमो नमः ॥१५६॥
नमोन्यासस्वरूपाय न्यासरूप नमोऽस्तु ते ।
नमो बिन्दुस्वरूपाय भैरवाय नमो नमः ॥१५७॥
नमो विसर्गरूपाय प्रणवरूपाय ते नमः ।
नमो मन्त्रप्रकाशाय भैरवाय नमो नमः ॥१५८॥
नमो जंबुकरूपाय जंगमाय नमो नमः ।
नमो गरुडरूपाय भैरवाय नमो नमः ॥१५९॥
नमो लंबुकरूपाय लंबिकाय नमो नमः ।
नमो लक्ष्मीस्वरूपाय भैरवाय नमो नमः ॥१६०॥
नमो वीरस्वरूपाय वीरणाय नमो नमः ।
नमः प्रचण्डरूपाय भैरवाय नमो नमः ॥१६१॥
नमो डंबस्वरूपाय डमरुधारिन्नमोऽस्तु ते ।
नमः कलंकनाशाय कालनाथाय ते नमः ॥१६२॥

नमः ऋद्धिप्रकाशाय सिद्धिदाय नमो नमः ।
नमः सिद्धस्वरूपाय भैरवाय नमो नमः ॥१६३॥

नमो धर्मप्रकाशाय धर्मनाथाय ते नमः ।
धर्माय धर्मराजाय भैरवाय नमो नमः ॥१६४॥

नमो धर्माधिपतये धर्मध्येयाय ते नमः ।
नमो धर्मार्थसिद्धाय भैरवाय नमो नमः ॥१६५॥

नमो विरजरूपाय रूपारूपप्रकाशिने ।
नमो राजप्रकाशाय भैरवाय नमो नमः ॥१६६॥

नमः प्रतापसिंहाय प्रतापाय नमो नमः ।
नमः कोटिप्रतापाय भैरवाय नमो नमः ॥१६७॥

नमः सहस्त्ररूपाय कोटिरूपाय ते नमः ।
नमः आनन्दरूपाय भैरवाय नमो नमः ॥१६८॥

नमः संहारबन्धाय बंधकाय नमो नमः ।
नमो विमोक्षरूपाय मोक्षदाय नमो नमः ॥१६९॥

नमो विष्णुस्वरूपाय व्यापकाय नमो नमः ।
नमो माङ्गल्यनाथाय शिवनाथाय ते नमः ॥१७०॥

नमो व्यालाय व्याघ्राय व्याघ्ररूपिन्नमोऽस्तु ते ।
नमो व्यालविभूषाय भैरवाय नमो नमः ॥१७१॥

नमो विद्याप्रकाशाय विद्यानां पतये नमः ।
नमो योगिस्वरूपाय क्रूररूपाय ते नमः ॥१७२॥

नमः संहाररूपाय शत्रुनाशाय ते नमः ।
नमः पालकरूपाय भैरवाय नमो नमः ॥१७३॥

नमः कारुण्यदेवाय देवदेवाय ते नमः ।
नमो विश्वविलासाय भैरवाय नमो नमः ॥१७४॥

नमो नमः प्रकाशाय काशीवासिन्नमोऽस्तु ते ।
नमो भैरवक्षेत्राय क्षेत्रपालाय ते नमः ॥१७५॥

नमो भद्रस्वरूपाय भद्रकाय नमो नमः ।
नमो भद्राधिपतये भयहंतर्नमोऽस्तु ते ॥१७६॥

नमो मायाविनोदाय मायिने मदरूपिणे ।
नमो मत्ताय शांताय भैरवाय नमो नमः ॥१७७॥
नमो मलयवासाय कैलासाय नमो नमः ।
नमः कैलासवासाय कालिकातनयाय ते ॥१७८॥
नमः संसारपाराय भैरवाय नमो नमः ।
नमो मातृविनोदाय विमलाय नमो नमः ॥१७९॥
नमो यमप्रकाशाय नियमाय नमो नमः ।
नमः प्राणप्रकाशाय ध्यानाधिपतये नम ॥१८०॥
नमः समाधिरूपाय निर्गुणाय नमो नमः ।
नमो मन्त्रप्रकाशाय मन्त्ररूपाय ते नमः ॥१८१॥
नमो वृन्दविनोदाय वृन्दकाय नमो नमः ।
नमो बृंहितरूपाय भैरवाय नमो नमः ॥१८२॥
नमो मान्यस्वरूपाय मानदाय नमो नमः ।
नमो विश्वप्रकाशाय भैरवाय नमो नमः ॥१८३॥
नमो वै स्थिरपीठाय सिद्धपीठाय ते नमः ।
नमो मण्डलपीठाय उक्तपीठाय ते नमः ॥१८४॥
नमो यशोदानाथाय कामनाथाय ते नमः ।
नमो विनोदनाथाय सिद्धिनाथाय ते नमः ॥१८५॥
नमो नाथाय नाथाय ज्ञाननाथाय ते नमः ।
नमः शङ्करनाथाय जयनाथाय ते नमः ॥१८६॥
नमो मुद्‌गलनाथाय नीलनाथाय ते नमः ।
नमो बालकनाथाय धर्मनाथाय ते नमः ॥१८७॥
विश्वनाथाय नाथाय कार्यनाथाय ते नमः ।
नमो भैरवनाथाय महानाथाय ते नमः ॥१८८॥
नमो ब्रह्मसनाथाय योगनाथाय ते नमः ।
नमो विश्वविहाराय विश्वभाराय ते नमः ॥१८९॥
नमो रंगसनाथाय रंगनाथाय ते नमः ।
नमो मोक्षसनाथाय भैरवाय नमो नमः ॥१९०॥

नमो गोरक्षनाथाय गोरक्षाय नमो नमः ।
नमो मन्दारनाथाय नन्दनाथाय ते नमः ॥१९१॥
नमो मङ्गलनाथाय चम्पानाथाय ते नमः ।
नमः सन्तोषनाथाय भैरवाय नमो नमः ॥१९२॥
नमोऽगरागनाथाय सुखनाथाय ते नमः ।
नमः कारुण्यनाथाय भैरवाय नमो नमः ॥१९३॥
नमो द्रविडनाथाय दरीनाथाय ते नमः ।
नमः संसारनाथाय जगन्नाथाय ते नमः ॥१९४॥
नमो माध्वीकनाथाय मन्त्रनाथाय ते नमः ।
नमो न्याससनाथाय ध्याननाथाय ते नमः ॥१९५॥
नमो गोकर्णनाथाय महानाथाय ते नमः ।
नमः शुभ्रसनाथाय भैरवाय नमो नमः ॥१९६॥
नमो विमलनाथाय मण्डलेशाय ते नमः ।
नमः सरोजनाथाय मत्स्यनाथाय ते नमः ॥१९७॥
नमो भक्तसनाथाय भक्तिनाथाय ते नमः ।
नमो मोहननाथाय वत्सनाथाय ते नमः ॥१९८॥
नमो मातृसनाथाय विश्वनाथाय ते नमः ।
नमो बिन्दुसनाथाय जयनाथाय ते नमः ॥१९९॥
नमो मङ्गलनाथाय धर्मनाथाय ते नमः ।
नमो गङ्गासनाथाय भूमिनाथाय ते नमः ॥२००॥
नमो धीरसनाथाय बिन्दुनाथाय ते नमः ।
नमः कंचुकिनाथाय शृंगिनाथाय ते नमः ॥२०१॥
नमः समुद्रनाथाय गिरिनाथाय ते नमः ।
नमो माङ्गल्यनाथाय कुट्टनाथाय ते नमः ॥२०२॥
नमो वेदान्तनाथाय श्रीनाथाय नमो नमः ।
नमो ब्रह्माण्डनाथाय भैरवाय नमो नमः ॥२०३॥
नमो गिरिशनाथाय वामनाथाय ते नमः ।
नमो बीजसनाथाय भैरवाय नमो नमः ॥२०४॥

नमो मन्दरनाथाय मन्दनाथाय ते नमः ।
नमो भैरवीनाथाय भैरवाय नमो नमः ॥२०५॥
अम्बानाथाय नाथाय जन्तुनाथाय ते नमः ।
नमः कालिसनाथाय भैरवाय नमो नमः ॥२०६॥
नमो मुकुन्दनाथाय कुन्दनाथाय ते नमः ।
नमः कुण्डलनाथाय भैरवाय नमो नमः ॥२०७॥
नमोऽष्टचक्रनाथाय चक्रनाथाय ते नमः ।
नमो विभूतिनाथाय शूलनाथाय ते नमः ॥२०८॥
नमो न्यायसनाथाय न्यायनाथाय ते नमः ।
नमो दयासनाथाय जंगमेशाय ते नमः ॥२०९॥
नमो विशदनाथाय जगन्नाथाय ते नमः ।
नमः कामिकनाथाय भैरवाय नमो नमः ॥२१०॥
नमः क्षेत्रसनाथाय जीवनाथाय ते नमः ।
नमः केवलनाथाय चैलनाथाय ते नमः ॥२११॥
नमो मात्रासनाथाय अमात्राय नमो नमः ।
नमो द्वंद्वसनाथाय भैरवाय नमो नमः ॥२१२॥
नमः शूरसनाथाय शूरनाथाय ते नमः ।
नमः सौजन्यनाथाय सौजन्याय नमो नमः ॥२१३॥
नमो दुष्टसनाथाय भैरवाय नमो नमः ।
नमो भयसनाथाय विंबनाथाय ते नमः ॥२१४॥
नमो मायासनाथाय भैरवाय नमो नमः ।
नमो विटंकनाथाय टंकनाथाय ते नमः ॥२१५॥
नमश्चर्मसनाथाय खड्गनाथाय ते नमः ।
नमः शक्तिसनाथाय धनुर्नाथाय ते नमः ॥२१६॥
नमो मानसनाथाय शापनाथाय ते नमः ।
नमो यन्त्रसनाथाय भैरवाय नमो नमः ॥२१७॥
नमो गंडूषनाथाय गंडूषाय नमो नमः ।
नमो डाकिनिनाथाय भैरवाय नमो नमः ॥२१८॥

नमो डामरनाथाय डारकाय नमो नमः ।
नमो डंकसनाथाय डंकनाथाय ते नमः ॥२१९॥

नमो मांडव्यनाथाय यज्ञनाथाय ते नमः ।
नमो यजुःसनाथाय क्रीडानाथाय ते नमः ॥२२०॥

नमः सामसनाथायाथर्वनाथाय ते नमः ।
नमः शून्याय नाथाय स्वर्गनाथाय ते नमः ॥२२१॥

॥ फलश्रुति ॥

इदं नामसहस्त्रं मे रुद्रेण परिकीर्तितम् ।
यः पठेत्पाठयेद्वापि स एव म सेवकः ॥२२२॥

यं यं चिंतयते कामं कारंकारं प्रियाकृतिम् ।
यः श्रृणोति दुरापं स तं तं प्राप्नोति मामकः ॥२२३॥

राजद्वारे श्मशाने तु पृथिव्यां जलसन्निधौ ।
यः पठेन्मानवो नित्यं स शूरः स्यान्न संशयः ॥२२४॥

एककालं द्विकालं वा त्रिकालं वा पठेन्नरः ।
स भवेद् बुद्धिमाँल्लोके सत्यमेव न संशयः ॥२२५॥

यः श्रृणोति नरो भक्त्या स एव गुणसागरः ।
यः श्रद्धया रात्रिकाले श्रृणोति पठतेऽपि वा ॥२२६॥

स एव साधकः प्रोक्तः सर्वदुष्टविनाशकः ।
अर्धरात्रे पठेद्यस्तु स एव पुरुषोत्तमः ॥२२७॥

त्रिसंध्ये वै देवगृहे श्मशाने च विशेषतः ।
वने च मार्गगमने बले दुर्जनसन्निधौ ॥२२८॥

यः पठेत्प्रयतो नित्यं स सुखी स्यान्न संशयः ।
विद्यार्थी लभते विद्यां धनार्थी लभते धनम् ॥२२९॥

शौर्यार्थी लभते शौर्यं पुत्रार्थी पुत्रमाप्नुयात् ।
एवं विंशतिमन्त्रेण अक्षरेण सहैव मे ॥२३०॥

यः पठेत्प्रातरुत्थाय सर्वकाममवाप्नुयात् ।
रसार्थी पाठमात्रेण रसं प्राप्नोति नित्यशः ॥२३१॥

अन्नार्थी लभते चान्नं सुखार्थी सुखमाप्नुयात् ।
रोगी प्रमुच्यते रोगाद्बद्धो मुच्यते बंधनात् ॥२३२॥
शापार्थी लभते शापं सर्वशत्रुविनाशनम् ।
स्थावरं जङ्गमं वापि विषं सर्वं प्रणश्यति ॥२३३॥
सर्वलोकप्रियः शान्तो मातापितृप्रियंकरः ।
संग्रामे विजयस्तस्य यः पठेद्भक्तिसंयुतः ॥२३४॥
सर्वत्र जयदं देवि स्तोत्रमेतत्प्रकीर्तितम् ।
इदं स्तोत्रं महापुण्यं निन्दकाय न दर्शयेत् ॥२३५॥
असाधकाय दुष्टाय मातापितृविकारिणे ।
अधार्मिकाकुलीनाभ्यां नैतत्स्तोत्रं प्रकाशयेत् ॥२३६॥
साधकाय च भक्ताय योगिने धार्मिकाय च ।
गुरुभक्ताय शान्ताय दर्शयेत्साधकोत्तमः ॥२३७॥
अन्यथा पापलिप्तः स्यात्क्रोधनो भैरवोत्तमे ।
तस्मात्सर्वप्रयत्नेन गोपनीयं प्रयत्नतः ॥२३८॥
इदं स्तोत्रं च रुद्रेण रामस्यापि मुखेऽर्पितम् ।
तन्मुखान्निः सृतं लोके दरिद्रायापि साधवे ॥२३९॥
रामेण कथितं भ्रात्रे लक्ष्मणाय महात्मने ।
ततो दुर्वाससा प्राप्तं तेनैवोक्तं तु पांडवे ॥२४०॥
पाण्डुरप्यब्रवीत्कृष्णं कृष्णेनेह प्रकीर्तितम् ।
अस्य स्तोत्रस्य माहात्म्यं रामो जानाति तत्त्वतः ॥२४१॥
रामोऽपि राज्यं संप्राप्तो ह्यस्य स्तोत्रस्य पाठतः ।
पाण्डवोऽपि तथा राज्यं संप्राप्तो भैरवस्य च ॥२४२॥
अनेन स्तोत्रपाठेन किमलभ्यं भवेदिति ।
सर्वलोकस्य पूज्यस्तु जायते नात्र संशयः ॥२४३॥

॥इति रुद्रयामलोक्तश्री वटुकभैरवसहस्रनामस्तोत्रं सम्पूर्णम्॥

॥ श्रीवटुकभैरवस्तवराज ॥

(१०८ नामावलि प्रयोगः)

मेरुपृष्ठे सुखासीन देवदेवं त्रिलोचनम् ।
शङ्करं परिपप्रच्छ पार्वती परमेश्वरम् ॥१॥

॥ पार्वत्युवाच ॥

य एष भैरवो नाम आपदुद्धारको मतः ।
त्वया च कथितो देव भैरवः कल्प उत्तमः ।
तस्य नामसहस्राणि प्रयुतान्यर्बुदानि च ॥२॥
सारमुद्धृत्य तेषां वै नामाष्टशतकं वद ।
यानि संकीर्त्तयन्मर्त्यः सर्वदुःखविवर्जितः ।
सर्वान्कामानवाप्नोति साधकः सिद्धिमेव च ॥३॥

॥ ईश्वर उवाच ॥

श्रृणुदेवि प्रवक्ष्यामि भैरवस्य महात्मनः ।
आपदुद्धारंणस्येह नामाष्टशतमुत्तमम् ॥४॥
सर्वपापहरं पुण्यं सर्वापद्विनिवारणम् ।
सर्वकामार्थदं देवि साधकानां सुखावहम् ॥५॥
सर्वमङ्गलमांगल्यं सर्वोपद्रवनाशनम् ।
आयुष्करं पुष्टिकरं श्रीकरं च यशस्करम् ॥६॥
आद्यन्ते स्तोत्रपाठस्य मूलमन्त्रं जपेन्नरः ।
अष्टोत्तरशतं धीमान् यथासंख्यमथापि वा ।
जपांतेऽप्युत्तरन्यासाः कर्तव्या जपसिद्धये ॥७॥
आयुरारोग्यमैश्वर्यं सिद्धार्थे विनियोजयेत् ।
साधकः सर्वलोकेषु सत्यं सत्यं न संशयः ॥८॥

विनियोगः - ॐ अस्य श्री वटुकभैरवस्तोत्र मन्त्रस्य वृहदारण्यक ऋषिः । अनुष्टुप्छन्दः । श्री वटुकभैरवो देवता । अष्टबाहुमिति बीजम् । त्रिनयनमिति शक्तिः । प्रणवः कीलकम् । ममाभीष्टसिद्धयर्थे जपे विनियोगः ।

ऋष्यादिन्यास - ॐ वृहदारण्यकऋषये नमः शिरसि । अनुष्टुप्छन्दसे नमः मुखे । श्री वटुकभैरवदेवतायै नमः हृदये । अष्टबाहुमिति बीजाय नमः

गुह्ये। त्रिनयनेति शक्तये नमः पादयोः। ॐ कीलकाय नमः नाभौ। विनियोगाय नमः सर्वाङ्गे।

करन्यासः - ॐ ह्रां वां ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपति-ब्रह्मणोऽधि पतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम्। अंगुष्ठाभ्यां नमः ॥१॥ ॐ ह्रीं वीं तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात्। तर्जनीभ्यां नमः ॥२॥ ॐ ह्रूं वूं अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः। सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः। मध्यमाभ्यां नमः ॥३॥ ॐ ह्रैं वैं वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः। अनामिकाभ्यां नमः ॥४॥ ॐ ह्रौं वौं सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः। भवे भवे नातिभवे भवस्व मां भवोद्भवाय नमः। कनिष्ठिकाभ्यां नमः ॥५॥ ॐ ह्रः वः पञ्चवक्त्राय महादेवाय नमः। करतलकरपृष्ठाभ्यां नमः ॥६॥

हृदयादिषडङ्गन्यासः - ॐ ह्रां वां ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम्। हृदयाय नमः ॥१॥ ॐ ह्रीं वीं तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्। शिरसे स्वाहा ॥२॥ ॐ ह्रूं वूं अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः। सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः। शिखायै वषट् ॥३॥ ॐ ह्रैं वैं वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः। कवचाय हुम् ॥४॥ ॐ ह्रौं वौं सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः। भवे भवे नातिभवे भवस्व मां भवोद्भवाय नमः। नेत्रत्रयाय वौषट् ॥५॥ ॐ ह्रः वः पञ्चवक्त्राय महादेवाय नमः अस्त्राय फट् ॥६॥

देहन्यासः - ॐ ह्रीं भैरवाय नमः मूर्ध्नि ॥१॥ ॐ ह्रीं भीमदर्शनाय नमः ललाटे ॥२॥ ॐ ह्रीं भूताश्रयाय नमः नेत्रयोः ॥३॥ ॐ ह्रीं भूतनायकाय नमः कर्णयोः ॥४॥ ॐ ह्रीं त्रिशूलाय नमः नासिकायाम् ॥५॥ ॐ ह्रीं रक्तपाय नमः जिह्वायाम् ॥६॥ ॐ ह्रीं नागहार नागयज्ञोपवीतिकाय नमः कण्ठे ॥७॥ ॐ ह्रीं क्षेत्रज्ञाय नमः करयोः ॥८॥ ॐ ह्रीं क्षेत्रपालाय नमः हृदये ॥९॥ ॐ ह्रीं क्षेत्रदाय नमः नाभौ ॥१०॥ ॐ ह्रीं अबोधनाशनाय नमः कट्याम् ॥११॥

ॐ ह्रीं त्रिनेत्राय नमः ऊर्वोः ॥१२॥ ॐ ह्रीं रक्तपायिने नमः जंघयोः ॥१३॥ॐ ह्रीं देवदेदेशाय नमः सर्वाङ्गें ॥१४॥

करन्यासः - ॐ ह्रीं भैरवाय नमः अंगुष्ठाभ्यां नमः ॥१॥ ॐ ह्रीं भीमदर्शनाय नमः तर्जनीभ्यां नमः ॥२॥ ॐ ह्रीं भूतश्रेष्ठाय नमः मध्यमाभ्यां नमः ॥३॥ ॐ ह्रीं भूतनायकाय नमः अनामिकाभ्यां नमः ॥४॥ ॐ ह्रीं क्षत्रियाय नमः कनिष्ठिकाभ्यां नमः ॥५॥ ॐ ह्रीं क्षेत्रपालाय नमः करतलकर पृष्ठाभ्यां नमः ॥६॥ ॐ ह्रीं क्षेत्रज्ञाय दिग्विदिशायाम् ॥७॥ ॐ भैरवाय नमः सर्वाङ्गे ॥

व्यापकन्यास - ॐ ह्रीं भैरवाय नमः शिरसि ॥१॥ ॐ ह्रीं भीमदर्शनाय नमः ललाटे ॥२॥ ॐ ह्रीं भूतहननाय नमः नेत्रयोः ॥३॥ ॐ ह्रीं सारमेयानुगाय नमः भ्रुवोः ॥४॥ ॐ ह्रीं भूतनाथाय नमः कर्णयोः ॥५॥ ॐ ह्रीं प्रेतवाहनाथाय नमः कपोलयोः ॥६॥ ॐ ह्रीं भस्मांगाय नमः नासापुटे ॥७॥ ॐ ह्रीं सर्पभूषणाय नमः ओष्ठयोः ॥८॥ ॐ ह्रीं आदिनाथाय नमः मुखे ॥९॥ ॐ ह्रीं शक्तिहस्ताय नमः गले ॥१०॥ ॐ ह्रीं दैत्यशमनाय नमः स्कंधयोः ॥११॥ ॐ ह्रीं अतुलतेजसे नमः बाह्वोः ॥१२॥ ॐ ह्रीं कपालिने नमः करयोः ॥१३॥ ॐ ह्रीं मुण्डमालिने नमः हृदये ॥१४॥ ॐ ह्रीं शान्ताय नमः वक्षःस्थले ॥१५॥ ॐ ह्रीं कामचारिणे नमः स्तनयोः ॥१६॥ ॐ ह्रीं सदातुष्टाय नमः उदरे ॥१७॥ ॐ ह्रीं क्षेत्रेशाय नमः पार्श्वयोः ॥१८॥ ॐ ह्रीं क्षेत्रपालाय नमः पृष्ठे॥१९॥ ॐ ह्रीं क्षेत्रज्ञाय नमः नाभौ ॥२०॥ ॐ ह्रीं पापौघनाशाय नमः कट्याम् ॥२१॥ ॐ ह्रीं वटुकाय नमः लिङ्गे ॥२२॥ ॐ ह्रीं रक्षाकराय नमः गुदे ॥२३॥ ॐ ह्रीं रक्तलोचनाय नमः ऊर्वोः ॥२४॥ ॐ ह्रीं घुर्घुराय नमः जानुनि ॥२५॥ ॐ ह्रीं रक्तपायिने नमः जंघयोः ॥२६॥ ॐ ह्रीं सिद्धपादुकाय नमः गुल्फयोः ॥२७॥ ॐ ह्रीं सुरेश्वराय नमः पादपृष्ठे ॥२८॥ ॐ ह्रीं आपदुद्धारकाय नमः आपादतलमस्तकपर्यन्तं न्यसेत् ॥२९॥ ॐ ह्रीं क्ष्रौं ब्लौं ह्रीं ॐ स्वाहा आपदुद्धारणभैरवाय नमः ॥ अनेनं सर्वाङ्गे व्यापकं कुर्यात् ॥३०॥ इति व्यापक न्यासः ।

दिङ्न्यासः - ॐ ह्रीं डमरुहस्ताय नमः पूर्वे ॥१॥ ह्रीं दण्डधारिणे नमः दक्षिणे ॥२॥ ॐ ह्रीं खड्गहस्ताय नमः पश्चिमे ॥३॥ ॐ ह्रीं घण्टावादिने नमः उत्तरे ॥४॥ ॐ ह्रीं अग्निवर्णाय नमः अग्नये ॥५॥ ॐ ह्रीं दिगम्बराय नमः नैर्ऋत्ये ॥६॥ ॐ ह्रीं सर्वभूतस्थाय नमः वायव्ये ॥७॥ ॐ ह्रीं अष्टसिद्धिदाय नमः ऐशान्याम् ॥८॥ ॐ ह्रीं खेचारिणे नमः उर्ध्वम् ॥९॥ ॐ ह्रीं रौद्ररूपिणे नमः पाताले ॥१०॥

विलोम करन्यासः - ॐ ह्रीं रुद्राय नमः अङ्गुष्ठयोः ॥१॥ ॐ ह्रीं शिखिसखाय नमः तर्जन्याम् ॥२॥ ॐ ह्रीं शिवाय नमः मध्यमायाम् ॥३॥ ॐ ह्रीं त्रिशूलिने नमः अनामिकायाम् ॥४॥ ॐ ह्रीं ब्रह्मणे नमः कनिष्ठिकायाम् ॥५॥ ॐ ह्रीं त्रिपुरांतकाय नमः करतलयोः ॥६॥ ॐ ह्रीं मांसाशिने नमः कराग्रेषु ॥७॥ ॐ ह्रीं दिगम्बराय नमः करपृष्ठयोः ॥८॥

हृदयादिषडङ्गन्यासः - ॐ ह्रीं भूतनाथाय नमः हृदयाय नमः ॥१॥ ॐ ह्रीं आदिनाथाय नमः शिरसे स्वाहा ॥२॥ ॐ ह्रीं आनन्दनाथाय नमः शिखायै वषट् ॥३॥ ॐ ह्रीं सिद्धशाबरनाथाय नमः कवचाय हुम् ॥४॥ ॐ ह्रीं सहजानन्दनाथाय नमः नेत्रत्रयाय वौषट् ॥५॥ ॐ ह्रीं श्रीआनन्दनाथाय नमः अस्त्राय फट् ॥६॥

एवं न्यासविधिं समाप्य कामनापरत्वेनोपयोगिरूपं ध्यायेत् ॥

॥ अथ सात्त्विक ध्यानम् ॥

वंदे बालं स्फटिकसदृशं कुण्डलोद्भासिताङ्गं
दिव्याकल्पैर्नवमणिमयैः किंकिणीनूपुराढयैः ॥
दीप्ताकारं विशदवदनं सुप्रसन्नं त्रिनेत्रं
हस्ताग्राभ्यां वटुक सदृशं शूलदण्डौ दधानम् ॥१॥

॥ अथ राजस ध्यानम् ॥

उद्यद्भास्क रसन्निभं त्रिनयनं रक्तांगरागस्त्रजं
स्मेरास्यं वरदं कपालमभयं शूलं दधानं करैः ॥
नीलग्रीवमुदारभूषणयुतं शीतांशुखण्डोज्ज्वलं
बंधूकारुणवाससं भयहरं देवं सदा भावये ॥२॥

॥ अथ तामस ध्यानम् ॥

ध्यायेन्नीलादिकांतं शशिशकलधरं मुण्डमालं
महेशंदिग्वस्त्रंपिंगकेशं डमरुमथ सृणिंखड्गपाशाभयानि।
नागं घण्टां कपालं करसरसिरुहैर्बिभ्रतं भीमदंष्ट्रं
दिव्याकल्पंत्रिनेत्रं मणिमयविलसत्किंकिणीनूपुराढ्यम् ॥३॥

॥ अथ सकल मनोरथप्राप्त्यर्थमिदं त्रिगुणात्मकं ध्यानम् ॥

शुद्धःस्फटिकसंकाशं सहस्त्रादित्यवर्चसम्।
नीलजीमूतसंकाशं नीलांजनसमप्रभम् ॥१॥

अष्टबाहुं त्रिनयनं चतुर्बाहुं द्विबाहुकम् ।
दंष्ट्राकरालवदनं नूपुरारावसंकुलम् ॥२॥
भुजङ्गमेखलं देवमग्निवर्णं शिरोरुहम् ।
दिगंबरं कुमारेशं वटुकाख्यं महाबलम् ॥३॥
खट्वाङ्गमसिपाशं च शूलं दक्षिणभागतः ।
डमरुं च कपालं च वरदं भुजङ्गं तथा ।
अग्निवर्णसमोपेतं सारमेयसमन्वितम् ॥४॥

॥ अथ साधारण ध्यानम् ॥

करकलितकपालः कुण्डली दण्डपाणि-
स्तरुणतिमिर नीलो व्यालयज्ञोपवीती ।
क्रतुसमयसपर्याविघ्नविच्छेद हेतु-
र्जयति वटुकनाथः, सिद्धिदः साधकानाम् ॥१॥
आनीलकुंतलमलक्तक रक्तवर्णं
मौनीकृतं कृत मनोज्ञमुखारविन्दम् ।
कल्याणकीर्ति कमनीय कपालपाणिं
वन्दे महावटुकनाथमभीष्टसिद्धये ॥२॥
आनम्र सर्वगीर्वाणशिरोभृंङ्गागसङ्गिनम् ।
भैरवस्य पदाम्भोजं भूयोऽहं नौमि भूतये ॥३॥

एवं यथारुचि ध्यात्वा भैरवं प्रार्थयेत्॥

तत्रमन्त्रः - ॐ ह्रीं भैरव भैरव भयकर हर मां रक्ष रक्ष हुँ फट् स्वाहा इति मन्त्रेण प्राथ्र्य पटलस्थ यन्त्रपीठे आवाहनादि प्राणं प्रतिष्ठाप्य षोडशोपचारैरभ्यर्च्य पुनः कामनापरत्वेन यथा रुचि ध्यात्वा।

इस प्रकार भैरव का ध्यान कर षोड़शोपचार पूजन कर भैरव को दीपदान व बलि प्रदान करें।

मन्त्र की संख्यानुसार तन्तुओं की एक वर्तिका बनाकर दीप जलायें।

दीप जलाकर प्रार्थना करें - **ॐ ह्रीं श्रीं क्लीं ह्रीं श्रीं वं सर्वज्ञाय महाबलपराक्रमाय वटुकाय नमः इमं दीपं गृहाण सर्व कार्यार्थसाधक, दुष्टान्नाशय नाशय त्रासय त्रासय सर्वतो मम रक्षां कुरु कुरु फट् स्वाहा॥**

तीन बार आचमन करके हस्तप्रक्षालन करें। उसके बाद बलि प्रदान करें।

देवता के आगे त्रिकोण उसके बाहर चतुरस्र मण्डल रक्तचन्दन कुंकुम इत्यादि से बनायें (गणेश, दुर्गा, वटुक की रक्तचन्दन, गंध पुष्पाक्षत से अर्चना करते हैं।) मण्ड़ल पर एक पात्र में बलिद्रव्य रखें।

तीन बार आचमन करें - **ॐ ह्रां नमः ॥१॥ ॐ ह्रीं नमः ॥२॥ ॐ कुं नमः ॥३॥** देशकाल का उच्चारण करते हुये बलिदान हेतु सङ्कल्प करें।

मूलमन्त्र बोलते हुये बलि का पूजन करें - **वटुक बलिरूपाय नमः।**

ॐ एह्येहि देव वटुकनाथ कपिलजटाभारभासुर त्रिनेत्र ज्वालामुख सर्वविघ्नान्नाशय नाशय सर्वोपचारसहितं बलिं गृह्ण गृह्ण स्वाहा एष बलिर्वटुकाय नमः।

पश्चात् मूलमन्त्र का जपकर स्तोत्र का पाठ करें।

मूलमन्त्र - ॐ ह्रीं वटुकाय आपदुद्धारणाय कुरु कुरु वटुकाय ह्रीं ॐ ॥

विनियोगः - **श्रीवटुकभैरव शतनाम स्तोत्र मन्त्रस्य, अनुष्टुप् छन्दः, वृहदारण्य ऋषि, भैरवो देवता, अष्टबाहुत्रिनयन बीजशक्ति, ॐ कीलकं सर्वाभीष्ट सिद्धये जपे पाठे विनियोगः।**

॥ अथ नामावलिस्तोत्रम् ॥

ॐ ह्रीं भैरवो भूतनाथश्च भूतात्मा भूतभावनः।
क्षेत्रदः क्षेत्रपालश्च क्षेत्रज्ञः क्षत्रियो विराट् ॥१॥
श्मशानवासी मांसाशी खर्पराशीः स्मरांतकृत्।
रक्तपः पानपः सिद्धः सिद्धिदः सिद्धसेवितः ॥२॥
कंकालः कालशमनः कलाकाष्ठातनुः कविः।
त्रिनेत्रो बहुनेत्रश्च तथा पिंगललोचनः ॥३॥
शूलपाणिः खड्गपाणिः कंकाली धूम्रलोचनः।
अभीरुभैंरवो नाथो भूतपो योगिनीपतिः ॥४॥
धनदो धनहारी च धनवान्प्रीतिभावनः।
नागहारो नागपाशो व्योमकेशः कपालभृत् ॥५॥
कालः कपालमाली च कमनीयः कलानिधिः।
त्रिलोचनोज्ज्वलन्नेत्रस्त्रिशिखी च त्रिलोकपः ॥६॥

त्रिनेत्रतनयो डिंभ : शांतः शान्तजनप्रियः ।
वटुको वटुवेषश्च खट्वाङ्गवरधारकः ॥७॥
भूताध्यक्षः पशुपतिर्भिक्षुकः परिचारकः ।
धूर्तो दिगंबरः शूरो हरिणः पाण्डुलोचनः ॥८॥
प्रशान्तः शान्तिदः सिद्धः शङ्करः प्रियबांधवः ।
अष्टमूर्तिर्निधीशश्च ज्ञानचक्षुस्तपोमयः ॥९॥
अष्टाधारः षडाधारः सर्पयुक्तशिखी सखः ।
भूधरो भूधराधीशो भूपतिर्भूधरात्मजः ॥१०॥
कंकालधारी मुण्डी च नागयज्ञोपवीतवान् ।
जृंभणो मोहनः स्तंभी मारणः क्षोभणस्तथा ॥११॥
शुद्धनीलाञ्जनप्रख्यो दैत्यहा मुण्डभूषितः ।
बलिभुग्बलिभुग्नाथो बालो बालपराक्रमः ॥१२॥
सर्वापत्तारणो दुर्गो दुष्टभूतनिषेवितः ।
कामी कलानिधिः कान्तः कामिनीवशकृद्वशी ॥१३॥
सर्वसिद्धिप्रदो वैद्यः प्रभुर्विष्णुरितीव हि ।
अष्टोत्तरशतं नाम्नां भैरवस्य महात्मनः ॥१४॥

॥ फलश्रुति ॥

मया ते कथितं देवि रहस्यं सर्वकामदम् ।
य इदं पठति स्तोत्रं नामाष्टशतमुत्तमम् ॥१५॥
न तस्य दुरितं किंचिन्न च भूतभयं तथा ।
न च मारीभयं तस्य ग्रहराजभयं तथा ॥१६॥
न शत्रुभ्यो भयं क्वापि प्राप्नुयान्मानवः क्वचित् ।
पातकानां भयं चैव पठेत्स्तोत्रमनुत्तमम् ॥१७॥
मारीभये राजभये तथा चोराग्निजे भये ।
औत्पत्तिके महाघोरे तथा दुःस्वप्नदर्शने ॥१८॥
बंधने च तथा घोरे पठेत्स्तोत्रमनन्यधीः ।
सर्वं प्रशमनं यातिभयं भैरवकर्तिनात् ॥१९॥
एकादशसहस्त्रं तु पुरश्चरणमुच्यते ।
यस्त्रिसंध्यं पठेद्देवि संवत्सरमतंद्रितः ॥२०॥

स सिद्धिं प्राप्नुयादिष्टां दुर्लभामपि मानवः ।
षण्मासं भूमिकामस्तु जपित्वा प्राप्नुयान्महीम् ॥२१ ॥
राजशत्रुविनाशार्थं जपेन्मासाष्टकं पुनः ।
रात्रौ वारत्रयं चैव नाशयत्येव शात्रवान् ॥२२ ॥
जपेन्मासत्रयं मर्त्यो राजानं वशमानयेत् ।
धनार्थी च सुतार्थी च दारार्थी यस्तु मानवः ॥२३ ॥
जपेन्मासत्रयं देवि वारमेकं तथा निशि ।
धनं पुत्रं तथा दारान्प्राप्नुयान्नात्र संशयः ॥२४ ॥
रोगी रोगात्प्रमुच्येत बद्धो मुच्येत बंधनात् ।
भीतो भयात्प्रमुच्येत देवी सत्यं न संशयः ॥२५ ॥
निगडैश्चापि बद्धौ यः कारागेहे निपातितः ।
शृङ्खलाबन्धनं प्राप्तं पठेच्चैव दिवानिशि ॥२६ ॥
यं यं चिंतयते कामं तं तं प्राप्नोति निश्चितम् ।
अप्रकाश्यं परं गुह्यं न देयं यस्य कस्यचित् ॥२७ ॥
सुकुलीनाय शान्ताय ऋजवे दंभ वर्जिते ।
दद्यात्स्तोत्रमिमं पुण्यं सर्वकामफलप्रदम् ॥२८ ॥
इति श्रुत्वा ततो देवि नामाष्टशतमुत्तमम् ।
जजाप परया भक्त्या सदा सर्वेश्वरेश्वरी ॥२९ ॥
भैरवोऽपि प्रहृष्टोऽभूत्सर्वलोकमहेश्वरः ।
वरं ददाति भक्तेभ्यः पठेत्स्तोत्रमनन्यधीः ।
संतोषं परमं प्राप्य भैरवस्य महात्मनः ॥३० ॥
वारं वारं भुवनजननि प्रोच्यते साधुवादः सत्यं सत्यं
जगति सकले भैरवो देव एकः ।
यां यां सिद्धिं भुवनजठरे कामयेन्मानवो यस्तांस्तां
सिद्धिं वितरति सदा भैरवः सुप्रसन्नः ॥३१ ॥
पाणिभ्यां परितः प्रपीड्य सुदृढं निश्चौत्य निश्चोत्य च
ब्रह्माण्डं सकलं प्रचालितरसालोच्चैः फलाभं मुहुः ।
पायं पायमपायय त्रिजगति ह्युन्मत्तवत्तै
रसैर्नृत्यंस्तांण्डवडंबरेण शिरसा पायान्महाभैरवः ॥३२ ॥

विभ्राणः शुभ्रवर्णं द्विगुणनवभुजं पञ्चवक्रं त्रिनेत्रं
ज्ञाने मुद्रेंद्रशास्त्रं सविषममृतकं शङ्खभैषज्यचापम्।
शूलं खट्वाङ्गवाणान् डमरुमसिगदा वह्निमारोग्यमाला-
मिष्टाभीतिं च दोर्भिर्जयति खलु महाभैरवः सर्वसिद्ध्यै ॥३३॥

क्वाकाशः क्व समीरणः क्व दहनः क्वापश्च विश्वंभरा
क्व ब्रह्मा क्व जनार्दनः क्व तरणिः क्वेंदुश्च देवासुराः।
कल्पान्ते दिगिभेशवत्प्रमुदितः श्रीसिद्धयोगीश्वरः
क्रीडानाटकनायको विजयते देवो महाभैरवः ॥३४॥

लिखित्वा परया भक्त्या भैरवस्तोत्रमुत्तमम्।
अष्टानां ब्राह्मणानां च देयं पुस्तकमादरात् ॥३५॥
यान् यान् समीहते कामांस्तान्प्राप्नोत्यंसंशयम्।
इहलोके सुखं प्राप्य पुस्तकस्य प्रसादतः ॥३६॥
शिवलोकमनुप्राप्य शिवेन सह मोदते।
लिखित्वा भूर्जपत्रे तु त्रिलोहपरिवेष्टितम् ॥३७॥
सौम्ये च वस्तुवसने कर्पटे च सुशोभने।
करे बाह्वौ गले कट्यां मूर्ध्नि त्रिलोहगोपितम्॥
यस्तु धारयते स्तोत्रं सर्वत्र जयमाप्नुयात् ॥३८॥

इस स्तोत्र का विशेष पुरश्चरण ११००० पाठ का है। अधिकांशतः ३-४ हजार आवृति पश्चात् ही भैरव आवाहन के लक्षण प्रकट होने लगते है जैसे - रात्रि में किसी का चलना, घुंघरु की आवाज या नाचने-कूदने की ध्वनि या भ्रम पैदा होता है। इसके बाद साधक को समय व क्रिया संपादन के नियमों का विशेष ध्यान रखना चाहिये अन्यथा जिस प्रकार भैरव शीघ्र प्रसन्न होते हैं उसी प्रकार शीघ्र रुष्ट भी होते हैं।

॥ इति रुद्रयामल तंत्रोक्त भैरवाष्टोत्तर शतनाम् स्तोत्रं समाप्तम् ॥

॥ अथ वटुकभैरवाष्टोत्तरशतनाम स्तोत्रम्॥

(कालसंकर्षणतन्त्रे)

विनियोगः - ॐ अस्य श्रीवटुकभैरवस्तोत्र मन्त्रस्य कालाग्निरुद्र ऋषिः। अनुष्टुप् छन्दः। आपदुद्धारक वटुकभैरवो देवता। ह्रीं बीजम्। भैरवीवल्लभः शक्तिः। नीलवर्णो दण्डपाणिरिति कीलकम्। समस्तशत्रुदमने समस्तापन्निवारणे

सर्वाभीष्टप्रदाने च विनियोगः।

ऋष्यादिन्यासः - ॐ कालाग्निरुद्रऋषये नमः शिरसि ॥१॥ अनुष्टुप्छन्दसे नमः मुखे ॥२॥ आपदुद्धारक वटुकभैरवदेवतायै नमः हृदये ॥३॥ ह्रीं बीजाय नमः गुह्ये ॥४॥ भैरवीवल्लभशक्तये नमः पादयोः ॥५॥ नीलवर्णो दण्डपाणिरिति कीलकाय नमः नाभौ ॥६॥ विनियोगाय नमः सर्वाङ्गे ॥७॥

मूलमन्त्रः - ॐ ह्रीं वां वटुकाय क्ष्रौं क्षौं आपदुद्धारणाय कुरु कुरु वटुकाय ह्रां वटुकाय स्वाहा।

यह मंत्र प्रेतादि उपद्रव शांति व शत्रूदमन में विशेष काम में आता है

ध्यानम् -

नीलजीमूतसंकाशो जटिलो रक्तलोचनः ।
दंष्ट्राकरालवदनः सर्पयज्ञोपवीतवान् ॥१॥
दंष्ट्रायुधालंकृतश्च कपालस्त्रग्विभूषितः ॥
हस्तन्यस्तकरोटीको भस्मभूषितविग्रहः ॥२॥
नागराजकटीसूत्रो बालमूर्तिर्दिगंबरः ।
मंजुसिंजानमंजरि - पादकंपितभूतलः ॥३॥
भूतप्रेतपिशाचैश्च सर्वतः परिवारितः ।
योगिनीचक्रमध्यस्थो मातृमण्ड़लवेष्टितः ॥४॥
अट्टहासस्फुरद्वक्त्रो भृकुटीभीषणाननः ।
भक्तसंरक्षणार्थाय दिक्षु भ्रमणतत्परः ।
एवंभूतस्तु वटुको ध्यातव्यो भैरवीश्वरः ॥५॥
एवं ध्यात्वा स्तोत्रं पठेत् ।
ॐ ह्रीं वटुको वरदः शूरो भैरवः कालभैरवः ।
भैरवीवल्लभो भव्यो दण्डपाणिर्दयानिधिः ॥६॥
वेतालवाहनो रौद्रो रुद्रभ्रुकुटिसंभवः ।
कपाललोचनः कांतः कामिनीवशकृद्वशी ॥७॥
आपदुद्धारणो धीरो हरिणांकशिरोमणिः ।
दंष्ट्राकरालो दष्टौष्ठो धृष्टो दुष्टनिर्वहणः ॥८॥
सर्पहारः सर्पशिराः सर्पकुण्डलमण्डितः ।
कपाली करुणापूर्णः कपालैकशिरोमणिः ॥९॥

श्मशानवासी मांसाशी मधुमत्तोऽट्टहासवान् ।
वाग्मी वामव्रतो वामो वामदेवप्रियंकरः ॥१०॥
वनेचरो रात्रिचरो वसुदो वायुवेगवान् ।
योगी योगव्रतधरो योगिनीवल्लभो युवा ॥११॥
वीरभद्रो विश्वनाथो विजेता वीरवंदितः ।
भूताध्यक्षो भूतिधरो भूतभीतिनिवारणः ॥१२॥
कलंकहीनः कंकाली क्रूरः कुक्कुरवाहनः ।
गाढो गहन गम्भीरो गणनाथसहोदरः ॥१३॥
देवीपुत्रो दिव्यमूर्तिर्दीप्तिमान् दीप्तिलोचनः ।
महासेनप्रियकरो मान्यो माधवमातुलः ॥१४॥
भद्रकालीपतिर्भद्रो भद्रदो भद्रवाहनः ।
पशूपहाररसिकः पाशी पशुपतिः पतिः ॥१५॥
चण्डः प्रचण्डचण्डेशश्चंडीहृदयनन्दनः ।
दक्षो दक्षाध्वरहरो दिग्वासा दीर्घलोचनः ॥१६॥
निरातंको निर्विकल्पः कल्पः कल्पांतभैरवः ।
मदतांण्डवकृन्मत्तो महादेवप्रियो महान् ॥१७॥
खट्वांगपाणिः खातीतः खरशूलः खरांतकृत् ।
ब्रह्माण्डभेदनो ब्रह्मज्ञानी ब्राह्मणपालकः ॥१८॥
दिक्चरो भूचरो भूष्णुः खचरः खेलनप्रियः ।
सर्वदुष्टप्रहर्ता च सर्वरोगनिषूदनः ॥१९॥
सर्वकामप्रदः शर्वः सर्वपापनिकृंतनः ।
इत्थमष्टोत्तरशतं नाम्नां सर्वसमृद्धिदम् ॥२०॥
आपदुद्धारजनकं वटुकस्य प्रकीर्तितम् ।
एतच्च शृणुयान्नित्यं लिखेद्वा स्थापयेद्-गृहे ॥२१॥
धारयेद्वा गले बाहौ तस्य सर्वाः समृद्धयः ।
न तस्य दुरितं किंचिन्न चोरनृपजं भयम् ॥२२॥
न चापस्मृतिरोगेभ्यो डाकिनीभ्यो भयं नहि ।
न कूष्माण्डग्रहादिभ्यो नापमृत्योर्न च ज्वरात् ॥२३॥

मासमेकं त्रिसंध्यं च शुचिर्भूत्वा पठेन्नरः ।
सर्वदारिद्यनिर्मुक्तो निधिं पश्यति भूतले ॥२४॥
मासद्वयमधीयानः पादुकासिद्धिमान् भवेत् ।
अञ्जनं गुटिका खड्गं धातुवादरसायनम् ॥२५॥
सारस्वतं च वेतालवाहनं बिलसाधनम् ।
कार्यसिद्धिं महासिद्धिं मन्त्रं चैव समीहितम् ॥२६॥
वर्षमात्रमधीयानः प्राप्नुयात्साधकोत्तमः ।
एतत्ते कथितं देवि गुह्याद्गुह्यतरं परम् ॥२७॥
कालसंकर्षणीतन्त्रे कलिकल्मषनाशनम् ।
नरनारीनृपाणां च वशीकरणमंबिके ॥२८॥

॥ इति कालसंकर्षणतन्त्रोक्तवटुकाष्टोत्तरशतनाम स्तोत्रं समाप्तं ॥

॥ वटुकभैरव कवचम् ॥

॥ देव्युवाच ॥

देव देव जगन्नाथ त्रिनाथ श्रीत्रिलोचनः ।
भवत्प्रसादाद्भगवन्भैरवस्य महात्मनः ॥
कवचं श्रोतुमिच्छामित्वत्स्नेहातिशयादहम् ॥

॥ शिवोवाचः ॥

प्राणिनां रक्षणार्थं च ब्रवीमि सुमुखे गुणान् ।
वर्मणो भैरवस्यास्य शिव ब्रह्मा ऋषिः स्मृतः ॥
छन्दोनुष्टुप् तथा देवो भैरवो वटुकात्मजा ।
ऐश्वर्यस्याभिवृद्ध्यर्थमिष्टार्थं च नियुज्यते ॥
शूलखड्ग डमरुलसत्करं सव्यहस्तमपरं करोज्वलम् ।
सन्ततं हृदि भजामि भैरवं स्वाधिरूढमधिकार सिद्धये ।
दिग्वाससं कमलपत्र विशालनेत्रं ।
भस्माङ्गरागमभयं प्रभुमादि देवम् ॥
ध्यायामि तं वटुकनाथमहर्निशं मे ।
सर्वार्थसिद्धिमतुलां कृपया दिशन्तम् ॥

एवं ध्यात्त्वा तु देवेशं वटुकाख्यं महाबलम् ।
उच्चरेत कवचं पश्चाद्देवताभीष्ट सिद्धिदम् ॥
शिरो मे भैरवः पातु भालं पुरनिषूदनः ।
दृशौ पातु त्रिनेत्रो मे श्रवणं नीलकण्ठकः ॥
दिग्वासा पातु मे कण्ठं नासिकांममनन्यभाक् ।
ओष्ठौ त्रिपुरघाती मे जिह्वां पातु कपालधृक् ॥
दन्तान्पातु क्रतुध्वंसी चिबुकं भूतवासकः ।
कपाली पातु मे ग्रीवां स्कन्धौ पातु गजान्तकः ॥
भुजौ मे पातु कौमारी हृदयं क्षेत्रपालकः ।
अभीरुर्मे स्तनौ पातु वक्षः पातु महेश्वरः ॥
कुक्षौ मे पातु संहर्ता नाभिं मे षण्मुखप्रियः ।
भूतनाथः कटिं पातु गुह्यं पातु जटाधरः ॥
ऊरू पातु वृषारूढो जानुनी भूतभावनः ।
श्मशानवासी मे पातु पातु सर्वाङ्गमीश्वरः ॥
य इदं कवचं देवि पठेत्प्रयत मानसः ।
तस्यैश्वर्याभिवृद्ध्यर्थमिष्टान्नं च ददाम्यहम् ॥
रोगार्त्तो मुच्यते रोगात्पुत्रार्थी लभते सुतम् ।
जपित्वा श्रद्धया कन्या आयुष्मन्तं पतिं लभेत् ॥
विद्या विनय सम्पन्नं सुकुलीनं सुरूपिणम् ।
जपित्वा विधवानारी वैधव्यं नाप्नुयात्क्वचित् ॥
जपित्वा कवचं प्रातर्मुच्यते नात्र संशयः ।
नास्ति तस्यापमृत्युश्चाकालमृत्युः कदाचन ॥
इहलोके सुखं भुक्त्वा पुत्र पौत्रै सबान्धवैः ।
अन्ते कैलाशमाविश्य मम पादतलं व्रजेत् ॥
तस्मात्सर्व प्रयत्नेन जपेन्नित्यमतंद्रितः ॥
ये भक्ति युक्ताः कवचं पठन्ति
ते वै कुले स्वे कुलिनो वसन्ति ॥

तेजोधिकं विंशतिसंख्यया दिने
कैलासमाप्नोति मम प्रसादात् ॥
एतत्ते कथितं देवि यन्मां त्वं परिपृच्छति ।
तव स्नेहातिशयादुक्तं कवचं भैरवात्मकम् ॥

॥ इति वटुकभैरव कवचम् ॥

॥ श्रीवटुकभैरवपञ्जर कवचम् ॥

॥ श्रीपार्वत्युवाच ॥

देव देव महादेव संसार प्रियकारक ।
पञ्जरं वटुकस्यास्य कथनीयं मम प्रभो ॥

॥ श्रीशिवोवाच ॥

पूर्वं भस्मासुर त्रासाद् भयविह्वलतां स्वयम् ।
पठनादेव मे प्राणा रक्षिताः परमेश्वरि ॥
सर्वदुष्ट विनाशाय सर्वरोग निवारणम् ।
दुःख शान्तिकरं देवि ह्यल्पमृत्यु भयापहम् ॥
राज्ञां वश्यकरं चैव त्रैलोक्य विजयप्रदम् ।
सर्वलोकेषु पूज्यश्च लक्ष्मीस्तस्य गृहे स्थिरा ॥
अनुष्ठानं कृतं देवि पूजनं च दिने दिने ।
विना पञ्जरपाठेन तत्सर्वं निष्फलं भवेत् ॥

विनियोगः - अस्य श्री वटुकभैरव पञ्जर कवच मन्त्रस्य कालाग्निरुद्र ऋषिः, अनुष्टुप् छन्दः, श्री वटुकभैरवो देवता, ह्रां बीजं, ॐ भैरवीवल्लभा शक्तिः, ॐ दण्डपाणये नमः कीलकम् मम सकल कामना सिद्ध्यर्थे जपे विनियोगः।

॥ कवचम् ॥

ॐ ह्रां प्राच्यां डमरुहस्तो रक्तवर्णो महाबलः ।
प्रत्यक्षमहमीशान वटुकाय नमो नमः ॥
ॐ ह्रीं दण्डधारी दक्षिणे च पश्चिमे खड्गधारिणे ।
ॐ ह्रूं घण्टावादी मूर्ति उत्तरस्यां दिशि तथा ॥

ॐ हैं अग्निरूपोह्याग्नेयां नैऋत्यां च दिगम्बरः ।
ॐ ह्रौं सर्वभूतस्थौ वायव्ये भूतानां हितकारकः ॥
ॐ हश्चाष्ट सिद्धिश्च ईशाने सर्वसिद्धिकरः परः ।
प्रत्यक्षमहमीशान वटुकाय नमो नमः ॥
ॐ ह्रां ह्रीं ह्रूं हैं ह्रौं हः स्वाहा ऊर्ध्वखेचरिणं न्यसेत् ।
रुद्ररूपस्तु पाताले वटुकाय नमो नमः ॥
ॐ ह्रीं बटुका य मूर्ध्नि ललाटे भीमरूपिणम् ।
आपदुद्धारणं नेत्रे मुखे च वटुकं न्यसेत् ।
कुरु कुरु सर्वसिद्धिर्देहे गेहे व्यवस्थितः ।
वटुकाय ह्रीं सर्वदेहे विश्वस्य सर्वतो दिशि ॥
आपदुद्धारकः पातु ह्यापादतल मस्तकम् ।
ह स क्ष म ल व र यूं पातु पूर्वे दण्ड हस्तस्तु दक्षिणे ।
ह स क्ष म ल व र यूंनैत्रऋत्यै ह स क्ष म ल व र यूंपश्चिमेऽवतु ।
सर्वभूतस्थो वायव्ये ह स क्ष म ल व र यूं घण्टावादिन उत्तरे ॥
हंसः सोहं तु ईशाने चाष्टसिद्धिकरः परः ।
शं क्षेत्रपाल ऊर्ध्वे तु पाताले शिवसन्निभः ॥
एवं दशदिशो रक्षेद्वटुकाय नमो नमः ।
इति ते कथितं ह्रीं श्रीं क्लीं ऐं सदावतु ॥
ॐ फ्रें हुं फट् च सर्वत्र त्रैलोक्ये विजयी भवेत् ।
लक्ष्मीं ऐं श्रीं लं पृथिव्यां च आकारोहं ममावतु ॥
स्त्रौं प्रौं ज्रौं ॐ यं वायव्यां रं रं रं तेजोरूपिणम् ।
ॐ कं खं गं घं ङं वटुकं चं छं जं झं ञं कपालिनम् ॥
ॐ टं ठं डं ढं णं क्षेत्रेशं तं थं दं धं नं उमाप्रियम् ।
ॐ पं फं बं भं मं मम रक्ष यं रं लं भैरवोत्तमम् ॥
ॐ वं शं षं सं आदिनाथं लं क्षं वै क्षेत्रपालकम् ।
एवं पञ्जरमाख्यातं सर्वसिद्धिकरं भवेत् ॥
दुःख दारिद्र्य शमनं रक्षकं सर्वतो दिशः ।
अवश्यसर्वतोवश्यं सर्ववीजैश्च संपुटम् ॥

सर्वरोगहरं दिव्यं सर्वत्र सुखमाप्नुयात् ।
एवं रहस्यमाख्यातं देवानामपि दुर्लभम् ॥
वज्रपञ्जरनामेदं ये शृण्वन्ति वरानने ।
आयुरारोग्यमैश्वर्यं कीर्तिलाभः सुखं जयः ॥
लक्ष्मीमनोरमा वृद्धिस्तेषां गेहे व्यवस्थितः ।
सुशीलाय सुदाताय गुरुभक्तिपराय च ॥
तस्य शीघ्रं च दातव्यमन्यथा न कदाचन ।
गोपनीयं प्रयत्नेन सर्वगोप्यमयं भवेत् ॥
यस्मै कस्मै न दातव्यं न दातव्यं कदाचन ।
राज्यंदेयं शिरो देयं न देयं भैरवाक्षरम् ॥
एककालं द्विकालं वा त्रिकालं पठते नरः ।
सर्वपाप विनिर्मुक्तो शिवेन सह मोदते ॥

॥इति शक्ति रहस्योक्त श्रीवटुकभैरवपञ्जर कवचम् ॥

॥ श्रीबटुकभैरव पञ्जरस्तोत्रम् ॥

यह स्तोत्र कवच एवं किले के समान रक्षा करता है।

॥श्रीदेव्युवाच ॥

देव देव महादेव भक्ताभीष्ट प्रदायक पूर्वं ।
मे सूचितं नाथ ब्रूहि मम कृपयाऽद्य ॥१॥
पञ्जरं बटुकत्यैव सर्वसिद्धि प्रदायकम् साधकानां ।
हितार्थाय प्रकाशं कुरु भैरव ॥२॥

॥श्रीभैरव उवाच ॥

शृणु देवि! प्रवक्ष्यामि भैरवस्य पञ्जरम् ।
पञ्जरस्यास्य देवेशि वृहदारण्यको ऋषिः ॥३॥
छन्दश्चानुष्टुप् देवेशि वटुको नाम देवता ।
सर्वार्थ साधने देवि विनियोगः प्रकीर्तितः ॥४॥

॥ स्तोत्रम् ॥

बटुकोऽव्यात् शिरोदेशः ललाटे भैरवेश्वरः ।
कपोले क्षेत्रपालश्च भ्रूभागे चासिताङ्गक ॥१॥
खट्वाङ्गधारी नासायां नेत्रयोर्भूतनायकः ।
ऊर्ध्वोष्ठे रुरुनाथश्च अधरोष्ठे धनेश्वरः ॥२॥
चिबुके कुल नाथोऽव्यात् महेशो मुखमण्डले ।
क्षेत्रेशः कण्ठदेशेऽव्यात् स्कन्धयोर्विशनी पतिः ॥३॥
हृदये मम नाथोऽव्यात् कामेशो भुजमण्डले ।
पाणौ रक्षेन् महाकालो मार्तण्डो चाङ्गुलीषु तु ॥४॥
उदरे कालकालोऽव्यात् सर्वज्ञो नाभिमण्डले ।
रक्ताक्षो लिङ्गदेशेऽव्यात् अण्डकोशे सुरेश्वरः ॥५॥
कट्यां शूलभृतः पातु-वस्तिदेशे अघान्तकः ।
घोरान्तकोऽव्यात् चोर्वो जघने शत्रुतापनः ॥६॥
पादयोः पातु कन्दर्पो कल्पान्तो चाङ्गुलीषु च ।
आकेशात् पादपर्यन्तं पातु मां भैरवेश्वरः ॥७॥
प्रतीच्यां पातु भूतेशो याम्ये बलिहरोऽवतु ।
प्राच्यां कलानिधिः पातु उदीच्यां मन्मथेश्वरः ॥८॥
आग्नेयां शिखिनो पातु नैर्ऋत्यां प्रतयोऽवतु ।
वायव्यां प्राणदः पातु ऐशान्यामीश्वरोऽवतु ॥९॥

॥ फलश्रुति ॥

इतीदं पञ्जरं देवि सर्वमन्त्र रहस्यकम् ।
पठनात् पाठनाद् देवि स्वयं सिद्धिश्वरो भवेत् ॥१॥
प्रातःकाले पठेद् यस्तु मुच्यते व्याधि बन्धनात् ।
भानुमध्यगतो यस्तु पठनात् धनवान भवेत् ॥२॥
सायंकाले प्रपठनात् मुच्यते नानासिद्धिमवाप्नुयात् ।
अर्धरात्रौ पठेद् यस्तु शुचिः तद्गतमानसः ॥३॥
साक्षाद् भैरवरूपोऽसौ जायते भुवि मानवः ।
पञ्जरं भूर्जपत्रेषु चाष्टगन्धेन लेखयेत् ॥४॥

धारयेत् कण्ठे च बाहौ शिरसि सदा यः पुमान् ।
तस्य सर्वार्थ सिद्धिः स्यात् नात्रकार्या विचारणा ॥५ ॥
तस्मात् पठेत् सदा भक्त्या पातकान्मुच्यते ध्रुवम् ।
शत्रुश्च स्तम्भनं याति भूतादि भय नाशनम् ॥६ ॥

॥ श्रीमहाकालभैरव कवचम् ॥

॥ श्रीदेव्युवाच ॥

देव देव महाबाहो भक्तानां सुखवर्द्धन ।
केन सिद्धिं ददात्याशु कालौ त्रैलोक्यमोहन ॥
तन्मे वद दयाधार! साधकाभीष्ट सिद्धये ।
कृपां कुरु जगन्नाथ! वद देव विदाम्बर ॥

॥ श्रीभैरवोवाच ॥

गोपनीयं प्रयत्नेन तत्वात्तत्त्वं परात्परम् ।
एष सिद्धिकरः सम्यक् किमथो कथयाम्यहम् ॥
महाकालमहं वन्दे सर्वसिद्धि प्रदायकम् ।
देव दानव गन्धर्व किन्नरैः परिसेवितम् ॥
कवचं तत्वदेवस्य पठनाद् घोर दर्शने ।
सत्यं भवति सान्निध्यं कवचस्तवनान्तरात् ॥
सिद्धिं ददाति सातुष्टा कृत्वा कवचमुत्तमम् ।
साम्राज्यत्वं प्रियं दत्त्वा पुत्रवत् परिपालयेत् ॥
कवचस्य ऋषिर्देवी कालिका दक्षिणा तथा ।
विराट् छन्दः सुविज्ञेयं महाकालस्तु देवता ॥
कालिका साधने चैव (इष्टसाधने) विनियोगः प्रकीर्तितः ।
ॐ श्मशानस्थो महारुद्रो महाकालो दिगम्बरः ॥
कपाल कर्तुका वामे शूलं खट्वाँग दक्षिणे ।
भुजङ्ग भूषिते देवि! भस्मास्थि मणिमण्डित ॥
ज्वलत्पावक मध्यस्थो भस्मशय्या व्यवस्थितः ।
विपरीतरतां तत्र कालिकां हृदयोपरि ॥

पेयं खाद्यं च चोष्यं च तौ कृत्वा तु परस्परम् ।
एवं भक्त्या यजेद्देवं सर्वसिद्धिः प्रजायते ॥
प्रणवं पूर्वमुच्चार्यं महाकालाय तत्पदम् ।
नमः पातु महामन्त्रः सर्वशास्त्रार्थ पारगः ॥
अष्टाक्षरो महामन्त्रः सर्वाशा परिपूरकः ।
सर्वपाप क्षयं याति ग्रहणं भक्त वत्सले ॥
कूर्चं द्वन्द्वं महाकाल प्रसीदेति पदद्वयम् ।
लज्जायुग्मं वह्निजाया स तु राजेश्वरी महान् ॥
मन्त्रग्रहण मात्रेण भवेत्सत्यं महाकविः ।
गद्य पद्यमयी वाणी गङ्गा निर्झरिता तथा ॥
तस्य नामतु देवेशि! देवाः गायन्ति भावुकाः ।
शक्तिबीज द्वयं दत्त्वा कूर्चं स्यात्तदनन्तरम् ॥
महाकालपदं दत्त्वा मायाबीज युगं तथा ।
कूर्चमेकं समुद्धृत्य महामन्त्रो दशाक्षरः ॥
राजस्थाने दुर्गमे च पातु मां सर्वतो मुदा ।
वेदादि वीजमादाय भगमान्तदनन्तरम् ॥
महाकालाय सम्प्रोच्य कूर्चं दत्त्वा च ठद्वयम् ।
ह्रींकार पूर्वमुद्धृत्य वेदादिस्तदनन्तरम् ॥
महाकालस्यान्त भागे स्वाहान्तमनुमुत्तमम् ।
धनं पुत्रं सदा पातु वन्धुदारा निकेतनम् ॥
पिंगलाक्षो मंजु युद्धे युद्धे नित्यं जयप्रदः ।
सम्भाव्यः सर्वदुष्टघ्नः पातु स्वस्थान वल्लभः ॥

॥ फलश्रुति ॥

इति ते कथितं तुभ्यं देवानामपि दुर्लभम् ।
अनेन पठनाद् देवी! विघ्ननाशो यथा भवेत् ॥
सम्पूजकः शुचिस्नातः भक्तियुक्तः समाहितः ।
सर्वव्याधि विनिर्मुक्तः वैरिमध्ये विशेषतः ।
महाभीमः सदापातु सर्वस्थान वल्लभम् ।
काली पार्श्वस्थितो देवः सर्वदा पातु मे मुखे ॥

पठनात् कालिका देवी पठेत् कवचमुत्तमम् ।
शृणुयाद्वा प्रयत्नेन सदानन्दमयो भवेत् ॥
श्रद्धयाऽश्रद्धयावापि पठनात् कवचस्य यत् ।
सर्वसिद्धिमवाप्नोति यद्यन्मनसि वर्तते ॥
बिल्वमूले पठेद्यस्तु पठनाद्कवचस्य यत् ।
त्रिसंध्यं पठनाद् देवि भवेन्नित्यं महाकविः ॥
कुमारीं पूजयित्वा तु यः पठेद् भावतत्परः ।
न किञ्चिद् दुर्लभं तस्य दिवि वा भुवि मोदते ॥
दुर्भिक्षे राजपीड़ायां ग्रामे वा वैरिमध्यके ।
यत्र यत्र भयं प्राप्तः सर्वत्र प्रपठेन्नरः ॥
तत्रतत्राभयं तस्य भवत्येव न संशयः ।
वामपार्श्वे समानीय शोभितांवर कामिनीम् ॥
श्रद्धयाऽश्रद्धया वापि पठनात्कवचस्य तु ।
प्रयत्नतः पठेद्यस्तु तस्य सिद्धिः करेस्थिता ॥
इदं कवचमज्ञात्वा कालं (कालीं) यो भजते नरः ।
नैव सिद्धिर्भवेत्ततस्य विघ्नस्तस्य पदे पदे ॥
आदौ वर्मं पठित्वा तु तस्य सिद्धिर्भविष्यति ॥

इस कवच से पाँच मंत्रों का ज्ञान होता है - (१) ॐ महाकालाय नमः (२) हूं हूं महाकाल प्रसीद प्रसीद ह्रीं ह्रीं स्वाहा (३) ह्रीं ह्रीं हूं महाकाल ह्रीं ह्रीं हूं (४) ॐ भू र्भुवः स्वः ऐं महाकालाय हूं स्वाहा (५) ह्रीं भू र्भुवः स्वः महाकालाय स्वाहा

॥इति रुद्रयामले महातन्त्रे महाकालभैरव कवचं सम्पूर्णम् ॥

॥ महाकालभैरवाष्टकम् ॥

देवराज सेव्यमान पापनांघ्रि पञ्कजं व्याल यज्ञसूत्रमिन्दुशेखरं कृपाकरम् ।
नारदादि योगिवृन्द वन्दितं दिगम्बरं काशिकापुराधिनाथ कालभैरवं भजे ॥१॥
भानुकोटि भास्वरं भवाब्धि तारकं परं नीलकण्ठमीप्सितार्थदायकं त्रिलोचनम् ।
काल कालमंबुजाक्षमक्षशूलमक्षरं काशिकापुराधिनाथ कालभैरवं भजे ॥२॥

शूलटंक पाशदण्ड पाणिमादि कारणं श्यामकायमादिदेवमक्षयं निरामयम् ।
भीमविक्रमप्रभुं विचित्र ताण्डव प्रियं काशिकापुराधिनाथ कालभैरवं भजे ॥३ ॥

भुक्ति मुक्ति दायकं प्रशस्त चारु विग्रह नितान्तभक्तवत्सलं समस्तलोकविग्रहम्।
विनिक्वणन्मनोज्ञहेम किंकिणीलसत्कटिं काशिकापुराधिनाथ कालभैरव भजे ॥४ ॥

धर्मसेतु पालकं त्वधर्ममार्ग नाशकं कर्मपाशमोचकं सुशर्मदायकं विभुम् ।
स्वर्णवर्ण शेषपाश शोभिताङ्ग मण्डलं काशिकापुराधिनाथ कालभैरवं भजे ॥५ ॥

रत्नपादुकाप्रभाभिराम पादयुग्मकं नित्यमद्वितीयमिष्ट दैवतं निरञ्जनम् ।
मृत्युदर्पनाशनं करालदंष्ट्र मोक्षणं काशिकापुराधिनाथ कालभैरवं भजे ॥६ ॥

अट्टहास भिन्नपद्मजाण्डकोश सन्ततिं, दृष्टिपात नष्टपापजालमुग्रशाशनम् ।
अष्टसिद्धिदायकं कपालमालिकन्धरं काशिकापुराधिनाथ कालभैरवं भजे ॥७ ॥

भूतसंघ-नायकं विशाल कीर्तिदायकं काशिवास लोकपुण्य पापशोधकं विभुम्।
नीतिमार्ग कोविन्दं पुरातनं जगत्पतिं काशिकापुराधिनाथ कालभैरवं भजे ॥८ ॥

कालभैरवाष्टकं पठन्ति ये मनोहरं ज्ञानमुक्तिसाधनं विचित्रपुण्यवर्द्धनम् ।
शोकमोह दैन्यलोभ-कोपतापनाशनं ये प्रयान्ति कालभैरवांघ्रि सन्निधिं ध्रुवम्॥९ ॥

॥इति श्रीमच्छंकराचार्य विरचितं कालभैरवाष्टकं सम्पूर्णम् ॥

॥ श्री तीक्ष्णदंष्ट्रकालभैरवाष्टकम् ॥

यं यं यं यक्षरूपं दशदिशि विदितं भूमिकम्यायमानं ।
सं सं संहारमूर्ति शिरमुकुटजटा शेखरं चन्द्रबिम्बम् ॥
दं दं दं दीर्घ कायं विकृतनख मुखं त्यूर्व्वरोमं करालं ।
पं पं पं पापनाशं प्रणमत सततं भैरवं क्षेत्रपालम् ॥१ ॥

रं रं रं रक्तवर्ण कटकटिततनुं तीक्ष्णदंष्ट्राकरालं ।
घं घं घं घोष घोषं घघघघ घटितं घर्घरं घोरनादम् ॥
कं कं कं कालपाशं धृकधृकधृकितं ज्वालितं कामदाहं ।
तं तं तं दिव्यदेहं प्रणमत सततं भैरवक्षेत्रपालम् ॥२ ॥

लं लं लं लं वदन्तं लललल ललितं दीर्घजिह्वाकरालं ।
धुं धुं धुं धूम्रवर्ण स्फुट विकट मुखं भास्करं भीमरूपम् ॥
रुं रुं रुं रुण्डमालं रवितम नियतं ताम्रनेत्रं करालं ।

नं नं नं नग्नरूपं प्रणमत सततं भैरवं क्षेत्रपालम् ॥३॥
वं वं वं वायुवेगं नतजनदमिनं ब्रह्मवारंपरं तं ।
खं खं खं खड्गहस्तं त्रिभुवन निलयं भास्करं भीरु रूपम् ॥
चं चं चं चं चलित्वा चलचल चलित च्चालितं भूमिचक्रम् ।
मं मं मं मायिरूपं प्रणमत सततं भैरवं क्षेत्रपालम् ॥४॥
शं शं शं शङ्खहस्तं शशिकरधवलं मोक्ष सम्पूर्णतेजं ।
मं मं मं मं महान्तं कुलमकुलकुलं मन्त्रगुप्तं सुनित्यम् ॥
यं यं यं भूतनाथं किलकिलकिलितं बालकेलिप्रधानं ।
अं अं अं अन्तरिक्षं प्रणमेत सततं भैरवं क्षेत्रपालम् ॥५॥
खं खं खं खड्गभेदं विषममृतमयं कालकालं करालं ।
क्षं क्षं क्षं क्षिप्रवेगं दहदहदहनं तप्तसन्दीप्यमानम् ॥
हौं हौं हौंकार नादं प्रकटित गहणं गर्जितैर्भूमिकम्पं ।
वं वं वं बाललीलं प्रणयत सततं भैरवं क्षेत्रपालम् ॥६॥
सं सं सं सिद्धियोगं सकल गुणधनं देव देवं प्रसन्नं ।
पं पं पं पद्मनाभं हरिहर नयनं चन्द्रसूर्याग्निनेत्रम् ॥
ऐं ऐं ऐश्वर्यनाथं सततभयहर पूर्वदेव स्वरूपं ।
रौं रौं रौं रौद्ररूपं प्रणमत सततं भैरव क्षेत्रपालम् ॥७॥
हं हं हं हंसहासं हसितकलहकं मुक्तयोगाट्टहास ।
धं धं धं येत्र रूपं शिरमुकुटजटा बन्ध बन्धागृहस्तम् ।
टं टं टङ्कारनादं त्रिदशलटलटं कामगर्वापहारं ।
भृं भृं भृं भूतनाथं प्रणमत सततं भैरवं क्षेत्रपालम् ॥८॥
इत्येवं कामयुक्तं प्रपठति नियतं चाष्टकं भैरवस्य ।
निर्विघ्नं दुःखनाशं सुरभयहरणं डाकिनी शाकिनीनाम् ॥
नश्येद्धि व्याघ्रसर्प वहवहसलिलेराज्यशं सस्य शून्यं ।
सर्वानश्यन्ति दूरं विपदइति भृशं चिन्तमात्सर्व सिद्धम् ॥९॥
भैरवस्याष्टकमिदं षडमासं यः पठेन्नरः ।
स याति परमं स्थानं यत्र देवो महेश्वरः ॥
सिन्दूरारुणगात्रं च सर्वजन्म विनिर्मितम् ।
मुकुटाग्रचधरं देवं भैरवं प्रणमाम्यहम् ॥

॥ इति श्री तीक्ष्णदंष्ट्रकालभैरवाष्टकम् समाप्तम् ॥

॥ अथ कालभैरव वटुकभैरव प्रयोग:॥

यह प्रयोग भैरव की प्रसन्नता व शत्रूनाश एवं दिग्बंधन हेतु विशेष है अत: भैरव का पूजन, बलिप्रदान कर्म पूजा पूर्णरूप से विधिवत् करें।

विनियोग: - **अथ वटुकभैरव स्तोत्रस्य सप्तऋषिः मात्रिका छन्दः श्री वटुक -काल भैरवो देवता ममेप्सित सिद्ध्यर्थं जपे विनियोगः।**

ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्। शोकदु:ख क्षयकरं निरंजनं निराकारं नारायणं भक्तिपूर्ण त्वं महेशं सर्वकाम सिद्धिर्भवेत्। कालभैरव भूषण वाहनं कालहंता रूपं च भैरव गुनी महात्मनः योगीनां महादेव स्वरूपं सर्व सिद्ध्येत्। ॐ कालभैरौ वटुकभैरौ भूतभैरो महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

ॐ त्वं ज्ञानं त्वं ध्यानं त्वं योगं त्वं तत्वं त्वं वीजं महात्मानं त्वं शक्ति शक्तिधारणं त्वं महादेव स्वरूपं सर्वसिद्धिर्भवेत्। ॐ कालभैरौ वटुकभैरौ भूतभैरो महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

ॐ कालभैरव त्वं नागेश्वरं नागहारं च त्वं वन्दे परमेश्वरं, ब्रह्मज्ञानं ब्रह्मध्यानं ब्रह्मयोगं ब्रह्मतत्वं ब्रह्मवीजं महात्मनः। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

त्रिशूलचक्र गदापाणिं शूलपाणि पिनाकधृक्। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

ॐ कालभैरव त्वं विनागन्धं विनाधूपं विनादीपं सर्वशत्रुविनाशनं सर्वसिद्धिर्भवेत्। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धर्भवेत्।

विभूति भूति नाशाय दुष्टक्षयकारकं महाभैरवे नमः सर्वदुष्ट विनाशनं सेवक सर्वसिद्धिं कुरु। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

ॐ कालभैरव त्वं महाज्ञानी महाध्यानी महायोगी महाबली तपेश्वरी देहि मे सिद्धिं सर्वं त्वं भैरवं भीमनादं च नादनम्। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

ॐ आं ह्रीं ह्रीं ह्रीं अमुकं मारय मारय उच्चाटय उच्चाटय मोहय मोहय वशं कुरु कुरु सर्वार्थकस्य सिद्धिरूपं त्वं महाकाल काल भक्षणं महादेव स्वरूप त्वं सर्व सिद्धियेत्। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव

महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

ॐ कालभैरव त्वं गोविन्द गोकुलानन्द गोपालं गोवर्द्धनम् धारणं त्वं वन्दे परमेश्वरं नारायणं नमस्कृत्य त्वं धामशिवरूपं च साधकं सर्व सिद्धयेत्॥ ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

ॐ कालभैरव त्वं राम लक्षमणं त्वं श्रीपति सुन्दरं त्वं गरुड वाहनं त्वं शत्रुहंता च त्वं यमस्य रूपं सर्वकार्य सिद्धिं कुरु। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

ॐ कालभैरव त्वं ब्रह्मा विष्णु महेश्वरं त्वं जगत्कारणं सृष्टि स्थिति संहारकारकं रक्तबीज महासैन्यं महाविद्या महाभयविनाशनम्। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

ॐ कालभैरव त्वं आहार मद्य मांसं च सर्व दुष्ट विनाशनं साधकं सर्वसिद्धप्रदा। ॐ आं ह्रीं ह्रीं ह्रीं अघोर अघोर महाअघोर सर्वअघोर भैरव काल। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

ॐ आं ह्रीं ह्रीं ह्रीं ॐ आं क्लीं क्लीं क्लीं ॐ आं क्रीं क्रीं क्रीं ॐ ह्रीं ह्रीं ह्रीं रुं रुं रुं क्रूं क्रूं क्रूं मोहन सर्व सिद्धिं कुरु कुरु ॐ आं ह्रीं ह्रीं ह्रीं अमुकं उच्चाटय उच्चाटय मारय मारय प्रूं प्रूं प्रें प्रें खं खं दुष्टान् हन हन अमुकं फट् स्वाहा। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

ॐ वटुक वटुक योगं च वटुकनाथ महेश्वरः वटुकं वटवृक्षै वटुकं प्रत्यक्ष सिद्धियेत्। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

ॐ कालभैरव श्मशान भैरव कालरूप कालभैरव मेरो वैरी तेरो आहार रे काढि करेजा चखन करो कटकट। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

ॐ नमो हंकारी वीर ज्वालामुखी तूं दुष्टन वधकरो विना अपराध जो मोहि सतावे तेकर करेजा छिदिपरै मुखवाट लोहू आवे को जाने चन्द्र सूर्य जाने की आदि पुरुष जाने कामरूप कामाक्षा देवी त्रिवाचा सत्यफुरो मन्त्र ईश्वरो वाचा। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता

सर्वसिद्धिर्भवेत्।

ॐ कालभैरव त्वं डाकिनी शाकिनी भूत पिशाचश्च सर्वदुष्ट निवारणं कुरु कुरु साधकानां रक्ष रक्ष देहि मे हृदये सर्व सिद्धिं त्वं भैरव भैरवीभ्यो त्वं महाभय विनाशनं कुरु। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

ॐ आं ह्रीं पच्छिम दिशा में सोने का मठ सोने का किवाड सोने का ताला सोने की कुंजी सोने का घण्टा सोने की सांकुली पहिली सांकुली अठारह कुल नाग के बाँधों दूसरी साँकुली अठारह कुल जाति के बौधों तीसरी सांकुली वैरि दुष्टन को बाँधों चौथी साँकुली डाकिनी शाकिनी के बाँधों पाँचवी सांकुली भूतप्रेत को बाँधो जरती अगिन बाँधों जरता मसान बांधों थल जल बांधो बांधो अम्मरताई जहां भेजूं तहां जाई जेहि का वांधि लावो वो तेहि का वांध लावो वाचा चूकै उमा सूखे श्री बावन वीर ले जाय सात समुन्दर तीर त्रिवाचा सत्य मन्त्र फुरो ईश्वरो वाचा। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

ॐ आं ह्रीं उत्तर दिशा में रूपे का मठ रूपे का किवार रूपे का ताला रूपे की कुंजी रूपे का घण्टा रूपे की सांकुली पहिली सांकुली अठारह कुल नाग बाँधों दूसरी साँकुली अठारह कुल जाति को बांधूं तीसरी सांकुली वैरि दुश्मन को बाँधों चौथी साँकुली डाकिनी शाकिनी को बाँधों पाँचवी सांकुली भूतप्रेत को बांधो जलत अग्नि बौधों जलत मसान बाँधो जल बाँधो थल बाँधो बाँधो अम्बरताई जहां भेजूं तहां जाई जेहि का वांधि मंगावो तेहि का वांधि लावो वाचा चूकै उमा सूखै श्री बावन वीर ले जाय सात समुन्दर तीर त्रिवाचा फुरो मन्त्र ईश्वरी वाचा। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

ॐ आं ह्रीं पूरब दिशा में तामे का मठ तामे का किवार तामे का ताला तामे की कुंजी तामे का घण्टा तामे की सांकुली पहिली सांकुली अठारह कुल नाग को बाँधूँ दूसरी साँकुली अठारह कुल जाति को बांधू तीसरी सांकुली वैरि दुष्टन को बाँधूं चौथी साँकुली डाकिनी शाकिनी को बाँधूं पाँचवी सांकुली भूतप्रेत को बाँधूं जलत अग्नि बाँधूं जलत मसान बांधूं जल बाँधो थल बाँधो बाँधो अम्बरताई जहां भेजूं तहां जाई जेहि का वांधि मंगावो तेहि वांधि लावो वाचा चूकै उमा सूखै श्री बावन वीर ले जाय सात समुन्दर

तीर त्रिवाचा फुरो मन्त्र ईश्वरो वाचा। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

ॐ आं ह्रीं दक्षिण दिशा में अस्थि का मठ अस्थि का किवार अस्थि का ताला अस्थि की कुंजी अस्थि का घण्टा अस्थि की सांकुली पहिली सांकुली अठारह कुल नाग को बाँधो दूसरी साँकुली अठारह कुल जाति को बांधो तीसरी सांकुली वैरि दुष्टन को बाँधो चौथी साँकुली डाकिनी शाकिनी को बाँधो पाँचवीं सांकुली भूतप्रेत को बाँधो जलत अग्नि बांधो जलत मसान बांधो जल बाँधो थल बाँधो बाँधो अम्बरताई जहां भेजूं तहां जाई जेहि वांधि मंगावो तेहि का वांधि लावो वाचा चूकै उमा सूखे श्री बावन वीर ले जाय सात समुन्दर तीर त्रिवाचा फुरो मन्त्र ईश्वरो वाचा। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

ॐ कालभैरव त्वं आकाशं त्वं पातालं त्वं मृत्युलोकं चतुर्भुजं चतुर्मुखं चतुर्बाहु शत्रुहन्ताश्च त्वं भैरव भक्तिपूर्ण कलेवरम्। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

ॐ कालभैरव त्वं सहस्त्रमुख सहस्त्र-जिह्वा सहस्त्र-वाहनं सहस्त्र-दुष्ट-भक्षितं त्वं सेवकस्य सहस्त्र कामना सिद्धि करोसि। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

ॐ कालभैरव तुम जहाँ जाहु जहाँ दुश्मन बैठा होय तो बैठे को मारो चलत होय तो चलते को मारो सोवत होय तो सोते को मारो पूजा करत होय तो पूजा में मारो जहां होय तहां मारो ब्याघ्र लै भैरव दुष्ट को भक्षौ सर्प लै भैरव दुष्ट को डसो खड्ग से मारो भैरव दुष्ट को शिर गिरैबान से मारो दुष्टन करेजा फटै त्रिशूल से मारो शत्रुछिदि परै मुख वाट लोहू आवे को जाने चन्द्र सूरज जाने आदि पुरुष जानै कामरूप कामाक्षा देवी त्रिवाचा सत्य फुरो मन्त्र ईश्वरो वाचा। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

ॐ कालभैरव त्वं वाचा चूकै उमा सूखै दुश्मन मरै अपने घर में दुहाई कालभैरव की जोह मार वचन झूठा होय तो ब्रह्मा के कपाल टूटै शिवजी के तीनों नेत्र फूटै मेरी भक्ति गुरु की शक्ति फुरो मन्त्र ईश्वरो वाचा। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

ॐ कालभैरव त्वं भूतस्य भूतनाथश्च भूतात्म भूत भावनः त्वं भैरव सर्व

सिद्धिं कुरु कुरु। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

ॐ कालभैरव त्वं ज्ञानी त्वं ध्यानी त्वं योगी त्वं जंगम स्थावरं त्वं सेवित सर्वकाम सिद्धिर्भवेत्। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

ॐ कालभैरव त्वं वन्दे परमेश्वरं ब्रह्मरूपं प्रसन्नो भव गुनि महात्मानां महादेव स्वरूपं सर्वसिद्धिर्भवेत्॥

(ॐ कालभैरव वटुकभैरव योग विख्यातः गोपालेन संकीर्तितम्। गोरखनाथ स्वयं श्रुतं सर्व कार्येषु कामदम्)॥ इति॥

॥ शत्रुसंहाराष्टक भैरव स्तोत्रम् ॥

यह स्तोत्र प्रबल शत्रुसंहार कारक है। जिस महात्मा ने इसकी रचना अपने शत्रुओं के नाश हेतु की उसका प्रबल प्रभाव आज भी १५० वर्षों से है। शत्रुओं का नाश हुआ एवं आज तक वह गाँव वीरान है। यह स्तोत्र बहुत उग्र है अत: दीपदान, बलिदान प्रयोग करके नित्य शांति पाठ करना चाहियें।

हन-हन दुष्टन को, प्राणनाथ हाथ गहि, पटकि मही-तल मिटाओ सब शोक को।
हमें जो सतावे जन, काम-मन-वाक्यन ते , बार बार तिनको पठाओ यमलोक को ।
वाकोघर मसान करौ संसत श्रृगाल रोवैं, रुधिर कपाल भरो उर शूल चोक को ।
भैरो महाराज! मम काज आज एही करौ, शरण तिहारो वेग माफ करो चूक को ॥१॥

भल-भल करे ओ विपक्षी पक्ष, आपनो टरे न टारे, काहू के त्रिशूल दण्ड रावरो ।
घेरि-घेरि छलिन छकाओ, छिति छल माहिं बचै नाहीं, नाती-पूत सहित स पाँवरो।
हेरि-हेरि निन्दक सकल निरमूल करो, चूसि लेहु रुधिर रस धारो शत्रु सागरो ।
झपटि-झपटि झूमि-झूमि काल दण्ड मारो, जाहि यमलोक वैरि वृन्द को विदा करो ॥२॥

झपटि के सारमेय पीठ पै सवार होहु, दपटि दबाओ तिरशूल, देर ना करो ।
रपटि-रपटि रहपट एक मारो, नाथ! नाक से रुधिर गिरै, मुण्ड से व्यथा करो ।
हरषि निरखि यह काम मेरो, जल्दी करो सुनि के कृपानिधान भैरोजी! कृपा करो ।
हरो धन-दार-परिवार, मारो पकरिके, बचे सौ बहि जाइ नदी नार जा भरो ॥३॥

जाहि जर-मूर से रहे न वाके बंस कोई, रोइ-रोइ छाती पीटै, करै हाइ-हाइ के ।
रोग अरु दोष कर, प्राणी विललाइ, वाके कोई न सहाइ लागै, मरै धाइ-धाइ के ।
खलन खधारि, दण्ड देहु दीनानाथ! मैं तो परम अनाथ, दया करो आइ-आइ के ।

जनम-जनम गुन गाइ के बितैहों दिन, भैरो महाराज! वैरी मारो, जाइ-जाइ के ॥४॥
रात-दिन पीरा उठै, लोहू कटि-कटि गिरे, फारि के करेजा ताके बंस में समाइ जा।
रिरिकि-रिरिकि मरे, काहू को उपाय कछू लागै नाहीं एको जुक्ति, हाड़ माँस खाइ जा।
फिरत-फिरत फिरि आवै, चाहे चारों ओर यन्त्र-मन्त्र-तन्त्र को प्रभाव विनसाइ जा।
भैरो महाराज! मम काज आज एहि करौ, शत्रुन के मारि दुःख दुसह बढ़ाइ जा ॥५॥
झट-झट पेट चीर,चीर के बहाइ देह, भूत औ पिशाच पीवैं रुधिर अघाइ कै।
रटि-रटि कहत सुनत नाहीं, भूतनाथ!, तुम बिनु कवन सहाय करै आइ कै।
भभकि-भभकि रिपु तन से रुधिर गिरे, चभकि-चभकि पिओ कुकुर लिआइ कै।
हहरि-हहरि हिआ फाटै सब शत्रुन को, सुनहु सवाल हाल कासो कहैं जाइ कै।
जरै ज्वर-जाल-काल भृकुटि कराल करो, शत्रुन की सेखि देखि जात नहीं नेक हूँ ॥६॥
तेरो है विश्वास, त्रास एको नहीं काहू केर लागत हमारे, कृपा-दृष्टि कर देख हूँ।
भैरो! उनमत्त ताहि कीजिए, उनमत्त आज गिरै जम-ज्वाल-नदी जल्दी से फेंक हूँ।
यम कर दूत जहाँ भूत-सम दण्ड मारै, फूटे शिर, टूटे हाड़, बचै नाहिं एक हूँ।
हवकि-हवकि मांस काटि दाँतन से, बोटि-बोटि वीरन के, नवो नाथ खाइ जा ॥७॥
भूत- वेताल ववकारत, पुकार करै, आज नर-रुधिर पर वहै आइ जा।
डाकिनी अनेक डडकारैं, सब शत्रुन के रुधिर कपाल भरि-भरि के पिआइ जा।
भैरो भूतनाथ! मेरो काज आज एहि करो, दुर्जन के तन-धन अबहीं नसाइ जा।
शत्रुन संहार आज, अष्टक बनाए आज, षट-जुग ग्रह शशि सम्वत में सजि कै ॥८॥
फागुन अजोरे पाख, वाण तिथि, सोमवार, पढ़त जो प्रातः काल उठि नींद तजि कै।
शत्रुन संहार होत, आपन सब काज होत, सन्तन सुतार होत, नाती-पूत रजि कै।
कहै गुरुदत्त तीनि मास, तीनि साल महँ, शत्रु जमलोक जैहै बचिहै न भजि कै ॥९॥

॥ क्षेत्रपालमन्त्रप्रयोग:॥

नवाक्षर मन्त्र – ॐ क्षं क्षेत्रपालाय नमः।

विनियोग: – अस्य क्षेत्रपालमन्त्रस्य ब्रह्मा ऋषिः। गायत्री छन्दः। क्षेत्रपालो देवता। क्षं बीजम्। लः शक्तिः। सर्वेष्टसिद्धये जपे विनियोगः।

ऋष्यादिन्यास: – ॐ ब्रह्मऋषये नमः शिरसि। ॐ गायत्री छन्दसे नमः मुखे। ॐ क्षेत्रपालदेवतायै नमः हृदि। ॐ क्षं बीजाय नमः गुह्ये। ॐ लः शक्तये नमः पादयोः। ॐ विनियोगाय नमः सर्वाङ्गे।

करन्यास: – ॐ क्षां अंगुष्ठाभ्यां नमः। ॐ क्षीं तर्जनीभ्यां नमः। ॐ क्षूं मध्यमाभ्यां नमः। ॐ क्षैं अनामिकाभ्यां नमः। ॐ क्षौं कनिष्ठिकाभ्यां नमः। ॐ क्षः करतलकरपृष्ठाभ्यां नमः।

हृदयादिषडङ्गन्यास: – ॐ क्षां हृदयाय नमः। ॐ क्षीं शिरसे स्वाहा। ॐ क्षूं शिखायै वषट्। ॐ क्षैं कवचाय हुम्। ॐ क्षौं नेत्रत्रयाय वौषट्। ॐ क्षः अस्त्राय फट्।

इस प्रकार ध्यान कर मूर्ति या यन्त्र का दूधधारा व जलधारा से शोधन कर यन्त्र की आवरण पूजा करें।

ध्यानम् –

ॐ नीलांजनादिनिभमूर्द्धापिशंगकेशं
वृत्तोग्रलोचनमुदात्तगदा कपालम्।
आशांबरं भुजगभूषणमुग्रदंष्ट्रं
क्षेत्रेशमद्भुततनुं प्रणमामि देवम्॥

प्रथमावरणम् – षट्कोण केसरेषु आग्नेय्यादि चतुर्दिक्षु मध्ये दिक्षु च – **ॐ क्षां हृदयाय नमः हृदय श्री पादुकां पूजयामि तर्पयामि नमः। इति सर्वत्र॥१॥ ॐ क्षीं शिरसे स्वाहा। शिरः श्री पा०। ॐ क्षूं शिखायै वषट्। शिखाश्री पा०। ॐ क्षैं कवचाय हुम्। कवचश्री पा०। ॐ क्षौं नेत्रत्रयाय वौषट्। नेत्रत्रय श्री पा०। ॐ क्षः अस्त्राय फट्। अस्त्रश्री पा०।**

तरह षडङ्गों का पूजन करें। तथा पुष्पाञ्जलि प्रदान करें –

ॐ अभीष्ट सिद्धिं मे देहि शरणागतवत्सल।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्॥

द्वितीयावरणम् - (अष्टदलेषु) - ॐ अग्निलाख्याय नमः। अग्निलाख्यश्री पा०। ॐ अग्निकेशाय नमः। अग्निकेशश्री पा०। ॐ करालाय नमः। करालश्री पा०। ॐ घण्टारवाय नमः। घण्टारवश्री पा०। ॐ महाकोपाय नमः। महाकोपश्री पा०। ॐ पिशिताशनाय नमः। पिशिताशनश्री पा०। ॐ पिङ्गलाक्षाय नमः। पिङ्गलाक्षश्री पा०। ॐ ऊर्द्धकेशाय नमः। ऊर्द्धकेशश्री पा०।

क्षेत्रपाल यन्त्रम्

पुष्पाञ्जलि देवें - अभीष्टसिद्धिं........द्वितीयावरणार्चनम् ॥

तृतीयावरणम् - (परिधि में) इन्द्रादि दशदिक्पालों का एवं चतुर्थावरणम् में उनके वज्रआयुधों का पूजन करें व बलिप्रदान करें।

पुष्पाञ्जलि देवें - अभीष्टसिद्धिं........ तृतीयावरणार्चनम् ॥ ॐ पूजितास्तर्पिता सन्तु से जल छोड़ें।

ॐ क्षं क्षेत्रपालाय नमः इस मन्त्र से माष बलि प्रदान करें। अर्धरात्रि में पुनः बलि देवें। इस मन्त्र का पुरश्चरण १ लाख जप का है। तथा दशांश हवन, तर्पण कर ब्राह्मण भोजन करायें। और कहें **क्षेत्रपालः प्रसन्नो भवति।**

तथा च लक्षमेकं जपेन्मन्त्रं जुहुयात्तद्दशांशतः। चरुणा घृतसिक्तेन ततः क्षेत्रे समर्चयेत्। बलिनानेन संतुष्टः क्षेत्रपालः प्रयच्छति। कान्तिमेधा बलारोग्यतेजः पुष्टियशः श्रियः।

॥इति क्षेत्रपालनवाक्षरमन्त्र प्रयोगः॥

॥ आरती श्री वटुकभैरव की॥

आरती कीजै श्री वटुकभैरव की । विपदा विदारण भक्त हृदय की ॥
हाथ त्रिशूल गले मुण्डमाला । डमरू खड्ग त्रिनेत्र विशाला ॥
राजत चन्द्रकला शिवनीकी । आरती कीजै श्री वटुकभैरव की ॥१ ॥
क्षेत्रपाल श्मशान के वासी । व्यालो पवीत हाथ यम फांसी ॥
शोभित रूप दिगम्बर नीकी । आरती कीजै श्री वटुकभैरव की ॥२ ॥
जयशङ्कर प्रियबन्धन हारी । बलिमुकनाथ शत्रुलयकारी ॥
वाहन स्वान जगत के फीकी । आरती कीजै श्री वटुकभैरव की ॥३ ॥
व्याघ्र चर्म पहिरत योगिनपति । काशी द्वारपाल भैरव पति ॥
पशुपति भिक्षुक मेष बटुक की । आरती कीजै श्री वटुकभैरव की ॥४ ॥
मूसल दक्षिण अङ्ग बहन्ता । खप्परधारी योगिन कन्ता ॥
अष्टमूर्ति भूधर योगी की । आरती कीजै श्री वटुकभैरव की ॥५ ॥
दिगम्बर वटुकेश कृपाला । काल शमन कङ्काल कृपाला ॥
नाश करत तुम नित दुष्टन की । आरती कीजै श्री वटुकभैरव की ॥६ ॥
वटुकभैरव की जो आरती गावै । व्याघ्र चर्म रुद्राक्ष चढ़ावै ॥
रक्षा करत प्रभु ताके घर की । आरती कीजै श्री वटुकभैरव की ॥७ ॥
ब्रह्मदेव यह आरती ग ावत । बिल्व पत्र फल लै नित ध्यावत ॥
आरती करत कालभैरव की । आरती कीजै श्री वटुकभैरव की ॥८ ॥

卐 इति श्रीभैरव तन्त्रम् सम्पूर्णम् 卐

❀❀❀

॥ मिश्रतन्त्रम् ॥

॥ पितृस्तोत्रम् ॥

नमस्येऽहं पितृभाद्धेये वसन्ताधि देवताः ।
दैवेरपि तर्प्यन्ते ये च भाद्धै स्वधोत्तरै ॥१॥
नमस्येऽहं पितृन्स्वर्गे ये तर्प्यन्ते महर्षिभिः ।
श्राद्धैर्मनोमयैर्भत्क्या भुक्तिमुक्तिमभीप्सुभिः ॥२॥
नमस्येऽहं पितृन्स्वर्गे सिद्धाः संतर्पयन्ति यान् ।
श्राद्धेषु दिव्यैः सकलै-रुपहारैरनुत्तमैः ॥३॥
नमस्येऽहं पितृन्भक्त्यायेऽर्च्यन्ते गुह्यकैरपि ।
तन्मयत्वेन वाञ्छाद्धि-र्ऋद्धिमात्यंतिकीं पराम् ॥४॥
नमस्येऽहं पितृन्मर्त्यैरर्च्यन्ते भुवि ये सदा ।
श्राद्धेषु श्रद्धयाभीष्टलोकप्राप्ति प्रदायिनः ॥५॥
नमस्येऽहं पितृन् विप्रैरर्च्यन्ते भुवि ये सदा ।
वाञ्छिताभीष्ट-लाभाय प्राजापत्यप्रदायिनः ॥६॥
नमस्येऽहं पितृन् ये वै तर्प्यतेऽरण्य वासिभिः ।
वन्यैः श्राद्धैर्यताहारै-स्तपोनिर्धूतकिल्विषैः ॥७॥
नमस्येऽहं पितृन् विप्रैर्नैष्टिक ब्रह्मचारिभिः ।
ये संयतात्मभिर्नित्यं संतर्प्यन्ते समाधिभिः ॥८॥
नमस्येऽहं पितृन् श्राद्धै राजन्यास्तर्पयंति यान् ।
कव्यैरशेपैर्विधिवल्लोकत्रय फल प्रदान् ॥९॥
नमस्येऽहं पितृन्वैश्यैरर्च्यन्ते भुवि ये सदा ।
स्वकर्माभिरतैर्नित्यं पुष्पधूपान्नवारिभिः ॥१०॥
नमस्येऽहं पितृन् श्राद्धैर्ये शूद्रैरपि भक्तितः ।
संतृप्यन्ते जगत्यत्र नाम्ना ज्ञाताः सुकालिनः ॥११॥
नमस्येऽहं पितृन् श्राद्धैः पाताले ये महासुरैः ।
संतर्प्यन्ते स्वधाहारैस्त्यक्तदंभमदैः सदा ॥१२॥

नमस्येऽहं पितृन् श्राद्धैरर्च्यन्ते ये रसातले ।
भोगैरशेषैर्विधिवन्नागैः कामानभीप्सुभिः ॥१३॥
नमस्येऽहं पितृन् श्राद्धैः सर्पैः संतर्पितान् सदा ।
तत्रैव विधिवन्मंत्र भोगसंपत्समन्वितैः ॥१४॥
पितृन्नमस्ये निवसन्ति साक्षाद्ये देवलोके च तथांतरिक्षे ।
महीतले ये च सुरादिपूज्यास्ते मे प्रयच्छंतु मयोपनीतम् ॥१५॥
पितृन्नमस्ये परमात्मभूता ये वै विमाने निवसंतिमूर्ताः ।
यजन्ति यानस्तमलै र्मनोभिर्योगीश्वराः क्लेशविमुक्ति हेतून् ॥१६॥
पितृन्नमस्ये दिवि ये च मूर्ताः स्वधाभुजः काम्यफलाभिसंधौ ।
प्रदानसक्ताः सकलेप्सिताना विमुक्तिदा येऽनभिसंहितेषु ॥१७॥
तृप्यंतु तेऽस्मिन् पितरः समस्ता इच्छावतां ये प्रदिशंति कामान् ।
सुरत्वमिन्द्रत्व मतोऽधिकं वा सुतान् पशून् स्वानि बलं गृहाणि ॥१८॥
सोमस्य ये रश्मिषु येऽर्कबिम्बे शुक्ले विमाने च सदा वसंति ।
तृप्यन्तु तेऽस्मिन् पितरोऽन्नतोयैंर्गधादिना पुष्टिमितो व्रजंतु ॥१९॥
येषां हुतेऽग्नौ हविषा च तृप्तिर्ये भुञ्जते विप्रशरीरभाजः ।
ये पिण्डदानेन मुदं प्रयांति तृप्यन्तु तेऽस्मिन् पितरोऽन्नतोयैः ॥२०॥
ये खड्गिमांसेन सुरैरभीष्टैः कृष्णैस्तिलैर्दिव्यमनोहरैश्च ।
कालेन साकेन महर्षिवर्यैः संप्रीणितास्ते मुदमत्र यान्तु ॥२१॥
कव्यान्यशेषाणि च यान्यभीष्टान्यतीव तेषाममरार्चितानाम् ।
तेषां तु सान्निध्यमिहास्तु पुष्पगंधान्नभोज्येषु मया कृतेषु ॥२२॥
दिने दिने ये प्रतिगृह्णतेऽर्च्चां मासान्तपूज्या भुवि येऽष्टकासु ।
ये वत्सरान्तेऽभ्युदये च पूज्याः प्रयान्तु ते मे पितरोऽत्र तृप्तिम् ॥२३॥
पूज्या द्विजानां कुमुदेंदुभासो ये क्षत्रियाणां च नवार्कवर्णाः ।
तथा विशां ये कनकावदाता नीलीनिभाः शूद्रजनस्य ये च ॥२४॥
तेऽस्मिन् समस्ता मम पुष्पगंधधूपान्नतोयादिनिवेदनेन ।
तथाग्निहोमेन च यांतु तृप्तिं सदा पितृभ्यः प्रणतोऽस्मि तेभ्यः ॥२५॥
ये देवपूर्वाण्यतितृप्ति हेतोरश्नंति कव्यानि शुभाहुतानि ।
तृप्ताश्च ये भूतिसृजो भवंति तृप्यन्तु तेऽस्मिन् प्रणतोऽस्मि तेभ्यः ॥२६॥

रक्षांसि भूतान्यसुरांस्तथोग्रान्निर्णाशयन्तस्त्वशिवं प्रजानाम् ।
आद्याः सुराणाममरेश पूज्यास्तृप्यन्तु तेऽस्मिन्प्रणतोऽस्मि तेभ्यः ॥२७॥
अग्निष्वात्ता बर्हिषदा आज्यपाः सोमपास्तथा ।
व्रजन्तु तृप्तिं श्राद्धेऽस्मिन् पितरस्तर्पितामयां ॥२८॥
अग्निष्वात्ताः पितृगणाः प्राचीं रक्षन्तु मेदिशम् ।
तथा बर्हिषदः पान्तु याम्यायां पितरस्तथा ॥२९॥
प्रतीचीमाज्यपास्तद्वदुदीचीमपि सोमपाः ।
रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः ॥३०॥
सर्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे ।
विश्वो विश्वभुगाराध्यो धर्म्यो धन्यः शुभाननः ॥३१॥
भूतिदो भूतिकृद्भूतिः पितृणां ये गणा नव ।
कल्याणः कल्पतां कर्त्ता कल्पः कल्पतराश्रयः ॥३२॥
कल्पताहेतुरनघः षडिमे ते गणाः स्मृताः ।
वरो वरेण्यो वरदः पुष्टिदस्तुष्टिदस्तथा ॥३३॥
विश्वपाता तथा धाता सप्तैवैते गणास्तथा ।
महान् महात्मा महितो महिमा वान्महाबलः ॥३४॥
गणाः पंच तथैवेते पितृणां पापनाशनाः ।
सुखदो धनदश्चान्यो धर्मदोऽन्यश्च भूतिदः ॥३५॥
पितृणां कथ्यते चैतत्तथा गणचतुष्टयम् ॥
एकविंशत्पितृ गणा यैर्व्याप्तमखिलं जगत् ॥३६॥
ते मेऽनुतृप्तास्तुष्यं तु यच्छन्तु च सदा हितम् ॥

(सप्तार्चिस्तवम्)

अमूर्त्तानां च मूर्त्तानां पितृणां दीप्ततेजसाम् ॥३७॥
नमस्यामि सदा तेषां ध्यानिनां दिव्यचक्षुषाम् ।
इन्द्रादीनां च नेतारो दक्षमारी चयोस्तथा ॥३८॥
सप्तर्षीणां तथान्येषां तान्नमस्यामि कामदान् ।
मन्वादीनां मुनींद्राणां सूर्य्याचन्द्रमसोस्तथा ॥३९॥
तान्नमस्याम्यहं सर्व्वान् पितरश्चार्णवेषु ये ।
नक्षत्राणां ग्रहाणां च वाय्वग्न्योर्नभ सस्तथा ॥४०॥

द्यावापृथिव्योश्च तथा नमस्यामि कृतांजलिः ।
देवर्षीणां ग्रहाणां च सर्वलोकनमस्कृतान् ॥४१॥
अभयस्य सदा दातृन्नमस्येऽहं कृतांजलिः ।
नमो गणेभ्यः सप्तभ्यस्तथा लोकेषु सप्तसु ॥४२॥
स्वयंभुवे नमस्यामि ब्रह्मणे योग चक्षुषे ।
सोमाधारान् पितृगणान् योगमूर्तिधरांस्तथा ॥४३॥
नमस्यामि तथा सोमं पितरं जगतामहम् ।
अग्निरूपांस्तथैवान्यान्नमस्यामि पितृनहम् ॥४४॥
अग्नीसोममयं विश्वं यत एतदशेषतः ।
ये तु तेजसि ये चैते सोमसूर्य्याग्निमूर्त्तयः ॥४५॥
जगत्स्वरूपिणश्चैव तथा ब्रह्मस्वरूपिणः ।
तेभ्योऽखिलेभ्यो योगिभ्यः पितृभ्यो यतमानसाः ।
नमो नमो नमस्ते मे प्रसीदन्तु स्वधाभुजः ॥४६॥

॥ पितर ऊचुः ॥

स्तोत्रेणानेन च नरो यो मां स्तोष्यति भक्तितः ।
तस्य तुष्टा वयं भोगानात्मज्ञानं तथोत्तमम् ॥४७॥
शरीरारोग्यमर्थं च पुत्रपौत्रादिकं तथा ।
प्रदास्यामो न संदेहो यच्चान्यदभिवांछितम् ॥४८॥
तस्मात्पुण्यफलं लोके वाञ्छद्भिः सततं नरैः ।
पितृणां चाक्षयां तृप्तिं स्तव्यां स्तोत्रेण मानवैः ॥४९॥
वाञ्छद्भिः सततं स्तव्याः स्तोत्रेणानेन वै यतः ।
श्राद्धे च य इमं भक्त्या अस्मत्प्रीतिकरं स्तवम् ॥५०॥
पठिष्यंति द्विजाग्याणां भुञ्जतां पुरतः स्थिताः ।
स्तोत्रश्रवणसंप्रीत्या सन्निधाने परे कृते ॥५१॥
अस्माकमक्षयं श्राद्धं तद्भविष्यत्यसंशयम् ।
यद्यप्यश्रोत्रियं श्राद्धं यद्यप्युपहतं भवेत् ॥५२॥
अन्यायोपात्तवित्तेन यदि वा कृतमन्यथा ।
अश्राद्धार्हैरुपहतैस्तथा कृतम् ॥५३॥

अकालेऽप्यथवाऽदेशे विधिहीनमथापि वा ।
अश्रद्धया वा पुरुषैर्दंभमाश्रित्य वा कृतम् ॥५४॥
अस्माकं तृप्तये श्राद्धं तथाप्येतदुदीरणात् ।
यत्रैतत्पठ्यते श्राद्धे स्तोत्रमस्मत्सुखावहम् ॥५५॥
अस्माकं जायते तृप्तिस्तत्र द्वादशवार्षिकी ।
हेमंते द्वादशाब्दानि तृप्तिमेतत्प्रयच्छति ॥५६॥
शिशिरे द्विगुणाब्दांश्च तृप्तिस्तोत्रमिदं शुभम् ।
वसंते षोडश समास्तृप्तये श्राद्धकर्मणि ।
ग्रीष्मे च षोडशे वैतत्पठितं तृप्तिकारकम् ।
विकलेऽपि कृते श्राद्धे स्तोत्रेणानेन साधिते ॥५८॥
वर्षासु तृप्तिरस्माकमक्षया जायते रुचे ।
शरत्काले पिपठितं श्राद्धकाले प्रयच्छति ॥५९॥
अस्माकमेतत्पुरुषैस्तृप्तिं पंचदशाब्दिकाम् ।
यस्मिन् गृहे च लिखितमेततिष्ठति नित्यदा ॥६०॥
सन्निधानं कृते श्राद्धे तत्रास्माकं भविष्यति ।
तस्मादेतत्त्वया श्राद्धे विप्राणांभुंजतां पुरः ॥६१॥
श्रावणीयं महाभाग अस्माकं पुष्टिहेतुकम् ।
इत्युक्त्वा पितरस्तस्य स्वर्गता मुनिसत्तम ॥६२॥

॥ इति मार्कण्डेयपुराणे रुचिमनुना कृतं रुचिस्तवं सप्तार्चिस्तवं च पितृस्तोत्रम् ॥

॥ पितरादि बाह्यशान्ति स्तोत्रम् ॥

(पितर शान्ति, देवदोष शमन, इष्टसिद्धि हेतु)

इस सूक्त का पाठ करने से मनोवांछित कार्यो में सफलता प्राप्त होती है। घर-परिवार में सुख शान्ति रहती है। मनोकामना पूर्ण होती है। पितर प्रसन्न होते है उन्हें शान्ति मिलती है। यह दुर्लभ स्तोत्र है। इससे अन्य देवदोष भी शान्त होकर इष्ट सिद्धि होती है।

सूक्त पाठ करने की विधिः-

(१) उक्त सूक्त के २४ श्लोकों में से २२ वें, २३ वें, २४ वें श्लोक का पाठ दो

बार करें। अर्थात् पहले १ से २४ श्लोक तक पाठ कर लेवें तदुपरान्त २२-२३-२४ श्लोकों का पाठ दो बार करें। इस प्रकार २२-२३-२४ श्लोकों का पाठ तीन बार होगा। तब इस पितृ सूक्त का पाठ पूर्ण होगा। (२) श्लोक २२-२३-२४ के पाठ में अधिक ध्यान देवें। (३) काले तिल व शुद्ध घी से हवन करें। हवन में भी २२-२३-२४ श्लोक से तीन-तीन आहुतियाँ दी जावेगी। (४) १, १२, २३, २४ श्लोक में स्वाहा की जगह होम समय स्वधा कहें। (५)दक्षिण दिशा की और मुख करके ही पाठ एवं हवन करें। (६) केवल एक आवृति पाठ और एक ही आवृति से हवन करें। (७) नित्य पाठ एवं हवन आवश्यक है।

नमो वः पितरो, यच्छिव तस्मै नमो वः पितरो यतृस्योन तस्मै ।
नमो वः पितरः, स्वधा वः पितरः ॥१ ॥

नमोऽस्तु ते निर्ऋर्त्तु, तिग्मतेजोऽयस्यमयान विचृता बन्धपाशान्।
यमो मह्यं पुनरित् त्वां ददाति। तस्मै यमाय नमोऽस्तु मृत्यवे ॥२ ॥

नमोऽस्त्वसिताय, नमस्तिरश्चिराजये।
स्वजाय वभ्रवे नमो, नमो देवजनेभ्यः ॥३ ॥

नमः शीताय, तक्मने नमो, रूराय शोचिषे कृणोमि।
यो अन्येद्युरुभयद्युरभ्येति, तृतीय कायं नमोऽस्तु तक्मने ॥४ ॥

नमस्ते अधिवाकाय, परावाकाय ते नमः।
सु-मत्यै मृत्यो ते नमो, दुर्मत्यै त इदं नमः ॥५ ॥

नमस्ते यातुधानेभ्यो, नमस्ते भेषजेभ्यः।
नमस्ते मृत्यो मूलेभ्यो ब्राह्मणेभ्य इदं मम ॥६ ॥

नमो देववद्येभ्यो, नमो राज-वद्येभ्यः।
अथो ये विश्वानां वद्यास्तेभ्यो मृत्यो नमोऽस्तु ते ॥७ ॥

नमस्तेऽस्तु नारदा नुष्ठ विदुषे वशा।
कसमासां भीमतमा याम दत्वा पराभवेत् ॥८ ॥

नमस्तेऽस्तु विद्युते नमस्ते स्तनयित्नवे।
नमस्तेऽस्तु वश्मने येना दूड़ाशे अस्यसि ॥९ ॥

नमस्तेऽस्त्वायते नमोऽस्तु पराय ते।
नमस्ते प्राण तिष्ठत, आसीनायोत ते नमः ॥१० ॥

नमस्तेऽस्त्वायते, नमोऽस्तु पराय ते।

नमस्ते रुद्र तिष्ठत, आसीनायोत ते नमः ॥११॥
नमस्ते जायमानायै, जाताय उत ते नमः ।
वालेभ्यः शफेभ्यो रूपायाध्न्ये ते नमः ॥१२॥
नमस्ते प्राणक्रन्दाय नमस्ते स्तनयित्नवे।
नमस्ते प्राणविद्युते नमस्ते प्राणवर्षते ॥१३॥
नमस्ते प्राण-प्राणते, नमोऽस्त्वपान ते।
परा चीनाय ते नमः, प्रतीचीनाय ते नमः, सर्वस्मै न इदं नमः ॥१४॥
नमस्ते राजन्! वरुणास्तु मन्यवे विश्व ह्यग्र निचिकेषि दुग्धम्।
सहस्त्रमन्यान् प्रसुवामि, साकं शतं जीवाति शरदस्तवायं ॥१५॥
नमस्ते रुद्रास्य ते, नमः प्रतिहितायै।
नमो विसृज्यमानायै, नमो निपतितायै ॥१६॥
नमस्ते लाङ्गलेभ्यो नमः ईषायुगेभ्यः।
वीरुत् क्षेत्रिय-नाशन्यप क्षैत्रियमुच्छतु ॥१७॥
नमो गंधर्वस्य नमस्ते नमो भामाय चक्षुषे च कृण्मः।
विश्वावसो ब्रह्मणा ते नमोऽभि जाया अप्सरसः परेहि ॥१८॥
नमो यमाय, नमोऽस्तु मृत्यवे, नमः पितृभ्य उतये नयन्ति।
उत्पारणस्य यो वेद, तमग्नि पुरो दद्योऽस्याः अरिष्टतातये ॥१९॥
नमो रुद्राय, नमोऽस्तु तक्मने, नमो राज्ञ वरुणायं त्विणीमते।
नमो दिवे, नमः पृथिव्ये, नमः ओषधीभ्यः ॥२०॥
नमो रुराय च्यवनाय रोदनाय, घृष्णवे।
नमः शीताय पूर्वकामकृत्वने ॥२१॥
नमो वः पितर उर्जे, नमः वः पितरो रसाय ॥२२॥
नमो वः पितरो भामाय, नमो वः पितरो मन्धवे ॥२३॥
नमो वः पितरां पदघोरं, तस्मै नमो वः पितरो, यत क्ररं तस्मै ॥२४॥

॥ गोरक्ष चालीसा ॥

॥श्रीगुरु शरणम् ॥

जय जय जय गोरक्ष अविनाशी । कृपा करो गुरुदेव प्रकाशी ॥१ ॥
जय जय जय गोरक्ष गुणखानी । इच्छा रूप योगी वरदानी ॥२ ॥
अलख निरंजन तुम्हरो नामा । सदा करो भक्तन हित कामा ॥३ ॥
नाम तुम्हारो जो कोई गावे । जन्म जन्म के दुःख नसावे ॥४ ॥
जो कोई गोरक्ष नाम सुनावे । भूत पिशाच निकट नहीं आवे ॥५ ॥
ज्ञान तुम्हारा योग से पावे । रूप तुम्हारा लखा न जावे ॥६ ।
निराकार तुम हो निर्वाणी । महिमा तुम्हारी वेद बखानी ॥७ ॥
घट घट के तुम अन्तरयामी । सिद्ध चौरासी करे प्रणामी ॥८ ॥
भस्म अंग गले नाद विराजे । जटा शीश अति सुन्दर साजे ॥९ ॥
तुमबिन देव और नहिं दूजा । देव मुनी जन करते पूजा ॥१० ॥
चिदानन्द भक्तन हितकारी । मंगल करो अमंगल हारी ॥११ ॥
पूर्ण ब्रह्म सकल घट वासी । गोरक्षनाथ सकल प्रकाशी ॥१२ ॥
गोरक्ष गोरक्ष जो कोई गावे । ब्रह्मस्वरूप का दर्शन पावे ॥१३ ॥
शंकर रूप धर डमरू बाजे । कानन कुण्डल सुन्दर साजे ॥१४ ॥
नित्यानन्द है नाम तुम्हारा । असुर मार भक्तन रखवारा ॥१५ ॥
अति विशाल है रूप तुम्हारा । सुर नर मुनि पखें नहिं पारा ॥१६ ॥
दीन बन्धु दीनन हितकारी । हरो पाप हम शरण तुम्हारी ॥१७ ॥
योग युक्त तुम हो प्रकाशा । सदा करो संतन तन वाशा ॥१८ ॥
प्रातः काल ले नाम तुम्हारा । सिद्धि बढ़े अरु योग प्रचारा ॥१९ ॥
जय जय जय गोरक्ष अविनाशी । अपने जन की हरो चौरासी ॥२० ॥
अचल अगम है गोरक्ष योगी । सिद्धि देवो हरो रस भोगी ॥२१ ॥
काटो राह यम की तुम आई । तुम बिन मेरा कौन सहाई ॥२२ ॥
कृपा सिन्धु तुम हो सुख सागर । पूर्ण मनोरथ करो कृपा कर ॥२३ ॥
योगी सिद्ध विचरे जग माहीं । आवागमन तुम्हारा नाहीं ॥२४ ॥
अजर अमर तुम हो अविनाशी । काटो जन की लख चौरासी ॥२५ ॥
तप कठोर है रोज तुम्हारा । को जन जाने पार अपारा ॥२६ ॥
योगी लखै तुम्हारी माया । परंब्रह्म से ध्यान लगाया ॥२७ ॥

ध्यान तुम्हारा जो कोई लावै । अष्ट सिद्धि नव निधि घर पावे ॥२८॥
शिव गोरक्ष है नाम तुम्हारा । पापी अधम दुष्ट को तारा ॥२९॥
अगम अगोचर निर्भय नाथा । योगी तपस्वी नवावै माथा ॥३०॥
शंकर रूप अवतार तुम्हारा । गोपी चंद भरतरी तारा ॥३१॥
सुन लीज्यो गुरु अर्ज हमारी । कृपा सिन्धु योगी ब्रह्मचारी ॥३२॥
पूर्ण आस दास की कीजै । सेवक जान ज्ञान मोहि दीजै ॥३३॥
पतित पावन अधम उदारा । तिन के हित अवतार तुम्हारा ॥३४॥
अलख निरंजन नाम तुम्हारा । अगम पंथ जिन योग प्रचारा ॥३५॥
जय जय जय गोरक्ष अविनाशी । सेवा करे सिद्ध चौरासी ॥३६॥
सदा करो भक्तन कल्याण । निज स्वरूप पावे निर्वाण ॥३७॥
जो नित पढे गोरक्ष चालीसा । होय सिद्ध योगी जगदीशा ॥३८॥
बारह पाठ पढे नित जोई । मनोकामना पूरण होई ॥३९॥
धूप दीप से रोट चढावे । हाथ जोड़ कर ध्यान लगावे ॥४०॥

॥ दोहा ॥

अगम अगोचर नाथ तुम, पारब्रह्म अवतार ।
कानन कुण्डल सिर जटा, अंग विभूति अपार ॥
स्पिद्ध पुरुष योगेश्वर, दो मुझको उपदेश ।
हर समय सेवा करुं, सुबह शाम आदेश ॥
सुने सुनावे प्रेम वश, पूजे अपने हाथ ।
मन इच्छा सब कामना, पूरे श्रीगोरक्षनाथ ॥

ॐ शान्ति प्रेम आनन्द।

॥ श्रीकार्तवीर्यअर्जुन प्रयोगः॥

कार्तवीर्याऽर्जुन को सुदर्शनचक्र का अवतार माना गया है। यथा -

अथेष्टदान् मनून् वक्ष्ये कार्तवीर्यस्य गोपितान् ।
यः सुदर्शनचक्रस्यावतारः क्षितिमण्डले ॥

मन्त्र - फ्रों व्रीं क्लीं भ्रूं आं ह्रीं फ्रों श्रीं हुं फट् कार्तवीर्याजुनाय नमः ॥

यह १९ अक्षर का मन्त्र है एवं इसके आदि में 'ॐ' लगाने से २० अक्षर का मन्त्र हो जाता है। (मन्त्रमहार्णव में फ्रों के बाद व्रीं है।)

विनियोग :- ॐ अस्य श्रीकार्तवीर्यार्जुन मन्त्रस्य दत्तात्रेय ऋषिः। कार्तवीर्यार्जुनो देवताः। ॐ बीजं नमः शक्तिं मम सर्वशत्रुक्षयार्थे गतं नष्टं च लभ्यार्थे अमुकव्याधि निवारणार्थं सर्वाभीष्ट सिद्ध्यर्थे जपे विनियोगः।

ऋष्यादिन्यासः - शिरसि दत्तात्रेय ऋषये नमः। मुखे गायत्री छन्दसे नमः। हृदि कार्तवीर्यार्जुन देवतायै नमः। अभीष्ट सिद्ध्यर्थे जपे विनियोगाय नमः सर्वाङ्गे।

पञ्चाङ्गन्यास - ॐ आं फ्रों व्रीं हृदयाय नमः, ईं क्लीं भ्रूं शिरसेस्वाहा, हुँ शिखायै वषट्, क्रैं श्रैं कवचाय हुँ, हुं फट् अस्त्रायफट्।

कार्तवीर्यार्जुनाय नमः से सर्वाङ्गन्यास करें।

वर्णन्यास - ॐ फ्रों ॐ हृदये। ॐ व्रीं ॐ जठरे। ॐ क्लीं ॐ नाभौ। ॐ भ्रूं ॐ गुह्ये। ॐ आं ॐ दक्षपादे। ॐ ह्रीं ॐ वामपादे। ॐ फ्रों ॐ सक्थनी। ॐ श्रीं ॐ उर्वो। ॐ हुं ॐ जानुनी। ॐ फट् ॐ जंघयो। ॐ कां ॐ मस्तके। ॐ र्त्त ॐ ललाटे। ॐ वी ॐ भ्रुवोः। ॐ र्या ॐ कर्णयोः। ॐ र्जु ॐ नेत्रयोः। ॐ नां ॐ नासिकायाम्। ॐ यं ॐ मुखे। ॐ नं ॐ गले। ॐ मः ॐ स्कन्धे।

अङ्गन्यास विशेषः (प्राणतोषणी तन्त्रे) -

ॐ नमो भगवते भोः भोः कार्तवीर्यार्जुन। (ॐ फ्रों ॐ हृदये) दुष्टं दारय दुरितं हन हन पापं मथ मथ आरोग्यं कुरु कुरु हां हुं हुं फट् फट् द्विषः।

ॐ नमो भगवते भोः भोः कार्त्तवीर्यार्जुन ।(ॐ फ्रों ॐ शिरसे स्वाहा)दुष्टं दारय दुरितं हन हन पापं मथ मथ आरोग्यं कुरु कुरु हां हां हुं हुं फट् फट् द्विषः।

ॐ नमो भगवते भोः भोः कार्तवीर्यार्जुन। (ॐ फ्रों ॐ शिखायै वषट्) दुष्टं दारय दुरितं हन हन पापं मथ मथ आरोग्यं कुरु कुरु हां हुं हुं फट् फट् द्विषः।

ॐ नमो भगवते भोः भोः कार्तवीर्यार्जुन। (ॐ फ्रों ॐ कवचाय हुं) दुष्टं दारय दुरितं हन हन पापं मथ मथ आरोग्यं कुरु कुरु हां हुं हुं फट् फट् द्विषः।

ॐ नमो भगवते भोः भोः कार्तवीर्यार्जुन। (ॐ फ्रों ॐ अस्त्राय फट्) दुष्टं दारय दुरितं हन हन पापं मथ मथ आरोग्यं कुरु कुरु हां हुं हुं फट् फट् द्विषः।

ध्यानम् –

उद्यत्सूर्य सहस्त्रकान्तिरखिलक्षोणीधवैर्वन्दितो ।
हस्तानां शतपञ्चकेन च दद्यच्चापानिषूस्तावता ॥
कण्ठे हाटकमालया परिवृतश्चक्रावतारो हरेः ।
पायात् स्यन्दनगोरुणाभवसनः श्रीकार्तवीर्यो नृपः ॥

॥ कार्तवीर्यार्जुन यंत्रार्चनम् ॥

कार्तवीयार्जुन यन्त्रम्

षट्कोण अष्टदल भूपूर युक्त बनायें कहीं कहीं दशदल का उल्लेख है। दशदल एवं अष्टदल युक्त भी बनाया जा सकता है । दशदल में दशबीजाक्षरों (**फ्रों व्रीं**

क्लीं भ्रूं आं ह्रीं फ्रों श्रीं हुं फट्) को लिखें। वृत्त में **अं आं ..... अं अः** स्वरों को लिखें दशदलों के बाहर **कं खं ....हं लं क्षं** व्यंजनों को लिखे ।

यंत्र की पीठ शक्तियों का आह्वान करें - पूर्वादि क्रमेण - **ॐ विमलायै नमः, ॐ उत्कर्षिण्यै नमः, ॐ ज्ञानायै नमः ,ॐ क्रियायै नमः, ॐ योगायै नमः, ॐ पुह्वयै नमः, ॐ सत्यायै नमः, ॐ ईशानायै नमः। मध्ये अनुग्रहायै नमः।**

इसके बाद ढाल और तलवार लिये हुये चन्द्रमा की आभा वाले षडङ्गमूर्तियों का ध्यान करते हुये षडङ्ग पूजा करें।

प्रथमावरणम्- षडङ्ग पूजा - आग्रेय, ईशान, नैऋत्य, एवं वायव्य कोणों के बाद एवं सर्वाङ्गे - (**अमुक शक्तिं पूजयामि** साथ में बोले)

ॐ फ्रों वीं हृदयाय नमः हृदय शक्तिं पूजयामि । ॐ क्लीं भ्रूं शिरसे स्वाहा, शिर शक्तिं पूजयामि (इति सर्वत्र) **ॐ हुं शिखायै वषट्। ॐ क्रैं श्रैं कवचाय हुं। हुं फट् अस्त्राय फट्। ॐ कार्तवीर्यार्जुनाय नमः।**

षट्कोण में षड्मूर्ति की पूजा करें- **राजन्य चक्रवर्तिने नमः। वीराय नमः। शूराय नमः। माहिष्मतीपतये नमः। रेवांबुपरितृप्ताय नमः। कारागेह प्रबाधितदशास्याय नमः।**

द्वितीयावरणम्- (अष्टदले-पूर्वादि चतुर्दिक्षु) - **ॐ चोर विभंजनाय नमः** पूर्वे। **मारीमदविभंजनाय नमः** दक्षिणे। **अरिमद विभंजनाय नमः** पश्चिमे। **दैत्यमदविभंजनाय नमः** उत्तरे।

(कोणेषु) - **ॐ दुःखनाशाय नमः** आग्नेये। **ॐ दुष्टनाशाय नमः** नैऋत्ये। **ॐ दुरित नाशाय नमः** वायव्ये। **ॐ रोगनाशाय नमः** ऐशान्ये।

तृतीयावरणम्- अष्टदलाग्रे (श्वेत वर्णा) पूर्वादि क्रमेण - **ॐ क्षेमकर्यै नमः, ॐ वश्यकर्यै नमः, ॐ श्री कर्यै नमः, ॐ यशकर्यै नमः, ॐ आयुकर्यै नमः, ॐ प्रज्ञाकर्यै नमः, ॐ विद्याकर्यै नमः, ॐ धनकर्यै नमः।**

चतुर्थावरणम्- भूपूरे - भूपूर (परिधि) में पूर्वादि क्रम से इन्द्रादि लोकपालों का पूजन करें- **ॐ इन्द्राय नमः पूर्वे, ॐ अग्नये नमः आग्नेये, ॐ यमाय नमः दक्षिणे, ॐ नैर्ऋतये नमः नैऋत्ये, ॐ वरुणाय नमः पश्चिमे, ॐ वायवे नमः वायव्ये, ॐ सोमाय नमः उत्तरे, ॐ ईशानाय नमः ऐशान्ये। ॐ ब्रह्मणे नमः ईशानपूर्वयोर्मध्ये। ॐ अनन्ताय नमः पश्चिमनैऋत्यर्मध्ये।**

इनके पास ही इनके आयुधों का पूजन पूर्वादि क्रम से करें -

पंचमावरणम् - ॐ वज्राय नमः, ॐ शक्तये नमः, दण्डाय नमः, खड्गाय नमः, पाशाय नमः, अंकुशाय नमः, गदायै नमः, त्रिशूलाय नमः, पद्माय नमः, चक्राय नमः।

इस प्रकार आवरण पूजा कर यंत्रार्चन कर नैवेद्यादि अर्पण कर मूल मंत्र का जप करें। एक लक्ष जप का पुरश्चरण करें ।

॥ कार्तवीर्यार्जुन के अन्य दश मंत्र ॥

१. फ्रों कार्तवीर्यार्जुनाय नमः २. फ्रों वीं कार्तवीर्यार्जुनाय नमः ३. फ्रों क्लीं कार्तवीर्यार्जुनाय नमः ४. फ्रों भ्रूं कार्तवीर्यार्जुनाय नमः ५. फ्रों आं कार्तवीर्यार्जुनाय नमः ६. फ्रों ह्रीं कार्तवीर्यार्जुनाय नमः ७. फ्रों क्रों कार्तवीर्यार्जुनाय नमः ८. फ्रों श्रीं कार्तवीर्यार्जुनाय नमः ९. फ्रों ऐं कार्तवीर्यार्जुनाय नमः १०. हुं कार्तवीर्यार्जुनाय नमः फट्।

इनमें प्रथम मंत्र (दशाक्षर) विनियोगः - **ॐ अस्य श्री कार्तवीर्यार्जुन मंत्रस्य दत्तात्रेय ऋषि विराट छन्दः कार्तवीर्यार्जुनो देवतात्मनोऽभीष्ट सिद्धयर्थे जपे विनियोगः।**

अन्य शेष मंत्रों का त्रिष्टुप् छन्द है।

यदि पूर्वोक्त मंत्रों में प्रथम मंत्र के पहिले '' ॐ '' लगाये तो मंत्र एकादशाक्षर हो जायेगा एवं त्रिष्टुप् छन्द होगा। शेष मंत्र भी ॐ लगाने से जगती छन्द हो जायेगें।

इनके न्यास - **फ्रां, फ्रीं, फ्रूं, फ्रें, फ्रौं, फ्रः से षडङ्गन्यास करें।**

चतुर्दशाक्षर मंत्र- ॐ नमः कार्तवीर्यार्जुनाय हुं फट् स्वाहा।

पञ्चाङ्ग न्यास करते समय अक्षरों का विभाजन इस प्रकार है- १,२,७,२,२ विभाजित शब्दाक्षर है।

अष्टादशाक्षर मंत्र - ॐ नमो भगवते श्रीकार्तवीर्यार्जुनाय हुं फट् स्वाहा। इसके **पञ्चाङ्ग न्यास विभाग** इस प्रकार है - शब्दाक्षर संख्या - ३ (ॐ नमो) ४ (भगवते) ७ (कार्तवीर्यार्जुनाय) २ (हुं फट्) २ (स्वाहा) ।

त्रिषट्दशाक्षर मंत्र - ॐ नमो भगवते श्रीकार्तवीर्यार्जुनाय सर्वदुष्टांतकाय तपोबल पराक्रमाय परिपालित सप्तदीपाय सर्वराजन्यचूडामणये महाशक्तिमते सहस्त्रबाहवे हुं फट् ।

न्यास - राजन्यचक्रवर्तिने हृदयाय नमः। वीराय शिरसे स्वाहा। शूराय

शिखायै वषट्। महिष्मतीपतये कवचाय हुं। रेवाम्बुपरितृप्ताय नेत्रत्रयाय वौषट् कारागेहप्रबाधित दशास्याय अस्त्राय फट्।

ध्यानम् –

सिंच्यमानं युवतिभिः क्रीडन्तं नर्मदाजले ।
हस्तैर्जलोघं रुंधन्तं ध्यायेन्मत्तं नृपोत्तमम् ॥

इस प्रकार ध्यान कर कम से कम १०००० जप करें।

होम एवं अभिषेक विधि – (सभी मंत्रों के लिये)

लक्षमेकं जपेन्मंत्रं दशांश जुहुयात्तिलैः ।
सतंडुलैः पायसेन विष्णुपीठे जेत्तुतम् ॥१॥
एवं संसाधितो मंत्रः प्रयोगार्हः प्रजायते ।
शुद्धभूमावष्टगंधैर्लिखित्वा यंत्रमादशत् ॥२॥
तत्र कुम्भंप्रतिष्ठाप्य तत्रावाह्यार्चयेन्नृपम् ।
स्पष्ट्वा कुम्भं जपेन्मंत्रं सहस्त्रं विजितेन्द्रियः ॥३॥
अभिषिंचेत्तदंभोभिः प्रियं सर्वेष्टसिद्धये ।
पुत्रान् यशो रोगनाशमायुः स्वजनरंजनम् ॥४॥
वाक्सिद्धिं सुदृशः कुम्भाषिक्तो लभते नरः ।
शत्रूपद्रवमापन्ने ग्रामे वा पुटभेदने ॥५॥
संस्थापयेदिदं यंत्रमरिभीतिनिवृत्तये ।

होमविषये –

सर्षपारिष्टलशुन कार्पासैर्मार्यते रिपुः ।
धत्तूरैः स्तंभ्यते निम्बैर्द्वेष्यते वश्यतेऽम्बुजैः ॥
उच्चाट्यते विभीतस्य समिद्भिः खदिरष्य च ।
कटुतैलमहिष्याज्यैर्होमद्रव्याञ्जनं स्मृत् ॥

सरसों, रीठा, लहसुन, एवं कपास के होम से शत्रु का मारण, धत्तूरे के होम से शत्रु का स्तंभन, नीम के होम से विद्वेषण, कमल के होम से वशीकरण, बहेड़ा एवं खदिर की समिधा होम से शत्रु का उच्चाटन होवे। जौ (इन्द्र जौ) के होम से लक्ष्मी प्राप्ति, तिल एवं घी के होम से पापक्षय, तिल, तण्डुल सिद्धार्थ (सफेद सरसों) एवं लाजा (पक्वान चावलों की खीलें) के होम से राज का वशीकरण होवें।

अपामार्ग आक एवं दूर्वा होम पापनाशक, आयुवृद्धि कारक एवं लक्ष्मीप्रद होता है।

प्रियंगु के होम से बाधानिवारण एवं स्त्रीवश्य, गुग्गुल होम से प्रेतोपद्रव शान्त होवे। पीपल, गूलर, पाकड़, बरगद एवं बेल की समिधाओं से होम करने से पुत्र, धन आयु, सुख-समृद्धि प्राप्त करें।

साँप की केंचुली, धत्तूरा, सिद्धार्थ (सफेदसरसों) एवं लवण के होम से शत्रु एवं चोरों का नाश होता है। गोरोचन एवं गोबरके होम से स्तंभन तथा शालि (धान) के होम से भूमि संबंधी चिंता दूर होकर लाभ होवे।

॥ नष्टद्रव्य की प्राप्ति एवं गये हुये को बुलाने का प्रयोग ॥

नष्टधन की प्राप्ति हेतु मन्त्र -

ॐ कार्तवीर्यार्जुनो नाम राजा बाहुसहस्त्रवान् ।
तस्य संस्मरणा देव हृतं नष्टं च लभ्यते ॥

मतान्तरे -

ॐ कार्तवीर्यार्जुनो नाम राजा सहस्त्रबाहुकम् ।
यस्य स्मरण मात्रेण हृतं नष्टं च लभ्यते ॥

गये हुये को बुलाने के लिये -

ॐ कार्तवीर्यार्जुनो नाम राजा सहस्त्रबाहुकम् ।
यस्य स्मरण मात्रेण गतं नष्टं च लभ्यते ॥

इस प्रयोग को करने के लिये गये हुये व्यक्ति का वस्त्र लेकर उस पर मन्त्र लिखें, यस्य स्मरण मात्रेण के बाद गये हुये व्यक्ति का नाम लिखें पश्चात् गतं नष्टं च लभ्यते लिखें। किसी सूतकातने वाले चरखे के इस को बाँध दिया जाये एवं उसे उल्टी दिशा में घुमाया जाये तो गये हुये व्यक्ति की बुद्धि परिवर्तन होवे एवं वापस आये। एवं मन्त्र के १० हजार जाप भी करने चाहिये।

आजकल चरखे घरों में होते नहीं है, अतः एक बार एक प्रयोग के समय वस्त्र को पंखे पर बाँध दिया एवं उसे पंखे की घूर्णन दिशा के विपरीत घुमाया गया तो कार्य में सफलता मिली। परन्तु एक बड़ी चोरी के मामले में इसी प्रयोग को करने पर सफलता प्राप्त नहीं हुई कारण मन्त्र का जाप विधान पूरा नहीं हो सका।

॥ कार्तवीर्यार्जुन दीपदान विधानम् ॥

कार्तवीर्यार्जुन को दीप अत्यन्त प्रिय है, गणेश को तर्पण, शिव को अभिषेक, जगदम्बा को अर्चन तथा सूर्य को नमस्कार प्रिय है। दीप प्रयोग से रोग एवं शत्रुनाश तथा चोरभय नष्ट होता है, नष्ट द्रव्य की प्राप्ति होती है।

मास - वैशाख, श्रावण, मार्गशीर्ष, आश्विन (शुक्लपक्ष) पोष, माघ एवं फाल्गुन मास दीपदान हेतु शुभ मास कहे गये हैं।

तिथी-वार - (चौथ) चतुर्थी, नवमी एवं चतुर्दशी को छोड़कर तथा मंगलवार, शनिवार के अलावा शुभवारों में सिद्धियोगों में हस्त, तीनों उत्तरा, अश्वनी, आर्द्रा, पुष्य, श्रवण, स्वाति, विशाखा एवं रोहिणी नक्षत्रों में दीपदान श्रेष्ठ कहा गया है।

योग - वैधृति, व्यतिपात, धृति, वृद्धि, सुकर्मन, प्रीति, हर्षण, सौभाग्य, शोभन एवं आयुष्मान योग में भद्रारहित दिन में दीपारम्भ करना चाहिये।

नित्य दीप में ३ तोले भार वाले पात्र में १ पल घी जलाना चाहिये। पात्र का परिमाप ४, ५, ६, ८, १० या १२ अङ्गुल होना चाहिये। जितना घृत जलाना हो उस प्रमाण व भार का दीपक काम में लेवें। ३ तोला भार वाले पात्र में ५० तोला घी, ५२ तोला भार के पात्र में १०० ग्राम घी, १०० पल (ग्राम) भार वाले पात्र में १६ हज़ार तोला घी, ११५ पल वाले पात्र में २ हजार पल घी, १२५ पल वाले पात्र में ३ किलो घी, ५०० पल वाले पात्र में १० किलो घी, जलाना चाहिये। (प्राचीन ग्रन्थों में पल शब्द का प्रयोग है, वर्त्तमान समय में तोला या १० ग्राम का वजन मान सकते हैं।)

काँसी, ताँबा, चाँदी एवं स्वर्ण के पात्र उत्तरोत्तर श्रेष्ठ हैं। किन्तु लोहे एवं मिट्टी केपात्र को अधम माना गया है।

पौष्टिक एवं शांति कार्य में मूंग के आटे का तथा किसी को मिलाने के लिये गेहूँ के आटे का दीपपात्र बनाये, परन्तु ध्यान रहें कि निचले भाग एवं ऊपरी भाग आकृति में समान होने चाहिये।

वर्त्ति संख्या - बत्तियाँ विषम संख्या में होनी चाहिये। १, ३, ५, ७, १५, २१ या १ हजार सूतों की बनी बत्तियाँ ड़ालनी चाहिये। जितना घी जलाना हो उसी के अनुसार दिन प्रमाण, संख्या, पात्र का भार व बत्तियों की संख्या लेनी चाहिये। दीप जलाने हेतु गौघृत उत्तम है, भैंस का घी मध्यम, तिल का तेल भी मध्यम है, तथा बकरी का घी अधम कहा गया है।

दीप प्रयोग – कार्त्तिक शुक्ला सप्तमी को निशीथ काल में दीपारंभ करना श्रेष्ठ है। यदि उस दिन रविवार एवं श्रवण नक्षत्र का संयोग हो तो अति उत्तम है।

साधक दीपदान से एक दिन पूर्व उपवास करें, पृथ्वी पर शयन करें। दूसरे दिन गोमय से शुद्ध भूमि का लेपन करें एवं रंगीन चावलों या रंगोली से दीप यंत्र बनायें। पहले षट्कोण बनायें, उसके ऊपर अधोमुख त्रिकोण बनायें।

षट्कोण में ॐ फ्रों व्रीं भ्रूं आं ह्रीं लिखे, मध्य में क्लीं लिखें। षट्कोण के आगे चारों दिशाओं में **क्रीं श्रीं हुँ फँट्** लिखें। पश्चात् उसके चारों ओर कार्तवीर्यार्जुनाय नमः लिखें। यंत्र ताम्र पात्र का ही हो सकता है, बीजाक्षरों का लेखन यदि नहीं हो सके तो उनकी कल्पना करें उनके न्यास अवश्य उस यंत्र में करें।

सुवर्णादि निर्मित पात्र में एक सुन्दर शलाका जिसका अग्रभाग पतला हो (४, ८ या १६ अङ्गुल लंबी होवें) लेवें एवं दीप के अग्रभाग में दाहिनी ओर रखें। दीपपात्र से दक्षिण दिशा में एक चाकू या छुरी को अधोमुख भूमि में गाड़ देना चाहिये। यदि फर्श पक्का है तो मिट्टी के किसी गमले या पात्र में गाड़ देवें।

गणपति स्मरणपूर्वक दीप प्रज्ज्वलित करें। दीप को यंत्र पर रखें। दीपक से पूर्व दिशा में एक अष्टदल बनायें उस पर घट रखकर कार्तवीर्यार्जुन का पूजन करना चाहियें।

संकल्प, दिग्रक्षण एवं गणपत्यादि पूजन करें। दीपक का पूजन करें, दीपक यंत्र का "**ॐ कार्तवीर्यार्जुन दीपाधार यंत्राय नमः**" से पूजन करें, उसमें लिखे बीजाक्षरों का यंत्र में न्यास करें। घट में कार्तवीर्यार्जुन का पूजन पहले बताई गयी विधि से करें ।

दीप मन्त्र का संकल्प ...... **ॐ अद्य दिने .... अमुक कामना सिद्ध्यर्थे .... दीप दान मंत्र** पूरा बोल कर विनियोग छोड़ें ।

दीपदान माला मंत्र (१५२ अक्षरात्मक)

ॐ आं ह्रीं वषट् कार्तवीर्यार्जुनाय माहिष्मतीनाथाय सहस्त्र बाहवे सहस्त्रक्रतु दीक्षित हस्ताय दत्तात्रेय प्रियाय आत्रेयानुसूयागर्भरत्नाय हुं आं इमं दीपं गृहाण अमुकं रक्ष रक्ष दुष्टान्नाशय नाशय पातय पातय घातय घातय शत्रून जहि जहि ह्रीं ॐ फ्रों क्लीं स्वाहा अनेन दीपवर्येण पश्चिमाभिमुखेन अमुकं रक्ष अमुक वर प्रदानाय ह्रीं ह्रीं ह्रीं ॐ क्लीं व्रीं स्वाहा तं थं दं धं नं पं फं बं भं मं ॐ स्वाहा।

विनियोगः – **अस्य श्री कार्तवीर्यार्जुनमाला मंत्रस्य दत्तात्रेय ऋषिः अमित छन्दः कार्तवीर्यार्जुनो देवता मनोभीष्ट सिद्धयर्थे दीपदाने च जपे विनियोगः ।**

षडङ्गन्यास – **ॐ व्रां हृदयाय नमः, व्रीं शिर से स्वाहा, व्रूं शिखायै वषट्, वैं कवचाय हुं, व्रौं नेत्रत्रयाय वौषट्, व्रः अस्त्राय फट् ।**

दीप संकल्प के पहले कार्तवीर्यार्जुन का ध्यान करें पश्चात् मंत्र संकल्प बोलकर जल भूमि पर छोड़े ।

इसके बाद नवाक्षर मंत्र के एक हजार जप करें।

विनियोगः – **अस्य नवाक्षरकार्तवीर्यर्जुन मंत्रस्य दत्तात्रेय ऋषिः अनुष्टुप् छन्दः कार्तवीर्यार्जुनो देवतात्मनोऽभीष्ट सिद्धयर्थे जपे विनियोगः।**

मंत्र – ॐ आं ह्रीं फ्रीं वीं स्वाहा क्रों ॐ।

डामर तंत्र में इसे हूं के साथ दिया गया है अर्थात् ॐ की जगह हुं का भी प्रयोग किया जा सकता है।

न्यास – **पहले की तरह व्रां, व्रीं, व्रूं, वैं, व्रौं, व्रः, से अङ्गन्यास करें।**

दीपदान करते समय अमाङ्गलिक शब्दों का प्रयोग नहीं करे। गौ, ब्राह्मण, अश्व के दर्शन शुभ है। चूहा, बिल्ली, मलेच्छ के दर्शन अशुभ, शूद्र के दर्शन मध्यम फलदायक है।

दीपज्वाला ठीक सीधी होतो सिद्धिप्रद, टेढी मेढी विद्याप्रद होती है। ज्वाला में चट चट का शब्द भयकारक होता है। ज्योति काली होवे एवं नीचे की ओर झुकती हो तो पशुहानि होवे, ज्योति भग्न अहितकर यदि दीपदान करने के बाद पात्र भग्न हो जावे तो १५ दिन के भीतर महा अनिष्ट होवें ।

दीपक में दूसरी बत्ती बदलनी पड़े तो कार्य में विलम्ब होता है दीप से दीप जलाने पर नेत्र पीड़ा होवे, अशुचि व अशुद्ध अवस्था में दीप स्पर्श करे तो व्याधि उत्पन्न होवे।

चूहे, बिल्ली, कुत्तों के स्पर्श से दीप भग्न होवे तो राज भय देता है। निशीथ काल में एक पैर पर खड़ा होकर जप करने से शीघ्र सिद्धि प्राप्त होवे।

दीपदान दिनों में ब्रह्मचर्य नियमों का पालन करें। दीप प्रारम्भ के पहिले एवं बाद में गुरु का अभिनन्दन करें एवं दक्षिणा देवें। उत्तरार्ध होम कर ब्राह्मण को भोजन करायें। यदि प्रयत्न के बाद भी इष्टसिद्धि में बाधा होतो तीन दीपक जलाने चाहियें।

॥ श्रीकार्तवीर्यार्जुन मालामन्त्रम् ॥

विनियोग :- ॐ अस्य श्रीकार्तवीर्यार्जुन माला मन्त्रस्य दत्तात्रेय ऋषिः। गायत्री छन्दः। श्रीकार्तवीर्यार्जुन देवता। अभीष्ट सिद्ध्यर्थे जपे विनियोगः।

ऋष्यादिन्यास: - शिरसि दतात्रेय ऋषये नमः। मुखे गायत्रीछन्दसे नमः। हृदि श्रीकार्तवीर्यार्जुन देवतायै नमः। अभीष्ट सिद्ध्यर्थे जपे विनियोगाय नमः सर्वाङ्गे।

पञ्चांगन्यास :- दत्तात्रेय प्रियतमाय हृदयाय नमः। महिष्मती नाथाय शिरसे स्वाहा। रेवानदी जलक्रीडा तृप्ताय शिखायै वषट्। हैहयाधिपतये कवचाय हुम्। सहस्त्र बाहवे अस्त्राय फट्।

ध्यानम् :– (१)

दोर्दण्डेषु सहस्त्र सम्मित तरेष्वेतेष्वजस्त्रं लसत्
कोदण्डैश्च शरैरुदग्र निशितैरुद्यद् विवस्वत् प्रभः।
ब्रह्माण्डं परिपूरयन् स्व निनादैर्गण्ड द्वयान्दोलित
द्योतत् कुण्डल मण्डितो विजयतो श्रीकार्तवीर्यो विभुः॥

ध्यानम् :– (२)

उदग्र बाणाँश्चापानि दधतं सूर्य सन्निभम्।
प्रपूरयन्तं ब्रह्माण्डं धनुर्ज्या निस्स्वनैस्तथा॥
कार्तवीर्यं नृपं ध्यायेद् गण्डशोभित कुण्डलम्॥

॥ माला मन्त्र॥

ॐ नमो भगवते कार्तवीर्यार्जुनाय हैहयाधिपतये सहस्त्र कवचाय, सहस्त्रकर सदृशाय सर्वदुष्टान्तकाय सर्व शिष्टेष्टाय सर्वत्रोदधेरागन्तुकान् अस्मद् वसुविलुम्पकान् चौर समूहान् स्वकरसहस्त्रैः निवारय निवारय रोधय रोधय पाश सहस्त्रैः बन्धय बन्धय अंकुश सहस्त्रैः आकर्षय आकर्षय स्वचापोद्भूत बाण सहस्त्रैः भिन्दि भिन्दि स्वहस्तोद्गत खड्ग सहस्त्रैः छिन्धि छिन्धि स्वहस्तोद्गत मुसल बाण सहस्त्रैः मर्दय मर्दय स्वशङ्खोद्भुतनाद सहस्त्रैः भीषय भीषय स्वहस्तोद्गत चक्र सहस्त्रैः निकृन्तय निकृन्तय पर कृत्यां त्रासय त्रासय गर्जय गर्जय आकर्षण आकर्षय भ्रामय भ्रामय मोहय मोहय मारय मारय उद्वासय उद्वासय उन्मादय उन्मादय तापय तापय विनाशय विनाशय विदारय विदारय स्तम्भय स्तम्भय जृम्भय जृम्भय मारय मारय वशीकुरु वशीकुरु

उच्चाटय उच्चाटय विनाशय विनाशय दत्तात्रेय श्रीपाद प्रियतम! कार्तवीर्यार्जुन! सर्वत्रोदधेरागन्तुकान् अस्मद्वसु विलुम्पकान् चौर समूहान् समग्रं उन्मूलय उन्मूलय हुं फट् स्वाहा॥

पुरश्चरण :- माला मन्त्र का पुरश्चरण ३००० आवृत्तियों से होता है। पुरश्चरण करने के पश्चात् ही प्रयोग करना चाहिए।

॥ कार्तवीर्यार्जुन कवच प्रयोगः ॥

॥ श्रीदेव्युवाच ॥

देवाधि देव! सर्वज्ञ! सर्व लोकहिते रत! केन रक्षा भवेनृणां भीतानां विविधापदि। राज चौरादि पीड़ासु शस्त्राग्नि विष पातने। मारी दुःस्वप्न-पीड़ासु ग्रह रोग भयेऽपि च। ज्वरापस्मार पीड़ासु सिंह-व्याघ्रनिपातने। राक्षसासुर पिशाच वेताल-प्रेत-पातने। महाभये महानाशे महाकारागारगतेऽर्णवे। महामृत्युभये घोरे महाकलहपातने। केनोपायेन शान्तिः स्यात् साधकानां महेश्वर! अनष्टद्रव्यता चैव नष्टस्य पुनरागम। सर्वाकर्षणसक्षोभः सर्वसंहननं तथा। भवत्यभीष्टं जन्तूनां केवलं वद मे शिव!

॥ ईश्वर उवाच ॥

श्रृणु गुह्यतमं देवि! गोपनीयं प्रयत्नतः अवाच्यमपि वक्ष्यामि तव लोकहिताय वै। कवचं कार्तवीर्यस्यसाङ्गावरणकं क्रमात्। स्वमूर्तिशक्तिमंत्रौघं स-जपध्यानपूर्वकं सहस्त्रादित्यसङ्काशे नानारत्नसमुज्ज्वले। भास्वद् ध्वजपताकाढ्ये तुरगायुधभूषणे। महासंवर्त्तकाम्भोज भीमरावविराविणि। समुद्धृतमहाच्छत्र वितानितवियत्पथे। निर्माणकिङ्किणीजाल चलच्चामर शोभिते। महारथवरे दीप्तेनानायुधविराजिते । सुस्थितं विपुलोदार सहस्त्रभुज मण्डितं। वामोरुकुण्डकोदण्डान् दधानमपरैः शरान्। किरीटहारमुकुटकेयूर वलयाङ्गदैः। मुद्रिकोदर गन्धाढ्यैमौञ्जी नूपुरकादिभिः। भूषितं विविधाकल्पैर्भा स्वरैःसुमहाधनैः। आबद्धकवचं वीरं सुप्रसन्नाननाम्बुजं। धनुर्ज्यासिंहनादेन कम्पयन्तं जगत्त्रयं । सर्वशत्रुक्षयकरं सर्वव्याधिविनाशनं। सर्वसम्पत्प्रदातारं विजयश्रीनिषेवितं। सर्वसौभाग्यदं भद्रं भक्तानां भयनाशनं। दिव्यमालानुलेपाढ्यं सर्वलक्षणसंयुतं। रथनागाश्वपादाति वृन्दमध्यगमीश्वरं । वरदं चक्रवर्त्तीनां महीलोकैकपालकं। समानोदितसाहस्त्रं दिवाकरसमत्विषं। महायोगबलैश्वर्य कीर्त्याक्रान्तजगत्त्रयं। श्रीमच्चक्रहरेरंशादवतीर्णं महाबलं। सम्यगात्मविभेदेन

ध्यात्वारक्षामुदीरयेत्।

दत्तात्रेयऋषिः प्रोक्तोऽनुष्टुप् छन्दः प्रकीर्त्तितं। कार्तवीर्यार्जुनो विष्णुश्चक्रवर्ती च देवता। विनियोगश्च रक्षायै सर्वतः परिकीर्तितः।

सर्वदुष्टविनाशाय सर्वार्थस्य च सिद्धये। अस्याङ्गमूर्त्तयः पञ्चपांतु मां स्फाटिकोज्ज्वलाः। अग्नीशासुर वायव्यकोणेषु हृदयादिकाः। सर्ववस्तूज्ज्वल रूपवीर चर्मासिपाणयः। अव्याहतबलैश्वर्य शक्तिसामर्थ्यविग्रहः। क्षेमङ्करीशक्ति-युतश्चौराणां मद भञ्जनः। प्राचीदिशं रक्षतु मे वाणवाणाशयायुधः। श्रीकराशक्ति सहितो मारीमदविभञ्जनः। शरचापधरः श्रीमान् दिशं मे पातु दक्षिणां। महावश्यकरीयुक्तः शत्रूणां मदभञ्जनः। कोदण्डेषु धरः सौर्यां दिशं मे परिरक्षतु। प्रजाकरीयुतश्चापवाण दुष्टप्रणाशनः। परिरक्षतु मे सम्यक् विदिशं चैत्र भानवीं। विद्याकरीसमायुक्तः सुमहान् दुष्टनाशनः। पातु मे नैऋतीं चापवाणवान् दिशमीश्वरः। धनकर्या समायुक्तो महादुरितनाशनः। इष्वासनेषुधृक् मम पातु विदिशं मम वायवीं। आयुष्कर्या समायुक्तः श्रीमान् भय विनाशनः। चापेषुधारी शैवीं मे विदिशं परिरक्षतु। विजय श्रीयुतः साक्षात् सहस्रारधरो विभुः। दिशमूर्ध्वामवतु मे महाभयविनाशनः। शङ्खभृत् सुमहाशक्तिसंयुतोऽप्यधरां दिशं। परिरक्षतु मे दुःखध्वान्त संभेदभास्करः। महायोगसमायुक्तः सर्वदिक् चक्रमण्डलं। महायोगीश्वरः पातु सर्वतो मम पद्मभृत्।

एता दिङ्-मूर्त्तयो रक्ता रक्त-माल्यांशुकैर्वृताः। प्रधान देवता रूपाः पृथक् रथवरे स्थिताः। शक्तयः पद्महस्ताश्च नीलेन्दीवर सन्निभाः। सुशुक्ल माल्यवसनाः सुलिप्त तिलकोज्ज्वलाः। तत्पार्श्व देवताः स्व स्व वाहनायुध भूषणाः। स्व स्व दिक्षु स्थिताः पान्तु मामिन्द्राद्या महाबलाः। एतास्तस्य समाख्याताः सर्वावरण देवताः।

सर्वतो मां सदा पान्तु सर्वशक्ति समन्विताः। हृदये चोदरे नाभौ जठरे गुह्य मण्ड़ले। उरुयुग्-जानु पादेषु भ्रूयुगलेषु च। कर्णाक्षि नासिका जिह्वा कण्ठ बाहु युगेषु च। दश वीजात्मका मंत्राः सम्यक् सम्पत्तिदायकाः। तेजोरूपाः स्थिताः पान्तु वांछा सुरद्रुमाः सदा। दश चान्ये महावर्णा मंत्ररूपा महोज्ज्वलाः। व्यापकत्वेन पान्त्वस्मानापादतल मस्तकं। कार्त्तवीर्यः शिरः पातु ललाटं हैहयेश्वरः। सुमुखो मे मुखं पातु कर्णौ व्याप्तजगत्-त्रयः। सुकुमारो हनू पातु भ्रूयुगं मे धनुर्धरः। नयने पुण्डरीकाक्षो नासिकां मे गुणाकरः। अधरोष्ठौ सदा पातु ब्रह्मगेयो द्विजान् कविः। सर्वशास्त्र कलाधारो जिह्वां चिबुकमव्ययः।

दत्तात्रेय प्रियः कण्ठं स्कंधौ राजकुलेश्वरः। भुजौ दशास्य दर्पघ्नो हृदयं मे महाबलः। करौ सर्वार्थदः पातु कराग्राणि जगत्प्रियः। कुक्षिं रक्षतु मे विद्वान् वक्षः परपुरञ्जयः। रेवाम्बुलीला सन्तृप्तो जठरं परि रक्षतु। वीर शूरस्तु मे नाभिं पार्श्वौ मे सर्वदुष्टहा। सहस्त्रभुजभृत् पृष्ठं सप्तद्वीपाधिपः कटिं। उरू माहिष्मतीनाथो जानुनी वल्लभो विभुः। जङ्घे वीराधिपः पातु पातु पादौ मनोजवः। पातु सर्वायुधधरः सर्वाङ्गं सर्व-मर्मसु। सर्वदुष्टान्तकः पातु धात्वष्टक कलेवरं। प्राणादि दश जीवेशान् सर्वशिष्टेष्टदोऽवतु। वशीकृतेन्द्रिय ग्रामः पातु सर्वेन्द्रियाणि मे। अनुक्तमपि यत्-स्थानं शरीरेऽन्तर्बहिश्च यत्। तत् सर्वं पातु मे सर्वलोक नाथेश्वरेश्वरः। वज्रात् सारतरं चेदं शरीरं कवचावृतं। बाधाशत विनिर्मुक्तमस्ति मे भयवर्जितं। बध्वेदं कवचं दिव्यं न भेद्यं हैहयेशितुः। विचरामि दिवा रात्रौ निर्भयेणान्तरात्मना।

राजमार्गे महादुर्गे मार्गे चौरादि संकुले। विषमे विपिने घोरे दावाग्नौ गिरिकन्दरे। संग्रामे शस्त्रसङ्घाते सिंहव्याघ्र निषेविते! गह्वरे सर्प संकीर्णे संध्याकाले नृपालये। विवादे विपुलावर्त्ते समुद्रे च नदीतटे। परिपन्थि जनाकीर्णे देशे। दस्युगणैर्वृते। सर्वस्व हरणे प्राप्ते प्राप्ते प्राणस्य संकटे। नाना-रोग-जरावेशे विषाद प्राप्त भूतले। मारी-दुःस्वप्न-पीड़ासु क्लिष्टे विश्वास-घातकैः। शरीरे च महादुःखैर्मानसे च महाज्वरे। आधि व्याधिभये विघ्ने ज्वालोपद्रवकेऽपि च। न भवेत् तु भयं किञ्चित् कवचेनावृतस्य मे। आगन्तु कामानखिलान् सुरदस्यु-विलुम्पकान्। विनाशयेत् तद्दोर्दण्ड सहस्त्रेण महारथः। स्वकरोद्धृत निर्भिन्नान् सहस्त्रशर-खण्डितान्। राजचूड़ामणिः क्षिप्रं करोत्वस्मद् विरोधकान्। खड्गसाहस्त्र दलितान् सहस्त्र-मूषलार्दितान्। चौरादि दुष्ट सत्वौघान् सहस्त्रारः सहस्त्रभृत्। कृत-वीर्यसुतो राजा सहस्त्रभुजमण्डितः।

अवतारो हरेः साक्षात् पालयेत् सकलं मम। कार्त्तवीर्यार्जुनो नाम राजा बाहुसहस्त्रवान्। तस्य स्मरण मात्रेण गतं नष्टं च लभ्यते। यो भवेल्लोक-रक्षार्थमंशाच्चक्रं हरेर्भुवि। तं नमामि महावीर्यमर्जुनं कृत वीर्यकं। सहस्त्रबाहुं स-शरं स-चापं रक्ताम्बरं रत्नकिरीट कुण्डलं। चौरादि दुष्टभयनाशनमिष्टदं तं वन्दे महाबल विजृम्भित कार्त्तवीर्यं। कार्त्तवीर्य! महावीर्य! सर्वदुष्टविनाशन! सर्वत्र सर्वदा तिष्ठ दुष्टान्-नाशय पाहि माम्। दक्षे पञ्चशतं वाणा वामे पंचशतं धनुः। यो बिभर्त्ति स पात्वस्मान् विषव्याल शताकुलान्। उत्तिष्ठ दुष्ट दमन! सप्तद्वीपैक पालक! त्वमेव शरणं प्राप्तं सर्वतो रक्ष माम्। उत्तिष्ठ किं त्वं स्वपिषि किं तिष्ठसि चिराय हि। पाहि नः सर्वदा सर्व भयेभ्यः स्व-सुतानिव।

ये चौरा वसुहर्तारो विद्विषो ये च हिंसकाः। अन्तराय-करा दुष्टाः पापका ये दुराशयाः। दुर्हृदो दुष्टभूपाला दुष्टामान्याश्च पापकाः। ये च कार्यविलोप्तारो ये खलाः परिपन्थिनः। सर्वस्व हारिणो ये च ये च मायाविनोऽपरे। महाक्लेश-करा म्लेच्छा दस्यवो वृषलाश्च ये। ये महाशर दातारो वञ्चकाः शस्त्रपाणयः। ये पापा दुष्ट कर्माणो दुःखदा दुष्टबुद्धयः। व्याजकाः कुपथासक्ता ये च नानाभयप्रदाः। छिद्रान्वेष रता नित्यं येऽस्मान् बाधितुमुद्यताः। ते सर्वे कार्त्तवीर्यस्य महाशंख वराहताः। सहसा विलयं यान्तु दूरादेव विमोहिताः।

ये दानवा महादैत्या ये यक्षा ये च राक्षसाः। पिशाचा ये महासत्वा ये भूता ब्रह्मराक्षसाः। अपस्मार ग्रहा ये च ये ग्रहाः पिशताशनाः। महालोहित भोक्तारो वेताला ये च गुह्यकाः। मनोबुद्धीन्द्रिय जवाः स्फोटकाश्च महाज्वराः। महाशना बलिभुजो महाकुणप भोजनाः। गन्धर्वाप्सरसः सिद्धा ये च देवादि योनयः। डाकिन्यो घोनसाः प्रेताः क्षेत्रपाला विनायकाः। महाव्याघ्र महामेष महातुरगरूपकाः। महापूजा महासिंहा महामहिष सन्निभाः। ऋक्षवाराह शुनकरूपा वोलुकमूर्त्तयः। महोष्ट्रखर-मार्जार-सर्पाणां विषमस्तकाः। नानारूपा महासत्वा नाना क्लेशसहस्रदाः। नानारोग-कराः क्षुद्रा महावीर्या महाबलाः। वातिकाः पैतिका घोराः श्लैष्मिकाः सान्निपातिकाः। माहेश्वरा वैष्णवाश्च वैरिंश्या महाग्रहाः। स्कान्दा वैनायकाः क्रूरा ये च प्रमथसम्भवाः। महाशत्रुग्रहा रौद्रा महामारी-मसूरिकाः। ऐकाहिका द्व्याहिका त्र्याहिकाश्च महाज्वराः। चातुर्थिकाः पाक्षिकाश्च मासाः षाण्मासिकाश्च ये। सांवत्सरा दुर्निवार्या ज्वराः परम दारुणाः। स्वाप्निकाश्च महोत्पाता ये च दुःस्वप्निका ग्रहाः। कूष्माण्डा जृम्भका भीमा घोनासा निधिवञ्चकाः। भ्रामकाः प्राणहर्त्तारो ये च बालग्रहादयः। दिवाचरा रात्रिचरा ये च संध्यासु दारुणाः। प्रमत्ता अप्रमत्ता वा येऽस्मान् बाधितुमुद्यताः। ते सर्वे हैहयेशस्य धनुर्मुक्त-शरार्दिताः। सहस्रधा प्रणश्यन्तु भग्नसत्व बलोद्यमाः।

ये सर्पा ये महानागा महागिरि गुहाशयाः। कालव्याला महादंष्ट्रा महाजगर-संज्ञकाः। अनन्त कुलिकाद्याश्च दंष्ट्राविष महाभयाः। अनेन शतशीर्षाश्च खण्डपुच्छाश्च दारुणाः। महाविष जलौकाश्च वृश्चिका रक्तपुच्छकाः। आशीविषाः कालकूटा महा-हालाहलाह्वयाः। जलसर्पा जलव्याला जलग्रहाश्च कच्छपाः। मासिका विष पुच्छाश्च ये चान्ये जलवासिनः। जलजाः स्थलजाश्चैव नानाभेद शतोद्भवाः। ये च षड्विन्दवो लूता भ्रामराः शुकपुच्छिकाः। स्थावरा जङ्गमाश्चैव कृत्रिमाश्च महाविषाः। गुप्तरूपा गुप्तविषा मूषिका गृहगोधिकाः। अपस्मारविषा घोरा महोग्रविषसंज्ञकाः। येऽस्मान् बाधितुमिच्छन्ति शरीर

प्राणनाशनाः। ते सर्वे कार्त्तवीर्यस्य खड्गसाहस्त्रखण्डिताः। दूरादेव विनश्यन्तु प्रनष्टेन्द्रिय साहसाः।

मनुष्याः पशवो वृक्षा वानरा वनगोचराः। सिंहव्याघ्र वराहाश्च महिषा ये महामृगाः। गजास्तुरङ्गा गवया रासभाः शरभा वृकाः। शुनकाः पिशुनाः शूद्रा मार्जारा विल-योनयः। शृगालाः शशकाः श्येना गरुत्मन्तो विहङ्गमाः। भेरुण्डा वायसा गृध्रा हंसाद्याः पक्षिजातयः। उद्भिज्जाश्चाण्डजाश्चैव स्वेदजाश्च जरायुजाः। नाना भेदकुले जाता नानाभाव पृथग्-विधाः। येऽस्मान् बाधितुमिच्छन्ति संध्यासु च दिवा निशि। ते क्षिप्रं कार्त्तवीर्यस्य गदासाहस्त्र चूर्णिताः। दूरादेव विनश्यन्तु विनष्टगति-पौरुषाः। ये चाक्षेप प्रदातारो द्वेष्टारो ये विदूषकाः। कार्त्यंयंत्र प्रकर्तारः कूटा मायाविनोऽपरे।

मारणोच्चाटनोन्मूल द्वेष मोहनकारकाः। विश्वास-घातका दुष्टा ये च स्वामिद्रुहो नराः। ये चाततायिनो दुष्टा ये पापा गोप्रहारिणः। दाहोपघात-गरलशस्त्र-पातातिं दुःखदाः। क्षेत्रवित्तापहरण बन्धनादि भयप्रदाः। एते ये विविधाकारा ये चान्ये दुष्टजातयः। पीड़ाकराश्च सततं छिद्रमिच्छन्ति बाधितुं। ते सर्वे कार्त्तवीर्यस्य चक्र -साहस्त्रदारिताः। दूरादेव विनश्यन्तु क्षयं यान्तु सहस्त्रधा।

ये मेघा ये महावर्षा ये वाता याश्च विद्युताः। ये महाऽशनयो दीप्ता निर्घाताद्याश्च दारुणाः। उल्कापाताश्च ये घोरा ये महेन्द्रायुधादयः। सूर्येन्दुकुज-सौम्याश्च गुरुकाव्य शनैश्चराः। राहुश्च केतवो घोरा नक्षत्राणि च राशयः। तिथयः संक्रमा मास हायना युगनायकाः। मन्वन्तराधिपाः सिद्धाऋषयो योगसिद्धयः। श्रुतय ऋग्-यजु-सामाथर्वणाद्याश्च वह्नयः। ऋतवो लोकपालाश्च पितरो देवसंहतिः। विद्याश्चैव चतुःषष्टि भेदोत्था भुवनत्रये। एते वै कीर्तिताः सर्वे ये चान्ये नानुकीर्तिताः। ते सन्तु नः सदा सौम्याः सर्वकालं सुखावहाः। आज्ञया कार्त्तवीर्यस्य योगीन्द्रस्यामित-द्युतेः।

कार्त्तवीर्यार्जुनो धन्वी राजेन्द्रो हैहयेश्वरः। दत्तात्रेय प्रियतमः सहस्त्रभुजमण्डितः। चापी खड्गी रथी वाणी तूणी चर्मी महाबलः। सुभगः सुमुखः शान्तश्चक्रवर्ती गुणाकरः। दशास्यदर्पहारो वा लीलातृप्तः सुदुर्जयः। दुष्टहा चौरदमनो राजराजेश्वरः प्रभुः। सर्वज्ञः सर्वदः श्रीमान् सर्वशिष्टेष्टदः कृती। राजचूडामणिर्योगी सप्तद्वीपाधिनायकः। विजयी विश्वतो राज्ञां महामतिरलोलुपः। देवविप्र-प्रियो विद्वान् ब्रह्मगेयः सनातनः। माहिष्मती पतिर्योद्धा महाकीर्तिर्महाभुजः। सुकुमारो महावीरो मारीघ्नो मदिरेक्षणः। शत्रुघ्नः

शाश्वतः शूरः शङ्खभृद् गोपिवल्लभः। महाभागवतो धीमान् महाभयविनाशनः। असाध्य विग्रहो दिव्यभावो व्याप्तजगत्त्रयः। सर्वशास्त्र कलाधारो विरजो लोकवन्दितः। वीरो विमल सत्वाढ्यो महाबलपराक्रमः। विजयश्रीमयो नान्यो जितारिर्मन्त्रनायकः। चक्रभृत् कामदः कान्तः कामघ्नः कमलेक्षणः। भद्रवादप्रियो वैद्यो विबुधो वरदो वशी। जितेन्द्रियो जितारातिः महान् योऽनन्तविक्रमः। चक्रभृत् परचक्रघ्नः संग्रामविधिपूजितः। महाधनो निधिपतिर्महायोगी गुरुप्रियः। योगाढ्यः सर्वरोगघ्नो राजिताखिल भूतलः। दिव्यास्त्र भृदमेयात्मा सर्वगोप्ता महोज्ज्वलः। सर्वायुध-धरोऽभीष्टप्रदः परपुरञ्जयः। योगसिद्धो महाकायो महावृन्द शताधिपः। सर्वज्ञाननिधिः सर्वसिद्धदान कृतोद्यमः।

इत्यष्टशतनामोत्था मूर्त्तयो श-दिक्पतेः। सम्यक् दशदिशो पालयन्तु च मां सदा। महासौख्यमसम्बाधमारोग्यमपराजयः। दुःखहानिररिघ्नश्च प्रजावृद्धिः सुखोदयः। वाञ्छाप्तिरिति कल्याणमवैषम्यमनामयं। अनालस्यमभीष्टं च मृत्युहानिर्बलोन्नतिः। भयहानिर्यशः कान्तिर्विद्या बुद्धिमहोच्छ्रितः। अनष्ट-द्रव्यता चैव नष्टस्य पुनरागमः। दीर्घायुष्ट्वं मनोलाभः सौकुमार्यमभीप्सितं। अप्रधृष्टमनल्पत्वं महासामर्थ्यमेव च। सन्तु मे कार्त्तवीर्यस्य हैहयेन्द्रस्य कीर्त्तनात्।

य इदं कार्त्तवीर्यस्य कवचपुण्यवर्द्धनं। सर्वपापप्रशमनं सर्वोपद्रवनाशनं। सर्वशान्तिकरं गुह्यं समस्तभयनाशनं। विजयार्थप्रदं नृणां सर्वसम्पत्प्रदं शुभं। शृणुयाद् वा पठेद्वापि पूजयेद्वापि पुस्तकं। नित्यं शिरसि यो धत्ते सर्वान् कामानवाप्नुयात्। मुच्यते सर्वदुःखैस्तु सर्वत्र विजयी भवेत्। मारी चौरादि-पीड़ाद्यैर्न कदाचित् प्रबाध्यते। पठतः प्रातरुत्थाय दुःस्वप्नादि विनश्यति। लभते वाञ्छितानर्थान् पूज्यते त्रिदशैरपि। शय्यातलगतो रात्रौ य इदं कवचं पठेत्। न तस्य तस्कराराति-दुःस्वप्नादिकृतं भयं। चौरैर्यदा हृतं पश्येत् पश्वादि-धनमात्मनः। सप्तवारं तदा जप्त्वा निशि पश्चिम-दिङ्मुखः। सप्तरात्रेण लभते नष्टद्रव्यं न संशयः। सप्तविंशतिधा जप्यात् प्राचीदिग्-वदनो यदि। तदा देवासुरनिभं परचक्रं निवारयेत्। विवादे कलहे घोरे पंचधाः य पठेदिदम्। विजयी जायते तस्य न कदाचित् पराजयः। सम्यक् द्वादशधा रात्रौ प्रजपेद् बन्धमुक्तये। त्रिदिनान्निगड़ ग्रस्तो मुच्यते नात्र संशयः। अनेनैव विधानेन सर्व साधन कर्मणि। असाध्यमपि सप्ताहात् साधयेन्मंत्र वित्तमः। यात्राकाले पठित्वेदं मार्गे गच्छति यः पुमान्। न तस्य चौरव्याघ्राद्यैर्भयं स्यात् परिपन्थिभिः। नित्यं गृहगतो जप्त्वा कल्याणैः परिपूर्यते।

न भयं जायते तस्य दुष्टसत्वादिभिः क्वचित्। सर्वरोग प्रपीड़ासु त्रिधा वा पंचधा पठेत्। स-रोगमृत्युवेताल-भूतप्रेतैर्न बाध्यते। जगन्नासेचनं कुर्याज्जलेनाञ्जलिना तनौ। न चासौ विषकृत्यादिरोग-स्फोटैः प्रबाध्यते। त्रिसन्ध्यं यः पठेदेतत् षणमासं विजितेन्द्रियः। कालमृत्युमपि प्राप्तं जीयान्नास्त्यत्र संशयः। पठतः कवचं चेदं विषं नाक्रमते तनौ। न जाड्यान्धत्व मूकत्वं नोपसर्ग भयं क्वचित्। विंशत्या चोक्त विधिना ध्यात्वा देवं तदात्मकं। मंत्री गुरु प्रसादाप्तं मंत्रराजं जपेत् पुनः। कवचेनावृतो भूयो मंत्र ध्यानं समाचरेत् ।

आदौ सम्बोधनं कुर्यात् तन्नाम ध्यान पूर्वकं। चतुरश्चक्र मंत्राणामुच्चरेद् वीज पूर्वकान्। कृत्वान्ते चैव मन्त्राणामुच्चरेद् वीज पूर्वकान्। शरीरे न्यासमेवं हि यः करोति समाहितः। स यथोक्तं लभेत् सद्यः फलं वज्रतनुर्भवेत्। यथा तथेदं कवचं कस्यचिन्न प्रकाशयेत्। गोपनीयं प्रत्यनेन शिवस्य वचनं यथा। सुभक्ताय सुशिष्याय दद्यात् सर्वस्व दायिने। साधकानां हितार्थाय यदुक्तं चन्द्रमौलिना। कार्त्तवीर्यस्य कवचं यदुक्तं वै मया तव। तेन संवीक्षितो देवि! कालेनापि न जीर्यते। तस्मात् सर्वप्रयत्नेन कवचं धारयेत् सुधीः।

कार्त्तवीर्यः खल-द्वेषी कृत-वीर्यसुतो बली। सहस्त्रबाहुः शत्रुघ्नो रक्तवासा धनुर्धरः। रक्तगंधो रक्तमाल्यो राजास्मर्तुरभीष्टदः। द्वादशैतानि नामानि कार्त्तवीर्यस्य यः पठेत्। सम्पदस्तस्य जायन्ते जनास्तस्य वशे सदा।

॥ इति श्रीउड्डामरेश्वर तन्त्रे कार्त्तवीर्यार्जुन कल्पे उमा महेश्वर संवादे कार्त्तवीर्यार्जुन कवचं नामाष्टाशीति पटलः समाप्तः।

॥ श्री कार्त्तवीर्यार्जुन दर्पण प्रयोग ॥

घर से भागे हुए व्यक्ति के बारे में यदि पता नहीं चल रहा हो तो उस स्थिति में उसकी स्थिति व परिस्थिति जानने के लिए यह प्रयोग किया जा सकता है। वैसे तो इस प्रयोग के द्वारा चोरी गई वस्तुओं तथा उनके चोरो का भी ज्ञान पाया जा सकता है, परन्तु क्योकि यह प्रयोग मँहगा तथा श्रम-साध्य है अतः अत्यन्त जटिल परिस्थिति में ही, जब और कोई उपाय काम में नहीं आए तभी इस दर्पण प्रयोग को करना चाहिए।

(१) शुभ मुहूर्त्त में, शुद्ध स्थान (शुभ स्थान) में शुद्ध होकर बैठ जाए (प्रयोग का स्थान निर्वात, पर्याप्त खुला, हवादार, रोशन-दान, झरोखा आदि से युक्त होना चाहिए, ताकि दीपक बुझे नहीं तथा दीपको का धुँआ बाहर निकलता रहे।)

विधि-पूर्वक इच्छित कार्य की सफलता हेतु संकल्प एवं श्रीगणपत्यादि पूजन करें।

(२) साधक स्वयं मध्य भाग में बैठे। अपने सामने काँसे/ ताँबे की थाली/ कटोरे में तैल भरकर रखे। दूसरा सहायक व्यक्ति, साधक के चारो और गोल घेरे की आकृति में, एक हजार मिट्टी के बने दीपक, इस प्रकार रखे कि सभी दीपकों के मुख साधक की तरफ रहें। साधक का स्वयं का मुख, उत्तर-दिशा की तरफ होगा तथा उसके दाहिने हाथ प्रधान दीपक रहेगा-जिससे प्रधान दीपक का मुख पश्चिम की तरफ रहे।

(३) साधक के वस्त्र, सहायक के वस्त्र, पूजा-सामग्री सभी लाल होनी चाहिए। लाल-चन्दन या गहरे लाल रंग की मूँगे की माला, सरसों के तेल में रोली मिली हुयी बत्तियो की रुई या तो लाल रंगी या मौली निर्मित होनी चाहिए। कमरे की दीवार या परदे लाल रंग के हो तो अच्छा रहेगा। सहायोगी व्यक्ति तथा सहायक का यज्ञोपवीत भी लाल रंग का होना चाहिए। दीपक मिट्टि के तथा लाल रंग के अतिरिक्त अन्य किसी रंग का दाग-धब्बा नहीं होना चाहिए। दीपकों को दूर-दूर रखें ताकि यदि किसी दीपक में तेल कम हो जाए, तो उसमें तेल डालने के लिए या बत्ती उपर करने के लिए सहयोगी व्यक्ति के आन-जाने के लिए पर्याप्त स्थान रहे। बत्तियाँ बड़ी प्रयोग करें। क्योकि दूसरी बत्ती प्रयोग नहीं की जा सकती है।

(४) सभी दीपक जलाकर साधक निम्न मन्त्र का दस सहस्त्र जप करें-

"ॐ नमो भगवते श्रीकार्त्तवीर्यार्जुनाय सर्वदुष्टान्तकाय तपोबल पराक्रम-परिपालित सप्तद्वीपाय, सर्वराजन्य चूडामणये, सर्वशक्तिमते, सहस्त्रबाहवे हुं फट् (मम) अभिलषितं दर्शय-दर्शय स्वाहा"।

(५) जब तक दस सहस्त्र जप पूरे नहीं हो जाए, तब तक आसन से नही उठें एवं न कोई दीपक बुझने देवें। मन व सभी इन्द्रिीया जप काल में एकाग्र रखें।

विशेष - (१) **यदि** भागे हुए व्यक्ति का चित्र प्रयोग **के स्थान** पर रख सके तो अच्छा रहेगा।

(२) यदि साधक को लगे की मंत्र बड़ा है तथा एकासन पर पूरा जप सम्भव नहीं है, तो सहयोगी रखे जा सकते है। सहयोगी एक या कई हो परन्तु सच्चरित्र व शुद्ध उच्चारण करने वाले होने चाहिए। सहयोगियों के वस्त्रादि का विधान साधक **की तरह** ही रहेगा।

(३) जप पूरा होने पर, अभिलषित व्यक्ति की हालत व स्थान आदि सामने रखे हुए तैल में प्रत्यक्ष चित्र के समान स्पष्ट हो जाते है।

॥ अथ कार्तवीर्यस्तोत्रम् ॥

विनियोगः – अस्य श्रीकार्तवीर्यार्जुनस्तोत्रमंत्रस्य दत्तात्रेय ऋषिः अनुष्टुप् छन्दः, श्रीकार्तवीर्यार्जुन देवता, फ्रों बीजं, ह्रीं शक्तिः, क्लीं कीलकं यजमानाभीष्टसिद्ध्यर्थे जपे विनियोगः।

षडङ्गन्यासः – कार्तवीर्यार्जुनाय नमः हृदयाय नमः। कार्त० शिरसे स्वाहा। कार्त० शिखायै वषट्। कार्त० कवचाय हुम्। कार्त० नेत्रत्रयाय वौषट्। कार्त० अस्त्राय फट्।

ध्यानम् –

सहस्त्रबाहुं सशरं सचापं रक्ताम्बरं रक्तकिरीटकुण्डलम्।
चौरादिदुष्टनाशनमिष्टदं तं ध्यायेन्महाबलविजृम्भितकार्तवीर्यम् ॥

मन्त्र – ॐ ह्रीं कार्तवीर्यार्जुनो नाम राजाबाहुसहस्त्रवान्। तस्य स्मरणमात्रेण हृतं नष्टं च लभ्यते। इति जपः कार्यः। जपान्ते पुनर्न्यासं कृत्वा जपं निवेदयेत्।

॥ अथपाठः ॥

कार्तवीर्यः खलद्वेषी कृतवीर्यसुतो बली।
सहस्त्रबाहुः शत्रुघ्नो रक्तवासा धनुर्धरः ॥१॥

रक्तगन्धो रक्तमाल्यो राजास्मर्तुरभीष्टदः।
द्वादशैतानि नामानि कार्तवीर्यस्य यः पठेत् ॥२॥

सम्पदरतस्य जायन्ते जनाः सर्वे वशं गताः।
राजानो दासतां यान्ति रिपवो वश्यतां तथा ॥३॥

आनयत्याशु दूरस्थं क्षेमलाभयुतं प्रियं।
सर्वसिद्धिकरं स्तोत्रं जपृणां सर्वकामदम् ॥४॥

कार्तवीर्य महावीर्य सर्वशत्रुविनाशन।
सर्वत्र सर्वदा तिष्ठ दुष्टान्नाशय पाहि माम् ॥५॥

उत्तिष्ठ दुष्टदमन सप्तद्वीपकपालक।
त्वामेव शरणं प्राप्तं सर्वतो रक्ष रक्ष माम् ॥६॥

दुष्टघ्न किं त्वं स्वपिषि किं तिष्ठसि चिरायसि ।
पाहि नः सर्वदा सर्वभयेभ्यः स्वसुतानिव ॥७॥
मतिभङ्गः स्वरो हीनः शत्रूणां मुखभञ्जनम् ।
रिपूणां च सभामध्ये सर्वत्र विजयं कुरु ॥८॥
यस्य स्मरण मात्रेण सर्वदुःखक्षयो भवेत् ।
तं नमामि महावीरमर्जुनं कृतवीर्यजम् ॥९॥
हैहयाधिपतेः स्तोत्रं सहस्त्रावृत्तिकं कृतम् ॥
वाञ्छितार्थप्रदं नृणां शूद्राद्यैर्न श्रुतं यदि ॥१०॥

'**प्रणम्य क्षमस्व**' इति विसर्जयेत्। प्रतिदिनमेवं जपो यावद्दीपसमाप्तिः कार्यः। शुभदिने समाप्य ब्राह्मणं सम्पूज्य दक्षिणां दत्त्वा भोजयित्वा कर्मेश्वरार्पणं कुर्यात्।

॥ श्रीदत्तात्रेय मालामन्त्र–साधना ॥

विनियोगः– ॐ अस्य श्रीदत्तात्रेय मालामन्त्रस्य शबराख्य महारुद्र ऋषिः, अनुष्टुप् छन्दः, श्रीदत्तात्रेयो देवता, ह्रां बीजं, ह्रीं शक्तिः, दत्तात्रेयेति कीलकं, सर्वार्थसाधने जपे विनियोगः।

ऋष्यादिः– न्यास श्रीमहारुद्र-ऋषये नमः शिरसि, अनुष्टुप् छन्दसे नमः मुखे, श्रीदत्तात्रेयो देवतायै नमः हृदि, ह्रां बीजाय नमः गुह्ये, ह्रीं शक्तये नमः नाभौ, दत्तात्रेयेति कीलकाय नमः पादयोः, सर्वार्थसाधने जपे विनियोगाय नमः अञ्जलौ।

षडङ्गन्यास	करन्यास	अङ्गन्यास
दत्तात्रेयाय हरये स्वाहा	अङ्गुष्ठाभ्यां नमः	हृदयाय नमः
कृष्णोन्मत्ताय स्वाहा	तर्जनीभ्यां नमः	शिरसे स्वाहा
आनन्दाय दिगम्बराय स्वाहा	मध्यमाभ्यां नमः	शिखायै वषट्
मुनये [illegible]य स्वाहा	अनामिकाभ्यां नमः	कवचाय हुँ

पिशाचाय ज्ञानसागराय स्वाहा	कनिष्ठिकाभ्यां नमः	नेत्र-त्रयाय वौषट्
दत्तात्रयाय स्वाहा	करतलकरपृष्ठाभ्यां नमः	अस्त्राय फट्

ध्यानम् -

दिगम्बरं भस्मविलेपिताङ्गं, बोधात्मकं मुक्तिकरं प्रसन्नम् ।
निर्मानसं श्यामतनुं भजेऽहं, दत्तात्रेयं ब्रह्मसमाधि-युक्तम् ॥

॥ श्रीदत्त षट्चक्र स्तोत्रम् ॥

मूलाधारे वारिजपत्रे सचतुष्के, वं-शं-षं-सं-वर्ण-विशालैः सु विशालैः ।
रक्तं वर्णं श्रीगण-नाथं भगवन्तं,दत्तात्रेयं श्रीगुरुमूर्तिं प्रणतोऽस्मि ॥१॥
स्वाधिष्ठाने षड्दलपत्रे तनुलिङ्गे, बालां तावद् वर्णविशालैः सुविशालैः ।
पीतं वर्णं वाक्मतिरूपं ग्रहणातं, दत्तात्रेयं श्रीगुरुमूर्तिं प्रणतोऽस्मि ॥२॥
नाभिपत्रे पद्मदशान्ते ठ-प-वर्णे, लक्ष्मीकान्तं गरुड़ारूढं नरवीरम् ।
नीलं वर्णं निर्गुणरूपं निगमाख्यं, दत्तात्रेयं श्रीगुरु-मूर्तिं प्रणतो प्रणतोऽस्मि ॥३॥
हृत् पद्मान्ते द्वादश पत्रे क-ठ- वर्णे, शम्भुं शेषं हंसविशेषं समयं तम् ।
सर्गस्थित्यं तान् कुर्वन्तं शिवकान्तिं, दत्तात्रेयं श्रीगुरुमूर्तिं प्रणतो प्रणतोऽस्मि ॥४॥
चक्रस्थाने चक्रविशुद्धे कुसुमान्ते, चन्द्रकारे षोडश पत्रे स्वर वर्णे ।
मायाधीशं जीवशिवं तं निजमूर्तिं, दत्तात्रेयं श्रीगुरुमूर्तिं प्रणतोऽस्मि ॥५॥
आज्ञाचक्रे भ्रुकुटिस्थाने द्वि-दलान्ते, हं-क्षं-बीजं ज्ञाननिधिं तं गुरुमूर्तिम् ।
विद्युद्-वर्णं ज्ञान-मयं तं निटिलाक्षं, दत्तात्रेयं श्रीगुरु-मूर्तिं प्रणतोऽस्मि ॥६॥
शान्ताकारं शेषशयनं सुरवन्द्यं, कान्तानाथं कोमलगात्रं कमलाक्षम् ।
चिन्तारत्ने चिद्घनरूपं द्विजराजं, दत्तात्रेयं श्रीगुरुमूर्तिं प्रणतोऽस्मि ॥७॥
ब्रह्मानन्दं ब्रह्मामुकुन्दं भगवन्तं, सत्यं ज्ञानं सत्यमनन्तं भगरूपम् ।
पूर्णब्रह्मानन्दमयं तं गुरुमूर्तिं, दत्तात्रेयं श्रीगुरुमूर्तिं प्रणतोऽस्मि ॥८॥

मानस पूजन- ॐ लं पृथ्वी-तत्त्वात्मकं गन्धं श्रीदत्तात्रेयप्रीतये समर्पयामि नमः। ॐ हं आकाशतत्त्वात्मकं पुष्पं श्रीदत्तात्रेय प्रीतये समर्पयामि नमः। ॐ यं वायुतत्त्वात्मकं धूपं श्रीदत्तात्रेय प्रीतये घ्रापयामि नमः। ॐ रं अग्नितत्त्वात्मकं दीपं श्रीदत्तात्रेय प्रीतये दर्शयामि नमः। ॐ वं जलतत्त्वात्मकं नैवेद्यं श्रीदत्तात्रेय प्रीतये निवेदयामि नमः। ॐ सं सर्वतत्त्वात्मकं ताम्बूलं श्रीदत्तात्रेय प्रीतये समर्पयामि नमः।

उक्त प्रकार से ''मानस पूजा'' कर श्रीदत्तात्रेय माला-महा-मंत्र का जप करे। यथा-

ॐ नमो भगवते दत्तात्रेयाय धूत मम परमगुरवे कोटिसूर्य प्रकाशाय प्रदीप्त कोटिब्रह्माण्ड तेजसे दिव्यरूपाय स्वर्णकाषाय चैलाय स्वर्णयज्ञोपवीताय योगमुद्राज्ञान मुद्राक्षमाला धराय स्फटिकाभ माणिक्यवज्र वैडूर्य रुद्राक्ष मालालंकृताय स्वर्णकंचुक भूषणाय भस्मोद् धूलितविग्रहाय बालचन्द्रशेखराय सदा योगानन्दचिन्मय स्वरूपाय मम हृदय चिन्मय स्वरूपाय माहुरीं भक्ष्य भोक्ष्य निलयाय ॐ ह्रौं द्रौं योगनिद्रा मोक्षलक्ष्मी समेताय श्रीदत्तात्रेयाय परब्रह्मस्वरूपाय चक्रशङ्खडमरु गदापाशांकुश-कुण्ड-खड्ग-शार्ङ्ग-पिनाक-वाणाक्षय तूणीरादि सर्वायुधधराय असाध्यसाधनाय ब्रह्मपौरुषे आत्मपौरुषे परमानन्दस्वरूपाय द्रां-द्रीं-द्रूं-द्रैं-द्रौं-द्रः भूतप्रेतपिशाच-शाकिनी-डाकिनी-राक्षस-ब्रह्मराक्षस-भैरव-गणनायक-कूष्माण्ड-बाधा सहस्त्रोच्चाटनोच्चाटय क्षुद्रमपि क्षुद्रापस्मार स्फोटक व्रण ज्वरोच्चाटयोच्चाटय देव ग्रह नाग ग्रह सामान्य ग्रह मूकग्रह पंगुग्रह स्त्रीग्रह पुरुषग्रह दानवग्रह सर्वग्रहादीनुच्चाटय उच्चाटय परमंत्र परयन्त्र परतंत्रान् कोटि-कोटि छेदनाय आत्ममंत्र आत्मयंत्र आत्मतंत्रान् कोटि कोटि स्फूर्जनाय मां रक्ष-रक्ष आयुर्देहि श्रियं देहि प्रजां देहि ॐ श्रीं क्लीं ग्लौं द्रौं दत्तात्रेय प्रसादेन हुं फट् स्वाहा।

॥ वाञ्छाकल्पलता: स्तोत्र प्रयोगम्॥

यह वाञ्छाकल्पलता स्तोत्र प्रयोग पारिजात के बीजाक्षर युक्त प्रयोग से भिन्न व सरल है। गृह कलह,चिन्ता व अरिष्ट के शमन हेतु यह प्रयोग सरल एवं शीघ्र फलदायी है। इसका प्रयोग प्रातःकाल सूर्योदय के समय ब्रह्ममुहूर्त्त में करना चाहिये। श्रीत्रिपुरसुन्दरी व कामेश्वरशिव की स्तुति ब्रह्म रूप में की गई है एवं उनके प्रकृतिपुरुषात्मक मिलन से प्राप्त अमृत द्वारा कष्टनिवारण हेतु अमृतरुद्र से प्रार्थना की गई है। यह प्रयोग लक्ष्मीप्रद एवं सभी कामनाओं की सिद्धि करता है।

॥ श्री वाञ्छाकल्पलता प्रयोग:॥

विनियोग: - ॐ अस्य श्रीवाञ्छाकल्पलता मंत्रस्य नलदमयन्त्यौ ऋषि:, गायत्री छन्द:, श्री परमेश्वर- परमेश्वरी प्रीत्यर्थं जपे विनियोग:।

ध्यायेद्देवमनन्त-रूपमखिलं तेजात्मकं ज्योतिषम् ।
चिच्छक्तिं शिवमीश्वरीं च सहितमात्मा अचिन्त्यं प्रभो ॥

निर्गुण गुणवान् देव जगदाधार त्वमीश्वर ।
सत्य-ज्ञान-चिदात्मकं तव वपुः वन्दे शिवा-शंकर ॥
ॐ आदिरूपं दिव्यरूपं गुरुरूपं निरामयम् ।
तेजोरूपं सर्वसाक्षी विश्वरूपं जनार्दनम् ॥
अ-रूपं उ-रूपं म-रूपं तम-रूपकम् ।
रज-रूपं सत्व-रूपं सत्य-रूपं परं पदम् ॥
आत्मा शिव सदा साक्षी जीवाभावं च चिन्मयम् ।
निरञ्जनं निराकारं सर्व-व्यापी चराचरम् ॥
परमं परमात्मानं परं धाम परात्परम् ।
अजिरं अपरं हंसः अपरं देहचालकम् ॥
आकाशमवकाशं च खग-बिन्दुश्च नादजम् ।
अनादि सिद्धमात्मानं परं ज्योतिः शिवात्मकम् ॥
सर्वतेजोमयं राम दिव्य-तेजोमयं सदा ।
शाश्वतं दण्डरहितं शान्तं शुद्धं सुनिर्मलम् ॥
अजं अव्ययं चिद्रूपं आनन्दानन्द-वर्द्धनम् ।
अक्षयं नित्यसन्तुष्टं शास्ताशासन-वर्जितम् ॥
अजात-अजितयोर्देव भूत-भव्य-भवत्प्रभा ।
विकृत-विश्वसाक्षी च विश्वं विश्वसनातनम् ॥
ज्ञान विज्ञानं त्वं विभुः ब्रह्मा ब्रह्म-प्रकाशकम् ।
चिन्मयं च चिदाकाशभास्करं दिव्यरूपके ॥
त्वं शून्यं पञ्चशून्यं निर्गुणं गुणवर्द्धनम् ।
त्वमेकं केवलं ब्रह्म नित्यतृप्तं निरामयम् ॥
शिवलिङ्गं ज्योतिरूपं शिवाकारं सुदिव्यकम् ।
सदसद्-व्यापिनो सूक्ष्मं विराट् मङ्गलं हरिः ॥
त्वमसत्य-द्वन्द्वरहितं सच्चिदानन्द-विग्रहम् ।
नित्याऽनित्य शाश्वताय आत्म-लिङ्गायते नमः ॥

श्रीं ह्रीं क्लीं हस्सौः सौः गुं गुं गुं ग्लौं ग्लौं ग्लौं अमृत-कुम्भाय गं गं गं ऐं ऐं ऐं ह्रीं ह्रीं ह्रीं क्लीं क्लीं क्लीं वं वं वं भं भं भं क्षं क्षं क्षं हस्ख्फ्रें क्षिप्र-भैरवाय प्रसीद ।

ॐ ह्रीं वं ठं अमृतरुद्राय आं ह्रीं क्रौं प्रतिकूलं मे नश्यत्वनुकूलं मे वशमानय स्वाहा।

दमयन्ती-नलाभ्यां च नमस्कारं करोम्यहम् ।
अविवादो भवेदत्र कलिदोष-प्रशान्तिदः ॥
एकमत्यं भवेदेषां ब्राह्मणानां पृथक्-धियां ।
निर्वैरिता प्रजायन्ते सम्वादाग्ने प्रसीद मे ॥

(इति प्रथम पर्यायः)

॥ द्वितीय पर्यायः ॥

खं बालार्कप्रभमिन्द्रनीलस्फटिकं श्वेताभ्रविद्युज्ज्वलम् ।
शान्तं नादविलीनचित्तपवनं चक्राब्जचिह्नं भृशम् ॥
ब्रह्माद्या सनकादिभिः परिवृतं सिद्धैर्महायोगिनाम् ।
एवं ध्यानमुपासितं हृदि मुदा ध्येयं महायोगिभिः ॥
त्वमात्मा सर्वभूतेषु साक्षीरूपेण संस्थिता ।
केवलं ज्ञानरूपाय तस्मै ब्रह्मणे ते नमः ॥
अनङ्गरूपरूपाय त्रिगुणं रहितं तनुम् ।
पञ्च तत्वादि-रहितं तस्मै ब्रह्मणे ते नमः ॥
अतीतं सर्वभावेभ्यो बालार्कदृशं तनुम् ।
एवं सर्वमयं पूर्णं तस्मै ब्रह्मणे ते नमः ॥
इन्द्रियाणामधिष्ठाय भूतानामखिलेषु च ।
भूतेषु सततं व्याप्तं तस्मै ब्रह्मणे ते नमः ॥
आब्रह्म-स्तम्भपर्यन्तं सर्वव्यापी चराचरम् ।
परमानन्दं च यद्रूपं तस्मै ब्रह्मणे नमः ॥
निर्द्वन्द्वं नित्यसन्तुष्टं निर्लोपं निर्मलं खलु ।
उपाधि रहितं शान्तं तस्मै ब्रह्मणे ते नमः ॥
एकायानन्त रूपाय चिन्मयाय चिदात्मने ।
भूताय भूतनाथाय तस्मै ब्रह्मणे ते नमः ॥
लोकाय लोकनाथाय अखिलाय जगत्पते ।
केवलं शुद्धशान्ताय तस्मै ब्रह्मणे ते नमः ॥

आदि-मध्यान्त-हीनाय निर्गुणाय गुणात्मने ।
समस्त-जगदाधार तस्मै ब्रह्मणे ते नमः ॥
प्रणम्य श्रीगुरु-नाथाय स्वात्मा-रामेण योगिनः ।
केवलं शुद्ध-शान्ताय तस्मै ब्रह्मणे ते नमः ॥

ह्रीं ह्रीं ह्रीं क्लीं क्लीं क्लीं, ह्रीं ह्रीं ह्रीं, श्रीं श्रीं श्रीं, ह्रीं ह्रीं ह्रीं, क्लीं क्लीं क्लीं, ह् स् क्ष् म् ल् व् र् यूं आनन्दभैरवाय भैरवी सहिताय वं अमृतं कुरु कुरु।

ॐ ह्रीं वं ठं अमृतरुद्राय आं ह्रीं क्रौं प्रतिकूलं मे नश्यत्वनुकूलं मे वशमानय स्वाहा।

दमयन्ती-नलाभ्यां च नमस्कारं करोम्यहम् ।
अविवादो भवेदत्र कलिदोष-प्रशान्तिदः ॥
एकमत्यं भवेदेषां ब्राह्मणानां पृथग्-धियाम् ।
निर्वैरिता प्रजायन्ते सम्वादाग्ने प्रसीद मे ॥

(इति द्वितीय पर्यायः)

॥ तृतीय पर्यायः ॥

गं ध्यायेद्देवीं पराम्बां सकलजगमयीं प्रकृति-चित्स्वरूपाम् ।
व्याप्तां त्रैलोक्यनादां निखिलभयहरां धारिणीं कालचक्रम्॥
ब्रह्मा विष्णु महेशां स्थितिप्रलय करामुत्पत्ति रूपमेकाम् ।
विश्वाधारामरूपामभय वर करामीश्वरीं त्वां नमामि ॥
आदिमाया आदिशक्तिरीश्वरी आत्मरूपिणी ।
कृपायुक्ता कृपाचित्ता कालरूपा कृपाश्रया ॥
स्वरूपा ख-रूपा च ख-शक्तिः खगपालिनी ।
आत्मविद्या इडा शक्तिरनाद्यनुरूपिणी ॥
गुरु रूपा गुणाधीशा निर्गुणा च गुणाश्रया ॥
घनरूपा घनशाया घातिनी घातनाशिनी ।
चिन्मया चित्कला चित्ता चिद्रूपा च चराचरा ॥
चिच्छक्तिश्च चिदाकाशा चिदम्बा चेतना तथा ।
चित्ताकर्षा चिदानन्दा त्वचिन्त्या चित्त-चालका ॥
जगदम्बा जगमाया जगरूपा जगाश्रया ॥

जगकर्त्री जगहन्त्री जननी जगमोहिनी ।
तत्त्वरूपा तत्त्ववेता तारिणी तत्त्वबोधिका ॥
त्रिगुणा तमरूपा च तान्त्रिका तीर्थरूपिणी ।
धर्माधीशा धर्म-कीर्तिर्धारिणी धर्मरूपिणी ॥
धरारूपा धराधीशा धनदा धनवर्द्धिनी ।
निरामया निराभासा निर्मला च निराकृती ॥
निर्लोभा निरहङ्कारा निश्चित्ता च निरञ्जना ।
परामाया परावाचा प्रकृतिः परमेश्वरी ॥
पिङ्गला प्रणवरूपा च पराविद्या प्रबोधिनी ।
बहुकान्ता बहुशुद्धा बोधिनी बुद्धि दायिनी ॥
भक्तिप्रिया भक्तिदात्री भ्रामरी भक्तवत्सला ।
भामिनी भवरूपा च भयकृद्-भयनाशिनी ॥
महामाया महाशक्तिः मोहिनी मंत्ररूपिणी ॥
लक्ष्मी लक्ष्यरूपा च विश्वा च विश्वमोहिनी ।
शान्ता सुषुम्णा सत्वा च सोहं हंसः नमो नमः ॥

ऐं ठं ठं ठं, कं ठं ठं ठं, एं ठं ठं ठं, ईं ठं ठं ठं, ह्रीं ठं ठं ठं, क्लीं ठं ठं ठं, सं ठं ठं ठं, कं ठं ठं ठं, हं ठं ठं ठं, लं ठं ठं ठं, ह्रीं ठं ठं ठं, ह्रीं ठं ठं ठं, सौः ठं ठं ठं,सं ठं ठं ठं, कं ठं ठं ठं, लं ठं ठं ठं, ह्रीं ठं ठं ठं।

ॐ ह्रीं वं ठं अमृतरुद्राय आं ह्रीं क्रौं प्रतिकूलं मे नश्यत्वनुकूलं मे वशमानय स्वाहा।

दमयन्ती-नलाभ्यां च नमस्कारं करोम्यहम् ।
अविवादो भवेदत्र कलिदोष-प्रशान्तिदः ॥
एकमत्यं भवेदेषां ब्राह्मणानां पृथग् -धियां ।
निर्वैरिता प्रजायन्ते सम्वादाग्रे प्रसीद मे ॥

(इति तृतीय पर्यायः)

॥ चतुर्थ पर्यायः ॥

लं त्रिभुवन-वपुरेकं योगिभिर्दृष्टमुच्चै-
स्त्रिगुणमपि गुणेभ्यो मत्परं प्राहुराख्यः ॥

तदहमहमन्त्रश्च ज्ञानमोक्ष-स्वरूपम् ।
दिशि दिशि बहुशक्तिर्ब्रह्म सम्पादयामि ॥
प्रकृतिपुरुषभिन्नं नास्ति नास्ति कदाचन ।
परा-पराणां प्रसादं सच्चिदानन्दलक्षणम् ॥
नोदेति नास्ति मध्येति न वृद्धिं नास्ति तत्क्षयम् ।
परमा परमेशानं प्रकृतिः परमेश्वर ॥
कर-पादौ दशाक्षादि-रहितं-चिन्मयं कुरु ।
कामेश्वरी महाशक्तिः कामेश्वर-सदाशिवां ॥
अनन्तमितभारूपं सत्तामात्रेण गोचरम् ।
ज्ञान-विज्ञान-सम्पन्नं ज्ञानरूपं च ज्ञानदम् ॥
श्रीविद्या ब्रह्मविद्या च व्याप्तं ये सचराचरं ।
निर्द्वन्द्वा नित्यसन्तुष्टा निर्मोहा निरुपाधिका ॥
कामेश्वरी मनोऽभीष्टकामेश्वर-स्वरूपिणी ।
नमस्तेऽनन्तरूपायै प्रसीद सुप्रसीद मे ॥

श्रीं श्रीं श्रीं, ह्रीं ह्रीं ह्रीं, क्लीं क्लीं क्लीं, ऐं ऐं ऐं, सौं सौं सौं, ॐ ॐ ॐ, ह्रीं ह्रीं ह्रीं, श्रीं श्रीं श्रीं, कं कं कं, एं एं एं, ईं ईं ईं, लं लं लं, ह्रीं ह्रीं ह्रीं, हं हं हं, सं सं सं, कं कं कं, हं हं हं, लं लं लं, ह्रीं ह्रीं ह्रीं, सं सं सं, कं कं कं, लं लं लं, ह्रीं ह्रीं ह्रीं, सौं सौं सौं, ऐं ऐं ऐं, क्लीं क्लीं क्लीं, ह्रीं ह्रीं ह्रीं, श्रीं श्रीं श्रीं, प्रसीद प्रसीद, मम मनो ईप्सितं कुरु कुरु ।

ॐ ह्रीं वं ठं अमृतरुद्राय आं ह्रीं क्रौं प्रतिकूलं मे नश्यत्वनुकूलं मे वशमानय स्वाहा।

दमयन्ती-नलाभ्यां च नमस्कारं करोम्यहम् ।
अविवादो भवेदत्र कलिदोष-प्रशान्तिदः ॥
एकमत्यं भवेदेषां ब्राह्मणानां पृथग् -धियां ।
निर्वैरिता प्रजायन्ते सम्वादाग्ने प्रसीद मे ॥

(इति चतुर्थ पर्यायः)

॥ फलश्रुतिः ॥

वाञ्छा-कल्पलतायास्तु न च होमो न च तर्पणम् ।
एकवारं जगद्वश्यं द्विरावृत्या महाश्रया ॥

त्रिरावृत्या कविर्भूत्वा तूर्यावृति स्वयं शिवा ।
पञ्चावृत्या भवेत्सिद्धो नात्र त्वन्य विचारणा ॥
निशान्ते यः प्रतिदिनं दशवारं पठेद्यदि ।
सर्वान् कामानवाप्नोति सत्यं सत्यं न संशयः ॥
सिद्धिर्भवतु मे देवि त्वत्प्रसादात् महेश्वरि ।

परमेश्वरी–

परमेश्वर-परमेश्वरी प्रीत्यर्थं वाञ्छा-कल्पलताया दशावृति पठनाख्येन कर्मणाख्येन श्री भगवान् परमेश्वरः प्रीयतामस्तु॥

॥ कामदेव (मन्मथ) ॥

अभीष्ट सिद्धि एवं जन सम्मोहन हेतु कामदेव का स्मरण करना चाहियें। मन के उच्चाटन के निवारण हेतु भी इसका स्मरण करें। विवाह कार्यकी सिद्धि एवं पौरुष बल की प्राप्ति के लिये कामदेव की उपासना करें।

मंत्र– **क्लीं कामदेवाय नमः**

विनियोगः– **अस्य मंत्रस्य संमोहन ऋषिः, गायत्री छन्दः, सर्वमोहनकरध्वजो देवता, सर्वसंमोहने विनियोगः।**

षडंगन्यास हेतु क्लीं, कां, मं, दें, वां, यं से हृदय, शिर, शिखा, कवच, नेत्रों का न्यास करके नमः से अस्त्राय फट् कहते हुये अस्त्र न्यास करें ।

कामदेव गायत्री – कामदेवाय विद्महे पुष्पवाणाय धीमहि। तन्नोऽनंग प्रचोदयात्

कामदेव ध्यानम्–

जपारुणं रक्तविभूषणाढ्यं मीनध्वजं चारुकृतांगरागम् ।
कराम्बुजैरंकुशमिक्षुचापपुष्पास्त्रपाशौ दधतं भजामि ॥

कामदेव यंत्र पर "ॐ" **मूंडकादि परतत्वांत पीठदेवताभ्यो नमः** से पूजन कर नव पीठ शक्तियों का पूजन करें –(पूर्वादि क्रमेण)

ॐ मोहिन्यै नमः ॐ क्षोभिण्यै नमः ॐ त्रास्यै नमः ॐ स्तंभिन्यै नमः ॐ कर्षिण्यै नमः ॐ द्राविण्यै नमः ॐ आह्लादिन्यै नमः ॐ क्लिन्नायै नमः।
मध्ये – **ॐ क्लेदिन्यै नमः ।**

"**ॐ क्लीं मकरध्वाज सर्व सम्मोहन शक्ताय पद्मासनाय नमः**" से पुष्पाञ्जलि प्रदान कर आवरण पूजन की आज्ञा मांगे।

ॐ सविन्मय परोदेवः परामृत रसप्रियः ।
अनुज्ञां देहि मे काम परिवारार्चनाय मे ॥

कामदेव यन्त्रम्

प्रथमावरणम् - षट्कोणों में - (१) **ॐ क्लां हृदयाय नमः** आग्रेये, (२) **क्लीं शिरसे स्वाहा** नैऋत्ये, (३) **क्लू शिखायै वषट्** वायवे,(४) **क्लैं कवचाय हुं** ऐशान्ये (५) **क्लौ नेत्रत्रयाय वौषट्** मध्ये (६) **ॐ क्लः अस्त्राय फट्** दिक्षु।

द्वितीयावरणम्- (षट्कोण के बाहर ईशान को छोड़कर) पञ्चबाणों का पूजन करें - (७) **ॐ द्रां शोषणाय नमः** (८) **ॐ ह्रीं मोहनाय नमः** (९) **ॐ सन्दीपनाख्य क्रीडाय नमः** (१०) **ॐ ब्लूं तापनाय नमः** (११) **ॐ**

मादनाय नमः।

तृतीयावरणम् - (अष्टदले) (१२) ॐ कामाय नमः (१३) ॐ भस्मशरीराय नमः (१४) ॐ अनंगाय नमः (१५) ॐ मन्मथाय नमः (१६) ॐ बसन्त सखाय नमः (१७) ॐ स्मराय नमः (१८) ॐ इक्षुधनुर्धराय नमः (१९) ॐ पुष्पबाणाय नमः ।

इस तरह १२ से १९ नं० तक आठ काम मूर्तियों का पूजन करें ।

चतुर्थावरणम् - दलाग्रे (२० से २७ नं० वामावर्तेन) (२०) ॐ अनंग रूपायै नमः (२१) ॐ अनंग मदनायै नमः (२२) ॐ अनंग मन्थायै नमः (२३) ॐ अनंग कुसुमायै नमः (२४) ॐ अनंग कुसुमातुरायै नमः (२५) ॐ अनंग शिशिरायै नमः (२६) ॐ अनंग मेखलायै नमः (२७) ॐ अनंग दीपाकायै नमः।

पञ्चमावरणम् - षोडशदले (२८ से ४३ नं० तक वामावर्तेन) (२८) ॐ युवत्यै नमः (२९) ॐ विपुल लंभायै नमः (३०) ॐ ज्योत्स्नायै नमः (३१) ॐ सुभ्रुवे नमः (३२) ॐ मदद्रवायै नमः (३३) ॐ सुरतायै नमः (३४) ॐ वारुण्यै नमः (३५) ॐ लोलायै नमः (३६) ॐ कान्त्यै नमः (३७) ॐ सौदामिन्यै नमः (३८) ॐ कामच्छत्रायै नमः (३९) ॐ चन्द्रलेखायै नमः (४०) ॐ शुक्त्यै नमः (४१) ॐ मदनायै नमः (४२) ॐ योन्यै नमः (४३) ॐ मायावत्यै नमः।

षष्टमावरणम्- (षोडश दलाग्रे -४४ से ५९ तक दक्षिणावर्तेन) ॐ (४४) शोकाय नमः (४५) ॐ मोहाय नमः (४६) ॐ विलासाय नमः (४७) ॐ विभ्रमाय नमः। (४८) ॐ मदनातुराय नमः (४९) ॐ अपजयाय नमः (५०) ॐ युवाकामाय नमः (५१) ॐ चूतपुष्पायै नमः (५२) ॐ रति प्रियाय नमः (५३) ॐ ग्रीष्मांतकराय नमः (५४) ॐ उज्जायिने नमः (५५) ॐ हेमन्ते शिशिरोन्मदाय नमः। (५६) ॐ इक्षुचापधराय नमः (५७) ॐ पुष्पबाण हस्ताय नमः (५८) ॐ रक्त भूषाय नमः (५९) ॐ वनितासक्तमानसाय नमः ।

सप्तमावरणम् - तदवाह्ये अष्टदले (६०) ॐ हावाय नमः पूर्वे (६१) ॐ भावाय नमः दक्षिणे (६२) ॐ कटाक्षाय नमः पश्चिमे (६३) ॐ भ्रूविलासाय नमः उत्तरे (६४) ॐ माधव्यै नमः आग्नेये (६५) ॐ मालत्यै नमः नैऋत्यै (६६) ॐ हरिणाक्ष्यै नमः वायव्यै (६७) ॐ मदोत्कटायै

नमः ईशाने।

अष्टमावरणम् - भूपूर में इन्द्रादि दश दिक्पालों का व उनके आयुधों का पूजन करें ।

ॐ इन्द्राय नमः, ॐ आग्नेये नमः, यमाय नमः, नैऋत्ये नमः, वरुणाय नमः, वायवे नमः, कुबेराय नमः, ईशानाय नमः, ब्रह्मणे नमः, अनंताय नमः।

नवमावरणम्- पुनः पूर्वादि क्रमेण - **ॐ वज्राय नमः, शक्तये नमः, दण्डाय नमः, खड्गाय नमः, पाशाय नमः, अंकुशाय नमः, गदायै नमः, त्रिशूलाय नमः, पद्माय नमः, चक्राय नमः।**

पुनः पूजन करके पुष्पाञ्जलि प्रदान करें ।

ॐ नमोस्तु पुष्पबाणाय जगदानंदकारिणे ।
मन्मथाय जगन्नेत्रे रतिप्रीति प्रदायिने ॥

प्रार्थना करें -

ॐ देवदेव जगन्नाथ वांछितार्थ प्रदायक ।
कृत्स्नान्पूरय मे त्वर्थान्कामान्कामेश्वरी प्रिय ॥

एकाक्षरी मंत्र के ३ लाख जप करके मधुत्रय से होम करें ।

किंशुक पुष्प, फलों से, सुंगंधित पुष्पों से होम करें धन एवं सौभाग्य को प्राप्त करें। अशोक पुष्प व गौघृत से १८००० होम करें तो अविवाहित वांछितार्थ कन्या को प्राप्त करें ।

रति मंत्र - ह्रीं रत्यै नमः

परम सुन्दर दिव्य स्वरूप अलंकारों से विभूषित एवं कामदेव के साथ नृत्य मुद्रा में एवं आलिङ्गनमुद्रा में रति का ध्यान करने से सुख सौभाग्य की वृद्धि होती है।

॥ कामदेव मंत्रप्रयोगः॥

कामदेव के सन्दीपन, सम्मोहन, संतापन, वसा (पुष्टि) एवं वश्यबाण प्रमुख है। पंचबाणों के द्वारा कामदेव संसार के प्राणियों को साम, दाम, दण्ड, भेद से सम्पूर्ण रूप से वशीभूत करते है। अतः प्रतिकूल धारणा व्यक्तियों को अनुकूल करने के लिये निम्न मंत्रों का प्रयोग किये जा सकते हैं।

कामदेव मंत्र–

१. ॐ नमो भगवते कामदेवाय इन्द्राय वसाबाणाय इन्द्रसन्दीपन बाणाय क्लीं क्लीं सम्मोहनबाणाय ब्लूँ ब्लूँ संतापनबाणाय सः सः वशीकरणबाणाय कंपित कंपित हुं फट् स्वाहा ।

२. क्लीं नमो भगवते कामदेवाय श्रीं सर्वजन प्रियाय सर्वजन संमोहनाय ज्वल-ज्वल प्रज्वल-प्रज्वल हन-हन वद-वद तप-तप संमोहय-संमोहय सर्वजनं मे वशं कुरु-कुरु स्वाहा ।

विधान – मंत्र पूजन दमन पूजा विधि में दिया गया है। २१००० जप करने पर मंत्र सिद्ध होता है ।

सिद्धे मंत्रे मंत्री पत्रं पुष्पं फलं वाभिमंत्रितं यस्मै ददाति स वश्यो भवति।

इसके प्रयोग से ७ दिन में पूर्ण वशीकरण हो जाता है एवं शत्रु भावना नष्ट हो जाती है। **दुष्टा जनैर्दुष्टजनाः सर्वे मोहवशंगताः।**

वशीकरण हेतु भ्रामरी एवं काम मेखलादेवी के प्रयोग इस प्रकार है–

भ्रामरी मंत्र– ॐ आं ह्रीं सौः ऐं क्लीं हूं सौः ग्लौं श्रीं क्रौं एहि एहि भ्रमरांबा हि सकल जगन्मोहनाय मोहनाय सकल अंडज पिंडजान् भ्रामय - २ राजाप्रजा वशंकरि संमोहय२ महामाये अष्टादशपीठरूपिणि अमलवरयूं स्फुर-२ प्रस्फुर-२ कोटिसूर्यप्रभाभासुरिं चन्द्रजटी मां रक्ष-रक्ष मम शत्रून भस्मी कुरु कुरु विश्व मोहिनि हुं क्लीं हुं हुं फट् स्वाहा ।

एक लक्ष जपने पर जगत का वशीकरण होवे शत्रु दमन होवें।

अथ वशीकरणार्थे काममेखला मंत्र – (उडड़ीश तंत्रे) ॐ ह्रीं कामातुरे काममेखले विघोषणी नीललोचने अमुकं वश्यं कुरु कुरु ह्रीं नमः।

इस मंत्र से साधक भक्ष्य पदार्थ को अभिमंत्रित स्वयं गृहण करे तो ७ यां १२ दिन में स्त्री पुरुष का वशीकरण होवें । सर्वप्रथम एक लक्ष या कम से कम ६१००० जप करें इसके बाद प्रयोग करें ।

॥ दमनक पूजा ॥

संवत्सर के प्रारंभ में दमन से सभी देवताओं का पूजन करना लिखा हैं। चैत्र मास में शुक्ला चतुर्थी को गणेश का, सप्तमी को सूर्य का, अष्टमी को गौरी का द्वादशी को नारायण का, तथा चतुर्दशी को दमनक से पूजा करनी चाहिये।

दमनक एकलता (द्रोण लता) है जिसका प्रादुर्भाव रति के विलाप से गिरे अश्रु कणों से हुआ था ।

रतिः पतिवियोगार्ता प्रीतिः शोकाद् रुरोद च ।
तदश्रुपातादुद्भूता दमनस्य लता शुभा ॥

मंत्र महोदधि में इसके आह्वान मंत्र में **''अशोकाय नमस्तुभ्यं''** शब्द आया है, अत: अशोक वृक्ष की भ्रांति बनती है, पुन: पूजन में लिखा है दमनक मँजरी व पुष्प माला से अर्चन करें अत: द्रोण लता से ही यथार्थ बनता है । अमरकोष में भी अशोक का पर्यायवाची शब्द दमनक नहीं लिखा है, कैथ (कपित्थ) का पर्यायवाची जरुर **''मन्मथ ''** है। शोक निवारण वाली इस लता को प्रार्थना में अशोक नाम से सम्बोधित किया है।

विधानम् - दमनक पूजा से एक दिन पहले अपने इष्टदेव की पूजन करके बगीचे में जाकर माली से दमन का क्रय करना चाहिये। फिर शुद्ध स्थान पर बैठकर पूजन करें ।

लता के पास बैठकर प्रार्थना करें -

अशोकाय नमस्तुभ्यं कामस्त्रीशोकनाशन ।
शोकार्तिहर मे नित्यमानन्दं जनयस्व मे ॥

लता में कामदेव व रति का नाम मंत्रों से पूजन करें ।

यथा - **क्लीं कामदेवाय नमः, ह्रीं रत्यै नमः ।**

तत् पश्चात् **''इष्टदेवस्य पूजार्थं त्वा नेष्यामि''** कहकर उखाड़ें (अस्त्र से छेदन नहीं करें) पंचगव्य से अभिषिक्त कर जल से प्रक्षालित करें, श्रीसूक्त देविसूक्त का पाठ करें गंधार्चन करें, पीले कपड़े से ढक कर बाँस की टोकरी में रखकर अपने इष्टदेव का स्मरण करते हुये गाजे बाजे के साथ घर पर पूजा स्थान में स्थापित करें।

दमनक पिटारी को पूजन के लिये सर्वतोभद्र मण्डल पर रखे या कामदेव यंत्र (भद्रमण्डल) पर रखें ।

अधिवासन - भद्रमण्डल पर सर्वप्रथम श्वेत, काले, रक्त एवं पीत वर्ण से युक्त अष्टदल बनायें। अष्टदल के बाहर पीले रंग का भुपूर बनाये, भूपूर के बाहर सफेद, लाल एवं पीले रंग के तीन वृत बनायें। वृतों के बाहर चतुरस्र बनाकर लाल रंग से भर देवें ।

सायं काल समय यंत्र एवं दमनक की पूजा करें।

फिर अष्टदल में कामदेव के आठ नामों से (यथा **ॐ क्लीं कामदेवाय नमः**) से पूजन करें। नाम के पहिले ॐ तथा अन्त में **नमः** का प्रयोग करें।

१. कामदेवाय २. भस्मशरीराय ३. अनङ्गाय ४. मन्मथाय ५. बसन्त-सखाय ६. स्मराय ७. इक्षुधनुर्धराय ८. ॐ पुष्पबाणाय नमः।

कामदेव के इन आठ शरीरों का क्रमशः कर्पूर, गोरोचन, कस्तूरी, अगर, कुंकुम, आँवला, चन्दन एवं पुष्पों से विशेषार्चन करें।

भूपूर में इन्द्रादि दश दिक्पालों का आह्वान करें यंत्र के देवो का एवं दमन का गंधार्चन का पूजन करें ।

पश्चात् **कामदेव गायत्री से १०८ बार अभिमंत्रित करें** । यथा -

ॐ कामदेवाय विद्महे पुष्पबाणाय धीमहि । तन्नोऽनंग प्रचोदयात्॥

पुष्पाञ्जलि प्रदान कर प्रर्थना करें -

नमोऽस्तु पुष्पबाणाय जगदान्दकारिणे ।
मन्मथाय जगन्नेत्ररतिप्रीतिप्रदायिने ॥
आमंत्रितोऽसि देवेश प्रातः काले मया प्रभो ।
कर्त्तव्यं तु यथा लाभं पूर्णं स्यात्तु तवाज्ञया ॥

फिर पुष्पाञ्जलि प्रदान कर, दण्डवत प्रणाम कर, पीले वस्त्र से आच्छादित करें । वर्म (**हुं**) मंत्र से अवगुंठन, अस्त्र (**फट्**) मंत्र से संरक्षण चुटकी एवं ताली बजाते हुये करें ।

पश्चात् रात्रि समय इष्टदेव की प्राप्ति हेतु नृत्य जागरण करना चाहिये।

इष्टदेव की दमनक पूजा - प्रातः काल में नित्यार्चन करने के बाद संकल्प करें -
''**वर्षपूजा साङ्गत्याय दमनार्चा करिष्ये** ''

कामदेव व रति मंत्रों से भद्रमण्डल एवं दमनक के गंधार्चन करें, दमनक की मँजरी लेकर इष्टदेव के शिर पर चढ़ावे, घण्टा एवं जय घोष के साथ दमनक की माला भी इष्टदेव के चढ़ावें।

मँजरी अर्पण -

सर्वरत्न मयीं दिव्यां सर्वगंधमयीं शुभाम् ।
गृहाण मँजरीं देव नमस्तेऽस्तु कृपानिधे ॥

माला मंत्र -

सर्वरत्नमयीं नाथ दामनीं वनमालिकाम् ।
गृहाण देवपूजार्थं सर्वगन्धमयी विभो ॥

इसके बाद देव परिवार का भी दमनक से अर्चन करें। नैवेद्यादि अर्पण कर प्रार्थना करें -

देव-देव जगन्नाथ वाञ्छितार्थ प्रदायक ।
कृत्स्नान् पूरय मेत्वर्थ कामान् कामेश्वरी प्रिय ॥

पश्चात् कामदेव व रतिमन्त्र व इष्टमन्त्र से हवनादि करें। गुरु का भी दमनक से पूजन करें, ब्राह्मण को भोजन करायें।

॥ वर–वधू प्राप्ति प्रयोग:॥

मन्त्र :- ह्रीं क्लीं इन्द्राणि, सौभाग्य देवते, मघवत् प्रिये!। सौभाग्यं देहि मे स्वाहा ॥

विनियोग:- ॐ **अस्य श्रीइन्द्राणी मन्त्रस्य बृहस्पति ऋषिः, गायत्री छन्दः, श्रीइन्द्राणी देवता, सर्व सौभाग्य प्राप्त्यर्थे जपे विनियोगः।**

ऋष्यादिन्यास :- शिरसि बृहस्पति ऋषये नमः। मुखे गायत्री छन्दसे **नमः। हृदि श्रीइन्द्राणी देवतायै नमः। सर्व सौभाग्य प्राप्त्यर्थे जपे विनियोगाय नमः सर्वाङ्गे।**

मन्त्रः	करन्यास	षडङ्गन्यास
ह्रीं क्लीं	अंगुष्ठाभ्यां नमः।	हृदयाय नमः
इन्द्राणि	तर्जनीभ्यां नमः।	शिरसे स्वाहा
सौभाग्य देवते	मध्यमाभ्यां नमः।	शिखायै वषट्
मघवत् प्रिये	अनामिकाभ्यां नमः।	कवचाय हुम्
सौभाग्यं	कनिष्ठिकाभ्यां नमः।	नेत्रत्रयाय वौषट्
देहि मे स्वाहा	करतलकरपृष्ठाभ्यां नमः	अस्त्राय फट्

ध्यानम् :-

कल्पद्रुमोद्यान मध्ये विविधमणि विलसन्मण्डपान्तर्विराजन्
मातङ्गाराति पीठ प्रविलसित सरोज संस्थां प्रसन्नाम् ।

पीनोत्तुङ्ग स्तनार्तां पृथुजघन भरां पद्म पत्रायताक्षीं
इन्द्राणीमिन्द्र नीलोत्पल शकल निभां हृद्य भूषां नमामि ॥

यन्त्रपूजन :- पहले षट्कोण, पश्चात् अष्टदल तथा भूपूर।

पीठपूजा :- आधार शक्तये नमः से परमात्मने नमः तक पीठ पूजन करें। आठों दिशाओं में आठ तथा मध्य में नवमी पीठशक्ति का पूजन करें। नाम के आदि में ॐ तथा अन्त में नमः का प्रयोग सर्वत्र करें।

यथा - **ॐ कान्त्यै नमः, रमायै, प्रभायै, रमायै, विद्यायै, मदनायै, मदनातुरायै, रम्भायै, मनोज्ञायै।**

आसनपूजन मन्त्र :- **ह्रीं सर्व शक्ति कमलासनाय नमः।**

आवाहन मन्त्र :-

आगच्छ वरदे देवि! परिवार समन्विते ।
यावत् त्वां पूजयिष्यामि तावत् त्वं सुस्थिरा भव ॥

प्रथम आवरण :- (षट्कोण में) मूलमन्त्र के हृदयायदि षडङ्गन्यास मन्त्रों से पूजन करें।

द्वितीय आवरण:- (अष्टदल कमल में) **ॐ उर्वश्यै नमः, मेनकायै, रम्भायै, प्रम्लोचायै, पुञ्जिक स्थलायै, तिलोत्तमायै, घृताच्यै, सुरूपायै॥**

तृतीय आवरण:- (भूपूर में) **ॐ इन्द्राय नमः, अग्नये, यमाय, निऋतये, वरुणाय, वायवे, सोमाय, ईशानाय, ब्रह्मणे, अनन्ताय।**

चतुर्थ आवरण:- (भूपूर में दिक्पालों के पास) **ॐ वज्राय नमः, शक्त्यै, दण्डाय, खड्गाय, पाशाय, अंकुशाय, गदाय, शूलायै, पद्माय, चक्राय नमः।**

चंपा के फूलो के होम से सबका वशीकरण होवें। वासन्ती, नेवारी, सेउती, पलाश के फुलो को मधुत्रय के साथ होम से वर-वधू की प्राप्ति होवें।

॥ विश्वावसु गन्धर्वराज कवच स्तोत्रम् ॥

यह कवच अविवाहहार्थि के विवाह हेतु, कामोत्तेजना व बलपुष्टिकारक है। विवाह कामना हेतु २ मंत्र है एवं कवच के १९ वे श्लोक के जप करने से भी विवाह हेतु कन्या की प्राप्ति होवें।

प्रणाममन्त्राः - **ॐ श्रीगणेशाय नमः॥ ३ ॐ श्रीसप्त शृङ्गनिवासिन्यै नमः ॥ ३ ॐ श्रीविश्वावसु गन्धर्वराजाय कन्याभिः परिवारिताय नमः॥३**

पूर्व पीठिका :- **ॐ नमस्कृत्य महादेवं सर्वज्ञं परमेश्वरम् ॥**

॥ श्रीपार्वत्युवाच ॥

भगवन् देव देवेश शङ्कर परमेश्वर !
कथ्यतां मे परं स्तोत्रं कवचं कामिनां प्रियम् ॥
जपमात्रेण यद्वश्यं कामिनी कुल भृत्यवत् ।
कन्यादि वश्यमाप्नोति विवाहाभीष्ट सिद्धिदम् ॥
भग दुःखैर्न बाध्येत सर्वैश्वर्यमवाप्नुयात् ॥

॥ श्रीईश्वरोवाच ॥

अधुना शृणु देवेशि! कवचं सर्वसिद्धिदं ।
विश्वावसुश्च गन्धर्वो भक्तानां भग भाग्यदः ॥
कवचं तस्य परमं कन्यार्थिणां विवाहदं ।
जपेद् वश्यं जगत् सर्वं स्त्रीवश्यदं क्षणात् ॥
भगदुःखं न तं याति भोगे रोग भयं नहि ।
लिङ्गोत्कृष्ट-बलप्राप्ति वीर्यवृद्धिकरं परम् ॥
महदैश्वर्यमवाप्नोति भग भाग्यादि सम्पदाम् ।
नूतन सुभगंभुक्त्वा विश्वावसु प्रसादतः ॥

विनियोग :- ॐ अस्यं श्रीविश्वावसु गन्धर्वराज कवच स्तोत्र मन्त्रस्य विश्व सम्मोहन वामदेव ऋषिः। अनुष्टुप् छन्दः। श्रीविश्वावसु गन्धर्वराज देवता। ऐं क्लीं बीजं। क्लीं श्रीं शक्तिः। सौः हंसः ब्लूं ग्लौं कीलकं श्रीविश्वावसु गन्धर्व राजप्रसादात् भगभाग्यादि सिद्धिपूर्वक यथोक्त फल प्राप्त्यर्थे जपे पाठे विनियोगः॥

ऋष्यादिन्यास :- ॐ शिरसि विश्वसम्मोहन वामदेवऋषये नमः। ॐ

मुखे अनुष्टुप्छन्दसे नमः । ॐ हृदि श्रीविश्वावसु गन्धर्वराज देवतायै नमः । ॐ गुह्ये ऐं क्लीं बीजाय नमः । ॐ पादयोः क्लीं श्रीं शक्तये नमः । ॐ नाभौ सौः हंसः ब्लूं ग्लौं कीलकाय नमः । ॐ सर्वाङ्गे श्रीविश्वावसुगन्धर्वराज प्रसादात् भगभाग्यादि सिद्धिपूर्वक यथोक्त फल प्राप्त्यर्थे जपे पाठे विनियोगाय नमः ॥

षडङ्गन्यास	करन्यास	अङ्गन्यास
ॐ क्लीं ऐं क्लीं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
ॐ क्लीं श्रीं गंधर्वराजाय क्लीं	तर्जनीभ्यां नमः।	शिरसे स्वाहा
ॐ क्लीं कन्यादान रतोद्यमाय क्लीं	मध्यमाभ्यां नमः।	शिखायै वषट्
ॐ क्लीं धृतकह्लार मालाय क्लीं	अनामिकाभ्यां नमः।	कवचाय हुँ
ॐ क्लीं भक्तानां भगभाग्यादि वर प्रदानाय क्लीं	कनिष्ठिकाभ्यां नमः।	नेत्रत्रयाय वौषट्
ॐ क्लीं सौः हंसः ब्लूं ग्लौं क्लीं	करतल करपृष्ठाभ्यां नमः	अस्त्राय फट्

मन्त्र :- (१) क्लीं ऐं श्रीं गंधर्वराजाय कन्यादान रतोद्यमाय धृतकह्लारमालाय भक्तानां भगभाग्यादि वर प्रदानाय सौं हंसः ब्लूं क्लीं नमः।

(२) ॐ क्लीं विश्वावसु गन्धर्वराजाय नमः ॐ ऐं क्लीं सौः हंसः सोहं ऐं ह्रीं क्लीं श्रीं सौः ब्लूं ग्लौं क्लीं विश्वावसु गन्धर्व राजाय कन्याभिः परिवारिताय कन्यादानरतोद्यमाय धृत कह्लारमालाय भक्तानां भग-भाग्यादि वर प्रदानाय सालङ्कारां सुरूपां दिव्यकन्या रत्नं मे देहि देहि मद् विवाहाभीष्टं कुरु कुरु सर्व स्त्रीवशमानय मे लिङ्गोत्कृष्टबलं प्रदापय मत्स्तोकं विवर्धय विवर्धय भगलिङ्गानन्दं कुरु कुरु भगलिङ्गरोगान् अपहर, मे भगभाग्यादि महदैश्वर्यं देहि देहि प्रसन्नो मे वरदो भव ऐं क्लीं सौः हंसः सोहं ऐं ह्रीं क्लीं श्रीं सौः ब्लूं ग्लौं क्लीं नमः स्वाहा॥ २०० अक्षर, १२ बार जाप करें॥

गायत्री मंत्र :- ॐ क्लीं गन्धर्व राजाय विद्महे कन्याभिः परिवारिताय धीमहि तन्नो विश्वावसु प्रचोदयात् क्लीं (१० बार जाप करें) ॥

ध्यानम् :-

क्लीं कन्याभिः परिवारितं सुविलसत् कह्लार मालाधृतन्
स्तुष्ट्याभरणं विभूषितं सुनयनं कन्या प्रदानोद्यमम् ।
भक्तानन्द करं सुरेश्वर प्रियं मिथुनासने संस्थितम्
स्त्रातुं मे मदनारविन्द सुमदं विश्वावसुं मे गुरुम् क्लीं

ध्यान के बाद उक्त मन्त्र को १२ बार और गायत्री मन्त्र को १० बा

॥ कवच मूलपाठ ॥

क्लीं कन्याभिः परिवारितं सुविलसत् माला धृतन्
स्तुष्ट्याभरण विभूषितं सुनयनं कन्याप्रदानोद्यमम् ।
भक्तानन्द करं सुरेश्वर प्रियं मिथुनासने संस्थितं
स्त्रातुं मे मदनारविन्द सुमदं विश्वावसुं मे गुरुम् क्लीं ॥ १ ॥

क्लीं विश्वावसु शिरः पातु ललाटे कन्यकाऽधिपः ।
नेत्रौ मे खेचरो रक्षेद् मुखे विद्या धरं न्यसेत् क्लीं ॥२ ॥

क्लीं नासिकां मे सुगन्धाङ्गो कपोलौ कामिनी प्रियः ।
हनुं हंसासनः पातु कटौ सिंह कटि प्रियः क्लीं ॥३ ॥

क्लीं स्कन्धौ महाबलो रक्षेद् बाहू मे पद्मिनी प्रियः ।
करौ कामाग्रजो रक्षेत् कराग्रे कुचमर्दनः क्लीं ॥४ ॥

क्लीं हृदि कामेश्वरो रक्षेत् स्तनौ सर्वस्त्री कामजित् ।
कुक्षौ द्वौ रक्षेद् गन्धर्वः ओष्ठाग्रे मघवार्चितः क्लीं ॥५ ॥

क्लीं अमृताहार सन्तुष्टो उदरं मे नुदं न्यसेत् ।
नाभिं मे सततं पातु रम्भाद्यप्सरसः प्रियः क्लीं ॥६ ॥

क्लीं कटिं कामप्रियो रक्षेद् गुदं मे गन्धर्वनायकः ।
लिङ्गमूले महालिङ्गी लिङ्गाग्रे भगभाग्यवान् क्लीं ॥७ ॥

क्लीं रेतः रेताचलः पातु लिङ्गोत्कृष्टबलप्रदः ।
दीर्घलिङ्गी च मे लिङ्गं भोगकाले विवर्धय क्लीं ॥८ ॥

क्लीं लिङ्गमध्ये च मे पातु स्थूललिङ्गी च वीर्यवान् ।
सदोत्तिष्ठश्च मे लिङ्गो भगलिङ्गार्चन प्रियः क्लीं ॥९ ॥

क्लीं वृषणं सततं पातु भगास्ये वृषणस्थितः ।
वृषणे मे बलं रक्षेद् बाला जङ्घाधः स्थितः क्लीं ॥१० ॥

क्लीं जङ्घमध्ये च मे पातु रम्भादि जघन स्थितः ।
जानू मे रक्ष कन्दर्पो कन्याभिः परिवारितः क्लीं ॥११ ॥

क्लीं ज़ानुमध्ये च मे रक्षेन्नारी जानु शिर स्थितः ।
पादौ मे शिविकारूढ़ः कन्यकादि प्रपूजितः क्लीं ॥१२ ॥

क्लीं आपाद मस्तकं पातु, धृत कह्लारमालिका ।
भार्यां मे सततं पातु सर्वस्त्रीणां सुभोगदः क्लीं ॥१३ ॥

क्लीं पुत्रान् कामेश्वरो पातु कन्याः मे कन्यकाऽधिपः ।
धनं गेहं च धान्यं च दास दासी कुलं तथा क्लीं ॥१४॥
क्लीं विद्याऽऽयुः सबलं रक्षेद् गन्धर्वाणां शिरोमणिः ।
यशः कीर्तिश्च कान्तिश्च गजाश्वादि पशून् तथा क्लीं ॥१५॥
क्लीं क्षेमारोग्यं च मानं च पथिषु च बालालये ।
वाते मंघे तडित्-पतिः रक्षेच्चित्राङ्गदाग्रजः क्लीं ॥१६॥
क्लीं पञ्चप्राणादि देहं च मनादि सकलेन्द्रियान् ।
धर्म कामार्थ मोक्षं च रक्षां देहि सुरेश्वर! क्लीं ॥१७॥
क्लीं रक्ष मे जगतस्सर्वं द्वीपादि-नव-खण्डकम् ।
दशदिक्षु च मे रक्षेद् विश्वावसुः जगतः प्रभुः क्लीं ॥१८॥
क्लीं सालङ्कारां सुरूपां च कन्यारत्नं च देहि मे ।
विवाहं च प्रद क्षिप्रं भगभाग्यादि सिद्धिदः क्लीं ॥१९॥
क्लीं रम्भादि कामिनी वारस्त्रियो जाति कुलाङ्गनाः ।
वश्यं देहि त्वं मे सिद्धिं गन्धर्वाणां गुरूत्तमः क्लीं ॥२०॥
क्लीं भगभाग्यादि सिद्धिं मे देहि सर्वसुखोत्सवः ।
धर्मकामार्थ मोक्षं च देहि विश्वावसु प्रभो! क्लीं ॥२१॥

॥ फलश्रुति ॥

इत्येतत् कवचं दिव्यं साक्षाद् वज्रोपमं परम् ।
भक्त्या पठति यो नित्यं तस्य कश्चिद्भयं नहि ॥१॥
एक विंशति श्लोकांश्च कामराज पुटं जपेत् ।
वश्यं तस्य जगत् सर्वं सर्वस्त्री भुवनत्रयम् ॥२॥
सालङ्कारां सुरूपां च कन्यां दिव्यां लभेन्नरः ।
विवाहं च भवेत् तस्य दुःख दारिद्र्यं तं नहि ॥३॥
पुत्र पौत्रादि युक्तश्च स गण्यः श्रीमतां भवेत् ।
भार्या प्रीतिर्विवर्धन्ति वर्धनं सर्वसम्पदाम् ॥४॥
गजाश्वादि धनं धान्यं शिबिकां च बलं तथा ।
महाऽऽनन्दमवाप्नोति कवचस्य पाठाद् ध्रुवम् ॥५॥
देशं पुरं च दुर्गं च भूषादि छत्रचामरम् ।
यशः कीर्तिश्च कान्तिश्च लभेद् गन्धर्वसेवनात् ॥६॥

राजमान्यादि सम्मानं बुद्धि विद्या विवर्धनम् ।
हेम रत्नादि वस्त्रं च कोश वृद्धिस्तु जायताम् ॥७॥
यस्य गन्धर्व सेवा वै दैत्य दानव-राक्षसैः ।
विद्याधरैः किंपुरुषैः चण्डिकाद्या भयं नहि ॥८॥
महामारी च कृत्यादि वेतालैश्चैव भैरवैः ।
डाकिनी शाकिनी भूतैर्न भयं कवचं पठेत् ॥९॥
प्रयोगादि महामन्त्र सम्पदो क्रूर योगिनाम् ।
राजद्वारे श्मशाने च साधकस्य भयं नहि ॥१०॥
पथि दुर्गे जलेऽरण्ये विवादे नृपदर्शने ।
दिवारात्रौ गिरौ मेघे भयं नास्ति जगत् त्रये ॥११॥
भोजने शयने भोगे सभायां तस्करेषु च ।
दुःस्वप्ने च भयं नास्ति विश्वावसु प्रसादतः ॥१२॥
गजोष्ट्रादि नखि शृङ्गि व्याघ्रादि वन देवताः ।
खेचरा भूचरादीनां न भयं कवचं पठेत् ॥१३॥
रणे रोगाः न तं यान्ति अस्त्र शस्त्र समाकुले ।
साधकस्य भयं नास्ति सदेदं कवचं पठेत् ॥१४॥
रक्त द्रव्याणि सर्वाणि लिखितं यस्तु धारयेत् ।
सभाराजपतिर्वश्यं वश्याः सर्व कुलाङ्गनाः ॥१५॥
रंभादि कामिनीः सर्वाः वश्याः तस्य न संशयः ।
मदनपुटितं जप्त्वा जप्त्वा च भगमालिनीं ॥१६॥
भग भाग्यादि सिद्धिश्च वृद्धिः तस्य सदा भवेत् ।
बाला त्रिपुरसुन्दर्या पुटितं च पठेन्नरः ॥१७॥
सालङ्कारा सुरूपा च कन्या भार्यास्तु जायतां ।
बाला प्रौढ़ा च या भार्या सर्वास्त्री च पतिव्रता ॥१८॥
गणिका नृप-भार्यादि जपाद्वश्यं च जायताम् ।
शतद्वयोः वर्णकानां मन्त्रं तु प्रजपेन्नरः ॥१९॥
वश्यं तस्य जगत्सर्वं नरनारी स्वभृत्यवत् ।
ध्यानादौ च जपेद्भानुं ध्यानान्ते द्वादशंजपेत् ॥२०॥

गायत्री दशवारं च जपेद् वा कवचं पठेत् ।
युग्म स्तोत्रं पठेन्नित्यं बालात्रिपुरा सुन्दरीम् ॥२१॥
कामजं वंश गोपालं सन्तानार्थे सदा जपेत् ।
गणेशस्यालये जप्त्वा शिवाले भैरवालये ॥२२॥
तड़ागे वा सरित्तीरे पर्वते वा महावने ।
जप्त्वा पुष्पवटीदिव्ये कदली कयलालये ॥२३॥
गुरोरभिमुखं जप्त्वा न जपेत् कण्टकानने ।
मांसोच्छिष्ट मुखे जप्त्वा मदिरा नाग वल्लिका ॥२४॥
जप्त्वा सिद्धिमवाप्नोति भग-भाग्यादि-सम्पदाम् ।
देहान्ते स्वर्गमाप्नोति भुक्त्वा स्वगङ्गिनासदा ॥२५॥
कल्पान्ते मोक्षमाप्नोति कैवलं पदवीं न्यसेत् ।
न देयं यस्य कस्यापि कवचं दिव्यं पार्वति ॥२६॥
गुरुभक्ताय दातव्यं काममार्ग-रताय च ।
देयं कौल कुले देवि! सर्व सिद्धिस्तु जायताम् ॥२७॥
भग भाग्यादि सिद्धि च सन्तानौ सम्पदोत्सवः ।
विश्वावसु प्रसन्नो च सिद्धि-वृद्धिर्दिनेदिने ॥२८॥

यह कवच क्लीं बीज मंत्र से संमुपटित होता है। इससे त्रिपुर सुन्दरी के त्र्यक्षर (ऐं क्लीं सौः) या षोडशाक्षर मंत्र से संपुटित करनेसे सभी कामनायें सिद्ध होवें। क्लीं या संतानगोपाल मंत्रसे संपुटित करने से संतान की प्राप्ति होवें।

॥ इति श्रीरुद्रयामले महातन्त्रराजे श्रीपार्वतीश्वर सम्वादे श्रीविश्वावसु गन्धर्व राज कवच स्तोत्रम् ॥

॥ पत्नि प्राप्ति के लिये विश्वावसु गंधर्वराज मन्त्र ॥

विनियोगः - ॐ अस्य श्रीगंधर्वराज विश्वावसु गंधर्व मन्त्रस्य संमोहन ऋषि गायत्री छन्दः श्रीगंधर्व विश्वावसुदेवता भार्या लाभार्थे जपे विनियोगः।

ध्यानम् -

हेमाभ्योरुहभूषिते रथवरे पुंड्रेक्षुमि कल्पिते
कल्हार स्थित रक्तपाणि कमलै कन्याजनै सेवितम्

गंधवर्गाधिपतिं प्रसन्न हृदयं विश्वावसु यः पुमान
मंत्रं तस्य जपेल्लभेत कन्या मस्ये कांक्षितम्

मन्त्र - ॐ विश्वावसुनामि गंधर्वः कन्यानामधिपति सुरूपां सालंकारां कन्यां देहि मे नमस्तस्मै विश्वावसये स्वाहा।

विधानम् - यदि सवा लाख जप नहीं हो सके तो प्रतिदिन सातबार मन्त्र से तर्पण करने से भी कुछ काल में सिद्धि प्राप्त हो जाती है।

॥ पति-पत्नि विरहपीड़ा विनाशक स्तोत्रम् ॥

पति-पत्नि में क्लेश, वाद-विवाद या पत्नि के रुठकर पीहर चले जाने, आदि कारणों से उत्पन्न विरह-पीड़ा इस स्तोत्र का पाठ करने से दूर होती है एवं दोनो में प्रेम-भाव बना रहता है।

ब्राह्मी ब्रह्मस्वरूपे त्वं मां प्रसीद सनातनि! ।
परमात्मस्वरूपे च परमानन्दरूपिणि! ॥१॥
ॐ प्रकृत्यै नमो भद्रे मां प्रसीद भवार्णवे ।
सर्वमङ्गलरूपे च प्रसीद सर्वमङ्गले! ॥२॥
विजये शिवदे देवी! मां प्रसीद जयप्रदे ।
वेदवेदाङ्गरूपे च वेदमातः! प्रसीद मे ॥३॥
शोकघ्ने ज्ञानरूपे च प्रसीद भक्तवत्सले ।
सर्वसम्पत्प्रदे माये प्रसीद जगदम्बिके! ॥४॥
लक्ष्मीर्नारायण क्रोडे स्त्रष्टुर्वक्षसि भारती ।
मम क्रोडे महामाया विष्णुमाये प्रसीद मे ॥५॥
कालरूपे कार्यरूपे प्रसीद दीन वत्सले ।
कृष्णास्य राधिके भद्रे प्रसीद कृष्णपूजिते! ॥६॥
समस्तकामिनीरूपे कलांशेन प्रसीद मे ।
सर्वसम्पत्स्वरूपे त्वं प्रसीद सम्पदां प्रदे! ॥७॥
यशस्विभिः पूजिते त्वं प्रसीद यशसां निधेः ।
चराचरस्वरूपे च प्रसीद मम मा चिरम् ॥८॥
मम योगप्रदेदेवी। प्रसीद सिद्धयोगिनि ।

सर्वसिद्धिस्वरूपे च प्रसीद सिद्धिदायिनि! ॥९॥
अधुना रक्ष मामीशे प्रदग्धं विरहाग्निना ।
स्वात्मदर्शनपुण्येन क्रीणीहि परमेश्वरि! ॥१०॥

॥ फलश्रुति ॥

एतत् पठेच्छृणुयाच्चन वियोगज्वरो भवेत् ।
न भवेत् कामिनीभेदस्तस्य जन्मनि जन्मनि ॥

इस स्तोत्र का पाठ करने अथवा सुनने वाले को वियोग-पीड़ा नहीं होती है और जन्म-जन्मान्तर तक कामिनी भेद नहीं होता है। अर्थात् वह अभीष्ट कामिनी जन्म-जन्मान्तर तक साथ रहती है।

विधानम् - पारिवारिक कलह, रोग या अकाल-मृत्यु आदि की संभावना होने पर इसका पाठ करना चाहिए। प्रणय संबधों में बाधाऐ आने पर भी इसका पाठ अभीष्ट फल-दायक होगा। अपने इष्ट-देवता या सती (भगवती गौरी) का विविध उपचारो से पूजन करके उक्त स्तोत्र का पाठ करे। अभीष्ट प्राप्ति के लिये कातरता, समर्पण आवश्यक है।

॥ अथ संतानोपाय:॥

आचार्य यजमान की जन्मपत्रिका के अनुसार संतान व सन्तानसुख प्रतिबंधित ग्रह व दोषों को देखकर उनका शान्ति उपाय बतायें। ग्रह का उपाय कराये। प्रेतदोष या पितरश्राप, सर्पदोष शाप, मातृपितृ शाप आदि दोषों के हेतु उपाय व शान्ति प्रयोग **कराकर रुद्र, चण्डी, हरिवंश कथा, सन्तान गोपाल प्रयोग** कराना चाहिये।

॥ अरुणोवाच: ॥

वृथा धनं गृहं धान्यमपुत्रजन्म निष्फलम् ।
ममोपरि दयां कृत्वा प्रायश्चित्तं वदस्व मे ॥

॥ श्रीसूर्योवाच: ॥

विप्रद्रव्यापहारी य: सोऽनपत्य: प्रजायते ।
तेनकार्यं विशुद्ध्यर्थं महारुद्र जपादिकम् ॥
तीर्थयात्रा प्रकर्तव्या रेवतापीसमुद्भवा ।
एकेनापि हि वस्त्रेण दंपतीस्नानमुत्तमम् ॥

श्रवणं हरिवंशस्य ब्राह्मणोद्वाहनं खग ।
अष्टोत्तरशतान् विप्रान् मिष्टान्नेन तु तर्पयेत् ॥

१. ॐ **ईशानाय नमः** इस मन्त्र के एक लक्ष जप करके दशांश होम करें। एक लक्ष पुष्पों से शिवार्चन करें। सवत्सधेनु या स्वर्णधेनु प्रदान करें। घृतपात्र का दान करें।

पार्थिव शिवलिङ्ग पूजन – इस का विधान पूर्व में दिया जा चुका है।

पार्थिव गणेश पूजन – पार्थिव शिवलिङ्ग की तरह मिट्टी के गणेश बनाकर गणेश मन्त्र का जप कर हवनादि कर्म करें। गणेश तंत्र में अवलोकन करें।

(गारुडेऽपि–)

हरिवंश कथां श्रुत्वा शतचण्डी विधानतः ।
भक्त्या श्रीशिवमाराध्य पुत्रमुत्पादयेत्सुधीः ॥

(महार्णवेऽपि)

सौवर्णं बालकं कृत्वा दद्याद्दोला समन्वितम् ।
अथवा वृषभं दद्याद्विप्रोद्वाहनमेव वा ॥
महारुद्र जपो वापि लक्षपद्मैः शिवार्चनम् ॥
श्रवणं हरिवंशस्य कर्तव्यं च यथाविधि ।
महारुद्रजपं चैव कारयेच्च यथाविधि ॥
जुहुयाच्च शतांशेन दूर्वा आज्यपरिप्लुताः ।
एकादश स्वर्णनिष्काः प्रदातव्या च दक्षिणा ॥
एकादश पशूंश्चैव दद्याद्वित्तानुसारतः ।
अन्येभ्योऽपि यथाशक्ति द्विजेभ्यो दक्षिणां दिशेत् ॥
स्नापयेद्दम्पती पश्चान्मंत्रैर्वरुण दैवतैः ।
आचार्याय प्रदेयानि वस्त्रालंकरणानि च ॥

॥ इति सन्तानोपायः॥

॥ हरिवंश श्रवण विधानम् ॥

पूर्वदिन यजमान दंपती का आचार्य पापघट दान कराकर दशविधि स्नान करायें प्रायश्चित होम करावें। क्रूरग्रहों का उपाय करायें।

दंपत्योरनुकूले सुदिने कृतनित्य क्रियः देवालयादि पुण्यस्थले स्वगृहे वा स्वासने प्राङ्मुख उपविश्य। आचम्य प्राणानायम्य। देशकालौस्मृत्वा-अनेक जन्मार्जितानपत्य मृतापत्यत्वादि-निदान पूर्वकं सर्पशाप-पितरदोषशाप-मातृपितृशाप दोष विमुक्तार्थं भूतप्रेत पिशाच बालघातनिक्षेपहरण विप्ररत्नापहरणादि-दुरित-समूलनाश द्वारा दीर्घायुर्बहु पुत्रादि संतति प्राप्ति कामो हरिवंश श्रोष्यामि। तदंगत्वेन गणपति पूजनं पुण्याहवाचनं मातृका पूजनं नान्दीश्राद्धं च करिष्ये।

गणपति पूजन नान्दीश्राद्ध करके उत्तराभिमुख ब्राह्मणों का पादप्रक्षालन, वरण। यजमान पूर्वाभिमुख होकर करें।

ततो विभवानुसारेण श्रुताध्ययन संपन्नं ब्राह्मणमासने उदङ्मुखमुपवेश्य स्वयं प्राङ्मुख उपविश्य पादप्रक्षालनं कृत्वा गंधादिभिः संपूजयेत्। ततो वरण द्रव्याणि गृहीत्वा देशकालौ संकीर्त्य दीर्घायुष्ट्वत्पुत्र कामनयाऽमुक गोत्रममुकशर्माणं ब्राह्मणमेभिर्गंध पुष्प स्वर्णमुद्रिकासन कमण्डलु तांबूल वासोभिः हरिवंश श्रवणार्थं श्रावथितारं त्वामहं वृणे। इति वृत्वा। ॐ वृतोऽस्मि इति प्रतिवचनानन्तरं वस्त्रालंकारैः संपूज्य पुस्तकं दद्यात्।

आचार्य नित्य पुस्तक पूजन करायें। अष्टाक्षर मन्त्र का जप करें। नारायण को नमस्कार करें। दंपती प्रतिदिन संतानगोपाल मन्त्र का जप करें ब्राह्मणों से भी करायें।

मंत्रोयथा –

ॐ देवकीसुत गोविन्द वासुदेव जगत्पते।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः॥

एक दंपती के संतान का अभाव था सभी प्रकार के उपचार कराने के पश्चात् प्रभु की शरण का सहारा लिया। उक्त प्रयोग कराने पर उनके कन्या की उत्पत्ती हुयी। अनुसंधान करने पर पाया कि यजमान द्वारा 'तनयं' की जगह 'तनयि' का उच्चारण किया जाता था।

संतानगोपाल मन्त्र प्रयोग पूर्व विष्णु तंत्र में दिया जा चुका है।

॥ अथ पुत्रप्रदाभिलाषाष्टकम् ॥

॥ विश्वानर उवाच ॥

एकं ब्रह्मैवाद्वितीयं समस्तं सत्यं सत्यं नेह नानास्ति किंचित् ।
एको रुद्रो न द्वितीयोऽवतस्थे तस्मादेकं त्वां प्रपद्ये महेशम् ॥१॥
एकः कर्ता त्वं हि विश्वस्य शंभो नानारूपेष्वेकरूपोऽस्यरूपः ।
यद्वत्तपत्यर्क एकोऽप्यनेकस्तस्मान्नान्यं त्वां विनेशं प्रपद्ये ॥२॥
रज्जौ सर्पः शुक्तिकायां च रौप्यं वारां पूरस्तन्मृगाख्ये मरीचौ ।
यद्वत्तद्वद्विष्वगेव प्रपंचो यस्मिञ्ज्ञाते तं प्रपद्ये महेशम् ॥३॥
तोये शैत्यं दाहकत्वं च वह्नौ तापो भानौ शीतभानौ प्रसादः ।
पुष्पे गंधो दुग्धमध्ये च सर्पिर्यद्वच्छंभो त्वं ततस्त्वां प्रपद्ये ॥४॥
शब्दं गृह्णास्यश्रवास्त्वं हि जिघ्रेरघ्राणस्त्वं व्यंघ्रिरायासि दूरात् ।
व्यक्षः पश्येस्त्वं रसज्ञोऽप्यजिह्वः कस्त्वां सम्यग्वेत्त्यतस्त्वां प्रपद्ये ॥५॥
नो वेदस्त्वामीश साक्षाद्धि वेद नो वा विष्णुर्नो विधाताऽखिलस्य ।
नो योगीन्द्रानेन्द्रमुख्याश्च देवा भक्तो वेद त्वामतस्त्वां प्रपद्ये ॥६॥
नो ते गोत्रं नाऽपी जन्मापि नाख्या नो वा रूपं नैव शीलं न देशः ।
इत्थं भूतोऽपिश्वरस्त्वं त्रिलोक्याः सर्वान् कामान् पूरयेस्तद्भजे त्वाम् ॥७॥
त्वत्तः सर्वं त्वं हि सर्वं स्मरारे त्वं गौरीशस्त्वं च नग्नोऽतिशांतः ।
त्वं वै वृद्धस्त्वं युवा त्वं च बालस्तत्किं यत्त्वं नास्यतस्त्वां नतोऽस्मि ॥८॥
स्तुत्वेति भूमौ निपपात विप्रः स दण्डवद्यावदतीव हृष्टः ।
तावत्स बालोऽखिलवृद्धवृद्धः प्रोवाच भूदेव वरं वृणीहि ॥९॥
तत उत्थाय हृष्टात्मा मुनिर्विश्वानरः कृती ।
प्रत्यब्रवीत्किमज्ञातं सर्वज्ञस्य तव प्रभो ॥१०॥
सर्वांतरात्मा भगवाञ्छर्वः सर्वप्रदो भवान् ।
याञ्चां प्रति नियुङ्क्ते मां किमीशो दैन्यकारिणीम् ॥११॥
इति श्रुत्वा वचस्तस्य देवो विश्वानरस्य ह ।
शुचेः शुचिव्रतस्याय शुचि स्मित्वाऽब्रवीच्छिशुः ॥१२॥

॥ बालउवाचः ॥

त्वया शुचे शुचिष्मत्यां योऽभिलाषः कृतो हृदि ।
अचिरेणैव कालेन स भविष्यत्यसंशयः ॥१३॥

तव पुत्रत्वमेष्यामि शुचिष्मत्यां महामते ।
ख्यातो गृहपतिर्नाम्ना शुचिः सर्वामरप्रियः ॥१४॥
अभिलाषाष्टकं पुण्यं स्तोत्रमेतत्त्वयेरितम् ।
अब्दं त्रिकालपठनात्कामदं शिवसन्निधौ ॥१५॥
एतत्स्तोत्रस्य पठनं पुत्रपौत्रधनप्रदम् ।
सर्वशान्तिकरं वापि सर्वापत्परिणाशनम् ॥१६॥
स्वर्गापवर्गसंपत्तिकारकं नात्र संशयः ।
प्रातरुत्थाय सुस्नातो लिङ्गमभ्यर्च्य शांभवम् ॥१७॥
वर्षं जपन्निदं स्तोत्रमपुत्रः पुत्रवान्भवेत् ।
वैशाखे कार्तिके माघे विशेषनियमैर्युतः ॥१८॥
यः पठेत्स्नानसमये लभते सकलं फलम् ।
कार्तिकस्य तु मासस्य प्रसादादहमव्ययः ॥१९॥
तव पुत्रत्वमेष्यामि यस्त्वन्यस्तत्पठिष्यति ।
अभिलाषाष्टकमिदं न देयं यस्य कस्यचित् ॥२०॥
गोपनीयं प्रयत्नेन महावंध्याप्रसूतिकृत् ।
स्त्रिया वा पुरुषेणापि नियमाल्लिङ्गसन्निधौ ॥२१॥
अब्दं जप्तमिदं स्तोत्रं पुत्रदं नात्र संशयः ।
इत्युक्त्वां तर्दधे बालः सोऽपि विप्रो गृहं गतः ॥२२॥

॥ इति श्रीस्कंदपुराणे काशीखण्डे विश्वेश्वरस्तोत्रं संपूर्णम् ॥

॥ पुत्रकामेष्टिप्रयोगः ॥

तत्रादौ – पुत्रेष्टिहोमविधानात्प्राक् सप्तम पञ्चम तृतीयमासैकपर्यन्तं वा, प्रदोष व्रतं वा भौमव्रतमाचरन्तौ अखण्डब्रह्मचर्यपालनं कुरुतां पुत्रेच्छू पतिपत्न्याविति शास्त्राचारः।

अस्यैव व्रतकालस्यान्तर्गताः जन्माङ्गतः प्रश्नाङ्गतो वा अनपत्यत्वमृतापत्यत्व कन्याप्रजननत्वादिदुःखप्रदं ग्रहयोगाः स्युस्तर्हि शास्त्रोक्तविधिना श्रीरुद्रस्नान पूर्वकं साङ्गोपाङ्गसन्तानगोपालादिपुरश्चरणद्वारा विश्वासपूर्वकं शास्त्रकृत्यं सुसंविधाय दूरीकरणीयास्ते ते दोषाः।

यदि चेत्पुरुषो धातुरोगग्रस्तो भवेदथवा वाजीकरणशक्त्यभावः स्यात् तथा स्त्रियः ऋतुदोषो गर्भदोषश्च प्रतीयेत तर्हि-आदौ हि पुत्रकामेष्टिं होमात् सुचिकित्सा विधेया।

जन्मलग्न या प्रश्नद्वारा संतान प्रतिबन्धित ग्रहों का उपाय करें। **रुद्रस्नान कर संतानगोपाल मन्त्र प्रयोग करें।** औषधोपाय करें

॥ अथादौ रुद्रस्नानविधानम् ॥

गुरुशुक्रास्तादिरहिते शुभे मासि- अष्टम्यां चतुर्दश्यां वा शुक्लपक्षे ऋतुस्नानाच्चतुर्थेऽह्नि रविवासरे चन्द्रताराद्यानुकूल्ये सति कर्ता सभार्यः अशोष्य नदीसंगमं गत्वा तदभावे सिद्धपीठशिवालयादिकमुपेत्य पुण्याहं वाचयित्वा आहिताग्न्यादिगुणविशिष्टं द्विजमाचार्यत्वेन वृत्वा सत्रऋत्विकब्राह्मणञ्च वृणुयात्। ततो दीर्घायुःसुपुत्राद्युत्पत्तिप्रतिबन्धकदुरितनिरासार्थं यथाशक्ति प्रायश्चित्तमनुतापयुक्तः कुर्यात् तच्च फलतारतम्यावगतदुरिततारतम्येन षडब्द-त्र्यब्द-सार्द्धाब्द रूपं चान्द्रायणकृच्छ्रातिकृच्छ्ररूपं वा द्रव्यजप्य होम तीर्थ ब्रह्मभोजनादि प्रत्याम्नायैः कार्यं सभ्योपदिष्टम्। ततः श्रीरुद्रप्रीत्यर्थं कृष्णामेकां धेनुं शक्त्योपस्करयुतां दद्यात्। तदशक्तौ पलं पलार्धमात्रं सुवर्णं वा दद्यात्। एवं कृते रुद्रस्नानेऽधिकारी भवति। ततः सभार्यो यजमानः आचम्य प्राणानायम्य।

संकल्प - **ॐ अद्येत्यादि० मम सभार्यस्य दीर्घायुः सुपुत्रादिसन्तति प्रतिबन्धकेन इह जन्मन्यन्यजन्मनि वा कृतेनाष्टकापर्वादिपैतृक नैमित्तिकाकरणेन वा परद्वेषेण वा गुरुद्वेषेण वा मृगशावभक्षणेन वा बालघातेन वा रत्नापहरणेन वा वत्सवियोजनेन वा पितृमातृभ्रातृद्वेषेण वान्येन वा कर्मणोत्पन्न चतुर्विध वन्ध्यात्वान्यतर वन्ध्यात्व दोषनिरासेन तथा स्त्रियाः कुक्षिदोष ज्ञाताज्ञातान्यदुष्टस्त्री चैलाञ्चलस्पर्श दोषतदेकांशेन शयनादिजनित दोषादि सर्वसन्ततिप्रतिबन्धक निरासेन च दीर्घायुःसुपुत्रादि सन्तत्यवाप्तिद्वारा श्रीउमासहित श्रीरुद्रप्रीत्यर्थं बौधायनोक्तविधिना श्रीरुद्रकलश स्नान इत्याख्यं कर्म करिष्ये। तदङ्गत्वेनादौ श्रीगणपत्यादिपूजनं नान्दीश्राद्धञ्च करिष्ये।** इति संकल्प्य श्रीगणपतिपूजन वरुणकलशादिनान्दी श्राद्धान्तं सर्वं सम्पादयेत्।

ततः श्रीरुद्रं ध्यात्वा, आराधितो मनुष्यैस्त्वं सिद्धैर्देवासुरादिभिः। आराधयामि भक्त्या त्वां मां गृहाण महेश्वर! इति प्रार्थयेत्। अथाचार्योऽष्टहस्तं मण्डपं कृत्वा पञ्चगव्येनाभ्युक्ष्य तन्मध्ये श्वेतरजसा अष्टदलपद्ममालिख्य ब्रह्मादीन् मण्डल

देवांस्तत्रावाह्य। पूजयित्वा मध्ये कर्णिकायां रुद्रकलशं कलश स्थापन विधिना स्थापयित्वा दध्यक्षतादिभिः शोधयित्वा।

तत्र निष्कं तदर्धं (वा यथा शक्ति) सुवर्ण निर्मित श्रीरुद्र प्रतिमाग्न्युतारण पूर्वकं संस्थाप्य त्र्यम्बक-मिति श्रीमहादेवमा वाहयेत्।

ततः पूर्वादिचतुर्षु दलेषु नन्दिनं, भृङ्गिरिटिं, कालं , महाकालं च क्रमेण आवाह्य तेष्वेवाष्टदलेषु इन्द्रादीनष्टदिक्पालांश्चावाह्य, महादेवस्य वामभागे पार्वतीदक्षिणभागे विनायकं चावाह्य षोडशोपचारैः पूजयित्वा।

पद्मचतुष्कोणेषु कुम्भचतुष्टयं यथाविधि स्थापयित्वा उदकमासिच्य अश्वत्थपल्लवादीनि निक्षिप्य वरुणमावाह्य कलशं प्रार्थ्य।

ततो मण्डपस्य अष्टदिक्षु कुम्भाष्टकं स्थापयित्वा इन्द्राद्यष्टदिक्पालान्सम्पूज्य अन्नादिबलिमुपहृत्य प्रार्थयेत्।

ॐ इन्द्राद्याश्च सुराः सर्वे लोकपालास्तथैव च।
आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः।
ते सर्वे पूजिताः शान्ति प्रयच्छन्तु यथेप्सिताम्।

ततः कुम्भान् संस्पृशन्नक्षतांश्चाक्षिपन्नेकादशावृत्त्या रुद्रान् जपेत्। तस्मिन् ब्रह्मपद्मादाग्नेय्यां दिशि स्थण्डिलेऽग्निमुपसमाधाय तूष्णीं निर्वापादिना चरुं पक्त्वाऽऽज्यभागान्तं कृत्वा समित्तिलचर्वाज्यैः **ॐ मानस्तोके० इति मन्त्रेण अष्टोत्तरशतवारं नवग्रहहोमपूर्वकं जुहुयात्। ततः स्विष्टकृदादिपूर्णाहुतिप्राक्तन होमशेषं समाप्याचार्यो गन्धाधुपचारैः रुद्रस्योत्तरपूजां कृत्वा**ऽभिषेकार्थं मण्डपादग्रेरुत्तरतश्चतुरस्रं स्वस्तिकोपेतं मण्डलं कृत्वा तत्रोदुम्बरकाष्ठपीठद्वये परिहिताऽहतश्वेतवस्त्रे दम्पती प्राङ्मुखमुपवेश्य स्वयमुदङ्मुखः **पूर्वादि कलशोदकेन रुद्राध्यायस्यैकैकेन मन्त्रेण एकैकेनार्कपत्रेणाभिषिच्य त्यजेत्। अत्र माध्यन्दिनीयशाखायां रुद्राध्यायगतानां चतुःषष्टिमन्त्राणामेकादशिन्यां चतुरधिक सप्तशतसंख्या भवति।**

पल्लवों के द्वारा **आशुः शिशान सूक्त, आपोहिष्ठा** ऋचा तथा **सुरस्त्वाभिषिंचतु** पौराणिक मन्त्रों से अभिषेक करें।

ततः पल्लवैराशुः शिशान इति सूक्तेन आपोहिष्ठेत्यादिभिः सुरास्त्वामित्यादि पौराणिकैश्चाभिषिच्य शिवं शिवमिति वदेयुः। तत्र सर्वौषधीभिः सप्तमृद्भिर्नद्या उभयकूलमृदा च सर्वाङ्गेऽनुलिप्तौ दम्पती विशेषतः कुक्षिदेशे अनुलिप्तस्त्रियं शिष्टोद्धृतेन श्रीरुद्रकलशोदकेन प्रक्षालिताङ्गौ शुद्धोदकेन स्नापयेयुः।

प्रार्थना करें।

ततस्तौ - ॐ शरीरस्थाश्च ये दोषाः ये दोषा गर्भवीजयोः। ते सर्वे नाशमायान्तु करणानेन भो द्विजाः।

स्नात्वा स्नानवस्त्रं परित्यज्य शुद्धवस्त्रान्तरं परिधाय कुंकुममालाद्यलंकृतौ भवेताम्। **तत आचार्यो यजमानान्वारब्धः पूर्णाहुतिं हुत्वा वसोर्धारां जुहुयात्, ततो यजमानः सपत्नीकः कृतत्र्यायुष करणः।** पूजापूर्वकमाचार्याय पयस्विनीं सदक्षिण धेनुं सुवर्णञ्च यथा शक्ति दत्वा ब्रह्मणे पूर्णपात्रमृत्विग्भ्यो यथाशक्ति दक्षिणां दत्त्वा क्षमाप्य श्रीरुद्राधावाहितदेवता विसृज्य **श्रीरुद्रप्रीत्यर्थं शतं तदर्धं तदर्धं वा ब्राह्मणान्भोजयित्वा तैः सम्पूर्णतां वाचयित्वा जीवत्पतिपुत्रादिभिर्वर्धापनादि कृतमङ्गलो ब्राह्मणाशिषो गृह्णीयात् ततः पुत्रेष्टिविधानम्।**

अथ गोचर वशात् गर्भप्रदगुरु भ्रमणं ज्ञात्वा ऋतुकालात्पञ्चदिनोत्तरं सप्तदश-दिनादर्वाक् शुभे समेऽह्नि भार्यया सह प्रायश्चित्तस्नानपूर्वक कृतमङ्गलस्नानाभ्यङ्गो यजमानोऽलङ्कृतः पूजाहोमकर्म प्रकरणोक्तस्वस्त्यनादिकं पठित्वा दम्पत्योरुत्तरीय वस्त्रस्यान्ते **ॐ शुक्लाम्बरधरेति मन्त्रेण सफलाक्षतग्रन्थिबन्धनं कुर्यात्ततः।**

ॐ अद्येत्यादिदेशकालौ सङ्कीर्त्य-अमुकगोत्रोऽमुकशर्म्माहं (वर्म्माहं गुप्तोऽहं) झटिति चिरञ्जीविपुत्रकामः पुत्रकामेष्टिं करिष्ये। तदङ्गत्वेन श्रीगणपत्यादि पूजनं नान्दीश्राद्धमाचार्यादिवरणञ्च करिष्ये। इति सङ्कल्प्य।

श्रीगणपत्याद्यावाहनपूर्वक पूजनम्-आचार्यादिवरणं नान्दीश्राद्धञ्च कृत्वा स्थण्डिलाद्यग्निप्रतिष्ठान्तं विधाय श्वेतवत्सगोक्षीरेण पायसचरुं पक्त्वा ततः - आघारादारभ्य पञ्चवारुणनवग्रहाधिदेवता प्रत्यधिदेवनादीनाञ्च होमं कृत्वा भार्ययाऽन्वारब्धः प्रधानाऽहुतीर्जुहुयात्।

॥ अथ प्रधानदेवताज्यहोमः॥

विनियोगः - **ॐ प्रधानाज्यहोममन्त्राणां याज्ञवल्क्य बृहदारण्यकावृषी अनुष्टुप्छन्दः सन्तानदाता परमात्मा देवता प्रधानाज्यहोमे विनियोगः।**

ॐ यावन्तो देवास्त्वयि जातवेदस्तिर्यञ्चो घ्नन्ति पुरुषस्य कामान्। तेभ्योऽहं भागधेयं जुहोमि ते मा तृप्ताः सर्वकामैस्तर्पयन्तु स्वाहा। इदमग्नये॥१॥ ॐ या तिरश्चीनि पद्यतेऽहं विधरणी इति तां त्वा घृतस्य धारया यजे संराधनीमह ठँ स्वाहा। इदमग्नये॥२॥ ॐ ज्येष्ठाय स्वाहा। इदं ज्येष्ठाय॥३॥ ॐ श्रेष्ठाय स्वाहा। इदं श्रेष्ठाय॥४॥ ॐ प्राणाय स्वाहा। इदं प्राणाय॥५॥ ॐ अवशिष्टाय स्वाहा। इदमवशिष्टाय॥६॥ ॐ चक्षुषे स्वाहा। इदं चक्षुषे॥७॥ ॐ सम्पदे

स्वाहा। इदं सम्पदे ॥८॥ ॐ श्रोत्राय स्वाहा। इदं श्रोत्राय॥९॥ ॐ यतनाय स्वाहा। इदं यतनाय॥१०॥ ॐ मनसे स्वाहा। इदं मनसे॥११॥ ॐ प्रजायै स्वाहा। इदं प्रजायै॥१२॥ ॐ रेतसे स्वाहा। इदं रेतसे ॥१३॥ ॐ अग्नये स्वाहा। इदमग्नये॥१४॥ ॐ सोमाय स्वाहा। इदं सोमाय॥१५॥ ॐ भूः स्वाहा। इदं भूः॥१६॥ ॐ भुवः स्वाहा। इदं भुवः॥१७॥ ॐ स्वः स्वाहा। इदं स्वः॥१८॥ ॐ भूर्भुवः स्वः स्वाहा। इदं भूर्भुवः स्वः॥१९॥ ॐ ब्रह्मणे स्वाहा। इदं ब्रह्मणे॥२०॥ ॐ क्षत्राय स्वाहा। इदं क्षत्राय॥२१॥ ॐ भूताय स्वाहा। इदं भूताय॥२२॥ ॐ भविष्यते स्वाहा। इदं भविष्यते॥२३॥ ॐ विश्वाय। स्वाहा इदं विश्वाय॥२४॥ ॐ सर्वाय स्वाहा। इदं सर्वाय॥२५॥ ॐ प्रजापतये स्वाहा। इदं प्रजापतये॥२६॥

अथ स्थालीपाकाहुतयः - ॐ अग्नये स्वाहा। इदमग्नये॥१॥ ॐ अनुमतये स्वाहा। इदमनुमतये॥२॥ ॐ देवाय स्वाहा। इदं देवाय॥३॥ ॐ सवित्रे स्वाहा। इदं सवित्रे॥४॥ ॐ सत्यप्रसवाय स्वाहा। इदं सत्यप्रसवाय॥५॥

विनियोगः - ॐ अग्नीषोमाविति सूक्तस्य राहूगणो गौतमऋषिः, अग्निषोमौ देवते अनुष्टुप्त्रिष्टुब्जगती छन्दांसि पायसचरुहोमे विनियोगः।

ॐ अग्नीषोमाविमं सु मे शृणुतं हवम्। प्रतिसूक्तानि हर्यतं भवतं दाशुषे मयः स्वाहा ॥१॥ ॐ अग्नीषोमा यो अद्य वामिदं वचः सपर्यति तस्मै धत्तं सुवीर्यं गवां पोषं स्वश्व्यं स्वाहा॥२॥ ॐ अग्नीषोमा य आहुतिं यो वां दाशाद्धविष्कृतिम्। स प्रजया सुवीर्यं विश्वमायुर्व्यशनवत् स्वाहा॥३॥ ॐ अग्नीषोमा चेति तद्वीर्यं वां यदमुष्णीतमवसं पणिगाः। अवातिरतं बृसयस्य शेषोऽविन्दतं ज्योतिरेकं बहुभ्यः स्वाहा॥४॥ ॐ युवमेतानि दिवि रोचनान्यग्निश्च सोमसक्रतू अधत्तम्। युवं सिन्धूँरभिशस्तर वद्यादग्नीषोमावमुञ्चतं गृभीतान् स्वाहा॥५॥ ॐ आन्यं दिवो मातरिश्वा जभारामथ्न्यादन्यं परिश्येनो अद्रेः अग्नीषोमा ब्रह्मणा वावृधानोरुं यज्ञाय चक्रथूरुलोकं स्वाहा॥६॥ ॐ अग्नीषोमा हविषः प्रस्थितस्य वीतं हर्यतं वृषणाजुषेथाम्। सुशर्माणा स्ववसा त्रि भूतमथाधत्तं यजमानाय शं योः स्वाहा॥७॥ ॐ अग्निषोमा हविषा सपर्याद्देवद्रीचा मनसा यो घृतेन। तस्य व्रतं रक्षतं पातमंहसो विशे जनाय महि शर्म यच्छतम् स्वाहा ॥८॥ ॐ अग्नीषोमा सवेदसा सहूती वनतं गिरः। सं देवत्रा बभूवथुः स्वाहा॥९॥ ॐ अग्नीषोमावनेन वां यो वां घृतेन दाशति। तस्मै दीदयतं बृहत् स्वाहा॥१०॥ ॐ अग्नीषोमाविमानि नो युवं हव्या

जुजोषतम्। आयातमुप नः सचा स्वाहा ॥११॥ ॐ अग्नीषोमा पिपृतमर्वतो न आप्यायन्तामुस्त्रिया हव्यसूदः। अस्मे बलानि मघवत्सु धतं कृणुतं नो अध्वरं श्रुष्टिमन्तं स्वाहा॥१२॥

विनियोगः - ॐ आ ते गर्भ इति पञ्चर्चसूक्तस्य हिरण्यगर्भ ऋषिः, अग्निर्देवता, अनुष्टुप्छन्दः, पायसचरु होमे विनियोगः। (गर्भकामना हेतु)

ॐ आ ते गर्भो योनिमैतु पुमान् बाणइवेषुधिम्। आवीरोऽत्र जायतां पुत्रस्ते दशमास्यः स्वाहा। अग्नये इदम् ॥१॥ ॐ करोमि ते प्राजापत्यैषा गर्भो योनिमैतु ते। अनूनः पूर्णो जायतामश्लोणो पिशाचधीतः स्वाहा। अग्नये इदम्॥२॥ ॐ पुमांस्ते पुत्रो नारितं पुमाननुजायताम्। यानि भद्राणि बीजान्यृषभा जनयन्तु नौ स्वाहा। अग्नये इदम् ॥३॥ ॐ यानि भद्राणि बीजान्यृषभा जनयन्तु नौ स्वाहा। अग्नये इदम्॥४॥ ॐ यानि भद्राणि बीजान्यृषमा जनयन्ति नः तैस्त्वं पुत्रान् विन्दस्व सा प्रसूर्धेनुकाभव स्वाहा अग्नये इदम् ॐ कामः समृद्धयतां मह्यमपराजित मेव मे कामये देव तं मे वायो समर्धय स्वाहा अग्नये इदम्॥५॥

विनियोगः - ॐ अग्निरिति पञ्चर्चसूक्तस्य हिरण्यगर्भऋषिर्वरुणो देवता जगतीछन्दः पायसचरु होमे विनियोगः। (संतान की दीर्घायु हेतु)

ॐ अग्निरेतु प्रथमो देवतानां सोऽस्यै प्रजा मुञ्चतु मृत्युपाशात्। तदयं राजा वरुणोऽनुमन्यतां यथेयं स्त्रीपौत्रमघं न रोदात् स्वाहा॥१॥ वरुणायेदम्। ॐ इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः। अशून्योपस्था जीवतामस्तु माता पौत्रमानन्दमभिबुध्यतामियम् स्वाहा॥२॥ वरुणायेदम् । ॐ मा ते गृहे निशिघोष उत्थादन्यत्रत्यद्रवत्यः संविशन्तु। मा त्वं विकेश्युर आवधिष्ठाजीवत्पत्नी पतिलोके विराज। पश्यन्ति प्रजां सुमनस्यमानां स्वाहा॥३॥ वरुणायेदम्। ॐ अप्रजस्तां पौत्रमृत्युं पाप्मानमुत वाऽधम शीर्ष्णस्त्रजमिवोन्मुच्य द्विषद्भ्यः प्रतिमुञ्चामि पापं स्वाहा॥४॥ वरुणायेदम्॥ ॐ देवकृतं ब्राह्मण कल्पमानं तेन हन्मि यो निषदः पिशाचान्। क्रव्यादो मृत्यूनधरान्पातयामि दीर्घमायुस्तव जीवन्तु पुत्राः स्वाहा॥५॥ वरुणायेदम्।

विनियोगः - ॐ नेजमेवेति तिसृणां विष्णुस्त्वष्टा गर्भकर्त्तर्षिः विष्णुपृथिवी विष्णवो यथासंख्यं देवता। अनुष्टुप् छन्दः पायसहोमे विनियोगः। (पुत्र कामना हेतु)

ॐ नेजमेष परापतः सुपुत्रः पुनरापत अस्यै मे पुत्रकामायै गर्भमाधेहि यः पुमान् स्वाहा। विष्णवे इदम्॥१॥ ॐ यथेमं पृथिवीमह्युत्ताना गर्भमादवे

एवन्तं गर्भमाधेहि दशमे मासि सूतवे स्वाहा। पृथिव्यै इदम् ॥२ ॥ ॐ विष्णो श्रेष्ठेन रूपेणास्यां नार्यां गर्भिण्यां पुमासं पुत्रमाधेहि दशमे मासि सूतवे स्वाहा। विष्णवे इदम् ॥३ ॥

विनियोगः – ॐ सोमो धेनुमिति राहूगणो गौतम ऋषिः सोमो देवता त्रिष्टुप्छन्दः पुत्रकामसिद्धये पायसहोमे विनियोगः।

ॐ सोमो धेनु ठँ सोमो अवन्तमाशु ठँ सोमो वीरं कर्मण्यं ददाति। सादन्यं विदत्थ्य ठँ सभेयं पितृश्रवणं यो ददाशदस्मै स्वाहा। सोमायेदम् ॥१ ॥ ॐ इहैव स्तम्मा वि यौष्टं विश्वमायुर्व्यश्नुतम्। क्रीडन्तौ पुत्रैर्नैतृभिर्मोदमानौ स्वे गृहे स्वाहा। सूर्यासावित्र्यै इदं ॥२ ॥

विनियोगः – ॐ इमात्वमित्यस्य सूर्यासावित्री ऋषिः अनुष्टुप्छन्दः पायसहोमे विनियोगः।

ॐ इमां त्वमिन्द्रमीढ्वः सुपुगां सुभगां कृणु दशास्यां पुत्रानाधेहि पतिमेकादशं कृधि स्वाहा। सूर्यासावित्र्यै इदम् ॥१ ॥

विनियोगः – ॐ तां पूषन्निति सूर्यासावित्री ऋषिः सूर्या देवता त्रिष्टुप्छन्दः पायसहोमे विनियोगः।

ॐ तां पूषञ्छिवतमामेरयस्व यस्यां बीजं मनुष्या उवपन्ति। या न ऊरू उशती विश्रयाते यस्यामुशन्तः प्रहराम शेपं स्वाहा। इदं सूर्यासावित्र्यै ॥२ ॥

आते योनिं गर्भ एतु पुमान् बाण इवेषुधिम्। आवीरोऽत्र जायतां पुत्रस्ते दशमास्यः स्वाहा ॥१ ॥ ॐ पुमांसं पुत्रं जनयतं पुमाननुजायताम्। भवासि पुत्राणां माता जातानां जनयाश्च यान् स्वाहा ॥२ ॥ ॐ यानि भद्राणिबीजान्यृषभा जनयन्ति च तैस्त्वं पुत्रं विन्दस्व सा प्रसूर्धेनुका भव स्वाहा। अग्नये इदं ॥३ ॥ ॐ कृणोमि ते प्राजापत्यमायोनिं गर्भ एतु ते विन्दस्व त्वं पुत्रनारि। यस्तुभ्यं शमसच्छमु तस्मै त्वं भव स्वाहा ॥४ ॥ ॐ यासां द्यौः पिता पृथिवी माता समुद्रो मूलं वीरुधां बभूव। तास्त्वा पुत्रविद्यायै दैवीः प्रावन्त्वोषधयः स्वाहा ॥५ ॥ ॐ पर्वताद्दिवो योनेरङ्गादङ्गात्समा भृतम्। शेपो गर्भस्य रेतोधाः सरो पर्णमिवादधत् स्वाहा ॥१ ॥ ॐ यथेयं पृथिवी महीभूतानां गर्भमादधे। एवादधामि ते गर्भस्तस्मै त्वामवसे हुवे स्वाहा ॥२ ॥ ॐ गर्भ धेहिसिनीवालि! गर्भं धेहि सरस्वति! गर्भं ते अश्विनोभावाधत्तां पुष्करस्त्रजा स्वाहा ॥३ ॥ गर्भन्ते मित्रावरुणौ गर्भं देवो बृहस्पतिः। गर्भं त इन्द्रश्चाग्निश्च गर्भं धाता दधातु ते स्वाह ॥४ ॥ ॐ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु। आसिञ्चंतु

प्रजापतिर्धाता गर्भं दधातु ते स्वाहा ॥५ ॥

ॐ यद्वेद राजा वरुणो यद्वा देवी सरस्वती। यदिन्द्रो वृत्रहा वेद तद्गर्भकरणं पिव स्वाहा ॥६ ॥ ॐ गर्भो अस्यौषधीनां गर्भो वनस्पतीनाम्। गर्भो विश्वस्य भूतस्य सो अग्ने गर्भमेहधाः स्वाहा ॥७ ॥ ॐ अधिस्कन्द वीरयस्व गर्भमाधेहि योन्याम्। वृषाऽसि वृष्णयावन्। प्रजायै त्वा नयामसि स्वाहा ॥८ ॥ ॐ विजिहीष्व वार्हत्सामे गर्भस्ते योनिमाशयाम्। अदुष्टे देवा पुत्रं सोमया उभया विनम् स्वाहा ॥९ ॥ ॐ धातः श्रेष्ठेन रूपेणास्यां नार्या गवीन्योः। पुमांसं पुत्रामाधेहि दशमे मासि सूतवे स्वाहा। धात्रे इदम् ॥१० ॥ ॐ त्वष्टः! श्रेष्ठेन रूपेणास्यां भार्यां गवीन्योः। पुमांसं पुत्रमाधेहि दशमे मासि सूतवे स्वाहा। त्वष्ट्रे इदम् ॥११ ॥ ॐ सवितः श्रेष्ठेन रूपेणास्यां नार्यां गवीन्योः। पुत्रमाधेहि दशमे मासि सूतवे स्वाहा ॥ इदं सवितायै ॥१२ ॥ ॐ प्रजापते! श्रेष्ठेन रूपेणास्यां नार्यां गवीन्योः पुमांसं पुत्रं जनयतं पुमाननु जायतां भवासि पुत्राणां माता जातानां जयनांश्च यान्त्स्वाहा। यज्ञेश्वरायेदम् ॥१३ ॥ ॐ यज्ञपुरुषाय स्वाहा। इदं यज्ञपुरुषाय ॥१४ ॥ ओं यदस्य कर्मणो त्यरीरिचं यद्वा न्यूनमिहाकरम्। अग्निष्टत्स्विष्टकृद्विद्यात्सर्वं स्विष्टं सुहुतं करोतु मे। अग्नये स्विष्टकृते सुहुतहुते सर्वप्रायश्चित्ताहुतीनां कामानां समर्द्धयित्रे सर्वान्नः कामान्त्समर्द्धयः स्वाहा। इदमग्नये स्विष्टकृते ॥१५ ॥ इति स्विष्टकृद्धोमं कृत्वा -

विनियोगः - ॐ अपश्यन्त्वेति द्वयोः प्रजावान्प्राजापत्य ऋषिः, प्रजापतिर्देवता, त्रिष्टुप्छन्दः, हुतशेषपायस चरुप्राशने विनियोगः।

आचार्यः शेषहविष्यांशं गृहीत्वा - ॐ अपश्यं त्वा मनसा चेकितानं तपसो जातं तपसो विभूतम्। इह प्रजामिह रयिंरराणः प्रजायस्व प्रजया पुत्रकाम ॥१ ॥ इति पठित्वा यजमानं भोजयेत्। हविष्यांशस्यार्धेन - ॐ अपश्यं त्वा मनसा दीध्यानां स्वायां तनू ऋत्व्ये नाधमानाम्। उपमामुच्चा युवतिर्बभूयाः प्रजायस्व प्रजया पुत्रकामे ॥२ ॥ इति पठित्वा यजमानपत्नीं भोजयेत्।

ततः हस्तौ प्रक्षाल्याचामेत्। ॐ पिशंगभृष्टिमित्यस्य दैवोदासिः परुच्छेपमृषिः, इन्द्रोः देवता, गायत्रीछन्दः, नाभ्यालम्भने विनियोगः।

ॐ पिशङ्गभृष्टि सम्भृणं पिशाचिमिन्द्र सम्भृण सर्वं रक्षो निबर्हय। इति मन्त्रेण पतिपत्नि स्वस्वनाभ्यालम्भनं कुर्याताम्। (इस मन्त्र से पति-पत्नि एक दूसरे को ग्रास देवें)

आज्याहुतिः - ॐ ब्रह्मणाग्निः साम्विदानो रक्षोहा बाधबामितः। अमीवा

यस्ते गर्भं दुर्णामायोनिमाशये स्वाहा ॥१॥ ॐ यस्ते गर्भममीवा दुर्णामायोनि माशये। अग्निष्ट ब्रह्मणा सह निष्क्रव्यादमनीनशत् स्वाहा ॥२॥ ॐ यस्ते हन्ति पतयन्तं निपत्सुं यः सरीसृपम्। जातं यस्ते जिघांसति तमितो नाशयामसि स्वाहा ॥३॥ ॐ यस्त ऊरूविहरन्त्यन्तरा दम्पतीशये! योनिं यो अन्तरारेदि तमितो नाशयामसि स्वाहा ॥४॥ ॐ यस्त्वा भ्राता पतिर्भूत्वा जारो भूत्वा निपद्यते। प्रजां यस्ते जिघांसति तमितो नाशयामसि स्वाहा ॥५॥ ॐ यस्त्वा स्वप्नेन तमसा मीहयित्वा निपद्यते! प्रजां यस्ते जिघांसति तमितो नाशयामसि स्वाहा ॥६॥ ॐ अग्ने! प्रायश्चित्ते त्वं देवानां प्रायश्चितिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्या अपुत्र्यास्तनूस्तामस्या अपजहि स्वाहा ॥७॥ ॐ वायो! प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्या अपुत्र्यास्तनूस्तामस्या अपजहि स्वाहा ॥८॥ ॐ चन्द्र! प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्या अपुत्र्यास्तनूस्तामस्या अपजहि स्वाहा ॥९॥ ॐ सूर्य! प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्या अपुत्र्यास्तनूस्तामस्या अपजहि स्वाहा ॥१०॥ ॐ अग्निवायुचन्द्रसूर्याः! प्रायश्चित्तयोयूयं देवानां प्रायश्चित्तयःस्थ ब्राह्मणो वो नाथकाम उपधावामि यास्या अपुत्र्यास्तनूस्तामस्या अपहत स्वाहा ॥११॥ ॐ मा नो महान्तमुतमानो अर्भकं मा न उक्षन्तमुतमा न उक्षितम्। मा नो वधीः पितरम्मोतमातरं मा नः प्रियास्तन्वो रुद्र! रीरिषः स्वाहा ॥१२॥

आब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो जायतां दोग्ध्रीधेनुर्वोढाऽनड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्टाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षोमो न कल्पतां स्वाहा ॥१॥ ॐ अहो मुचे प्रभरे मनीषामसुत्राव्णे सुमतिमावृणानः। इदमिन्द्रं प्रतिहव्यं गृभाय सत्याः सन्तु यजमानस्य कामाः स्वाहा ॥२॥ ॐ पुनस्त्वादित्या रुद्रावसवः समिन्धता, पुनर्ब्रह्माणो वसुनीथ! यज्ञः घृतेन त्वं तन्वं वर्धयस्व सत्याः सन्तु यजमानस्य कामाः स्वाहा ॥२॥ ततो भूराद्या नवाहुतयः। (इमे नव मंत्राः पूजा होम प्रकरणे द्रष्टव्याः)

पश्चात् प्रायश्चित होम करके नवाहुति देकर पूर्णाहुति देवें।

एवं प्रायश्चित्तहोमान्तं कृत्वोक्तक्रमेण विधिवत्सर्वं समाप्य विप्रेभ्योगां सुवर्णादि दक्षिणाञ्च दत्वा अत्यम्लं तिक्तादिकं विहाय केशरादिसंयुक्तं पायसादिवृष्यान्नं भक्षयेत् स्त्री तु लध्वाहारं तैलपकवटकादीन्सह खादयेत्।

तस्यामेव निशायां दम्पती दर्भास्तरणे प्राक्शिरसौ शयीयातां पश्चाद् गर्भाधानं कुर्यात्,

गर्भाधान मन्त्रः - ॐ **विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणिपि ठं शतु। आसिञ्चतु प्रजापतिर्धाता गर्भ दधातु ते।**

॥ इति कर्मठगुरौ पुत्रकामेष्टिविधिः ॥

॥ पुत्रप्राप्ति के अन्यप्रयोगः॥

द्वादशाक्षरमन्त्रोः - ॐ ह्रां ह्रीं ह्रूं पुत्रं कुरु कुरु स्वाहा।

चूतवृक्षसमारूढो जपेदेकाग्रमानसः।
अपुत्रो लभते पुत्रं नान्यथा शंकरोदितम्।

॥ पुत्रोत्पत्तिकारकयन्त्रम् ॥

शंकरमातुशंकरपितु

४०	४२	४	५
१	३	४८	४३
४६	४७	५	४
२	७	४७	४४

(बायें) करैवरनलक्ष्मीपति (दायें) शंकरराखे चारों दीप (नीचे) पापी के जारु दोश

इस यन्त्र को अच्छे नक्षत्र और शुभ दिन में गोरोचन से भोजपत्र पर लिखकर, गूगल की धूप देकर सोना या चाँदी से मढा कर वंध्या स्त्री के कण्ठ में बाँधे तो जिस स्त्री के लड़का न होता हो अथवा होकर मर जाता हो उसके निश्चय पूर्वक पुत्र उत्पन्न होकर जीता है। इस में संदेह नहीं है।

॥ अथशीघ्रप्रसवोपाय:॥ (संस्कार भास्करे)

हिमवत्युत्तरे पार्श्वे शवरी नाम यक्षिणी।
तस्या नूपुरशब्देन विशल्या स्यात्तु गर्भिणी स्वाहा ॥१॥

इति मंत्रेणैकविंशतिदूर्वांकुरैरेकपलं तिलतैलं प्रदक्षिणमावर्तयन्नष्टशतं मन्त्रयित्वा तत्तैलं किञ्चित्पाययेच्छेषमुदरे लेपयेदिति।

८	३	४
१	५	९
६	७	२

यन्त्रप्रकारः - पहले ८, ३, ४। १,५,९। ६,७,२। इस क्रम से यन्त्र लिखें। **गजाग्निवेदा उडुराट्शरांकार सर्षिपक्षा इति हि क्रमेण। लिखेत्प्रसूतेः समये गृहे वै सुखेन नार्यः सुवते हि शीघ्रमिति।**

॥ अथ मृत्वत्सा हेतु प्रयोगः॥

मृत्वत्सा वह कहलाती है जिसके पुत्र पैदा होकर एक पक्ष, मास, या एक दो वर्ष में मर जाते है।

लक्षणं यत्रेश्च -

अत्र योगः प्रकर्तव्यः यथाशंकरभाषितम् ।
मार्गशीर्षेऽथवा ज्येष्ठे पूर्णायां लेपिते गृहे ॥
नूतनं कलशं पूर्णं गन्धतोयेन कारयेत् ।
शाखाफलसमायुक्तं नवरत्नसमन्वितम् ॥
सुवर्णमुद्रिकायुक्तं षट्कोणमण्डलस्थितम् ।
तन्मध्ये पूजयेद्देवीमेकांतीं नाम विश्रुताम् ॥
गंधपुष्पाक्षतैर्धूपैर्दीपैर्नैवेद्य संयुतैः ।
अर्चयेद्भक्तिभावेन मधुना दुग्धमाषकैः ॥
वाराही च तथाचान्द्री ब्राह्मी माहेश्वरी तथा ।
कौमारी वैष्णवी देवी षट्सु पत्रेषु मातरः ॥
पूजयेन्मन्त्रभावेन दधिपिंडानि कारयेत् ।
सप्तसंख्याप्रमाणानि षट्संख्या मातृषट्कतः ॥
सप्तमं तुपृथग्धृत्वा शुचिस्थाने विशेषतः ।
तद्भुक्त्वा गृहमागच्छेत् कन्या वा वटुकस्त्रियः ॥
भोजयेद्दक्षिणां दत्त्वा प्रमाणं कारयेत्ततः ।
विसृज्य देवतां चाथ नद्यां तत्कलशोदकम् ॥
सुकुलं वीक्षयेद्धीमाञ्शुभेन शुभमादिशेत् ।
विपरीतं पुनः कुर्याद्यागं तावत्सुसिद्धिदम् ॥
प्रतिवर्षमिदं कुर्याद्दीर्घजीवी सुतो भवेत् ।
सिद्धियोगमिदं ज्ञानं नान्यथा शंकरोदितम् ॥

अस्य मन्त्रः - ॐ नमः परब्रह्मपरमात्मने अमुके गृहे गर्भजीवितं सुतान् कुरु कुरु स्वाहा ॥ इति मन्त्रमयुतं जपेत् सिद्धिः॥

षट्कोण मध्य में कांतीदेवी का पूजन करें। षट्कोणों में वाराही, ऐन्द्री, ब्राह्मी, माहेश्वरी, कौमारी एवं वैष्णवी का पूजन करें। इनको दधिपिण्ड प्रदान करें।

सातवाँ पिण्ड शुचि स्थान पर रखें। कन्या वटुक भोजन करायें।

॥ काकवन्ध्या हेतु प्रयोगः॥

अथ काकवन्ध्या लक्षणम् -

पूर्वं पुत्रवती या सा क्वचिद्वन्ध्या भवेद्यदि ।
काकवन्ध्या तु सा ज्ञेया चिकित्सा तत्र कथ्यते ॥
विष्णुक्रांतां समूलां तु पिट्वा महिषिदुग्धके ।
महिषी नवनीतेन ऋतुकाले तु भोजयेत् ॥
एवं सप्तदिनं कुर्यात् पुनर्गभश्च लभ्यते ।

तत्रमन्त्रः - ॐ नमः शक्तिरूपाय अमुकगृहे पुत्रं कुरु कुरु स्वाहा।
अष्टोत्तरशतं जपेत् सिद्धिः॥

औषधीप्रयोगो यथा - तत्रादौ वन्ध्याशुद्धि प्रयोगः। (तन्त्रसारे) एकविंशत्यहं यावद्दुग्धेन सह मेथिकाम्। मेथीतोलकमेकं च खंडकं तोलकद्वयम् । घृतं तोलकमेकं च पिवेद्दुग्धेन मिश्रितम्। मृतवत्सा मृतगर्भा काकवंध्या तथैव च ॥ पुत्रहीना च वन्ध्या च पंच चैव प्रकीर्तिताः । संहरेत्सर्व-दोषांश्च मेथीभक्षणमुत्तमम॥ नाडीशुद्धायां स्त्रियामुपरि ऋतुकालमिदमौषधं देयम् । पलाशपत्रयोगः (दत्तात्रेयतन्त्रे) - पत्रमेकं पलाशस्य गर्भिणीपयसान्वितम्। ऋत्वंते तानि पीतानि वंध्या भवति गर्भिणी ॥

तत्रमन्त्रः - ॐ नमः सिद्धिरूपाय अमुकी पुत्रं कुरु कुरु स्वाहा॥
अष्टोत्तरशतं जपेत् सिद्धिः॥

॥ गर्भ स्तम्भन मन्त्र॥

ॐ ऐं ह्रीं क्लीं वं वटुकाय आपदुद्धारणाय श्रीमते वीर वटुकाय ते नमः। कष्टं नाशय गर्भ-पक्षात् सौख्यं वितर सर्वान् कामान् पूरय पूरय वं क्लीं ह्रीं ऐं ॐ।

यह मंत्र १००० जप करने से सिद्धि प्रदान करता है।

अथानेकयोगाः (चिकित्साशास्त्रे)

समूलपत्रां सर्पाक्षीं रविवारे समुद्धरेत्। एकवर्णगवां क्षीरैः कन्याहस्तेन पेषयेत्॥ ऋतुकाले पिबेद्वंध्या पलार्द्धं तद्दिने दिने। क्षीरशाल्यन्नमुद्गांश्च लध्वाहारं

प्रदापयेत् ॥ एवं सप्तदिनं कुर्याद्वंध्याऽपि लभते सुतम् ॥ श्वेतायाः कंटकार्याश्च मूलं तद्वच्च गर्भकृत्। न कर्म कारयेत् किंचिद्वर्जयेच्छीतमातपम् ॥ शिफावहि-शिखायास्तु क्षीरेण परितोषितम्। पिबेदृतुमती नारीगर्भधारणहेतवे ॥ अश्वगंधाकषायेण सिद्धं दुग्धं घृतान्वितम्। ऋतुस्नातांगना प्रातः पीत्वा गर्भं दधाति ॥

॥ सर्वरोगप्रशमनोपायः ॥

कर्मदोष के उद्भव के कारण रोग शोक महाव्याधि की प्राप्ति होती है। जहाँ कर्मदोष का प्रभाव विशेष है वहाँ औषधी से व्याधि शमन नहीं होती

पूर्वजन्मकृतं पापं व्याधिरूपेण बाधते।
महारुद्रविधानेनासाध्यो रोगोऽपि शाम्यति ॥
अपामार्जनसंज्ञेन मालामन्त्रेण मार्जयेत्।
मार्जनाद्रोगिणः सर्वे रोगा नश्यंत्यसंशयम् ॥१॥
अच्युतानन्तगोविन्देत्येवं नामत्रयं हरेः।
सर्वरोगोपशात्यर्थं सततं व्याधिमान् जपेत्।
सर्वेषु ज्ञातरोगेषु प्रदद्यात्सततं नरः ॥२॥
पानीयं पायसं मुद्गाः शकरां घृतसंयुताम्।
प्रतिकूलग्रहाणां च जपं होमं च पूजनम् ॥३॥
प्रायश्चित्तं तु तत्कृत्वा चिकित्सामारभेत्ततः।
प्रदद्यात्सर्वरोगघ्नं छायापात्रं विधानतः ॥४॥

रुद्रार्चन अभिषेक मृत्युञ्जय मन्त्र जाप अपामार्जन स्तोत्र मन्त्र के मार्जन से व्याधिदूर होवें। '**अच्युतानन्तगोविन्दम्**' इन तीन नामों का स्मरण करें। छाया पात्र का दान व ग्रहों की शान्ति करायें। काँसी का छायापात्र होवे उसे घृत से पूर्ण करे, स्वर्ण उसमें रखें। संकल्प पूर्वक दान करें।

॥ दानमन्त्रः ॥

आयुर्बलं यशो वर्च्च आज्य स्वर्ण तथाऽमृतम्।
आधारं तेजसा यस्मादतः शान्तिं प्रयच्छ मे ॥
मन्त्रेणानेन विप्राय सर्वरोगोपशान्तये।
पात्रं सुवर्णसहितं दद्यात्संकल्पपूर्वकम् ॥

॥ अथकुष्ठरोगोपशमनविधानम् ॥

तत्र जन्तुघातकः कुष्ठरोगी वस्त्रहारी श्वेतकुष्ठी भवति सांतपनं कुर्य्यात्। तदुक्तम् (महार्णवे)-

''यो नरो हन्ति वै जन्तून्कुष्ठरोगी भवतु सः। स च सांतपनं कुर्याद्भगवानाह शंकरः''। इति॥

अन्यायदंण्डकारी च मुखकृष्णो भवति। असौ कृच्छ्रातिकृच्छ्रचांद्रायणं कुर्य्यात्। क्षुद्रप्राणिहिंसको विवर्णमुखः स चांद्रायणमतिकृच्छ्रं च कृत्वा राजतवृषभदानं कुर्य्यात्। ब्रह्महा नरकस्यांते पाण्डुकुष्ठी प्रजायते। प्रायश्चित्तं प्रकुर्वीत यथोक्तमृषिभाषितम्।

(महाभारते) हिरण्यं रक्तवासांसि पञ्चाशद्विप्रभोजनम्। सहस्त्रकलशस्नानं तस्य रोगोपशांतये। इति अत्र सहस्त्रकलशस्नानं शालग्रामोपरिकार्यम्। पुरुषसूक्तं सहस्त्रनामस्तोत्रम्। उद्यन्नद्येत्यृचो जपेत्प्रत्यष्टोत्तरायुतं चरुघृताभ्यां जुहुयात्। अथवा सूर्याराधनम्। आदित्य हृदयजपं महाभारतश्रवणं च कुर्य्यात्।

॥ ग्रहबाधा, ज्वर नाशक विघ्नेश मंत्र ॥

ॐ नमो गणपतये महावीर! दशभुज! मदनकाल विनाशन! मृत्युं हन हन धम धम मथ मथ कालं संहर संहर, सर्वग्रहांश्चूर्णय चूर्णय नागान् मोटय मोटय रुद्ररूप त्रिभुवनेश्वर सर्वतोमुख! हुं फट् स्वाहा॥

॥ अथ ज्वरशमन प्रयोगाः ॥

ज्वर के कई प्रकार पौराणिक ग्रन्थों में आये हैं। ज्वर, महाज्वर, तृतीयाहिक ज्वर, चातुर्थिकज्वर, ब्रह्मज्वर, विष्णुज्वर, रुद्रज्वर, माहेश्वरज्वर, शीतज्वर, तीक्ष्णज्वर, दारुणज्वर, इत्यादि के प्रकोप शमन हेतु शिवरुद्रानुष्ठान, अपामार्जन प्रयोग, जातवेद दुर्गा मन्त्र प्रयोग प्रचलित है। बाणासुर वध के अन्तर्गत शिव कृष्ण युद्ध में ज्वर शान्ति स्तोत्र है उसका पाठ करना भी ठीक है।

जातवेद दुर्गामन्त्र–

ॐ जातवेदसे सुनवा सोममरातीयतो निदहातिवेदः ।
सनः पर्षदति दुर्गाणि विश्वानावेवसिंधुं दुरितात्यग्निः ॥

विनियोगः - ॐ जातवेदसः इति मन्त्रस्य मारीचः काश्यप ऋषिः।

त्रिष्टुप्छन्दः। जातवेदोग्निदुर्गा देवता। रोगशमने विनियोगः।

ऋषिन्यासः – ॐ मारीचकाश्यपऋषये नमः शिरसि। त्रिष्टुप् छन्दसे नमः मुखे। ॐ जातवेदोग्निदुर्गादेवताभ्यां नमः हृदये। विनियोगाय नमः सर्वाङ्गे।

करन्यासः – ॐ जातवेदसेसुनवाम अंगुष्ठाभ्यां नमः। ॐ सोममरातीयतो तर्जनीभ्यां नमः। निदहाति वेदः मध्यमाभ्यां नमः। सनः पर्षदति अनामिकाभ्यां नमः। दुर्गाणिविश्वानावेव कनिष्ठिकाभ्यां नमः। सिन्धुं दुरितात्यग्निः करतलकरपृष्ठाभ्यां नमः।

इसी तरह हृदयादि षडङ्गन्यास करें।

मंत्रवर्णसहस्राणि (४४०००) जपेन्मन्त्रं विशालधीः।

तदंते तिलसिद्धार्थ चित्रमूलेः समिद्वैरः।
क्षीरद्रुमाणामाज्येन हविषान्नैघृतान्वितै॥

ज्वरशमन मन्त्रः –

त्रिपाद्भस्म प्रहरणस्त्रिशिराश्च त्रिलोचनः।
स मे प्रीतः सुखं दद्यात्यसर्वामयपतिर्ज्वरः॥

विनियोगः – अस्य श्री ज्वर मन्त्रस्य कालाग्निरुद्र ऋषिः। अनुष्टुप् छन्दः। महादेवो देवता। सकलज्वर शान्त्यर्थे जपे विनियोगः।

ऋष्यादिन्यासः – कालाग्निरुद्र ऋषये नमः शिरसि। अनुष्टुप् छन्दसे नमः मुखे। महादेवो देवता हृदि। विनियोगाय नमः सर्वाङ्गे।

ज्वरगायत्री – ॐ भस्मायुधाय विद्महे ऐं क्रीं एकदंष्ट्राय धीमहि। तन्नो ज्वरः प्रचोदयात्।

॥ अथ ज्वरहरण अपामार्जन स्तोत्रम् ॥

(सर्वरोगप्रशमनार्थे)

पद्मपुराण में उत्तरखण्ड में शिव पार्वती संवाद अन्तर्गत दालभ्य द्वारा पुलस्त्य ऋषि से पूछने पर बताये गये विष्णु अपामार्जन स्तोत्र का वर्णन है।

स्तोत्र में श्लोक १ से १६ तक ज्ञानखण्ड है। श्लोक १७ से श्लोक २९ तक विष्णुन्यास है मन्त्र बोलते हुये उक्त अंगों में न्यास करें।

नमः श्री परमार्थाय से वामनं च सुखप्रदम् इन नामों का स्मरण कर ॐ

विष्णवे नमः से सर्वाङ्ग न्यास करें। ३५ वें श्लोक में **ॐ निष्कल्मषाय** से स्तोत्र प्रारंभ होगा जो ८८ श्लोक तक है। बार बार पाठ करने पर ३५ से ८८ श्लोक की ही आवृत्तियाँ करनी चाहिये। ८९ से १०७ श्लोक महात्म्य खण्ड के है इन्हें उत्तरार्ध में पढ़ें।

पाठ करते समय कुशा के द्वारा जल अभिमन्त्रित करते रहे उत्तरार्ध में स्तोत्र मन्त्रों से रोगी का मार्जन करें।

॥ महादेव उवाच ॥

अथातः संप्रवक्ष्यामि अपामार्जनमुत्तमम् ।
पुलस्त्येन यथोक्तं तु दालभ्याय महात्मने ॥१॥
सर्वेषां रोगदोषाणां नाशनं मङ्गलप्रदम् ।
तत्तेहं तु प्रवक्ष्यामि शृणु त्वं नगनंदिनि ॥२॥

॥ श्रीदालभ्यउवाच ॥

भगवन्प्राणिनः सर्वे विषरोगाद्युपद्रवैः ।
कुष्ठग्रहाभिभूताश्च सर्वकाले ह्यपद्रुताः ॥३॥
अभिचारिक कृत्याद्या बहुरोगाश्च दारुणाः ।
न भवंति मुनिश्रेष्ठ तन्मे त्वं वक्तुमर्हसि ॥४॥

॥ पुलस्त्य उवाच ॥

व्रतोपवासनियमैर्विष्णुर्वै तोषितस्तु यैः ।
ते नरा नैव रोगार्ता जायन्ते मुनिसत्तम ॥५॥
यैर्न कृतं व्रतं पुण्यं न दानं न तपस्तदा ।
न तीर्थे देवपूजा च नान्नं दत्तं तु भूरिशः ॥६॥
ते वै लोकास्तदा ज्ञेया रोगदोषैः प्रपीड़िताः ।
आरोग्यं परमामृद्धिं मनसा यद्यदिच्छति ॥७॥
तत्तदाप्नोत्य संदिग्धं विष्णोः सेवी विशेषतः ।
नाधिं प्राप्नोति न व्याधिं न विषग्रहबन्धनम् ॥८॥
कृत्यास्पर्शभयं नापि तोषिते मधुसूदने ।
समस्तदोषनाशश्च सर्वदा च शुभा ग्रहाः ॥९॥
देवानामप्यधृष्योऽसो तोषिते च जनार्दने ।
यः सर्वेषु च भूतेषु यथात्मनि तथा परे ॥१०॥

उपवासादिना तेन तोषितो मधुसूदनः ।
तोषिते तत्र जायन्ते नराः पूर्णमनोरथाः ॥११॥
अरोगाः सुखिनो भोग भोक्तारो मुनिसत्तम ।
तेषां च शत्रवो नैव न च रोगाभिचारिकम् ॥१२॥
ग्रहरोगादिकं चैव पापकार्यं न जायते ।
अव्याहतानि कृष्णस्य चक्रादीन्यायुधानि वै ॥१३॥
रक्षंति सकलापद्भ्यो येन विष्णुरुपासितः ।

॥ श्रीदालभ्यउवाच ॥

अनाराधितगोविन्दा ये नरा दुःखभागिनः ।
तेषां दुखाभिभूतानां यत्कर्तव्यं दयालुभिः ॥१४॥
पश्यद्भिः सर्वभूतस्थं वासुदेवं सनातनम् ।
समदृष्टिभिरप्यत्र तन्मे ब्रूहि विशेषतः ॥१५॥

॥ श्रीपुलस्त्य उवाच ॥

तद्वक्ष्यामि मुनिश्रेष्ठ समाहितमनाः शृणु ।
रोगदोषाशुभ हरं विज्वरादिविनाशनम् ॥१६॥

॥ अथविष्णुन्यासः ॥

शिखायां श्रीधरं न्यस्य शखाधः श्रीकरं तथा ।
हृषीकेशं तु केशेषु मूर्ध्नि नारायणं परम् ॥१७॥
ऊर्ध्वश्रोत्रे न्यसेद्विष्णुं ललाटे जलशायिनम् ।
विभुं वै भ्रूयुगे न्यस्य भ्रूमध्ये हरिमेव च ॥१८॥
नरसिंहं नासिकाग्रे कर्णयोरर्णवेशयम् ।
चक्षुषोः पुण्डरीकाक्षं तदधो भूधरं न्यसेत् ॥१९॥
कपोलयोः कल्किनाथं वामनं कर्णमूलयोः ।
शङ्खिनं शङ्खयोर्न्यस्य गोविन्दं वदने तथा ॥२०॥
मुकुन्दं दन्तपङ्क्तौ तु जिह्वायां वाक्पतिं तथा ।
रामं हनौ तु विन्यस्य कंठे वैकुण्ठमेव च ॥२१॥
बलघ्नं बाहुमूलाधश्चांसयोः कंसघातिनम् ।
अजं भुजद्वये न्यस्य शार्ङ्गपाणिं करद्वये ॥२२॥

संकर्षणं कराङ्गुष्ठे गोपमंगुलिपंक्तिषु ।
वक्षस्यधोक्षजं न्यस्य श्रीवत्सं तस्य मध्यतः ॥२३॥
स्तनयोस्त्वनिरुद्धं च दामोदरमथोदरे ।
पद्मनाभं तथा नाभौ नाभ्यधश्चापि केशवम् ॥२४॥
मेढ्रे धराधरं देवं गुदे चैव गदाग्रजम् ।
पीताम्बरधरं कट्यामूरुयुग्मे मधोर्द्विषम् ॥२५॥
मुरद्विषं पिण्डिकयोर्जानुयुग्मे जनार्दनम् ।
फणीशं गुल्फयोर्न्यस्य पादयोश्च त्रिविक्रमम् ॥२६॥
पादांगुष्ठे श्रीपतिं च पादाधो धरणीधरम् ।
रोमकूपेषु सर्वेषु विष्वक्सेनं न्यसेद्बुधः ॥२७॥
मत्स्यं मांसे तु विन्यस्य कूर्मं मेदसि विन्यसेत् ।
वाराहं तु वसामध्ये सर्वास्थिषु तथाच्युतम् ॥२८॥
द्विजप्रियं तु मज्जायां शुक्रे श्वेतपतिं तथा ।
सर्वाङ्गे यज्ञपुरुषं परमात्मानमात्मनि ॥२९॥

॥ मार्जन प्रयोग विधानम् ॥

एवं न्यासविधिं कृत्वा साक्षान्नारायणो भवेत् ।
यावन्न व्याहरेत्किंचित्तावद्विष्णुमयः स्थितः ॥३०॥
गृहीत्वा तु समूलाग्रान्कुशाञ्शुद्धान्समाहितः ।
मार्जयेत्सर्वगात्राणि कुशाग्रैरिह शान्तिकृत् ॥३१॥
विष्णुभक्तो विशेषेण रोगग्रहविषार्दिते ।
विषार्तानां रोगिणां च कुर्याच्छांतिमिमां शुभाम् ।
जायते तेन भो विप्र सर्वरोगप्रणाशनम् ॥३२॥

निम्न नामों का स्मरण कर ॐ विष्णवे नमः से सर्वाङ्ग न्यास करें –

नमः श्री परमार्थाय पुरुषाय महात्मने ।
अरूप बहुरूपाय व्यापिने परमात्मने ॥३३॥
वाराहं नारसिंहं च वामनं च सुखप्रदम् ।
ध्यात्वा कृत्वा नमो विष्णोर्नामान्यंगेषु विन्यसेत् ॥३४॥

॥ अथ स्तोत्रम् ॥

ॐ निष्कल्मषाय शुद्धाय व्याधिपापहराय वै ।
गोविन्दपद्मनाभाय वासुदेवाय भूभृते ॥३५॥
नमस्कृत्वा प्रवक्ष्यामि यत्तत्सिध्यतु मे वचः ।
त्रिविक्रमाय रामाय वैकुण्ठाय नराय च ॥३६॥
श्रीवाराहनृसिंहाय वामनाय महात्मने ।
हयग्रीवाय शुभ्राय हृषीकेश हराशुभम् ॥३७॥
परोपतामहितं प्रमुक्तं चाभिचारिकम् ।
गरस्पर्शमहारोगप्रयोगं जरया जर ॥३८॥
नमोस्तु वासुदेवाय नमः कृष्णाय खड्गिने ।
नमः पुष्करनेत्राय केशवायादिचक्रिणे ॥३९॥
नमः किंजल्कवर्णाग्रयपीतनिर्मलवाससे ।
महादेववपुष्कंधधृतचक्राय चक्रिणे ॥४०॥
दंष्ट्रोद्धृतक्षितितल त्रिमूर्तिपतये नमः ।
महायज्ञवराहाय श्रीवल्लभ नमोस्तु ते ॥४१॥
तप्तहाटक केशांत ज्वलत्पावकलोचन ।
वज्राधिक नखस्पर्शदिव्यसिंह नमोस्तु ते ॥४२॥
कश्यपायातिह्रस्वाय ऋग्यजुःसामलक्षणः ।
तुभ्यं वामनरूपाय क्रमते गां नमोनमः ॥४३॥
वाराहाशेषदुःखानि सर्वपापफलानि च ।
मर्द्दमर्द्द महादंष्ट्र मर्दमर्द च तत्फलम् ॥४४॥
नृसिंह कुलिशस्पर्शदंतप्रांत नखोज्ज्वल ।
भंजभंज निनादेन दुःखान्यस्यार्त्तिनाशन ॥४५॥
ऋग्यजुः सामभिर्वाग्भिः कामरूपधराद्रिधृक् ।
प्रशमं सर्वदुखानि नय त्वस्य जनार्दन ॥४६॥
ऐकाहिकं द्वाहिकं च तथा त्रिदिवसज्वरम् ।
चातुर्थिकं तथात्युग्रं तथा वै सततज्वरम् ॥४७॥
दोषोत्थं सन्निपातोत्थ तथैवाङ्गतुकज्वरम् ।
शमं नयतु गोविन्दो भित्त्वा छित्त्वास्य वेदनाम् ॥४८॥

नेत्रदुःखं शिरोदुःखं दुःखं तूदरसंभवम् ।
अनुच्छ्वासं महाश्वासं परितापं सवेपथुम् ॥४९॥
गुदघ्राणांघ्रिरोगांश्च कुष्ठरोगं तथा क्षयम् ।
कामलादींस्तथा रोगान्प्रमेहादींश्च दारुणान् ॥५०॥
ये वातप्रभवा रोगा लूताविस्फोटकादयः ।
ते सर्वे विलयं यान्तु वासुदेवापमार्जिताः ॥५१॥
विलयं यांति ते सर्वे विष्णोरुच्चारणेन वा ।
क्षयं गच्छंतु चाशेषास्ते चक्राभिहता हरेः ॥५२॥
अच्युतानंतगोविन्दनामोचारण - भेषजात् ।
नश्यति सकला रोगाः सत्यं सत्यं वदाम्यहम् ॥५३॥
स्थावरं जंगमं यच्च कृत्रिमं चापि यद्विषम् ।
दंतोद्भवं नखोद्भूतमाकाशप्रभव च यत् ॥५४॥
भूतादिप्रभवं यच्च विषमत्यंतदुःसहम् ।
शमंमयतु तत्सर्वे कीर्तितोस्य जनार्द्दनः ॥५५॥
ग्रहान्प्रेतग्रहांश्चैव तथान्याञ्छाकिनीग्रहान् ।
मुखमण्डलिकान् क्रूरान् रेवतीं वृद्धिरेवतीम् ॥५६॥
वृद्धिकाख्यान्ग्रहांश्चोग्रांस्तथा मातृग्रहानपि ।
बालस्य विष्णोश्चरितं हंतुं बालग्रहानपि ॥५७॥
वृद्धानां ये ग्रहा केचिद्-बालानां चापि ये ग्रहाः ।
नृसिंहदर्शनादेव नश्यंते तत्क्षणादपि ॥५८॥
दंष्ट्राकरालवदनो नृसिंहो दैत्यभीषणः ।
तं दृष्ट्वा ते ग्रहाः सर्वे दूरं यांति विशेषतः ॥५९॥
श्रीनृसिंह महासिंह ज्वालामालोज्ज्वलानन ।
ग्रहानशेषान्सर्वेश नुद स्वास्यविलोचन ॥६०॥
ये रोगा ये महोत्पाता ये द्विषो ये महाग्रहाः ।
यानि च क्रूरभूतानि ग्रहपीडाश्च दारुणाः ॥६१॥
शस्त्रक्षतेषु ये रोगा ज्वालगर्दभिकादयः ।
विस्फोटकादयो ये च ग्रहा गात्रेषु संस्थिताः ॥६२॥

त्रैलोक्यरक्षाकर्त्तस्त्वं दुष्टदानववारण ।
सुदर्शनमहातेजश्छिंधि छिंधि महाज्वरम् ॥६३॥
छिन्धि वातं च लूतां च छिंधि घोरं महाविषम् ।
उद्दंडामरशूलं च विषज्वालासगर्दभम् ॥६४॥
ॐ ह्लां ह्लां ह्लूं ह्लूं प्रधारेण कुठारेण हन द्विषः ।
ॐ नमो भगवते सुदर्शनाय दुःखदारण विग्रह ॥६५॥
यानि चान्यानि दुष्टानि प्राणिपीडाकराणि वै ।
तानि सर्वाणि सर्वात्मा परमात्मा जनार्दनः ॥६६॥
किंचिद्रूपं समास्थाय वासुदेव नमोस्तु ते ।
क्षिप्त्वा सुदर्शनं चक्रं ज्वालामालाविभीषणम् ॥६७॥
सर्वदुष्टो पशमनं कुरु देववराच्युत ।
सुदर्शन महाचक्र गोविन्दस्य वरायुध ॥६८॥
तीक्ष्णधार महावेग सूर्यकोटिसमद्युते ।
सुदर्शन महाज्वाल छिंधि छिंधि महारव ॥६९॥
सर्वदुःखानि रक्षांसि पापानि च विभीषण ।
दुरितं हन चारोग्यं कुरु त्वं भो सुदर्शन ॥७०॥
प्राच्यां चैव प्रतीच्यां च दक्षिणोत्तरतस्तथा ।
रक्षां करोतु विश्वात्मा नरसिंहः स्वगर्जितैः ॥७१॥
भूम्यंतरिक्षे च तथा पृष्ठतः पार्श्वतोग्रतः ।
रक्षां करोतु भगवान् बहुरूपी जनार्दनः ॥७२॥
यथा विष्णु मयं सर्वं सदेवासुरमानुषम् ।
तेन सत्येन सकलं दुःखमस्य प्रणश्यतु ॥७३॥
यथा योगेश्वरो विष्णुः सर्ववेदेषु गीयते ।
तेन सत्येन सकलं दुःखमस्य प्रणश्यतु ॥७४॥
परमात्मा यथा विष्णुर्वेदांगेषु च गीयते ।
तेन सत्येन विश्वात्मा सुखदोऽस्त्वस्य केशवः ॥७५॥
शान्तिरस्तु शिवं चास्तु प्रणाशं यातु चासुखम् ।
वासुदेवशरीरोत्थैः कुशैः संमार्जितं मया ॥७६॥

अपामार्जित गोविन्द नमो नारायणस्तथा ।
तथापि सर्वदुःखानां प्रशमो वचनाद्धरेः ॥७७॥
शान्ताः समस्तदोषास्ते ग्रहाः सर्वे विषाणि च ।
भूतानि च प्रशाम्यंति संस्मृते मधुसूदने ॥७८॥
एते कुशा विष्णुशरीरसंभवा जनार्दनोऽहं स्वयमेव चाग्रतः ।
हतं मया दुःखमशेषमस्य वै स्वस्थो भवत्वेष वचो यथा हरेः ॥७९॥
शांतिरस्तु शिवं चास्तु दुःखं च यत् प्रणश्यतु ।
यदस्य दुरितं किंचित्क्षिप्तं तल्लवणांभसि ॥८०॥
स्वास्थ्यमस्य सदैवास्तु हृषीकेशस्य कीर्त्तनात् ।
यद्योतोत्रागतं पापं तत्तु तत्र प्रगच्छतु ॥८१॥
एतद्रोगेषु पीडासु जंतूनां हितमिच्छुभिः ।
विष्णुभक्तैश्च कर्तव्यमपामार्जनकं परम् ॥८२॥
अनेक सर्वदुःखानि विलयं यांत्यशेषतः ।
सर्वपापविशुद्ध्यर्थं विष्णोश्चैवापमार्जनम् ॥८३॥
आर्द्रंशुष्कं लघु स्थूलं ब्रह्महत्यादिकं तु यत् ।
तत्सर्वं नश्यते तूर्णं तमोवद्र विदर्शनात् ॥८४॥
नश्यंति रोगदोषाश्च सिंहात्क्षुद्रमृगा यथा ।
ग्रहभूतपिशाचादिः श्रवणादेव नश्यतु ॥८५॥
द्रव्यार्थं लोभपरमैर्न कर्तव्यं कदाचन ।
कृतेऽपामार्जने किंचिन्न ग्राह्यं हितकाम्यया ॥८६॥
निरपेक्षैः प्रकर्तव्यमादिमध्यांतबोधकैः ।
विष्णुभक्तैः सदाशांतैरन्यथा सिद्धिदं भवेत् ॥८७॥
अतुलेयं नृणां सिद्धिरियं रक्षा परा नृणाम् ।
भेषजं परमं ह्येतद्विष्णोर्यदपमार्जनम् ॥८८॥

॥ महात्म्य ॥

उक्तं हि ब्रह्मणा पूर्वं पुलस्त्याय सुताय वै ।
एतत्पुलस्त्यो हि मुनिर्दालभ्यायोक्तवान्स्वयम् ॥८९॥
सर्वभूतहितार्थाय दालभ्येन प्रकाशितम् ।
त्रैलोक्ये तदिदं विष्णोः समासं चापमार्जनम् ॥९०॥

तवाग्रे कथितं देवि यतो भक्तासि मे सदा ।
श्रुत्वा तुसर्वे भक्त्या च रोगान्दोषान्व्यपोहति ॥९१॥

॥ महादेव उवाच ॥

अपामार्जनकं दिव्यं परमाद्भुतमेव च ।
पठितव्यं विशेषेण पुत्रकामार्थसिद्धये ॥९२॥
एतत्स्तोत्रं पठेत्प्राज्ञः सर्वकामार्थ सिद्धये ।
एककालं द्विकालं वा ये पठंति द्विजातयः ॥९३॥
आयुश्च श्रीर्बलं तस्य वर्द्धयंति दिने दिने ।
ब्राह्मणो लभते विद्यां क्षत्रियो राज्यमेव वा ॥९४॥
वैश्यो धनसमृद्धिं च शूद्रो भक्तिं च विन्दति ।
अन्यैश्च लभ्यते भक्तिः पठनाच्छ्रवणाज्जपात् ॥९५॥
सामवेदफलं तस्य जायते नगनन्दिनि ।
अखिलं पापसंघातं तत्क्षणादेव नश्यति ॥९६॥
इति ज्ञात्वा तु भो देवि पठितव्यं समाहितैः ।
पुत्राश्चैव तथा लक्ष्मीः संपूर्णा भवति ध्रुवम् ॥९७॥
लिखित्वा भूर्जपत्रे तु यो धारयति वैष्णवः ।
इहलोके सुखं भुक्त्वा याति विष्णोः परं पदम् ॥९८॥
पठित्वा श्लोकमेकं तु तुलसीं यः समर्पयेत् ।
सर्वं तीर्थं कृतं तेन तुलस्या पूजने कृते ॥९९॥
एतत्स्तोत्रं तु परमं वैष्णवं मुक्तिदायकम् ।
पृथ्वीदानसमं पाठाद्विष्णुलोकं तु गच्छति ॥१००॥
जपेत्स्तोत्रं विशेषेण विष्णुलोकस्य वांछया ।
बालानां जीवनार्थाय पठितव्यं समाहितैः ॥१०१॥
रोगग्रहाभिभूतानां बालानां शान्तिकारकम् ।
भूतग्रहविषं चैव पठनादेव नश्यति ॥१०२॥
कंठे तुलसिजां मालां धृत्वा विप्रो हि यः पठेत् ।
स च वै वैष्णवो ज्ञेयो विष्णुलोकं स गच्छति ॥१०३॥
कंठे माला धृता येन शङ्खचक्रादिचिह्नितः ।
वैष्णवः प्रोच्यते विप्रः स्तोत्रं चैतत्पठन्सदा ॥१०४॥

इमं लोकं परित्यज्य विष्णुलोकं स गच्छति ।
मोहमायापरित्यक्तो दम्भ तृष्णाविवर्जितः ॥१०५॥
एतत्स्तोत्रं पठेद्दिव्यं परं निर्वाणमाप्नुयात् ।
ते धन्याः संति भूर्लोके ये विप्रा वैष्णवाः स्मृताः ॥१०६॥
स्वात्मा वै तारितस्तैस्तु सकुलो नात्र संशयः ।
ते वै धन्यतमा लोके नारायणपरायणाः ॥१०७॥
तैर्भक्तिश्च सदा कार्या ते वै भागवता नराः ।

इति श्रीपाद्मे महापुराणे उत्तरखण्डे शिवपार्वती संवादे अपामार्जनस्तोत्रं सम्पूर्णम् ॥

॥ रोगी बचेगा या नहीं ॥

किसी रोगी के बचने या न बचने की परीक्षा करनी हो तो उड़द की दाल की पिठीका चौकोना बड़ा भल्ला बनाकर सरसों के तेल में तलकर उस पर स्याही से **ॐ ह्रीं** लिखकर रोगी के सिरहाने रात्रि में रख देवें तो प्रातः उस बड़े को देखे यदि मन्त्र लिखा बड़ा हो तो रोगी बचेगा और मन्त्र मिटा मिले तो रोगी नहीं बचेगा ऐसा निश्चय जाने।

॥ रक्षा मन्त्र ॥

ॐ तारा तारा गारुड मन्त्र विस्से खाय ब्राह्मण कंपन नागे डोल, चल विस्से हमारा बोल॥

किसी ने जादू टोना अभिचार चलाया हो तो इस मन्त्र से उस व्यक्ति को मोर पंख या लोहे के चीमटे से झाड़े तो आराम होगा। यह पहाड़ी गद्दी लोगों का सिद्ध मन्त्र है।

॥ सर्व कष्टहर मन्त्र ॥

जब संकट के समय विवेक काम नहीं दे तो मुक्ति के लिये इस मन्त्र का जप करें। सिद्ध के लिये सूर्य, चन्द्र ग्रहण के समय **गायत्री मन्त्र से संपुटित कर** कम से कम एक माला जप करें।

मन्त्र –

ॐ महेशाय त्रिनेत्राय नमस्ते शूलपाणये ।
प्रणतः क्लेशनाशाय महादेवाय ते नमः ॥

वैष्णवों के लिये –

ॐ कृष्णाय वासुदेवाय हरये परमात्मने
प्रणतः क्लेशनाशाय गोविन्दाय नमो नमः ॥

॥ अथ व्याधिप्रतिरूप दान विधानम् ॥

(काल एवं मृत्यु के मंत्र शरभ तंत्र में देखें)

दुर्गासप्तशति में रहस्य त्रय में लिखा है कि – **कालमृत्यु तौ संपूज्यौ सर्वारिष्टप्रशांतये।**

परन्तु कालमृत्यु का आवाहन पूजन के बाद उनका विसर्जन करें या विसर्जन की भावना करें कि कालमृत्यु प्रसन्न होकर हमारे समस्त रोग व्याधि अनिष्टों को लेकर हमारे घर से विदा हो गये हैं। कालमृत्यु की स्वर्ण की प्रतिमा बनाकर चावलों पर रखें उनकी पूजा करें।

ॐ कालाय नमः, ॐ मृतवे नमः, ॐ रोगाय नमः, ॐ व्याधवे नमः।

गंधादि से पूजन कर वस्त्र अलंकार समर्पण कर उन्हे विप्र को दान करें – रोगी पुनः उसका मुँह नहीं देखे।

मन्त्रः –

ये मां रोगाः प्रबाधन्ते देहस्थाः सततं मम ।
गृह्णीष्व प्रतिरूपेण तान्–रोगान्द्विजसत्तम ॥१॥
बाढमित्येव तद्रूपं गृह्णीयाद्–ब्राह्मणस्तदा ।
ततो रोगप्रदातासौ दीर्घमायुः प्रपद्यते ॥२॥
तण्डुलानां तु यत्पात्रं मुख्यं तत्कांस्य संभवम् ।
दत्त्वा दानं तु तत्काले द्विजास्यं नावलोकयेत् ॥३॥

॥ सर्वारिष्टनिवारण स्तोत्रम् ॥

ॐ गं गणपतये नमः। सर्व-विघ्न विनाशनाय, सर्वारिष्टनिवारणाय, सर्वसौख्यप्रदाय, बालानां बुद्धिप्रदाय, नानाप्रकार धन वाहन भूमिप्रदाय, मनोवाञ्छित फलप्रदाय रक्षां कुरु कुरु स्वाहा।

ॐ गुरवे नमः, ॐ श्रीकृष्णाय नमः, ॐबलभद्राय नमः, ॐ श्रीरामाय नमः, ॐ हनुमते नमः, ॐ शिवाय नमः, ॐ जगन्नाथाय नमः, ॐ

बदरीनारायणाय नमः, ॐ श्रीदुर्गादेव्यै नमः ॥

ॐ सूर्याय नमः, ॐ चन्द्राय नमः, ॐभौमाय नमः, ॐ बुधाय नमः, ॐ गुरवे नमः, ॐ भृगवे नमः, ॐ शनिश्चराय नमः, ॐ राहवे नमः, ॐ पुच्छानयकाय नमः, ॐ नवग्रह! रक्षां कुरु कुरु नमः ॥

ॐ मन्येवरं हरिहरादय एव दृष्ट्वा द्रष्टेषु येषु हृदयस्थं त्वयं तोषमेति विविक्षते न भवता भुवि येन नान्य कश्चिन्मनो हरति नाथ भवान्तरेऽपि। ॐ नमो मणिभद्रे! जयविजयपराजिते! भद्रे! लभ्यं कुरु कुरु स्वाहा ॥

ॐ भूर्भुवः स्वः तत्-सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो योनः प्रचोदयात्। सर्वविघ्नं शान्तं कुरु कुरु स्वाहा।

ॐ ऐं ह्रीं क्लीं श्रीबटुकभैरवाय आपदुद्धारणाय महान्‌श्याम-स्वरूपाय दीर्घारिष्ट विनाशाय नानाप्रकार भोगप्रदाय मम (यजमानस्य वा) सर्वारिष्टं हन हन, पच पच, हर हर, कच कच, राज-द्वारे जयं कुरु कुरु, व्यवहारे लाभं वृद्धिं वृद्धिं, रणे शत्रून् विनाशय विनाशय, पूर्णां आयुः कुरु कुरु, स्त्री-प्राप्तिं कुरु कुरु, हुम् फट् स्वाहा।

ॐ नमो भगवते वासुदेवाय नमः। ॐ नमो भगवते, विश्व-मूर्तये , नारायणाय, श्रीपुरुषोत्तमाय। रक्ष रक्ष, युग्मदधिकं प्रत्यक्षं परोक्षं वा अजीर्णं पच पच, विश्वमूर्तिकान् हन् हन्, ऐकाह्निकं द्वाह्निकं त्राह्निकं चतुरह्निकं ज्वरं नाशय नाशय, चतुरग्निवातान् अष्टादशक्षयान् रोगान्, अष्टादशकुष्ठान् हन् हन्, सर्वदोषं भञ्जय-भञ्जय, तत्सर्व नाशय-नाशय, शोषय-शोषय, आकर्षय-आकर्षय, मम शत्रुं मारय-मारय, उच्चाटय-उच्चाटय, विद्वेषय-विद्वेषय, स्तंभय-स्तंभय, निवारय-निवारय, विघ्नं हन-हन, दह-दह, पच-पच, मथ-मथ, विध्वंसय-विध्वंसय, विद्रावय-विद्रावय, चक्रं गृहीत्वा शीघ्रमागच्छागच्छ, चक्रेण हन हन, पर-विद्यां छेदय-छेदय, चौरासी-चेटकान् विस्फोटान् नाशय नाशय, वात-शुष्क-दृष्टि-सर्प-सिंह-व्याघ्र-द्विपद-चतुष्पद अपरे बाह्यं ताराभिः भव्यन्तरिक्षं अन्यान्य-व्यापि-केचिद् देश-काल-स्थान सर्वान् हन हन, विद्युन्मेघ-नदी-पर्वत, अष्टव्याधि, सर्वस्थानानि, रात्रि-दिनं, चौरान् वशय-वशय, सर्वोपद्रव-नाशनाय, पर-सैन्यं विदारय-विदारय, पर-चक्रं निवारय-निवारय, दह-दह, रक्षां कुरु-कुरु, ॐ नमो भगवते, ॐ नमो नारायणाय, हुं फट् स्वाहा।

ठः ठः ॐ ह्रीं ह्रीं। ॐ ह्रीं क्लीं भुवनेश्वर्याः श्रीं ॐभैरवाय नमः। हरि ॐ

उच्छिष्ट-देव्यै नमः। डाकिनी-सुमुखी-देव्यै, महा-पिशाचिनी ॐ ऐं ठः ठः। ॐ चक्रिण्या अहं रक्षां कुरु कुरु, सर्वव्याधिहरणीदेव्यै नमो नमः। सर्वप्रकारबाधा शमनमरिष्ट निवारणं कुरु कुरु फट्। श्रीं ॐ कुब्जिका, देव्यै ह्रीं ठः स्वाहा।

शीघ्रमरिष्ट निवारणं कुरु कुरु देवी शाम्बरी क्रीं ठः स्वाहा।

शारिकाभेदा महामाया पूर्णं आयुः कुरु। हेमवती मूलं रक्षा कुरु। चामुण्डायै देव्यै शीघ्रं विघ्नं सर्वं वायु कफ पित्त रक्षां कुरु। मंत्र तंत्र यंत्र कवच ग्रहपीड़ा नडतर, पूर्वजन्मदोष नडतर, यस्य जन्मदोष नडतर, मातृदोष नडतर, पितृदोष नडतर, मारण-मोहन-उच्चाटन-वशीकरण-स्तंभन-उन्मूलनं भूत-प्रेत-पिशाच-जात-जादू-टोना-शमनं कुरु। सन्ति सरस्वत्यै कण्ठिका-देव्यै-गल-विस्फोटकायै विक्षिप्त-शमनं महान्-ज्वर-क्षयं कुरु स्वाहा ।

सर्वसामग्री भोगं सप्तदिवसं देहि-देहि, रक्षां कुरु, क्षण-क्षण, अरिष्ट निवारणं, दिवस-प्रति-दिवस दुःखहरणं मङ्गलकरणं कार्यसिद्धिं कुरु कुरु। हरि ॐ श्रीरामचन्द्राय नमः हरि ॐ भूर्भुवः स्वः चन्द्र-तारा-नवग्रह-शेष-नाग-पृथ्वी-देव्यै आकाशस्य सर्वारिष्ट निवारणं कुरु कुरु स्वाहा।

१.ॐ ऐं ह्रीं श्रीं बटुकभैरवाय आपदुद्धारणाय सर्वविघ्न निवारणाय मम रक्षां कुरु कुरु स्वाहा।

२. ॐ ऐं ह्रीं क्लीं श्रीवासुदेवाय नमः, बटुकभैरवाय आपदुद्धारणाय मम रक्षां कुरु कुरु स्वाहा।

३. ॐ ऐं ह्रीं क्लीं श्रीविष्णु भगवान् मम अपराधक्षमा कुरु कुरु,सर्वविघ्नं विनाशाय मम कामना पूर्णं कुरु कुरु स्वाहा।

४. ॐ ऐं ह्रीं क्लीं श्रीबटुक-भैरवाय आपदुद्धारणाय सर्वविघ्न निवारणाय मम रक्षां कुरु कुरु स्वाहा।

५. ॐ ऐं ह्रीं क्लीं श्रीं ॐ श्रीदुर्गादेवी रुद्राणीसहिता, रुद्रदेवता कालभैरव सह, बटुकभैरवाय, हनुमान सह मकरध्वजाय,आपदुद्धारणाय मम सर्वदोष क्षमाय कुरु कुरु सकल विघ्न-विनाशाय मम शुभमांगलिक कार्य सिद्धिं कुरु कुरु स्वाहा।

एष विद्यामाहात्म्यं च, पुरा मया प्रोक्तं ध्रुवं।
शतक्रतो तु हन्त्येतान् , सर्वांश्च बलिदानवाः ॥१॥

य पुमान् पठते नित्यं, एतत् स्तोत्रं नित्यात्मना ।
तस्य सर्वान् हि सन्ति, यत्र दृष्टिगतंविषं ॥२॥
अन्य दृष्टि-विषं चैव, न देयं संक्रमे ध्रुवम् ।
संग्रामे धारयेत्यम्बे, उत्पाता च विसंशयः ॥३॥
सौभाग्यं जायते तस्य, परमं नात्र संशयः ।
द्रुतं सद्यं जयस्तस्य, विघ्नस्तस्य न जायते ॥४॥
किमत्र बहुनोक्तेन, सर्वसौभाग्य सम्पदा ।
लभते नात्र सन्देहो, नान्यथा वचनं भवेत् ॥५॥
ग्रहीतो यदि वा यत्नं, बालानां विविधैरपि ।
शीतं समुष्णतां याति, उष्णः शीतमयो भवेत् ॥६॥
नान्यथा श्रुतये विद्या, पठति कथितं मया ।
भोज-पत्रे लिखेद् यंत्र, गोरोचनमयेन च ॥७॥
इमां विद्यां शिरो बध्वा, सर्वरक्षाकरोतु मे ।
पुरुषस्याथवा नारी, हस्ते बध्वा विचक्षणः ॥८॥
विद्रवन्ति प्रणश्यन्ति, धर्मस्तिष्ठति नित्यशः ।
सर्वशत्रुरधो यान्ति, शीघ्रं ते च पलायनम् ॥९॥

''श्रीभृगु-संहिता'' के ''सर्वाष्टि-निवारण-खण्ड'' में इस अनुभूत स्तोत्र के ४० पाठ करने की विधि बताई गई है। इस पाठ के फल स्वरूप पुत्रहीन को पुत्र की प्राप्ति होती है और जिसका विवाह नही होता है उसका विवाह हो जाता है। इसके अतिरिक्त इस स्तोत्र के पाठ के प्रभाव से सभी प्रकार के दोषों- ज्वर, क्षय, कुष्ठ, वात-पित्त-कफ की पीड़ाओं और भूतादिक सभी बाधाओं का निवारण होता है ।

इस स्तोत्र का पाठ यदि स्वयं अपने लिए करना हो तो '**मम**' या '**मम स-कुटुम्बस्य**' शब्द का उच्चारण करे और यदि किसी **अन्य (यजमान)** के लिए पाठ करना हो तो स्तोत्र में जहाँ **यजमान** शब्द लिखा है वहाँ उसके **नाम, गोत्रादि** का उच्चारण करना चाहिये।

किसी भी देवता या देवी की **प्रतिमा या यंत्र** के सामने बैठकर धूप-दीपादि से उसका पूजन कर इस स्तोत्र का पाठ करना चाहिये। विशेष लाभ की इच्छा हो तो **स्वाहा और नमः** का उच्चारण करते हुये **घृत-मिश्रित गुग्गुल** से आहुतियाँ दे

सकते है। ऐसा करने से अभीष्ट कामना की पूर्ति शीघ्र और अवश्य होती है। इसके पाठ से निर्धन को धन और बेरोजगार को जीविका का साधन-नौकरी, व्यापार आदि की सुविधा प्राप्त होती है। यह अनुभूत प्रयोग है।

॥ सर्वग्रह पीड़ा निवारण तांन्त्रिक प्रयोग:॥

आक, धतूरा, अपामार्ग, दूर्वा, वट इन सब की जड़ें, खेजड़ी, आम, गूलर के पत्ते इन सबको एक मिट्टि के बर्त्तन में रखकर दूध, घृत, चावल, चना, मूंग, गेंहू, तिल, गौमूत्र, सरसों, चन्दन, शहद और छाछ उसी पात्र में एकत्र कर शनिवार को सायंकाल के समय पीपल के वृक्ष की जड़ में गड्डा खोदकर गाड़ देवें और उसी समय पीपल के वृक्ष के नीचे या देवालय में जाकर निम्न मन्त्र का सहस्त्र जप करें-

ॐ नमो भगवते भास्कराय अस्माकं सर्व ग्रहाणां पीड़ा नाशनं कुरु कुरु स्वाहा॥

इस मंत्र का दश सहस्त्र जप करे तो ग्रहों का उपद्रव नष्ट हो जाते हैं और महादरिद्रीयोग भी मिट जाते हैं। दत्तात्रेय तंत्र में इस प्रयोग का मूल पाठ लिखा है।

॥ बन्दीमोचन मंत्रप्रयोग:॥

विनियोग:- **ॐ अस्य श्री बन्दीमोचन स्तोत्रमंत्रस्य श्रीकण्व ऋषि:, त्रिष्टुप् छन्द:, श्रीबन्दी देवीदेवता, ह्लीं बीजं, हूं कीलकं, मम बन्दीमोचनार्थे जपे विनियोग:।**

ऋष्यादिन्यास:- **श्रीकण्व ऋषये नम: शिरसि, त्रिष्टुप् छन्दसे नम: मुखे, श्रीबन्दी देवीदेवतायै नम: हृदि, ह्लीं बीजाय नम: गुह्ये, हूं कीलकाय नम: पादयो:, मम बन्दीमोचनार्थे जपे विनियोगाय नम: सर्वाङ्गे।**

मंत्र- ॐ ह्लीं हूं बन्दीदेव्यै नम:। अष्टोत्तरशतं जप:।

**बन्दी देव्यै नमस्कृत्य वरदाभय-शोभिनीम् ।
तदाज्ञां शरणं गच्छत् शीघ्रं मोचं ददातु मे ॥
बन्दी कमल-पत्राक्षी लौहश्रृङ्खला-भञ्जिनीम् ।
प्रसादं कुरु मे देवि! शीघ्रं मोचं ददातु मे ॥
त्वं बन्दी त्वं महामाया त्वं दुर्गा त्वं सरस्वती ।
त्वं देवी रजनी चैव शीघ्रं मोचं ददातु मे ॥**

संसार-तारिणी बन्दी सर्वकामप्रदायिनी ।
सर्वलोकेश्वरी देवि शीघ्रं मोचं ददातु मे ॥
त्वं ह्रीं त्वमीश्वरी देवि ब्रह्माणी ब्रह्मवादिनी ।
त्वं वै कल्पक्षयं कर्त्री शीघ्रं मोचं ददातु मे ॥
देवी धात्री धरित्री च धर्म शास्त्रार्थ-भाषिणी,
दुःश्वासाम्ब-रागिणी देवी शीघ्रं मोचं ददातु मे ॥
नमोऽस्तुते महालक्ष्मी रत्नकुण्डलभूषिता ।
शिवस्यार्धाङ्गिनी चैव शीघ्रं मोचं ददातु मे ॥
नमस्कृत्य महादुर्गां भयात्तु तारिणीं शिवां ।
महादुःखहरां चैव शीघ्रं मोचं ददातु मे ॥
इदं स्तोत्रं महापुण्यं यः पठेन्नित्यमेव च ।
सर्वबन्धविनिर्मुक्तो मोक्षं च लभते क्षणात् ॥

हवन विधि- कमल-गट्टा, गाय का घी, शुद्ध शहद, मिश्री, हल्दी एवं लाल चन्दन के चूर्ण को मिश्रित कर उससे जप संख्या का दशांश हवन करना चाहिए।

॥ सर्पभयनाशक मनसा स्तोत्रम् ॥

जिस स्थान में सर्पभय अधिक रहता है वहाँ पर इस स्तोत्र का पाठ करके निवास करना चाहिये।

ध्यानम्—

चारु-चम्पकवर्णाभां सर्वाङ्गसुमनोहराम् ।
नागेन्द्रवाहिनीं देवीं सर्वविद्याविशारदाम् ॥

॥ श्रीनारायण उवाच ॥

नमः सिद्धिस्वरूपायै वरदायै नमो नमः ।
नमः कश्यपकन्यायै शङ्करायै नमो नमः ।
बालानां रक्षणकर्त्र्यै नागदेव्यै नमो नमः ।
नमः आस्तीकमात्रे ते जरत्काव्यैं नमो नमः ।
तपस्विन्यै च योगिन्यै नागस्वस्त्रे नमो नमः ।
साध्व्यै तपस्यारूपायै शम्भुशिष्ये च ते नमः ॥

॥ फलश्रुति ॥

इति ते कथितं लक्ष्मी! मनसाया स्तवं महत् ।
यः पठति नित्यमिदं, श्रावयेद् वापि भक्तितः ।
न तस्य सर्पभीतिर्वै विषोऽप्यमृतं भवति ।
वंशजानां नागभयं नास्ति श्रवणमात्रतः ॥

॥ सर्प भयनिवारण मन्त्र ॥

ॐ जरले नृसिंह करले दूत कालू कालू नृसिंह बैरी खैंरदारी तुकमाही नहीं बांधे छः बांधे छः हाकूवाल डाकूवाल बड़ेलबडियाल सांप चोर कांटा गज्जा वाघमूल तुकमाही नहीं बांधे छः राम लक्ष्मण सीतामाता हनुमान नृसिंह से परे हंकार।

यह मन्त्र जहाँ सर्प हो या सर्प का भय हो वहाँ तीन-चार बार ऊँचे स्वर में पढ़ने पर सर्प नहीं आ सकेगा। जहाँ तक मंत्र का स्वर जायेगा वहाँ तक उस सीमा में सर्प नहीं आयेगा। यदि कोई सर्प आवाज की सीमा के अन्दर रह जायेगा तो वह अन्धा हो जायेगा। जब वह स्थान छोड़ देवें तो '**बांधे छः बांधे छः**' के स्थान पर '**खोले छः खोले छः**' लगाकर उसी प्रकार तीन बार मन्त्र उच्चारण करें तो सर्पो के आवागमन का मार्ग खुल जायेगा। यह अनुभूत प्रयोग है।

॥ दु:स्वप्न-नाशक प्रयोग ॥

१. विष्णुं नारायणं कृष्णं रामं च श्रीहरिं शिवम् ।
श्रियं लक्ष्मीं राधिकां जानकीं प्रभां च पार्वतीम् ॥
जपन् द्वादश दुःस्वप्नः सत्फलदः प्रजायते ॥

विधि- दु:स्वप्न दिखने पर उक्त बारह नामों का १२ बार स्मरण.करने से दु:स्वप्न शुभ फलदायक हो जाता है।

२. ॐ ह्रीं श्रीं क्लीं दु:ख-हन्त्यै दुर्गायै ते नमः स्वाहा।

विधि- उक्त श्रीदुर्गा मंत्र का दस बार जप करने से दु:स्वप्न भी शुभ फल देते है।

॥ शत्रुनाशक हनुमत् शाबरमन्त्र ॥

ॐ नमो आदेश गुरु को अंजनी बृहमानी तेजवन्ती वृजवन्ती हीया मोड़ संखला तोड़ आओ हनुमन्त वीर बाजंता गाजंता घडघडता अंजनी का पुत्र श्रीराम का बाण सीता सति का जण छेली पलराम की इठ्यासी कालया की

चोसठ जोगणी की हुँकार बाजे मारकर रार दुश्मन गले लगे गीत फंास नारसिंह कालका काल रावण को लागे मेरा हूंकारिया काल सदा फिरे नहीं फिरे तो माता अंजनी का दूध पिया हराम करे, सीता माता की सेज पर पाँव धरे राम के सिर गाम घाले मेरी भक्ति गुरु की शक्ति चलो मन्त्र ईश्वरो वाचः।

रविवार, मंगलवार, शुक्रवार, शनिवार, हनुमानजी के सामने बैठकर साधना करें, खासकर नवरात्रि में त्रिकाल साधना करनी चाहिये। १२१ गोली गुग्गल की होमे। अगर तीन दिन में हनुमानजी दर्शन नहीं देवें तो सिन्दुर मालीपन्ना का होम करना चाहिये। किन्तु स्मरण रहे मालीपन्ना हनुमानजी के वस्त्र हैं अत: इससे वे क्रोधित हो सकते हैं, इस हेतु जप शुरु करने से पहले और पश्चात् चोला चढ़ाना चाहिये। हनुमानजी जब उग्र होते हैं तो श्रीराम का कीर्त्तन करने से शांत हो जाते हैं।

॥ ऋणमुक्ति और लक्ष्मी प्राप्ती प्रयोग ॥

मन्त्रः - ॐ ह्रीं श्रीं क्लीं चिरचिर गणपतिवर वरदेयं मम वांछितार्थ कुरु कुरु स्वाहा।

अंगार की चतुर्थी के दिन नित्यकर्म से निवृत्त हो विधिवत् श्रीगणपति का पूजन कर उपर्युक्त मन्त्र का दश सहस्र जप करें,पश्चात् हवन करें। हवन में गुग्गल डालें १०१ रक्त करबीर पुष्प १०१ लड्डू (चूरमा) ये तीनों वस्तुयें एकत्रित कर उपर्युक्त मन्त्र से १०८ आहुति देवें। पूर्णाहुति सुपारी से देवें। पुन: श्रीगणपति का विधिवत गन्ध पुष्पादि द्वारा पूजन करें और २१ लड्डूओं का नैवेद्य करें। पश्चात् दक्षिणा आरती मन्त्र पुष्पांजलि की प्रणामादि करके लड्डूओं का भोजन करें और शुद्ध आचमन करके उपर्युक्त मन्त्र का पुन: १०८ बार जप करके आसन से उठें। जपारंभ से लेकर अंतिम १०८ बार जप करने तक एक ही आसन पर बैठे रहें तो विशेष लाभप्रद है। हवन में केवल पलाश की समिधा लेना, कार्यारम्भ से अन्त तक घृत दीप प्रज्वलित रहना चाहियें। इस प्रकार तीन पुरश्चरण करने पर लक्ष्मी प्राप्ति, इष्ट सिद्धि धन धान्य वृद्धि अवश्य होती है। ऋणग्रस्त हो तो ऋणमुक्त होवें।

॥ व्यापार व धनप्राप्ति का मन्त्र ॥

ॐ नमो ह्रीं श्रीं क्रीं श्रीं क्लीं क्लीं श्रीं लक्ष्मी मम गृहे धनचिंता दूर करोति स्वाहा।

विधानम् - प्रात:काल बिना किसी से बोले मुँह धोकर १०८ मंत्र बार जप करें तो धनधान्य की वृद्धि हो।

॥ अभिष्ट धनप्राप्ति के लिये ॥

ॐ ह्रीं श्रीं त्रिभुवन स्वामिनि महादेवि महालक्ष्मी ल ल ल ल हं हः महाप्रभुत्वमर्थ कुरु कुरु ह्रीं नमः।

विधानम् – प्रतिदिन पंचोपचार से लक्ष्मी का पूजन कर १०८ बार जप करने से अभीष्ट लाभ होगा। शुभमुहुर्त्त में जप करें अर्द्धरात्रि में जप करें तो ३ मास में इसका चमत्कार प्रत्यक्ष दिखाई देगा।

॥ भाग्योदय यंत्र ॥

इस यंत्र को अष्टगंध से भोजपत्र पर अनार की कलम से लिखकर धूपदीप नैवेद्य लगाकर ताबीज में भर लें दाहिनी भुजा में बांधें।

ऐसे व्यक्ति जिनका भाग्य सो गया हो जो कार्य करे उसी में असफलता मिलती हो तथा जीवन निराशामय हो गया हो उन्हें यह यन्त्र अवश्य धारण करना चाहिये। इससे सभी कार्यों में सफलता मिलेगी इसमें संदेह नहीं है।

इस यंत्र को सिद्ध करने के लिये दीपावली, होली की रात्रि तथा ग्रहण समय भोजपत्र पर अष्टगंध से १०८ बार लिखें। वैसे एक बार ही लिखकर बाँधने से फल मिलता है पर न्यून।

॥ लक्ष्मीदाता सिद्ध मन्त्र ॥

यह प्रयोग भगवान शंकर का है। श्रावण कृष्णा प्रतिप्रदा से प्रारंभ करें। भूशय्या एवं नक्त भोजनादि पुरश्चरण नियमों के पालन कर पूर्णिमा पर्यन्त शिवलिङ्ग मन्दिर में ११, २१, ४१, ५१, १०१, १११ आदि निश्चित संख्या में अर्क पुष्पों से पंचाक्षरी मन्त्र (नमः शिवाय) द्वारा अर्चन करें पुनः अखण्ड १०८ विल्वपत्रों पर तीनों पर अलग-अलग रक्त चंदन से मालती पर दाड़िम की लेखनी से निम्नांकित यंत्र अंकित कर प्रत्येक विल्व पत्र को उसी पंचाक्षरी मंत्र द्वारा शिवलिङ्ग पर अर्पित करें। तीसदिन के प्रयोग से निश्चय धनागमन होना पुनः प्रारंभ होगा। इसमें संदेह नहीं आज तक यह प्रयोग असफल

वं	वं	वं	वं
पं	पं	पं	पं
दं	दं	दं	दं
लं	लं	लं	लं

नहीं हुआ है। परन्तु ध्यान रखें कि अर्क पुष्पों की संख्या व विल्वपत्रों की संख्या में व समय में मास पर्यन्त कोई परिवर्तन नहीं हो।

॥ धनप्राप्ती हेतु हनुमत् प्रयोगः॥

मन्त्र - **ॐ श्रीं ह्रीं क्लीं अंजनी सुताय विद्महे वायुपुत्राय धीमहि तन्नो हनुमत् प्रचोदयात्॥**

विधानम् - साधक मंगल या शनिवार को अपना चन्द्र बल शुभ मुहुर्त्त में देखकर इस प्रयोग को प्रारंभ करें। इस मन्त्र का २१ दिन में सवा लाख जप करें। साधक पूर्वाभिमुख होकर ६० माला प्रतिदिन करें। मालपूवे का भोग लगावें उसी भोग का स्वयं पावे और कुछ नहीं खावें। एक समय भोजन करें। जपारंभ में मूर्ति पर चोला चढ़ावें, ब्रह्मचर्य से रहें। शुद्ध आचरण से जप करने पर एक नाग के दर्शन होंगे जो कार्य संपन्न होने का प्रतीक है। दर्शन होने के बाद साधक को धन का अभाव नहीं रहता, इस में संदेह नहीं है।

॥ ऋणमोचन प्रयोगः॥

खेर (कत्था) की लकड़ी के कोयले से तीन आड़ी रेखायें भूमि पर खीचें। फिर नीचे लिखें मन्त्रों को पढ़ते हुये बायें पैर की एडी से मिटा दें।

मन्त्र -

दुःखदौर्भाग्यनाशाय पुत्रसंतान हेतवे ।
कृतरेखात्रयं वामपादेनैतत्प्रमाज्मर्यहम् ॥१॥
ऋण दुख विनाशाय मनोभीष्टार्थ सिद्धये ।
मार्जयाम्या सिता रेखातिस्त्रो जन्मत्रयोदयभवा ॥२॥

इतना कर लेने के बाद मंगल के चरण कमलों का ध्यान करते हुये स्तुति करें-

धरणीगर्भसंभूतं विद्युत्तेजः समप्रभम् ।
कुमारं शक्तिहस्तं च मंगल प्रणमाम्यहम् ॥१॥
ऋणहर्त्रे नमस्तुभ्यं दुःखदारिद्र्यनाशिने ।
नमामि द्योतमानाय सर्वकल्याणकारिणे ॥२॥
देव दानव गंधर्व यक्ष राक्षसपन्नगा ।
सुखं यान्ति यतस्तस्मै नमो धरणिसूनवे ॥३॥

यो वक्रगति मायन्नो नृणां विघ्नं प्रयच्छति ।
पूजितः सुखसौभाग्य तस्मै क्ष्मासूनवे नमः ॥४॥
प्रसादं कुरु मे नाथ मंगलप्रद ।
मंगल मेषवाहन रुद्रात्मन। पुत्रान् देहि धनं यश ॥५॥

विधानम् - प्रतिदिन या केवल मंगलवार को ही यह विधान करने से शीघ्र ऋण मुक्ति होवें।

॥ ऋणहर-धनप्रद मंगल स्तोत्रम् ॥

विनियोगः - ॐ अस्य श्री भौम-स्तोत्रस्य श्रीगर्ग ऋषिः। त्रिष्टुप् छन्दः। मंगलो देवता। ऋण-हरणे धन-प्राप्त्यर्थे च विनियोगः।

ऋष्यादिन्यासः - ॐ श्रीगर्ग-ऋषये नमः शिरसि। त्रिष्टुप् छन्दसे नमः मुखे। मंगल देवतायै नमः हृदि। ऋण-हरणे धन-प्राप्त्यर्थे च विनियोगाय नमः अञ्जलौ।

ध्यानम्-

रक्ताम्बरो रक्तवपुः किरीटी चतुर्भुजो मेषगदो गदाभृत् ।
धराम्तः शक्तिधरश्च शूली सदा मम स्याद् वरदः प्रशान्तः ।

॥ स्तोत्रम् ॥

ॐ मङ्गलो भूमिपुत्रश्च ऋणहर्त्ता धनप्रदः ।
स्थिरात्मजो महाकायः सर्वकामार्थसाधकः ॥१॥
लोहितो लोहिताङ्गश्च सामगानां कृपाकरः ।
धरात्मजः कुजो भौमो भूमिदो भूमिनन्दनः ॥२॥
अङ्गारको यमश्चैव सर्वरोगापहारकः ।
वृष्टिकर्त्ताऽपहर्त्ता च सर्वकाम फलप्रदः ॥३॥

॥ फलश्रुति ॥

एतानि कुजनामानि प्रातरुत्थाय यः पठेत् ।
ऋणं न जायते तस्य धनं प्राप्नोति असंशयः ॥४॥
अङ्गारकोऽति बलवानपि यो ग्रहाणां
स्वेदोद्भवः त्रि-नयनस्य पिनाकपाणेः ।

आरक्त-चन्दन-सुशीतलवारिणा यः ।
अभ्यर्चितोऽथ विपुलां प्रददाति सिद्धिम् ॥५॥

॥ पुष्पाञ्जलि ॥

ॐ धरणीगर्भ सम्भूतं विद्युत्कान्ति समप्रभम् ।
कुमारं शक्तिहस्तं तं मङ्गलं प्रणमाम्यहम् ॥१॥
ऋणहर्त्रे नमस्तुभ्यं दुःखदारिद्र्यनाशिने ।
नभसि द्योतमानाय सर्वकल्याणकारिणे ॥२॥
देव-दानव-गंधर्व यक्ष-राक्षस-पन्नगाः ।
सुखं यान्ति यतस्तस्मै नमः धरणिसूनवे ॥३॥
यो वक्रगतिमापन्नो नृणां दुःखं प्रयच्छति ।
पूजितः सुखसौभाग्यं तस्मै क्ष्मासूनवे नमः ॥४॥
प्रसादं कुरु मे नाथ! मङ्गलप्रद मङ्गल !
मेषवाहन रुद्रात्मन्! सुखं देहि धनं यशः ॥५॥
स्तोत्रमङ्गारक स्येतत्पठनीयं सदा नृभिः ।
न तेषां भौमजा पीड़ा स्वल्पाऽपि भवति क्वचित् ॥६॥
अङ्गारक महाभाग भगवन्भक्त वत्सलं ।
त्वां नमामि ममाशेषमृणमाशु विनाशय ॥७॥
ऋणरोगादि दारिद्रयं ये चान्ये ह्यल्पमृत्यु
भयक्लेश-मनस्तापा नश्यन्तु मम सर्वदा ॥८॥
अतिवक्रदुराध्य भोगमुक्तजितात्मनः ।
दुष्टो ददासि साम्राज्यं रुष्टो हरसि तत्क्षणात् ॥९॥
विरिञ्च शक्र विष्णुनां मनुष्याणां तु स्त्रिस्तथा ।
तेन सर्वसहजेन ग्रहराजो महाबलः ॥१०॥
पुत्रान् देहि धनं देहि त्वमामि शरणं गतः ।
ऋणदारिद्र्य दुःखश्च शत्रुणां तु व्यपोहतो ॥११॥

॥ अभिषेक के २१ मंत्र ॥

१.ॐ मङ्गलाय नमः । २.ॐ भूमिपुत्राय नमः । ३.ॐ ऋणहर्त्रे नमः । ४.ॐ धनप्रदाय नमः । ५.ॐ स्थिरात्मजाय नमः । ६.ॐ महाकायाय नमः । ७.ॐ सर्वकामार्थ साधकाय नमः । ८.ॐ लोहिताङ्गाय नमः । ९.ॐ लोहिताक्षाय

नमः। १०. ॐ सामगानां कृपाकराय नमः। ११.ॐ धरात्मजाय नमः। १२.ॐ कुजाय नमः। १३.ॐभौमाय नमः। १४.ॐ भूमिदाय नमः। १५.ॐ भूमिनन्दनाय नमः। १६.ॐ अङ्गारकाय नमः। १७.ॐ यमाय नमः। १८.ॐ सर्वरोगापहारकाय नमः। १९.ॐ वृष्टिकर्त्रे नमः। २०.ॐ वृष्ट्यपहर्त्रे नमः। २१.ॐ सर्वकाम-फलप्रदाय नमः।

॥ भण्डारवृद्धि मंत्र ॥

मन्त्र - ॐ ह्रीं श्रीं आं ऐं लक्ष्मी स्वाहा

इस मन्त्र से सर्वधान्य २१ बार अभिमन्त्रित कर पोटली बाँधकर अन्न भण्डार कोठार या बड़े बर्त्तन में रख दें तो वह अपना फल दिखायेगा।

॥ वैभवायुर्दाता मंत्रम् ॥

ॐ सं मा सिञ्जन्त्वादित्याः सं मा सिञ्जन्त्वग्न्यः।
इन्द्रः समस्यान् सिञ्चतु प्रजया च धनेन च।
दीर्घमायुः कृणोतु मे ॥ (अथर्व० पैप्प० ६-१८-२)

सर्वप्रथम इस मंत्र का २१ सहस्र जप कर सिद्ध कर लेवे इसके उपरान्त
'' ॐ सं मा सिञ्चन्तु मरुतः सं पूषा सं वृहस्पतिः । सं मा यमाग्निः सिंचन्तु प्रजया च धनेन च। दीर्घमायुः कृणोतु मे''। (अथर्व० पैप्प० ६-१८-१) इस मंत्र को तामपत्र पर लिखकर विधिपूर्वक षोडशोपचार पूजन कर प्रतिष्ठा कर लेवें। इससे ऐश्वर्य सुख की वृद्धि होती है। आयुवृद्धि के लिये अनुष्ठान करें तो इसके यंत्र की पूजा करनी चाहियें। गुरु , सोम,. बुध के दिन इसका अनुष्ठान प्रारंभ करें। मांगलिक पदार्थों एवं इस यंत्र की पूजा कर लकड़ी या ऊन के आसन पर बैठकर रूद्राक्ष की माला पर ३ सहस्र जाप सात दिन तक नियमित रूप से करे। सातवे दिन २१०० मंत्रों से शुद्ध घी एवं अष्टगंधादि से हवन करने से निश्चय हि आयु की वृद्धि होती है अर्थात् वह जातक मृत्यु भय से मुक्ति को प्राप्त होता है। वाणिज्य (व्यापार) में लाभ प्राप्त करने के लिये उपरोक्त विधि से अनुष्ठान कर २१०० आहूतियों से हवन करना चाहिये। संतान सुख के लिये भी २१०० आहूतियों से हवन करें। उपरोक्त मंत्र धन-धान्य, आयु, एवं सन्तान सुख का वर्धन करने वाले है।

॥ वरुणमन्त्र प्रयोगः॥

(ऋण नाश एवं वृष्टिकामना हेतु)

त्रिचत्वारिंशदक्षरोमन्त्रः - ॐ ध्रुवासु त्वासु क्षितिषु क्षियंतो व्य ᳪ स्मत्पाशं वरुणो मुमोचत्। अवो वन्वाना अदितेरुपस्थाद्यूयंपात स्वस्तिभिः सदा नः स्वः।

विनियोगः - अस्य वरुणमन्त्रस्य वसिष्ठ ऋषिः। त्रिष्टुप्छंदः। वरुणो देवता। सर्वेष्टसिद्धये जपे विनियोगः।

ऋष्यादिन्यासः - ॐ वसिष्ठऋषये नमः शिरसि। त्रिष्टुप्छन्दसे नमः मुखे। वरुण देवतायै नमः हृदि। विनियोगाय नमः सर्वाङ्गे।

करन्यासः - ॐ ध्रुवासुत्वासुक्षितिषु इत्यंगुष्ठाभ्यां नमः। क्षियंतो व्यस्मत्पाशम् इतितर्जनीभ्यां नमः। वरुणो मुमोचदिति मध्यमाभ्यां नमः। अवो वन्वाना अदितेरिति अनामिकाभ्यां नमः। उपस्थाद्यूयंपात इति कनिष्ठिकाभ्यां नमः। स्वस्तिभिः सदा नः स्वः इति करतलकरपृष्ठाभ्यां नमः।

हृदयादिषडङ्गन्यासः - ॐ ध्रुवासुत्वासुक्षितिषु हृदयाय नमः। क्षियंतो व्यस्मत्पाशं शिरसे स्वाहा। वरुणो मुमोचत् शिखायै वषट्। अवो वन्वाना अदितेः कवचाय हुम्। उपस्थाद्यूयंपात नेत्रत्रयाय वौषट्। स्वस्तिभिः सदाः नः स्वः अस्त्राय फट्।

॥ मन्त्रवर्णन्यासः ॥

ॐ ध्रं नमः ध्रुं। दक्षपादाङ्गुल्यग्रे ॥१॥ ॐ वां नमः। दक्षपादांगुलिमूले ॥२॥ ॐ सुं नमः। दक्षगुल्फे ॥३॥ ॐ त्वां नमः। दक्षजानुनि ॥४॥ ॐ सुं नमः। दक्षपादमूले ॥४॥ ॐ क्षिं नमः। वामपादांगुल्यग्रे ॥६॥ ॐ तिं नमः। वामपादांगुलिमूले ॥७॥ ॐ षुं नमः। वामगुल्फे ॥८॥ ॐ क्षिं नमः। वामजानुनि ॥९॥ ॐ यं नमः। वामपादमूले ॥१०॥ ॐ तों नमः। गुदे ॥११॥ ॐ व्यं नमः। लिङ्गे ॥१२॥ ॐ स्मं नमः। आधारे ॥१३॥ ॐ त्पां नमः। नाभौ ॥१४॥ ॐ शं नमः। दक्षिणकुक्षौ ॥१५॥ ॐ वं नमः। वामकुक्षौ ॥१६॥ ॐ रुं नमः। पृष्ठे ॥१७॥ ॐ णों नमः। हृदि ॥१८॥ ॐ मुं नमः। दक्षिणस्तने ॥१९॥ ॐ मों नमः। वामस्तने ॥२०॥ ॐ चं नमः। गले ॥२१॥ ॐ अं नमः। दक्षिणहस्तांगुल्यग्रे ॥२२॥ ॐ वों नमः। दक्षिणहस्तांगुलिमूले ॥२३॥ ॐ वं नमः। दक्षिणमणिबन्धे ॥२४॥ ॐ न्वां नमः। दक्षिणकूर्परे ॥२५॥ ॐ

नां नमः। दक्षबाहुमूले ॥२६॥ ॐ अं नमः। वामहस्तांगुल्यग्रे ॥२७॥ ॐ दिं नमः। वामहस्तांगुलिमूले ॥२८॥ ॐ तें नमः। वाममणिबन्धे ॥२९॥ ॐ रुं नमः। वामकूर्परे ॥३०॥ ॐ पं नमः। वामबाहुमूले ॥३१॥ ॐ स्थां नमः। वक्रे ॥३२॥ ॐ द्यूं नमः। दक्षकपोले ॥३३॥ ॐ यं नमः। वामकपोले ॥३४॥ ॐ पां नमः। दक्षिणनासापुटे ॥३५॥ ॐ तं नमः। वामनासापुटे ॥३६॥ ॐ स्वं नमः। दक्षिणनेत्रे ॥३७॥ ॐ स्तिं नमः। वामनेत्रे ॥३८॥ ॐ भिं नमः। दक्षिणकर्णे ॥३९॥ ॐ सं नमः। वामकर्णे ॥४०॥ ॐ दां नमः। भ्रूमध्ये ॥४१॥ ॐ नं नमः। मस्तके ॥४२॥ ॐ स्वं नमः। शिरसि ॥४३॥

ध्यानम्

ॐ चन्द्रप्रभं पङ्कजसन्निषण्णं पाशाङ्कुशाभीतिवरं दधानम्।
मुक्ताविभूषांचितसर्वगात्रं ध्यायेत्प्रसन्नं वरुणं विभूत्यै॥

इस प्रकार मानसिक पूजन करें। सर्वतोभद्रमण्डल पर मण्डूक आदि पीठ देवताओं की स्थापना करें - ॐ मं **मण्डूकादिपरतत्वांतपीठदेवताभ्यो नमः।**

उसके बाद सोने या ताम्र से निर्मित मूर्ति का घृत से अभ्यजन करें। पश्चात् दुग्धधारा, जलधारा से अभिषेक कर स्वच्छ वस्त्र से पौछें और पुष्पों के आसन पर यन्त्र के मध्य में स्थापना करें। देवता से आवरण पूजा की आज्ञा माँगे।

वरुण यन्त्रम्

प्रथमावरणम् - षट्कोणकेसरेषु आग्नेय्यादिचतुर्दिक्षुमध्ये दिक्षुच - **ॐ हृदयाय नमः। हृदय श्री पादुकां पूजयामि तर्पयामि नमः। इति सर्वत्र ॥१॥ ॐ शिरसे स्वाहा। शिरः श्री पा०। ॐ शिखायै वषट्। शिखाश्री पा०। ॐ कवचाय हुम्। कवचश्री पा०। ॐ नेत्रत्रयाय वौषट्। नेत्रत्रयश्री पा०। ॐ अस्त्राय फट्। अस्त्रश्री पा०।**

पुष्पाञ्जलि मादाय -

ॐ अभीष्ट सिद्धिं मे देहि शरणागतवत्सल।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्॥

द्वितीयावरणम् – ततोऽष्टदलेषु पूज्यपूजक योरंतराले प्राचीं तदनुसारेण अन्या दिशः प्रकल्प्य प्राचीक्रमेण – **ॐ शेषाय नमः। शेषश्री पा०। ॐ वासुकये नमः। वासुकिश्री पा०। ॐ तक्षकाय नमः। तक्षकश्री पा०। ॐ कर्कोटकाय नमः। कर्कोटकश्री पा०। ॐ पद्माय नमः। पद्मश्री पा०। ॐ महापद्माय नमः। महापद्मश्री पा०। ॐ शङ्खपालाय नमः। शङ्खपालश्री पा०। ॐ कुलिकाय नमः। कुलिकश्री पा०।**

पुष्पाञ्जलि देवें – अभीष्टसिद्धिं........द्वितीयावरणार्चनम्॥

तृतीयावरणम् – **भूपूरे इन्द्रादिदशदिक्पालान् वज्राद्यायुधानि च सम्पूज्य।**

पुष्पाञ्जलि देवें – अभीष्टसिद्धिं........ तृतीयावरण र्चनम्॥ ॐ पूजितास्तर्पिता सन्तु से जल छोड़ें।

इस मन्त्र का पुरश्चरण १ लाख जप का है। तथा दशांश हवन, तर्पण कर ब्राह्मण भोजन करायें।

॥ फलश्रुति ॥

सिद्धे मन्त्रे मन्त्री प्रयोगान् साधयेत्।
तथा च लक्षमेकं जपेन्मन्त्रं पायसेन दशांशतः।
सर्पिःसिक्तेन जुहुयान्मन्त्री मन्त्रस्य सिद्धये ॥१॥
ऋणमुक्त्यै जपेन्मन्त्रं प्रत्यहं साष्टकं शतम्।
जपेनानेन लभते महतीमव्ययां श्रियम् ॥२॥
सितेक्षुशकलैर्मंत्री जुहुयाद्धृतसंप्लुतैः॥
चतुर्दिनं दशशतमृणमुक्त्यै महाश्रियै ॥३॥
समिद्भिर्वेतसोत्थाभिः क्षीराक्ताभिर्दिनत्रयम्।
जुहुयाद्वृष्टिसंसिद्धयै मन्त्रविद्विजितेन्द्रियः ॥४॥
अनेन विधिना मन्त्री सूर्ये शतभिषं गते।
चतुःशतं घृतयुतं पायसं जुहुयाद्वशी ॥५॥
ऋणनाशाय संपत्त्यै वश्यारोग्याभिवृद्धये।
भृगुवारे कृतो होमः पायसेन ससर्पिषा।
महतीं संपदं कुर्यान्नाशयेत्सकलापदः।
शालिभिघृतसंसिक्तैः सरिदंतरितः सुधीः ॥७॥
त्र्यहं चतुःशतं हुत्वा स्तंभयेत्परसैन्यकम्।

सायं प्रत्यङ्मुखो वह्निमाराध्य प्रजपेन्मनुम् ॥८॥
चतुःशतं विमुच्येत मन्त्री सर्वैरुपद्रवैः ।
मन्त्री प्रत्यङ्मुखो भूत्वा तर्पयेद्विमलैजलैः ॥९॥
सर्वोपद्रवनाशाय समस्ताभ्युदयाप्तये ।
बहुना किमिहोक्तेन मन्त्रेणानेन साधकः ।
साधयेत्सकलान् कामाञ्जपहोमादितत्परः ॥१०॥

॥ इति वरुणत्रिचत्वारिंशदक्षरमन्त्र प्रयोगः ॥

१.॥ अनावृष्टिशमन प्रयोगः॥

(वरुण यन्त्र प्रयोगः २)

अकाल पड़ने पर इन्द्र को प्रसन्न करने के लिये वरुण मण्डल बनाकर ४९ मेघों का पूजन, इन्द्र का पूजन मन्त्रजप, वरुणमन्त्र जाप किया जाता है।

वरुण मन्त्र जप नाभि पर्यन्त जल में अथवा गीले वस्त्रों सहित करने पर शीघ्र फल देता है।

॥ वारुणसूक्तम् ॥

ॐ हिरण्यवर्णाः शुचय पावकाया सुजातः कश्यपो या स्विन्द्रः ।
अग्नि या गर्भदधिरे विरुपास्तान आपः श ठं स्योना भंवतु ॥१॥
ॐ या सा ठं राजा वरुणो याति मध्ये सत्यानृत अवपश्यं जनानाम् ।
मधुश्युतः शुचयोयाः पावकास्तान आप श ठं श्योना भवंतु ॥२॥
या सां देवादिवि कृण्वंति भक्षं या अंतरिक्षे बहुधा भवंति ।
याः पृथिवीं पयसो दंति शुक्रास्तान आपः श ठं स्योनाभवंतु ॥३॥
ॐ शिवेन मा चक्षुषा पश्यतापः शिवया तनुवो पस्पृशत्व चं मे ।
सर्वा ठं अग्नि ठं रप्सुषदो हुवेवो मयि वर्चो बल्माजो निधत ॥४॥

वरुणमन्त्रपुरश्चरणम् (शारदातिलके) - ॐ ध्रुवासुत्वासक्षितिषुक्षियंतो व्यस्मत्याशंवरुणोमुमोचत्। अवोवन्वानाआदिते रुपस्थाद्यूयं पातस्वस्तिभिः सदानः॥ द्विचत्वारिंशद्वर्णात्मक ऋग्वेदोक्तो मन्त्रः॥ इति॥

विनियोग: - अस्य वरुणमन्त्रस्य वसिष्ठ ऋषिः। त्रिष्टुप् छन्दः। वरुणो देवता। अनावृष्टिशमनार्थे जपे विनियोगः।

ऋष्यादिन्यास: - ॐ वसिष्ठ ऋषये नमः शिरसि। ॐ त्रिष्टुप् छन्दसे नमः मुखे। ॐ वरुणदेवतायै नमः हृदये। विनियोगाय नमः सर्वाङ्गे।

अथ षडङ्गन्यासः - ध्रुवात्वासक्षितिषु हृदयाय नमः। ॐ क्षियंतोव्यस्मत्पाशं शिरसे स्वाहा। ॐ वरुणो मुमोचत शिखायै वषट्। ॐ अवोवन्वाना अदिते कवचाय हुं। ॐ रुपस्थाद्यूयंपात नेत्रत्रयाय वौषट्। ॐ स्वस्तिभिः सदान इत्यस्त्राय फट्।

॥ मन्त्रवर्णन्यासः॥

ॐ ध्रुं नमः दक्षिणपादांगुल्यग्रे। ॐ वां नमः दक्षिण पादांगुलिमूले। ॐ सुं नमः दक्षिणगुल्फे। ॐ त्वां नमः दक्षिणजानुनि। ॐ सं नमः दक्षपादमूले। ॐ क्षिं नमः वामपादांगुल्यग्रे। ॐ तिं नमः वामपादांगुलिमूले। ॐ षुं नमः वामगुल्फे। ॐ क्षिं नमः वामजानुनि। ॐ यं नमः वामपादमूले। ॐ तों नमः गुदे। ॐ ष्यं नमः लिङ्गे। ॐ स्मं नमः नाभौ। ॐ त्यां नमः कुक्षौ। ॐ शं नमः पृष्ठे। ॐ वं नमः हृदये। ॐ रुं नमः दक्षिण स्तने। ॐ णों नमः वामस्तने। ॐ मुं नमः गले। ॐ मों नमः दक्षिणहस्तांगुल्यग्रे। ॐ चं नमः दक्षिणहस्तांगुलिमूले। ॐ अं नमः दक्षिणमणिबन्धे। ॐ वों नमः दक्षिणकूर्परे। ॐ वं नमः दक्षिणबाहुमूले। ॐ न्वां नमः वामहस्तांगुल्यग्रे। ॐ नां नमः वामहस्तांगुलिमूले। ॐ अं नमः वाममणिबन्धे। ॐ दिं नमः वामकूर्परे। ॐ तें नमः वामबाहुमूले। ॐ रुं नमः वक्त्रे। ॐ पं नमः दक्षकपोले। ॐ स्थां नमः वामकपोले। ॐ द्यूं नमः दक्षिणनासिकायाम्। ॐ यं नमः वामनासिकायाम्। ॐ पां नमः दक्षिणनेत्रे। ॐ तं नमः वामनेत्रे। ॐ स्वं नमः दक्षिणकर्णे। ॐ स्तिं नमः वामकर्णे। ॐ भिं नमः भ्रूमध्ये। ॐ सं नमः मस्तके। ॐ दां नमः शिरसि। ॐ नं नमः सर्वाङ्गे।

ध्यानम् -

चन्द्रप्रभं पङ्कजसन्निषण्णं पाशाङ्कुशाभीतिवरं दधानम्।
मुक्ताविभूषांचितसर्वगात्रं ध्यायेत्प्रसन्नं वरुणं विभूत्यै ॥१॥

इस मन्त्र से ध्यान कर मानसोपचार से पूजन करें। धर्मादिपरतत्त्वांतपीठदेवताः पूर्ववत्संपूज्य। मध्ये। मूलेन मूर्तिं प्रकल्प्य। आवहनादिपुष्पांतैरुपचारैर्भगवन्तं वरुणं संपूज्य। यन्त्र की आवरण पूजा करें।

प्रथमावरणम् - तद्यथा (षट्कोणे) प्राचीक्रमेण आग्नेयादिकोणकेसरेषु मध्ये दिक्षु च - **ॐ ध्रुवासुत्वासक्षितिषु हृदयाय नमः। ॐ क्षियन्तोव्यस्मत्याशं शिरसे स्वाहा। ॐ वरुणो मुमोचत् शिखायै वषट्। ॐ अवोवन्नवानाअदिते कवचाय हुम्। ॐ रुपस्थाद्यूयम्पात नेत्रत्रयाय वौषट्। ॐ स्वस्तिभिः सदान इत्यस्त्राय फट्।** इति षडंगानि पूजयेत्।

वरुण यन्त्रम्

द्वितीयावरणम् - (ततोऽष्टदलेषु प्राचीक्रमेण) - **ॐ शेषाय नमः। ॐ वासुकये नमः। ॐ तक्षकाय नमः। ॐ कर्कोटकाय नमः। ॐ पद्माय नमः। ॐ महापद्माय नमः। ॐ शंखपालाय नमः। ॐ कुलिकाय नमः।** इति पूजयेत्।

तृतीयावरणम् - (तस्माद्वाह्ये चतुरस्त्रे भूपुरे पूर्वादिदशदिक्षु) - **ॐ लं इन्द्राय नमः। ॐ रं अग्नये नमः। ॐ मं यमाय नमः। ॐ क्षं निर्ऋतये नमः। ॐ वं वरुणाय नमः। ॐ यं वरुणाय नमः। ॐ सं सोमाय नमः। ॐ हं ईशानाय नमः।** ॐ ईशानपूर्वयोर्मध्ये - **ॐ आं ब्रह्मणे नमः।** निर्ऋतिपश्चिमयोर्मध्ये - **ॐ अं अनन्ताय नमः। इति पूजयेत्।**

चतुर्थावरणम् - (तद्वहिस्तत्तत्समीपे) - **ॐ वज्राय नमः। ॐ शक्तये नमः। ॐ दण्डाय नमः। ॐ खड्गाय नमः। ॐ पाशाय नमः। ॐ अङ्कुशाय नमः। ॐ गदायै नमः। ॐ त्रिशूलाय नमः। ॐ पद्माय नमः। ॐ चक्राय नमः।** इत्यादि आयुधों का पूजन करें।

एवमावरणपूजां कृत्वा - धूपदीप नैवेद्यतांबूलदक्षिणानीराजन प्रदक्षिणा नमस्कारैः पूजां समाप्य। यथाविधि वाग्यतो जपं कुर्य्यात्। अस्य पुरश्चरणं लक्षजपः। जपान्ते वृष्टिकामनया वेतेसोत्थाभिः क्षीराक्ताभिः समिद्भिः पायसान्नेन सर्पिः सिक्तेन च दशांश होमं कृत्वा तद्दशांशेन तर्पणं तद्दशांशेन मार्ज्जनं तद्दशांशतः यथाशक्ति वा पायसान्नेन ब्रह्मणभोजनं च कार्यम् (शारदातिलके) लक्षमेकं जपेन्मन्त्रं पायसेन दशांशतः। सर्पिः सिक्तेन जुहुयान्मंत्री मन्त्रस्य सिद्धये॥१॥ ऋणमुक्त्यै जपेन्मन्त्रं प्रत्यहं साष्टकं शतम्। जपेनानेन लभते महतीमव्ययां श्रियम्॥२॥ शितेक्षुशकलैर्मेत्री जुहुयाद्घृतसंप्लुतैः। चतुर्दिनं

दशशतमृणमुक्त्यै महाश्रियै ॥३॥ समिद्भिर्वेतसोत्थाभिः क्षीराक्ताभिर्दिनत्रयम्। जुहुयाद्वृष्टिसंसिद्ध्यै मन्त्रविद्विजितेन्द्रियः ॥४॥ अनेन विधिना मन्त्री सूर्ये शतभिषं गते। चतुःशतं घृतयुतं पायसं जुहुयाद्वशी ॥५॥ ऋणनाशाय संपत्यै वश्यारोग्याभिवृद्धये। भृगुवारे कृतो होमः पायसेन च सर्पिषा ॥६॥ महती संपद कुर्यान्नाशयेत्सकलापदः। शालिभिर्घृत संसिक्तैः सरिदंतरितः सुधीः ॥७॥ त्र्यहं चतुःशतं हुत्वा स्तंभयेत्परसैन्यकम्। सायं प्रत्यङ्मुखो वह्निमाराध्य प्रजपेन्मनुम् ॥८॥ चतुःशतं विमुच्येत मन्त्री सर्वैरुपद्रवैः। मन्त्री प्रत्यङ्मुखो भूत्वा तर्पयेद्विमलैर्जलैः ॥९॥ सर्वोपद्रवनाशाय समस्ताभ्युदयाप्तये। बहुनाकिमिहोक्तेन मन्त्रेणानेन साधकः ॥१०॥ साधयेत्सकलान्कामान्ज पहोमादितत्परः ॥

२. ॥ अथवृष्टिप्रदविधानं द्वितीयम् ॥

(बृहदृग्विधाने शौनकः)

अच्छावदेति सूक्तं तु वृष्टिकामः प्रयोजयेत् ।
निराहारः क्लिन्नवासा अचिरेण प्रवर्षति ॥१॥
हुत्वायुतं वैतसीनां क्षीराक्तानां हुताशने ।
महद्वर्षमवाप्नोति सूक्तेनाच्छावदेन हि ॥२॥

अनेन सूक्तेन प्रत्यृचं वा दिश उपस्थेया इति ''सायणभाष्ये''। अथ अच्छावदेति सूक्तं ऋ० अ०४, अ० ४, वर्ग २७।

ॐ अच्छावदतवसंगीर्भिराभिः स्तुहिपर्जन्यं नमसाविवास ।
कनिक्रदद्वृषभोजीरदानूरे - तोदधात्योषधीषुगर्भम् ॥१॥
विवृक्षान्हतन्त्युतहन्ति रक्षसोविश्वविभायभुवनं महावधात् ।
उतानागाईषवृष्ण्यावतोयत्पर्जन्यः स्तनयन्हन्तिदुष्कृतः ॥२॥
रथीवकशयाश्वां अभिक्षिपन्नाविर्दतान्कृणुतेवर्ष्यां३ अह ।
दूरात्सिंहस्यस्तनथाउदीरतेयत्पर्जन्यः कृणुतेवर्स्यं नमः ॥३॥
प्रवातावान्तिपतयन्तिविद्युतउदोषधीर्जिहतेपिन्वतेस्वः ।
इराविश्वस्मैभुवनायजायतेयत्पर्जन्यः पृथिवीरेतसावति ॥४॥
यस्यव्रतेपृथिवीनन्नमीतियस्यमीतियस्य व्रतेशफवजर्भुरीति ।
यस्यव्रतओषधीर्विश्वरूपाः सनः पर्जन्यमहिशर्मयच्छ ॥५॥

दिवोनोवृष्टिंमरुतोररीध्वं प्रपिन्वतवृष्णोअश्वस्यधाराः ।
अर्वाङ्तेनस्तनयित्नुनेह्यपोनिषिञ्चन्नसुर पितानः ॥६॥
अभिक्रंदस्तनय गर्भमाधाउदन्वता परिदीयारथेन ।
दृतिंसुकर्षबिषितन्यञ्चसमा भवन्तूद्वतोनिपादाः ॥७॥
महान्तंकोशमुदचानिषिञ्चस्यन्दन्तांकुल्या विर्षिताः पुरस्तात् ।
घृतेनद्यावापृथिवीव्युन्धिसुप्रपाणं भवत्वघ्न्याभ्यः ॥८॥
यत्पर्ज्जन्य कनिक्रदत्स्तनयन्हंसिदुष्कृतः ।
प्रतीदंविश्वं मोदतेयत्किं च पृथिव्यामधि ॥९॥
अबर्षीर्वर्षमुदुषूगृभाया कर्धन्वान्यत्येतवाउ ।
अजीजनओषधीर्भोजनाय कमुत्प्रजाभ्योविमोदनीषाम् ॥१०॥

इति दशर्चं सूक्तम्। अनेन सूक्तेन प्रत्यृचं वा अयुतवेतसीनां क्षीराक्तानां होमाच्छीघ्रं वर्षति। होमान्ते इदपर्जन्याय इति त्यागं कुर्यादितिपर्जन्यविधानम्।

३. ॥ अथ तिस्रोवाच इत्यादिसूक्तद्वयविधानम् ॥

(वृष्टिप्रद)

ऋग्विधाने - (शौनकः) - आस्यदघ्नं विगाह्यापः प्राङ्मुखः प्रयतः शुचिः सूक्ताभ्यां तिस्र आदिभ्यामुपतिष्ठेत भास्करम्। अनश्नतैतज्जप्तव्यं वृष्टिकामेन यत्नतः। पञ्चरात्रेऽप्यतिक्रांते महतीं वृष्टिमाप्नुयात्।

विनियोगः - ॐ तिस्रो वाच इत्यादिसूक्तस्य अग्निपुत्रः कुमार ऋषिः वसिष्ठो वा। त्रिष्टुप्छंदः। पर्जन्यो देवता। वृष्टिप्राप्त्यर्थे विनियोगः।

ॐ तिस्रो वाचः प्रवदज्योतिरग्राया एतद्दुह्रेमधुदोघमुधः ।
सवत्संकृण्वन् गर्भमोषधीनां सद्योजातो वृषभो रोरवीति ॥१॥
योवर्धनओषधीनां यो अपांयोविश्वस्यजगतोदेवईशे ।
सत्रिधातुशरणं शर्मयंसत्रिवर्तुज्योतिः स्वभिष्ट्य१ स्मे ॥२॥
स्तरीरुत्वद्भवति सूतउत्वद्यथावशं तन्वंचक्र एषः ।
पितुः पयः प्रतिगृभ्णातिमातातेन पितावर्धते तेनपुत्रः ॥३॥
यस्मिन्विश्वानिभुवनानित स्थुस्तिस्त्रोधावस्त्रेधाससंस्त्रुरापः ।
त्रयः कोशामउपसेचनासोमध्वश्चोतन्त्यभितोविरप्शम् ॥४॥

इदं वचः पर्जन्याय स्वराजेत्हृदोअस्त्वन्तरंतज्जुजोषत् ।
मयोभुवोवृष्टयः सन्त्वस्मेसुपिप्पलाओषधीर्देवगोपाः ॥५॥
पुरेतोधावृषभः शश्वतीनांतस्मिन्नात्मा जगतस्तस्थुषश्च ।
तन्मऋतं पातु शतशारदाय यूयंपातस्वस्तिभिः सदानः ॥६॥

॥ इति प्रथमसूक्तम् ॥

विनियोगः – **ॐ पर्जन्यायेति सूक्तस्य अग्निपुत्रः कुमार ऋषिः वसिष्ठो वा। गायत्री छन्दः। पर्जन्योदेवता। वृष्टिप्राप्त्यर्थे जपे विनियोगः।**

ॐ पर्जन्यायप्रगायतदिवस्पुत्रायमीडुषे। सनोयवसमिच्छतु॥१॥
योगर्भमोषधीनांगवांकृणोत्पर्वताम् । पर्जन्यः पुरुषीणाम् ॥२॥
तस्माइदास्येहविर्जुहोतामधुमत्तमम्। इलांनः संयतं करत् ॥३॥

॥ इति वृष्टिप्राप्तिकर विधानम् ॥

४. ॥ अन्यप्रयोगः ॥

नाभिपर्यन्त जल में शंकर का ध्यान करके मृत्युञ्जय जप करें। अथवा दुर्गा के मन्त्र का जप करें। संपुट पाठ करें तो गीलेवस्त्र पहन कर पाठ करें।

ॐ वञ्चिताभ्यामिति तदा सर्वमापोमयं जगत् ।

५.॥ अनावृष्टि –निवारक प्रयोगः॥

अच्छी वर्षा हेतु पंचदेवताओं गणेश, सूर्य, शक्ति, शिव और विष्णु के पूजन सहित भगवान् वरुण के पूजन हेतु **संङ्कल्प** करे। पंचब्रह्मदेवताओं के पूजन के बाद भगवान् श्रीवरुणदेव का ध्यान करे।

ध्यानम्–

ॐ पुष्करावर्तकैर्मेघैः प्लावयन्तं वसुन्धराम् ।
विद्युत् गर्जित-सन्नद्ध-तोयात्मने नमाम्यहम् ॥
यस्य केशेषु जीमूतो नद्यः सर्वांग-सन्धिषु ।
कुक्षौ समुद्राश्चत्वारस्तस्मै तोयात्मने नमः ॥

इस ध्यान को पढ़कर, अपने शिर पर पुष्प चढ़ाकर मानसोपचारों से पूजा करें। फिर अर्घ्य-स्थापन कर, पुनः भगवान् श्रीवरुण का ध्यान करते हुए उनका आवाहन करे तथा यथा-शक्ति उनका पूजन करें।

इसके बाद एकाग्रचित्त होकर, अच्छी वर्षा के लिये, दृढ़ निश्चय होकर, किसी नदी या उसके अभाव में किसी जलाशय (तालाब) के पास जाकर, "हुं श्रीं हूं" इस मंत्र का जप करते हुए उसमें प्रवेश करें। नाभि तक गहरे जल में खड़े होकर निम्न विनियोग पढ़े-

विनियोग: - **ॐ अस्य मंत्रस्य प्रजापतिः ऋषिः, त्रिष्टुप् छन्दः, श्रीवरुणः देवता एतद् राज्यमभिवाप्य सु-वृष्ट्यर्थं जपे विनियोगः।**

इसके बाद ॐ वं मंत्र का आठ हजार जप करें।

१. ॐ हुँ ह्रीं क्षं क्षां, क्षिं क्षीं, क्षुं क्षूं, क्षें क्षैं, क्षों क्षौं, क्षं क्षः, हुं फट् ठं ठः।

२. ॐ ह्रीं क्षें क्षिं क्षीं, क्षुं क्षूं, क्षें क्षैं, क्षों क्षौं, क्षं क्षः, हूं।

उक्त दोनो मंत्रो में से किसी एक मंत्र को जलाशय के मध्य में पूर्वमुख खड़े होकर जपे।

॥ अतिवृष्टि स्तंभन ॥

कोयले या भस्म से एक शिला पर षट्कोण बनाकर उसके मध्य में मेघ लिखकर खड्डा खोदकर उल्टा गाड़ देवें।

मेघ

वृष्टिस्तंभन यन्त्रम्

उसके बाद मेघों की तरफ देखकर त्राटक करते हुये मन्त्र जप करें।

प्रयोग की सफलता आपकी इष्टशक्ति पर निर्भर है तथा आजमाइस किया हुया सफल प्रयोग है।

कार्य संपन्न होने पर शिला को बाहर निकालें दूध की धारा देवें, पञ्चामृत से धोयें शान्ति स्तोत्र पढ़ें। कई बार उपद्रव अधिक होने पर देखा गया है कि शिला के टुकड़े हो जाते हैं।

गायों को चारा, कबूतरों को अन्न डालें, ब्राह्मणभोजन, कन्याभोजन करायें।

मन्त्र - ॐ ह्लीं बगलामुखी मेघानां (इन्द्रस्य) वाचं मुखं पदं स्तंभय जिह्वां कीलय बुद्धिं विनाशय ह्लीं ॐ स्वाहा।

॥ अथ चोरनिवारणम् ॥

जलेरक्षतु वाराहः स्थले रक्षतु वामनः ।
अटव्यां नारसिंहश्च सर्वतः पातुः केशवः ॥१॥
जले रक्षतु नन्दीशः स्थले रक्षतु भैरवः ।
अटव्यां वीरभद्रश्च सर्वतः पातुः शङ्करः ॥२॥
अर्जुनः फाल्गुनो जिष्णुः किरीटी श्वेतवाहनः ।
बीभत्सुर्विजयः कृष्णः सव्यसाची धनञ्जयः ॥३॥
तिस्रो भार्याः कफल्लस्य दाहिनी मोहिनी सती ।
तासां स्मरणमात्रेण चोरो गच्छति निष्फलः ॥४॥
कफल्लकः कफल्लकः कफल्लकः ।
इति पठित्वा शयनं कार्यं तेन चोरो निष्फलो गच्छेत् ॥५॥

॥ अथ भूतोपद्रवनाशका उड्डीशमन्त्राः ॥

मन्त्रः - ॐ नमो भगवते नारसिंहाय घोररौद्रमहिषासुररूपाय त्रैलोक्याडंबराय रौद्रक्षेत्रपालाय ह्रों ह्रों क्रीं क्रीं क्रीमिति ताडय ताडय मोहय मोहय द्रंभि २ क्षोभय २ आभि २ साधय २ ह्रीं हृदये आं शक्तये प्रीति ललाटे बंधय २ ह्रीं हृदये स्तंभय २ किलि २ ईं ह्रीं डाकिनि प्रच्छादय २ शाकिनीं प्रच्छादय २ भूतं प्रच्छादय २ प्रभूतं प्रच्छादय २ स्वाहा राक्षसं प्रच्छादय २ ब्रह्मराक्षसं प्रच्छादय २ सिंहिनीपुत्रं प्रच्छादय २ डाकिनीग्रहं साधनाय २ शाकिनीग्रहं साधय २ अनेन मन्त्रेण डाकिनीशाकिनी भूतप्रेतपिशाचाद्यैकाहिक - द्व्याहिक त्र्याहिक चातुर्थिक पञ्चवातिकपैत्तिकश्लैष्मिक सन्निपात केसरि डाकिनी ग्रहादीन्मुंच मुंच स्वाहा। गुरु की शक्ति मेरी भक्ति फुरो मन्त्र ईश्वरी वाचा।

॥ इति मन्त्रः ॥

विधानम् - लोहे की सेल से २१ बार झाड़ दें अथवा छप्पर के तीले से झाड़ दें तो उन्मादादिक भूतबाधा दूर हो।

॥ अथडाकिनी से बालक छुडाने का मन्त्र ॥

ॐ कालाभैरव कपिली जटा रात दिन खेले चौपटा कालाभैरव भस्म मुसाण जेहि मांगूं सो पकड़ी आन। डंकिनी संखिनी पटसिहारी जरख चढति गोरखमारी छोडिछोडिरे पापिनी बालक पराया गोरखनाथका परवाना आया॥ इति मन्त्रः॥

विधानम् - तीर से झाड़ दे और पानी अभिमन्त्रित करके पिलावें तो बालक डाकिनी से छुटे।

॥ प्रेतादि रोगादि झाड़ने का मन्त्र ॥

ॐ नमो आदेश गुरु को घोर घोर इन घोर काजीकी किताब घोर मुल्लाकी बाँग घोर रैगर की कुण्ड घोर धोबीका कुण्ड घोर पीपलका पान घोर देवकी दिवाल घोर आपकी घोर बिखेरता चल परकी घोर बैठता चल वज्रका किवाड़ तोड़ता चल सारका किवाड़ तोडता चल कुनकुन सो बन्द करता चल भूत को पलीत को देव को दानव को दुष्ट को मुष्ट को चोट को फेट को मेलेको घरेलेको उलकेको बुलके को हिडके को भिडके को ओपरी को पराई को भूतनी को पलीतनी को डंकिनी को स्यारी को भूचरी को खेचरी को कलुए को मलबे को उनको मथ बायके तापको तिजारीको माथाकी मथबायको मगरांकीपीडाको पेटकी पीडाको सांस को कांसको मरे को मुसाण को कुणकुणसा मुसाण कचिया मुसाण भुकिया मुसाण कीटिया मुसाण चीडीचौपाटा का मुसाण नुह्या मुसाण इन्हो को बंदकरि एडी की एडी बंध करि पीड़ाकी पीडीबंधकरि जांघकी जाडी बंधकरि कट्यांकी कडीबंधकरि पेटकी पीडा बंधकरि छातीकी शूल बंधकरि सरिकी सीस बंधकरि चोटीकी चोटीबंध करि नौनाडी बहतर कोठा रोमरोममें घर पिण्ड में दखलकर देश बंगालका मनसारा मसेबडा आकर मेरा कारज सिद्ध न करे तो गुरु उस्ताद से लाजे शब्द सांचा पिण्ड काचा फुरो मन्त्र ईश्वरी वाचा॥

विधानम् - मद्य, मांस चढ़ावें, छडछडीला की धूप देवें, अतर, तैल दीपक, सभी प्रत्येक रविवार को देय। भांग सुलफा चाढ़ाना चाहि सिद्ध होने पर मन्त्र सात बार पढ़कर झाड़ दे तो सर्वोपद्रव दूर हो कर सुखी हो इसमें संदेह नहीं हैं।

॥ नजर झाड़ने का मन्त्र ॥

ॐ नमो सत्य नाम आदेश गुरु को ॐ नमो नजर जहाँ परपीर न जानी बोले छलसों अमृतवानी कहो नजर कहां ते आई यहां की ठौर तोहि कौन बनाई कौन जात तेरो कहा ठाम किसकी बेटी कहा तेरो नाम कहांसे उड़ी कहां को जाया अबही बसकर ले तेरी माया मेरी जात सुनो चित लाय जैसी होय सुनाऊं आय तेलन तमोलन चूहडी चमारी कायथनी खतरानी कुम्हारी महतरानी राजाकी रानी जाको दोष ताही के शिर पड़े जाहर पीर नजर से रक्षा करे मेरी भक्ति गुरु की शक्ति फुरो मन्त्र ईश्वरी वाचा॥

अस्यविधानम् - इस मंत्र द्वारा मोरपंख से झाड़ दें तो आराम हो।

पलीता यंत्रम्

द	मू	सि	ज	जं	त्र	०	०	०
अ	च	जा	पै	नि.	स्थै	०	०	०

इसयन्त्र को कागज पर लिखकर पलीता सुलगाकर सुंघावे तो प्रेत वकुरे बात करे जो पूछे उसका जवाब दे।

॥ अथडाकिनी के चोट मारने का मन्त्र ॥

ॐ नमो महाकाली जोगनी जोगनी पारशाकिनी कल्पवृक्षीय दृष्टि जोगनी सिद्धरुद्राय कालदंडेन साधय २ मारय २ चूरय २ अपहर शाकिनी सपरिवारं नमः ॐ हूँ हूँ हैं ह्रौं फट् स्वाहा॥

अस्यविधानम् - इस मन्त्र से सात बार गूगल को पढ़कर ओखली में डाल मूसल से कूटे तो वह मूसल की चोट डाकिनी को लगेगी, अगर इस मन्त्र से अपना घोंटू मूंडे तो डाकिनी का सिर मुंड जायेगा, किसी चीज पर मन्त्र पढ़कर जिसके घर में डाले उसके घर में जाके डाकिनी बोलेगी। इस मन्त्र को पढ़कर आँखों में जल मारे तो खेल उठें।

॥ अथडाकन भक्षित का मन्त्र ॥

ॐ डाकन शाकन और सिहारी भैरो यतीके चक्र मारी अन्नपान खाय पराया तके तिस पापनका भण्डारा फूटे नरसा टूटे पाप न घूटे गुरु की शक्ति चेले की भक्ति फुरो मन्त्र ईश्वरी वाचा॥

विधानम् - सात बार झाड़ दें तो डाकिनी के खाये हुये को आराम होवें।

डाकिनी दूर करने का मन्त्र - ॐ नमो आदेश गुरुका डाकिनी सिहारी किन्ने मारी जती हनुमन्त ने मारी कहां जाय दब की किन देखी जती हनुमन्त ने देखी सातवें पाताल गई सातवें पाताल से कौन पकड़ लाया जती हनुमन्त पकड़ लाया एक ताल दे एक कोठा तोड़ा दो ताल दे दो कोठा तोड़ा तीन ताल दे तीन कोठा तोड़ा चार ताले दे चार कोठा तोड़ा पांच ताल दे पांच कोठा तोड़ा छः ताल दे छः कोठा तोड़ा सात ताल दे सातवां कोठा खोल देखे तो कौन खड़ी है डाकिनी सिहारी भूतप्रेत चले जती हनुमन्त रे झाडे सूं चले ॐ नमो आदेश गुरु का गुरु की शक्ति मेरी भक्ति गुरु की शक्ति फुरो मन्त्र ईश्वरी वाचा॥

विधानम् - मोर की पंख अथवा लोहे से झाड़ दें तो सर्वोपद्रव दूर हो।

अन्यत् - ॐ नमो आदेश गुरु का गिरह बाज नटनीका जाया चलती बेर कबूतर खाया पीवे दारू खाय जो मांस रोगदोष को लावे फांस कहां कहां से लावेगा गुदगुद में सुवावेगा बोटी बोटी में से लावेगा चामचाम में से लावेगा नौ नाड़ी बहत्तर कोठा में से लावेगा मारमार बन्दी करकर लावेगा न लावेगा तो अपनी माता की सेज पर पग धरेगा मेरा भाई मेरा दिखा दिखलाय तो मेरी भक्ति गुरु की शक्ति फुरो मन्त्र ईश्वरी वाचा॥

विधानम् - मोरपंख से झाड़ें तो भूतप्रेत डाकिनी शाकिनी सब भाग जायें।

॥ डाकिनी के बकुराने का मन्त्र ॥

ॐ नमो आदेश गुरु का ॐ नमो जय नरसिंह तीन लोक चौदह भुवन में हाथ चाबी और होठ चाबी नयन लाल लाल सर्व वैरी पछाड मार भगतन को प्राण राखि आदेश आदि पुरुषको।

विधानम् - इस मन्त्र से पानी पढ़कर पिलावे फिर पूछे तो डाकिनी शाकिनी बोले।

॥ भूतप्रेत उपद्रव दबाने हेतु ॥

भित्वा पाताल मूलं चल चालि चलतं व्याल लील कराले विद्युद्दण्डं प्रचण्डं प्रहरण सहिते सद्भुजैस्तर्जपन्ती दैव्येन्द्रं क्रूर दंष्ट्रा कटकट घटिते स्पष्ट भीमाट्टहासे माया जीमूत माला कुहरित गगने रक्ष मां देवि पद्मे

विधानम् - मास के दूसरे शनिवार से प्रारंभ कर प्रथम अयुत जप करले। और इस श्लोक से जल अभिमन्त्रित कर प्रोक्षण करने से भूतप्रेत पिशाचादि उपद्रव दूर होते हैं। किन्नर यक्षादि के उपद्रव स्वरूप अग्नि, अस्थि आदि की वर्षा होती हो तो बन्द हो जाती है।

॥ रामायण के कुछ सिद्ध मन्त्र॥

जीविका प्राप्ती के लिये -

विश्वभरन पोषनकर जोई। ताकर नाम भरत अस होई॥

खोई वस्तु पुनः प्राप्त करने के लिये -

गई बहोर गरीब नेवाजू। सरल सबल साहिब रघुराजु ॥

लक्ष्मीप्राप्ति के लिये -

जिमि सरिता सागर महि जाहि। जद्यपि ताहि कामना नाहीं ॥

तिमि सुख संपत्ति बिनही बौलाऐ। धरम शील पहिं जाहिं सुभाए॥

पुत्रप्राप्ति के लिये -

प्रेम मगन कौसल्या निसिदिन जातन जान ।

सुखत सनेह बस मात बाल चरित का गान ॥

विवाह के लिये -

तब जनक पाई बसिष्ठ आयसु ब्याह साज संवारिकै ।

मांडवी श्रुत कीरति उरमिला कुँअरि लई हैकारिकै ।

संकट नाश के लिये -

जो प्रभु दीन दयालु कहावा। आरति हरन वेदजनु गावा ।

जपहि नामु जन आरतभारी। मिटहि कुसंकट होई सुखारी ।

दीन दयालु विरिषु संभारी। हरहु नाथ मम संकट भारी ।

मुकद्दमा जीतने के लिये -

पवनतनय बल पवन समाना। बुद्धि विवेक विज्ञान निधाना ।

विद्याप्राप्ति के लिये -

गुरु गृहै गय पढन रघुराई। अल्पकाल विद्यासब पाई ।

बिक्री बढाने का मन्त्र — . . . .

भँवर वीर तू चेला मेरा, खोल दुकान कहाकर मेरा

उठे जो डंडी बिके जो माल, भँवर वीर सोखे नहीं जाय।

विधान - रविवार के दिन काले उड़द लेकर उन पर २१ बार यह मन्त्र पढ़कर दुकान में डाल दें तो तीन रविवार में बिक्री तीन-चार गुनी बढ़ जायेगी।

शिघ्र मन्त्र सिद्ध करने की विधि -

शुभ मुहूर्त्त में रात्रि के उपरान्त पवित्र स्थान में काशी की ओर मुँह करके अष्टांग हवन सामग्री से एक माला या १०८ मन्त्र से आहुति देवे अर्थात् एक बार चौपाई पढ़कर एक आहुति देवे। इस प्रकार एक सौ आठ बार मन्त्र उच्चारण के साथ १०८ आहुतियाँ देने पर एक रात्रि में ही मन्त्र सिद्ध हो जाता है। फिर जब जिस कार्य के लिए आवश्यकता हो इसका श्रद्धापूर्वक जबतक कार्यसिद्ध न हो नित्य जप करते रहना चाहिये।

अष्टांग हवन सामग्री इस प्रकार है – चन्दन का बुरादा, तिल, शुद्ध गौघृत, शक्कर, अगर, तगर, कर्पूर, केशर, नागरमोथा, पंचमेवा, जौ और चांवल।

रक्षा रेखा –

मन्त्रसिद्धि करने के लिए या किसी संकट पूर्ण स्थान पर रात्रि व्यतीत करने के लिए अपने चारों और रक्षा की रेखा खींच लेनी चाहिए श्री लक्ष्मणजी ने सीताजी की कुटिया के पास जो रक्षारेखा खींची थी उसी लक्ष्य पर यह रक्षामन्त्र है। इस की १०८ आहुतियां देकर सिद्ध कर लेना चाहिये।

मामभिरक्षय रघुकुल नायक । घृतवर चाप रुचिकर सायक ॥

॥ घण्टाकर्ण मणिभद्र यक्षराज साधन विधि ॥

यह सिद्ध मंत्र है साधक को सदाचारी होना चाहिये। सदाचार व तन्मनस्कता यदि हो तो इनकी काम्य साधना यश वृद्धि के साथ भोग-मोक्ष दोनों देने वाली होती है। प्रेतादि उपद्रव शीघ्र नष्ट होते हैं।

घण्टाकर्ण के मंत्र इस प्रकार है–

(१)

ॐ ह्रीं श्रीं क्लीं घण्टाकर्ण महावीर सर्व व्याधिविनाशक ।
आधिं व्याधिं विपत्तिं च महाभीत्तिं विनाशय ॥
नाममंत्रोऽस्ति ते सिद्धः सर्व-मंगलकारकः ।
इष्टसिद्धिं महासिद्धिं जयं लक्ष्मीं विवर्धय ॥
त्वच्छ्रद्धाभक्तियोगेन भवन्तु सर्वशक्तयः ।
पराभवन्तु दुष्टाश्च शत्रवो वैरि-दुर्जनाः ॥
आपत्-कालेषु मां रक्ष मम बुद्धिं प्रकाशय ।
सर्वोपद्रवतो रक्ष घोररोगान् विनाशय ॥
ॐ ह्रीं श्रीं क्लीं घण्टाकर्ण महावीर ! धन समृद्धिं-प्रवर्द्धय।
राज्यं च राज्यमानं च बलं बुद्धिं प्रवर्द्धय ॥
ॐ क्रों ह्रीं श्रीं घण्टाकर्ण महावीर ! सर्वव्याधि विनाशक
महारोगान् भयान् घोरान् नाशय नाशय द्रुतम् ॥
दर्शनं देहि प्रत्यक्षं संरक्ष सर्व सङ्कटात् ।
रणे वने समुद्रे च रक्ष संरक्ष मे द्रुतम् ॥

अग्निचौरादितो रक्ष त्वन्नाममंत्रजापतः ।
ह्रीं घण्टाकर्ण! नमोऽस्तु ते ठः ठः स्वाहा ॥

(२)

ॐ घण्टाकर्ण महावीर सर्वव्याधि विनाशकः ।
विस्फोटकभयं-घोरं रक्ष रक्ष महाबल ॥

इस मंत्र के जप करने से समस्त विघ्न, उपद्रव दूर होते है।

(३)

ॐ ऐं ह्रीं श्रीं क्लीं नवपद मणिभद्राय नमः ।
ॐ ऐं ह्रीं श्रीं क्लीं मणिभद्र ाय स्वाहा ॥
ॐ ह्रीं श्रीं भगवते श्रीमणिभद्राय ह्रीं श्रीं कण कण क्लीं फण फट् फट् स्वाहा ॥ ॐ क्लीं क्लीं क्लीं मणिभद्र-चेटकाय सर्व-सिद्धि-कराय मम स्वप्ने अमुक कार्यं दर्शय दर्शय स्वाहा।
ॐ ॐ ॐ ॐ ॐ।

लाल कनेर पुष्प पर मणिभद्र मंत्र का जप कर सिरहाने रखकर सोवें तो स्वप्न में वार्त्ता कहे। जैन ग्रंथों के अनुसार मणिभद्र व्यापार वृद्धिकारक है। सात सूंड के हाथी पर सवार है एवं व्यापार में कुशल है। कोई क्षेत्रपाल मानते हैं तो कोई यक्षराज मानते हैं।

नारियल की गिरी, छोहारा, दाख, घी, शक्कर, मधु इनसे १२००० बार **आहुतियाँ** देने से सर्व उपद्रवों की शान्ति होती है। प्रातः **जल** के ऊपर हाथ रखकर २१ बार मंत्र पढ़कर तीन अञ्जलि उस **जल** का पान करने से **विद्यावृद्धि** होती है। अपने ओढ़ने के वस्त्र को उक्त मंत्र से अभिमंत्रित कर ओढ़ने से सभी प्रकार के भयों की निवृति होती है। **लक्ष्मी प्राप्ति** के लिये भोजन करने के बाद श्वेत वस्त्र धारण कर पूर्वाभिमुख होकर बैठे। ७२ दिनों तक श्वेत आसन पर बैठकर सवा लाख जप करे। जप पूरा होने पर मेवो से होम करे। ६ महिने के भीतर धन की वृद्धि होती है।

मंत्र से सात बार फूँक देने से दाढ़ का दन्त-क्लेश दूर होता है। कन्या द्वारा काते गये सूत के नौ तागो को सिर से पैर तक नाप कर, उसमें सात गाँठें देकर २१ बार अभिमंत्रण और गुग्गल की धूप देकर स्त्री की कमर में बाँधने से **गर्भस्तंभन** होता है। चन्दन को घिसकर उस जल को मंत्र से अभिमंत्रित कर भूत-ग्रह से पीड़ित व्यक्ति को पिलाने से भूत भय दूर होता है। सात बार भभूत से माथे को झाड़ने से

सिर का दर्द दूर होता है। शीतज्वर मासिकज्वर, मोतीझरा आदि २१ बार झाड़ने से दूर होते है।

बिक्री की जाने वाली वस्तुऐं यदि विक्रय न हो तो सात बार उन पर हाथ रखकर मंत्र पढ़ना चाहिये। इससे बिक्री में वृद्धि होगी। हिंगुल से घर के भीतर दीवार पर मंत्र लिखने से आधि व्याधि, महा-मारी आदि नहीं होती। मंत्र को १०८ बार **चित्त लेटकर** जप करे और धूप दे, नाभि पर घी का **दीपक** सुरक्षित रूप से जलाए, सात दिनो में चोरी गई वस्तु की प्राप्ति होती है।

॥ अथ प्रज्ञावर्द्धन स्तोत्रम् ॥

विनियोग: - **ॐ अस्य श्रीविवर्द्ध स्तोत्रमन्त्रस्य भगवानशिव: ऋषि अनुष्टुप् छन्द: स्कन्दकुमारो देवता प्रज्ञा सिद्ध्यर्थ जपे विनियोग:।**

योगेश्वरो महासेन: कार्तिकेयोऽग्निनन्दन: ।
स्कंद: कुमार सेनानी स्वामी शंकर सम्भव: ॥
गांगेयस्ताम्र चूडश्च ब्रह्मचारी शिखिध्वज: ।
तारकारिरुमापुत्र: क्रौंचारिश्च षडानन: ।
शब्द ब्रह्म समूहश्च सिद्ध: सारस्वतो गुह: ।
सनत्कुमारो भगवान भोगमोक्षप्रद: प्रभु: ॥
शरजन्मा गणाधीश: पूर्वजो मुक्तिमार्गकृत् ।
सर्वागमप्रणेता च वाञ्छितार्थप्रदर्शक: ॥
अष्टाविंशति नामानि मदीयानीतिय: पठेत् ।
प्रत्यूषे श्रद्धयायुक्तो मूको वाचस्पतिर्भवेत् ॥
महामन्त्र मयानीति मम नामानि कीर्तयेत् ।
महाप्रज्ञामवाप्नोति नात्रकार्याविचारण: ॥
पुष्यनक्षत्रमारभ्य पुन: पुष्ये समाप्य च ।
अश्वत्थमूले प्रतिदिनं दशवारं तु संपठेत् ॥
सप्तविंशादिनैरेकं पुरश्चरणकं भवेत्

संपुटमन्त्र -

या देवी स्तूयते नित्यं विबुधै: वेदपारगै: ।
सा मे वसतु जिह्वाग्रे ब्रह्मरूपा सरस्वती ॥

प्रतिदिन प्रातःकाल ब्रह्ममुहुर्त्त में मयूर वाहिनी श्री सरस्वती की मूर्ति या चित्र के सामने घृतदीपक रखकर पंचोपचार से पूजा करके प्रथम उपर्युक्त संपुट मन्त्र की एक माला फिर स्तोत्र और अन्त में एक माला संपुट मन्त्र का जप करें।

पुष्य नक्षत्र के दिन से अगले पुष्य तक २७ दिन प्रतिदिन १० पाठ करें। अश्वत्थ (पीपल) वृक्ष के नीचे बैठकर २७ दिन में ही सिद्धि होती है। (शालिहासः)

॥ प्रस्थानसिद्धिप्रद मन्त्रः॥

ॐ क्लीं गच्छ गौतम्। शीघ्रं त्वं ग्रामेषु नगरेषु च द्रव्याच्छादन मिष्टान्नां कल्पयस्व महामुने! क्लीं ॐ ॥ श्रीगौतमाय नमः (५ बार जपें)

इस मन्त्र का गायत्री मन्त्र संपुटित कर ग्रहण में १०८ बार जप लेवें। फिर जब कभी यात्रा में जाना होतो गणपति स्मरण के पश्चात् ५ बार इस मन्त्र का स्मरण कर प्रस्थान करें। अवश्य ही यात्रा आनन्दपूर्वक निवृत्ति होगी। बहुधाः इसका अनुभव किया गया है। गौतम ऋषि का यह मन्त्र जावद के कर्मनिष्ठ महापुरुष के द्वारा प्राप्त हुआ।

॥ अथ शत्रुघ्नकवचम्॥

ध्यानम् –

शत्रुघ्नं धृतकार्मुकं धृतमहातूणीरवाणोत्तमं
पार्श्वे श्रीरघुनन्दनस्य विनयाद्वामे स्थितं सुन्दरम्।
रामं स्वीयकरेण तालदलजं धृत्वाऽतिचित्रं वरं
सूर्याभं व्यजनं सभास्थितमहंतं वीजयंतं भजे ॥

विनियोगः – **अस्य श्रीशत्रुघ्नकवचमन्त्रस्य अगस्त ऋषिः। श्रीशत्रुघ्नो देवता। अनुष्टुप् छन्दः। सुदर्शन इति बीजम्। कैकेयीनन्दन इति शक्तिः। श्रीभरतानुज इति कीलकम्। भरतमन्त्रीत्यस्त्रम्। श्रीरामदास इति कवचम्। लक्ष्मणांशज इति मन्त्रः। श्रीशत्रुघ्नप्रीत्यर्थं सकलमनः कामनासिद्ध्यर्थं जपे विनियोगः।**

करन्यासः – **ॐ शत्रुघ्नाय अंगुष्ठाभ्यां नमः। ॐ सुदर्शनाय तर्जनीभ्यां नमः। ॐ कैकेयी नन्दनाय मध्यमाभ्यां नमः। ॐ भरतानुजाय अनामिकाभ्यां नमः। ॐ भरतमंत्रिणे कनिष्ठिकाभ्यां नमः। ॐ रामदासाय करतलकरपृष्ठाभ्यां नमः।**

हृदयादिषडंगन्यासः – ॐ शत्रुघ्नाय हृदयाय नमः। ॐ सुदर्शनाय शिरसे स्वाहा। ॐ कैकेयीनन्दनाय शिखायै वषट्। ॐ भरतानुजाय कवचाय हुम्। ॐ भरतमंत्रिणे नेत्रत्रयाय वौषट्। ॐ रामदासाय अस्त्राय फट्।

ध्यानम् –

रामस्य संस्थितं वामे पार्श्वे विनयपूर्वकम्।
कैकेयीनन्दनं सौम्यं मुकुटेनातिरंजितम् ॥१॥
रत्नकंकणकेयूर वनमालाविराजितम्।
रशनाकुण्डलधरं रत्नहारसनूपुरम् ॥२॥
व्यजनेन वीजयंतं जानकीकांतमादरात्।
रामन्यस्तेक्षणं वीरं कैकेयीतोषवर्द्धनम् ॥३॥
द्विभुजं कंजनयनं दिव्यपीतांबरान्वितम्।
सुभुजं सुन्दरं मेघश्यामलं सुन्दराननम् ॥४॥
रामवाक्ये दत्तकर्णं रक्षोघ्नं खड्गधारिणम्।
धनुर्बाणधरं श्रेष्ठं धृततूणोंरमुत्तमम् ॥५॥
सभायां संस्थितं रम्यं कस्तूरीतिलकांकितम्।
मुकुटस्थावतंसेन शोभितं च स्मिताननम् ॥६॥
रविवंशोद्भवं दिव्यरूपं दशरथात्मजम्।
मथुरावासिनं देवं लवणासुरमर्दनम् ॥७॥
इति ध्यात्वा तु शत्रुघ्नं रामपादेक्षणं हृदि।
पठनीयं वरं चेदं कवचं तस्य पावनम् ॥८॥

॥ स्तोत्रम् ॥

पूर्वे त्ववतु शत्रुघ्नः पातु याम्ये सुदर्शनः।
कैकेयीनन्दनः पातु प्रतीच्यां सर्वदा मम ॥९॥
पातूदीच्यां रामबन्धुः पात्वधो भरतानुजः।
रविवंशोद्भवश्चोर्ध्वं मध्ये दशरथात्मजः ॥१०॥
सर्वत पातु मामत्र कैकेयीतोषवर्द्धनः।
श्यामलाङ्गः शिरः पातु भालं श्रीलक्ष्मणांशजः ॥११॥
भ्रुवोर्मध्ये सदा पातु सुमुखोऽत्रावनीतले।
श्रुतकीर्तिपतिर्नेत्रे कपोले पातु राघवः ॥१२॥

कर्णौ कुण्डलकर्णोऽव्यान्नासाग्रं नृपवंशजः ।
मुखं मम युवा पातु पातु वाणीं स्फुटाक्षरः ॥१३॥
जिह्वां सुबाहुतातोऽव्याद्यूपकेतुपिता द्विजान् ।
चुबुकं रम्यचुबुकः कंठं पातु सुभाषणः ॥१४॥
स्कंधौ पातु महातेजा भुजौ राघववाक्यकृत् ।
करौ मे कंकणधरः पातु खड्गी नखान्मम ॥१५॥
कुक्षी रामप्रियः पातु पातु वक्षो रघूत्तमः ।
पार्श्वे सुरार्चितः पातु पातु पृष्ठं वराननः ॥१६॥
जठरं पातु रक्षोघ्नः पातु नाभिं सुलोचनः ।
कटी भरतमन्त्री मे गुह्यं श्रीरामसेवकः ॥१७॥
रामार्पितमनाः पातु लिङ्गमूरू स्मिताननः ।
कोदंडधारी पात्वत्र जानुनी मम सर्वदा ॥१८॥
राममित्रं पातु जंघे गुल्फौ पातु सुनूपुरः ।
पादौ नृपतिपूज्योऽव्याच्छीमान्पादांगुलीर्मम ॥१९॥
पात्वंगानि समस्तानि ह्यदरांगः सदा मम ।
रोमाणि रमणीयोऽव्याद्रात्रौ पातु सुधार्मिकः ॥२०॥
दिवा मे सत्यसंधोऽव्याद्भोजने शरसत्करः ।
गमने कलकण्ठोऽव्यात्सर्वदा लवणांतकः ॥२१॥
एवं शत्रुघ्नकवचं मया ते समुदीरितम् ।
ये पठंति नरास्त्वेतत्ते नराः सौख्यभागिनः ॥२२॥
शत्रुघ्नस्य वरं चेदं कवचं मंगलप्रदम् ।
पठनीयं नरैर्भक्त्या पुत्रपौत्रप्रवर्द्धनम् ॥२३॥
अस्य स्तोत्रस्य पाठेन यं यं कामं नरोऽर्थयेत् ।
तं तं लभेन्निश्चयेन सत्यमेतद्वचो मम ॥२४॥
पुत्रार्थी प्राप्नुयात्पुत्रं धनार्थी धनमाप्नुयात् ।
इच्छाकामं तु कामार्थी प्राप्नुयात्पठनादिना ॥२५॥
कवचस्यास्य भूम्यां हि शत्रुघ्नस्य विनिश्चयात् ।
तस्मादेतत्सदा भक्त्या पठनीयं नरैः शुभम् ॥२६॥

॥ इति आनंदरामायणे सुतीक्ष्णागस्त्य संवादे शत्रुघ्नकवचं संपूर्णम् ॥

॥ श्रीमद्भागवतानुष्ठानचक्रम् ॥

एकाहपारायणम्

दिन	अध्याय	स्कंध	अध्याय
१	३३५	१२	१३

एकाहपारायणं शुक्राचार्य्यमतात् श्रावणकृष्णपक्षे कुर्यात्

द्व्यहपारायणम्

दिन	अध्याय	स्कंध	अध्याय
१	१९०	९	१३
२	१४५	१२	१३

त्र्यारुणिमतात् द्व्यहपारायणं श्रावण शुक्लपक्षे कुर्यात्

त्र्यहपारायणम्

दिन	अध्याय	स्कंध	अध्याय
१	१५३	७	१५
२	१३८	१०	९०
३	४४	१२	१३

त्र्यहपारायणं हारीतमतात् मुक्तिकाम आश्विनशुक्लपक्षे कुर्यात्

चतुरहपारायणम्

दिन	अध्याय	स्कंध	अध्याय
१	८१	४	२३
२	८९	८	१७
३	८३	१०	५२
४	८२	१२	१३

चतुरहपारायणं सर्वकामना प्राप्तौ शौनकमतात् भाद्रपद शुक्लपक्षे कुर्यात् ॥

पञ्चाहपारायणम्

दिन	अध्याय	स्कंध	अध्याय
१	६९	४	७
२	६९	६	१९
३	६३	९	२४
४	६९	१०	६९
५	६५	१२	१३

पंचाहपारायणं अकृतव्रणमतात सर्वकामनाप्राप्त्यर्थै भाद्रपदशुक्लपक्षे कुर्यात् ॥

षडहपारायणम्

दिन	अध्याय	स्कंध	अध्याय
१	६१	३	३२
२	४६	५	१४
३	७०	८	२४
४	६३	१०	३९
५	७०	११	३९
६	२५	१२	१३

षडहपारायणं शांशपायनमतात् धनप्रासिकामो भाद्रपद कृष्णपक्षे कुर्यात् ॥

सप्ताहपारायणम्

दिन	अध्याय	स्कंध	अध्याय
१	७१	४	९
२	६१	६	१३
३	५२	९	७
४	५१	१०	३४
५	३९	१०	७३
६	१७	१०	९०
७	४४	१२	१३

सप्ताहपारायणं शांशपायन मताद्धनप्रासिकामो भाद्रपद कृष्णपक्षे कुर्यात् ॥

सप्ताहपारायणम्

दिन	अध्याय	स्कंध	अध्याय
१	५३	३	२४
२	४३	५	३
३	५०	७	८
४	५९	१०	४
५	५१	१०	५५
६	४१	११	६
७	३८	१२	१३

सप्ताहपारायणं वशिष्ठ मतान्पुत्रप्रासिकामो वैशाखे कुर्यात् ॥

सप्ताहपारायणम्

दिन	अध्याय	स्कंध	अध्याय
१	४९	३	१०
२	६७	५	२३
३	३७	७	१५
४	४८	९	२४
५	४२	१०	४२
६	४८	११	९
७	४४	१२	१३

सप्ताहपारायणं सूतमतात्रिष्काम: कार्तिकशुक्लपक्षे कुर्यात् ॥

सप्ताहपारायणम्

दिन	अध्याय	स्कंध	अध्याय
१	२९	२	१०
२	६४	४	३१

सप्ताहपारायणम्

दिन	अध्याय	स्कंध	अध्याय
१	४८	३	१९
२	५१	५	६

सप्ताहपारायणम्

दिन	अध्याय	स्कंध	अध्याय
१	६१	३	३६
२	५७	५	२६

३	४५	६	१९	३	४९	७	१०	३	३४	७	१५
४	३९	८	२४	४	५३	९	२४	४	४८	९	२४
५	७३	१०	४९	५	४९	१०	४९	५	९०	१०	९०
६	७२	११	३१	६	४१	१०	९०	६	३२	११	३१
७	१३	१२	१३	७	४४	१२	१३	७	१३	१२	१३

सप्ताहपारायणं विश्वामित्रमतात् संकटमोचनार्थ मार्गशीर्षे कुर्यात् ॥

सप्ताहपारायणं जमदाग्निमतादिपनाशनकाम: पौषै: कुर्यात् ॥

सप्ताहपारायणं भारद्वाजमतात् बंधमोक्षकामो माघे कुर्यात् ॥

सप्ताहपारायणम्

दिन	अध्याय	स्कंध	अध्याय
१	४८	३	१९
२	६०	५	१५
३	४५	७	१५
४	६०	१०	१२
५	७२	१०	८४
६	३७	११	३१
७	१३	१२	१३

सप्ताहपारायणं गौतममतात् शत्रुपराजयकाम: फाल्गुने कुर्यात् ॥

सप्ताहपारायणम्

दिन	अध्याय	स्कंध	अध्याय
१	४९	३	२०
२	५०	५	६
३	३९	६	१९
४	५९	९	२०
५	३९	१०	३५
६	६१	११	६
७	३८	१२	१३

सप्ताहपारायणं अत्रिमता द्रौगमुक्तिकामश्चैवे कुर्यात् ॥ कुर्यात् ॥

दशाहपारायणम्

दिन	अध्याय	स्कंध	अध्याय
१	३५	३	६
२	३४	४	७
३	३३	५	९
४	३६	६	१९
५	३९	८	२४
६	३५	१०	११
७	३४	१०	४५
८	३४	१०	७९
९	३४	११	२३
१०	२१	१२	१३

दशाहपारायणं कश्यपमता–द्राज्यप्राप्तिकाम आषाढे शुक्लपक्षे कुर्यात् ॥

पञ्चदशाहपारायणम्

दिन	अध्याय	स्कंध	अध्याय
१	२१	२	२
२	२३	३	१५
३	२२	४	४
४	२३	४	२७
५	२२	५	१८
६	२३	६	१५
७	२४	८	५
८	२५	९	६
९	२२	१०	४
१०	२२	१०	२६
११	२३	१०	४९
१२	२१	१०	७०

मासपारायणम्

कृष्णपक्षे

दिन	अध्याय	स्कंध	अध्याय
१	११	१	११
२	१०	२	२
३	१०	३	२
४	१०	३	१२
५	११	३	२३
६	११	४	१
७	९	४	१०
८	१२	४	२२
९	१०	५	१
१०	९	५	१०
११	१०	५	२०
१२	११	६	५

शुक्लपक्षे

दिन	अध्याय	स्कंध	अध्याय
१	१४	८	१५
२	१३	९	४
३	१४	९	१८
४	१२	१०	६
५	११	१०	१७
६	१३	१०	३०
७	१२	१०	४२
८	१२	१०	५४
९	११	१०	६५
१०	१३	१०	७८
११	९	१०	९७
१२	१२	११	९

१३	२२	११	२	१३	११	६	१६	१३	१२	११	२१
१४	२३	११	२५	१४	१०	७	७	१४	१२	१२	२
१५	१९	१२	१३	१५	९	८	१	१५	११	१२	१३

वृहस्पतिमतात्सर्वकामासिकामी ज्येष्ठशुक्लपक्षे आषाढे वा कुर्यात् ॥

मासपारायणं यदाकृष्णादि तदा शुक्लांतं यदा शुक्लादि तदा कृष्णांतम्। एवं प्रजापालनादिसर्वकामनाप्राप्तिम् लकं वृहस्पतिसत–मिदम्। एवं द्विमासिकषाण्मासिक सांवत्सरिकादिकमपि पारायणे ज्ञेयम्। वृहस्पति मतस्पष्टि: समाप्ता॥ मतान्तरे वैशाखशुक्ल पञ्चर्मामारभ्य ज्येष्ठशुक्ल पञ्चमीं यावत्॥

॥ अथ महाभारतश्रवण विधानम् ॥

(महाभारते)

अत: परं प्रवक्ष्यामि यानि देयानि भारते ।
वाच्यमाने तु विप्रेभ्यो राजन्पर्वणिपर्वणि ॥१॥
स्वस्ति वाच्य द्विजानादौ तत: कार्ये प्रवर्तिते ।
समाप्ते पर्वणि तत: स्वशक्तया पूजयेद्द्विजान् ॥२॥
आदौ तु वाचकं चैव वस्त्रगंधसमन्वितम् ।
विधिवद्भोजयेद्राजन्मधुपायसमुत्तमम् ॥३॥
ततो मूलफलप्रायं पायसं मधुसर्पिषा ।
आस्तिकं भोजयेद्राजन्दद्याच्चैव गुडौदनम् ॥४॥
अपूपैश्चैव पूपैश्च मोदकैश्च समन्वितम् ।
सभापर्वणि राजेन्द्र हविष्यं भोजयेद्द्विजान् ॥५॥
आरण्यके मूलफलैस्तर्पयेत्तु द्विजोत्तमान् ।
अरणीपर्व चासाद्य जल कुंभान्प्रदापयेत् ॥६॥
तर्पणानि च मुख्यानि वन्यमूलफलानि च ।
सर्वकामगुणोपेतं विप्रेभ्योऽन्नं प्रदापयेत् ॥७॥
विराट्पर्वणि तथा वासांसि विविधानि च ।
उद्योगे भरतश्रेष्ठ सर्वकामगुणान्वितम् ॥८॥
भोजनं भोजयेद्विप्रान् गन्धमाल्यैरलंकृतान् ।
भीष्मपर्वणि राजेन्द्र दत्त्वा यानमनुत्तमम् ॥९॥

ततः सर्वगुणोपेतं मन्नं दद्यात्सुसंस्कृतम् ।
द्रोणपर्वणि विप्रेभ्यो भोजनं परमार्चितम् ॥१०॥
शराश्च देया राजेन्द्र चापान्यसिवरास्तथा ।
कर्णपर्वण्यपि तथा भोजनं सर्वकामिकम् ॥११॥
विप्रेभ्यः संस्कृतं सम्यग्दद्यात्संयतमानसः ।
शल्यपर्वणि राजेन्द्र मोदकैः सगुडौदनैः ॥१२॥
अपूपैस्तर्पणैश्चैव सर्वमन्नं प्रदापयेत् ।
गदापर्वण्यपि तथा मुद्गमिश्रं प्रदापयेत् ॥१३॥
स्त्रीपर्वणि तथा रत्नैस्तर्पयेत्तु द्विजोत्तमान् ।
घृतौदनं पुरस्ताच्च ऐषीके दापयेत्पुनः ॥१४॥
ततः सर्वगुणोपेतमन्नं दद्यात्सुसंस्कृतम् ।
शान्तिपर्वणि च तथा हविष्यं भोजयेद्द्विजान् ॥१५॥
आश्विमेधिकमासाद्य भोजनं सर्व कामिकम् ।
तथाश्रमनिवासे तु हविष्यं भोजयेद्द्विजान् ॥१६॥
मौसले सार्वगुणितं गंधमाल्यानुलेपनम् ।
महाप्रस्थानिके तद्वत्सर्वकामगुणान्वितम् ॥१७॥
स्वर्गपर्वण्यपि तथा हविष्यं भोजयेद्द्विजान् ।
हरिवंश्रसमाप्तौ तु महस्त्रं भोजयेद्द्विजान् ॥१८॥
गामेकां निष्कसंयुक्तां ब्राह्मणाय निवेदयेत् ।
तदर्धेनापि दातव्या दरिद्रेणापि पार्थिव ॥१९॥
प्रतिपर्वसमाप्तौ तु पुस्तकं वै विचक्षणः ।
सुवर्णेन च संयुक्तं वाचकाय निवेदयेत् ॥२०॥
हरिवंशे पर्वणि च पायसं तत्र भोजयेत् ।
पारणे पारणे राजन्यथावद्भरतर्षभ ॥२१॥
समाप्य सर्वाः प्रयतः संहिताः शास्त्रकोविदः ।
शुभे देशे निवेश्याथ क्षौमवस्त्राभिसंवृताः ॥२२॥
अर्चयेत यथान्यायं गंधमाल्यैः पृथक्पृथक् ।
हिरण्यं च सुवर्णं च दक्षिणामथ दापयेत् ॥२३॥

सर्वथा तोषयेद्भक्त्या वाचकं गुरुमात्मनः ।
वाचके परितुष्टे तु शुभा प्रीतिरनुत्तमा ॥२४॥
ब्राह्मणेषु तु तुष्टेषु प्रसन्नाः सर्वदेवताः ।
अष्टादशपुराणानां श्रवणाद्यत्फलं भवेत् ॥२५॥
तत्फलं समवाप्नोति वैष्णवो नात्र संशयः ।
स्त्रियश्च पुरुषाश्चैव वैष्णवं पदमाप्नुयुः ॥२६॥
स्त्रिभिश्च पुत्रकामाभिः श्रोतव्यं वैष्णवं यशः ।
दक्षिणा चात्र देया वै निष्कपंचसुवर्णकम् ॥२७॥
वाचकाय यथाशक्त्या यथोक्तं फलमिच्छता ।
स्वर्णशृंगीं च कपिलां सवत्सां वस्त्रसंवृताम् ॥२८॥
वाचकाय च दद्याद्धि आत्मनः श्रेय इच्छता ।
अलंकारं प्रदद्याच्च पाण्योर्वै भरतर्षभ ॥२९॥
कर्णस्याभरणं दद्याद्धनं चैव विशेषतः ।
भूमिदानं समादद्याद्वाचकाय नराधिप ॥३०॥
शृणोति श्रावयेद्वापि सततं चैव यो नरः ।
सर्वपापविनिर्मुक्तो वैष्णवं पदमाप्नुयात् ॥३१॥
पितृनुद्धरते सर्वानेकादशसमुद्भवान् ।
आत्मानं ससुतं चैव स्त्रियं च भरतर्षभ ॥३२॥
दशांशश्चैव होमोऽपि कर्त्तव्योत्र नराधिप ।
इदं मया तवाग्रे च प्रोक्तं सर्वे नरर्षभ ॥३३॥

॥ इति महाभारतश्रवणविधानं समाप्तम् ॥

अथ श्रीवाल्मीकिमुनिकृतस्यादिकाव्यस्य श्रीमद्रामायणाख्यस्य नवाहपाठ विधानम्

(रामसेवाग्रन्थे)

माघकार्तिकवैशाखे चैत्र वान्यतमेपि च ।
यथावकाशः श्रद्धा च तथैव शृणुयान्नरः ॥१॥
चैत्रे माघे कार्तिके च सिते पक्षे च वाचयेत् ।

नवाहे सुमहापुण्यं श्रोतव्यं च प्रयत्नतः ॥२॥
पञ्चम्या दिनमारभ्य रामायणकथामृतम् ।
नवाहश्रवणेनैव सर्व पापैः प्रमुच्यते ॥३॥
तिथिः सैव महापुण्या स कालः सर्वपुण्यदः ।
यस्मिन्नमायणकथाश्रवणे जायते मतिः ॥४॥
पुण्यक्षेत्रे पुण्यतीर्थे तुलसीविष्णुसन्निधौ ।
स्वगृहे वा पठेद्यस्तु स देवैः परिपूज्यते ॥५॥
पूर्वोत्तरमुखो वक्ता श्रोतारस्तत्पुरः स्थिताः ।
एकाग्रतरचित्तेन पठेद्वा शृणुयान्नरः ॥६॥
व्यासासनं समास्तीर्य तदग्रे पुस्तकासनम् ।
वितानपल्लवो-पेतं कदलीस्तंभमण्डितम् ॥७॥
श्रोतृणामासनं स्थाप्यं विशालं तत्पुरः पुनः ।
श्रोतृभिश्च तथा वक्तुर्व्यासादग्रंथस्य चोच्चता ॥८॥
पुराणं पूजयेन्नित्यं नित्यं व्यासस्य पूजनम् ।
मध्याह्ने घटिकायुग्मं विश्रामं कारयेत्तथा ॥९॥
कथान्ते भगवन्नामस्मरणं संप्रकीर्तितम् ।
समाप्तौ वस्त्रभूषाद्यैर्द्रव्यैर्व्यासस्य तोषणम् ॥१०॥

॥ अथ नवदिनपर्यन्तं कथाविश्रामस्थलकथनम् ॥

प्रथमे तु अयोध्यायाः षट्सर्गांते शुभा स्थितिः ।
तस्यैवाऽशीतिसर्गान्ते द्वितीये दिवसे स्थितिः ॥१॥
तथा विंशतिसर्गान्ते चारण्यस्य तृतीयके ।
दिने चतुर्थे षट्चत्वारिंशत्मर्गे कथास्थितिः ॥२॥
किष्किंधाख्यस्य कांडस्य पाठविद्भिरुदाहृता ।
सुसप्त चत्वारिंशत्के सर्गान्ते सुन्दरे स्थितिः ॥३॥
पञ्चमे दिवसे कुर्य्यादथ षष्ठे तथोच्यते ।
युद्धकाण्डस्य पञ्चाशत्सर्गान्ते विमला स्थितिः ॥४॥
एकोनशतसंख्याके सर्गान्ते सप्तमे दिने ।
युद्धस्यैव तु काण्डस्य विश्रामः संप्रकीर्तितः ॥५॥

तथा चोत्तरकाण्डस्य षट्त्रिंशत्सर्गपूरणे ।
अष्टमे दिवसे कृत्वा स्थितिश्च नवमे दिने ॥६॥
शेषं समाप्य युद्धस्य चान्त्यं सर्गं पुनः पठेत् ।
रामराज्यकथा यस्मिन्सर्ववांछितदायिनी ॥७॥
एवं पाठक्रमः पूर्वैराचार्यैश्च विनिर्मितः ।
यः करोति नरश्रेष्ठः शृणुयाद्वा समाहितः ॥८॥
धर्म्मार्थकाममोक्षाणां फलं त्वविकलं लभेत् ।
कथान्ते मण्डपं कृत्वा सर्वतोभद्रसंयुतम् ॥९॥
सस्थंडिलं सकुण्डं वा पताकाकदलीयुतम् ।
पूजयेद्गणराजं च ब्राह्मणैः स्वस्ति वाचयेत् ॥१०॥
मातृकापूजनं नान्दीश्राद्धं भूसुरवर्णनम् ।
मण्डले सर्वतोभद्रे हैमं रामं प्रपूजयेत् ॥११॥
जानकीसहितं वस्त्रभूषास्त्रक् चन्दनादिभिः ।
पार्श्वे भरतशत्रुघ्नौ हनुमन्तं पुरः स्थितम् ॥१२॥
पृष्ठे विभीषणं भक्तं सुग्रीवं तु समर्चयेत् ।
लक्ष्मणं पादपीठस्य सन्निधौ विधिनार्चयेत् ॥१३॥
चतुःशतोत्तरं चैव द्विसहस्रं तिलैस्तदा ।
हवनं मंत्रतः कुर्याद्द्वादशाक्षरविद्यया ॥१४॥
अष्टाक्षरेण वा रामषडक्षरत आचरेत् ।
तर्पणं तद्दशांशेन मार्ज्जनं तद्दशांशतः ॥१५॥
ब्राह्मणान्वैष्णवांश्चैव सदन्नेन तु भोजयेत् ।
एकपारायणस्यैषा संख्या होमे प्रकीर्तिता ॥१६॥
पाठवृद्ध्या तु होमस्य संख्यावृद्धिः प्रजायते ।
गोप्रदानादिकं सर्वे दानं शक्त्या प्रदापयेत् ॥१७॥
व्यासाय पुस्तकं दद्याद्धेमसिंहासने स्थितम् ।
सांगतासिद्धये तस्य स्वर्णमुद्रां समर्पयेत् ॥१८॥
भूयसीं दक्षिणां दत्त्वा दीनानाथान् समर्चयेत् ।
एवं कृते मनुष्याणां दुर्लभोऽपि मनोरथः ॥१९॥

श्रीरामस्य प्रसादेन सुलभः स्यान्न संशयः ।
प्रतिमां कलशोपेतां मण्डलेन समन्विताम् ॥२०॥
विसर्जयित्वाऽऽचार्याय दद्यात्कर्म्मोगसिद्धये ।
कृतकृत्यं भावयित्वा चात्मानं तु हरिं स्मरेत् ॥२१॥

॥ इति श्रीवाल्मीकि रामायण नवाहपारायणविधानम् ॥

॥ अथ पञ्चदशीकाम्य प्रयोगः ॥

विनियोगः – **अस्य श्रीपञ्चदशीमन्त्रस्य दक्षिणामूर्तिऋषिः पंक्तिश्छन्दः त्रिपुरा देवता मम इह जन्मनि सकल दुरितोपशमनार्थं अमुककामनासिद्धये एतावत्संख्याक यन्त्रपूजनपूर्वक जपे विनियोगः।**

ऋष्यादिन्यास – **दक्षिणामूर्ति ऋषिये नमः** शिरसे। **पंक्ति छन्दसे नमः मुखे। त्रिपुरा० देवतायै नमः** हृदये। विनियोगाय **नमः** सर्वाङ्गे।

ध्यानम् –

ॐ बालार्कद्युतितेजसां त्रिनयनां रक्ताम्बरोल्लसिनीं
नानाभूषणभूषितां सुविमलां रत्नासने संस्थिताम्।
हस्तैः पाशधनुः शृणिं सुरुचिरं पद्मं मुदा बिभ्रतीं
श्रीचक्रस्थितसुन्दरीं त्रिजगतामाधारभूतां भजे ॥१॥

इतिध्यात्वा यथामिलितोपचारैः प्राणप्रतिष्ठापूर्वकं यन्त्रस्य पूजनं विधाय यथासंख्याकमन्त्रैर्यन्त्रपूजनं कुर्य्यात् ॥

यंत्र में अंकित अंकों के देवताओं का उनके कोष्ठक में पूजन करें।

मन्त्राः – ॐ एकपरमात्माने नमः, द्वाभ्यामश्विनीकुमाराभ्यां० त्रिभ्यो ब्रह्मविष्णुरुद्रेभ्यो० चतुर्भ्यो वेदेभ्यो० पञ्चभ्यः पृथिव्यादिभूतेभ्यो० षड्भ्यः ऋतुभ्यो० सप्तभ्यो मुनिभ्यो० अष्टभ्यो वसुभ्यो० नवभ्यो निधिभ्यो० एवं संपूज्य पुनः सम्पूज्य बलिं दद्यात्।

बलिं संस्थाप्य संप्रोक्ष्य मन्त्रः – ॐ श्रीं ऐं ह्रीं पञ्चदश्यै स्वाहा। इति॥

आरम्भादिसमाप्तिपर्यन्तं यन्त्रसंख्यां च कुर्यात्। दक्षिणां ब्राह्मणभोजनं च दत्त्वा विसर्जनं कुर्यात्। एवं कृते यन्त्रः सिद्धो भवति। सिद्धे मन्त्रे प्रकुर्वीत प्रयोगानिष्ट सिद्धये। इति पञ्चदशीयन्त्रपूर्णप्रयोगः समाप्तः।

वस्त्र, आसन, गंध एवं लेखनी का उल्लेख अलग-अलग कामना हेतु इस प्रकार है-

॥ अथ पञ्चदशीप्रयोगविधिः ॥

अथातः सम्प्रवक्ष्यामि सुन्दरीयन्त्रमुत्तमम्। यस्य विज्ञानमात्रेण त्रैलोक्य-विजयी भवेत्॥१॥ तद्यन्त्रं सम्प्रवक्ष्यामि शृणु यत्नेन साम्प्रतम्। नवधा कृतभूभागे नव कोष्ठानि चालयेत्॥२॥

तत्र सूत्रक्रमेणैव स्थाप्या अङ्का महेश्वरि। नव यन्त्राणि देवेशि प्रस्तारक्रम योगतः ॥३॥ तत्राश्वगतियोगेन हयमारुह्य पार्वती। तानि मार्गक्रमेणैव नव यन्त्राणि कारयेत् ॥४॥ एकादिरन्ध्रपर्य्यन्तं तत्रांकांस्तु प्रवेशयेत्। एतस्य फलबाहुल्यं शृणु यत्नेन साम्प्रतम्॥५॥ दशवारं तु सततं लोकसंमोहनं भवेत्। वारविंशतिकं कृत्वा सर्वाकर्षणकृद्भवेत्॥६॥ त्रिंशद्वारं नरः कृत्वा पृथिव्यां जयमाप्नुयात्। चत्वारिंशत्समारभ्य शतान्तं परमेश्वरि॥७॥ यः करोति महेशानि पुरश्चर्यायुतो नरः। अयुतन्तु पुरश्चर्यं यन्त्रमात्रं समाचरेत्॥८॥ पुरश्चर्यां समाप्यैवं प्रयोगांश्च प्रकारयेत्। पुरश्चरणविहीनस्य नेदमुक्तं महेश्वरि॥९॥ जीवहीनो यथा देही सर्वकर्मसु न क्षमः। पुरश्चरणहीनन्तु तथा यन्त्रं प्रकीर्तितम्॥१०॥ अलक्त केन विलिखेन्मोहनार्थं महेश्वरि। गोरोचनेन विलिखेद्वशीकरणसिद्धये॥११॥ कस्तूर्य्या विलिखेद्देवि सर्वाकर्षणसिद्धये। हरिद्रया तु विलिखेत्सर्वेषां स्तंभकर्म[illegible]॥१२॥ केशरेण लिखेद्देवि देवतादर्शनाय वै। धुस्तूरस्य रसेनैव मारणार्थं लिखेत्सुधीः॥१३॥ शवाङ्गारेण विलिखेच्छत्रूच्चाटन कर्मणि। विद्वेषणे तु विलिखेद्विभीतकरसेन वै॥१४॥ चन्दनेन लिखेच्छान्तौ विशेषः कथ्यते शृणु। ब्राह्मणो विलिखेत् भूर्जे ताडपत्रे तु भूभुजः॥१५॥ वैश्यस्तु विलिखेद्देवि कार्पासे सर्वसिद्धये। शूद्रो हि विलिखेद्देवि भूमिभागे प्रयत्नतः॥१६॥ यवनस्याविकं प्रोक्तं कालिके सर्वकर्मसु। एवमेव लिखेन् मस्या ह्यनेषां पूर्व ईरितम् ॥१७॥ दूर्वया विलिखेच्छांतो वैश्ये जातभवामतः। स्वर्णेन विलिखेद्देवि मोहनार्थं स्वसिद्धये॥१८॥ रौप्येण विलिखेद्यत्नात् सर्वाकर्षणसिद्धये। काकपक्षोत्थलेखिन्या मारणार्थं लिखेच्छिवे॥१९॥ स्तम्भनार्थं तु विलिखेल्लेखिन्या सारसोत्थया। उच्चाटन द्वेषेणे तु लोहेन संलिखेत्सुधीः॥२०॥ लेखिन्या लक्षणं देवि प्रोक्तमष्टांगुलं ततः। पञ्चतत्त्व क्रमेणैव पञ्चकार्य प्रसिद्धये॥२१॥ अष्टांगादि दशांगादि तथा पञ्चदशप्रिये। अंकयंत्रेण कथितं किन्तु बीजे प्रकीर्तितम्॥२२॥ रक्तांबरो रक्तमाल्यो रक्तवस्त्रानुभूषितः। रक्तासने विशेद्देवि यवभुग् वा हविष्यभुक् ॥२३॥ स्त्रियं

न गच्छेत् नियतो ब्रह्मचारी भवेत्तदा। ब्रह्मचर्यरतो यस्तु तस्य सिद्धिर्न संशयः ॥२४॥ तदांकयन्त्रं कुर्वीत फलभागी तदा भवेत्। अंकत्रयं विहायाशु यः कश्चित्सिद्धिमिच्छति ॥२५॥ स चक्षुषा विना रूपं दर्पणे द्रष्टुमिच्छति। अयुतं विलिखेद्देवि वन्दीमोचन कर्म्मणि ॥२६॥ अयुतं द्वितीयं कृत्वा गतराज्यमवाप्नुयात्। अयुतं त्रितयं कृत्वा भूविजयी विजायते ॥२७॥ शापानुग्रहसामर्थ्यं भवेद्वेदायुते शिवे। वाणायुतप्रयोगेण वाक्सिद्धिश्च भवेद्ध्रुवम् ॥२८॥ रसायुतं लिखित्वा वै जलमध्ये विनिक्षिपेत्। जलक्षेपेण मार्गेण पृथ्वीशं तु वशं नयेत् ॥२९॥ सप्तायुतं लिखेद्धीमान् साक्षाल्लक्ष्मीपतिर्भवेत्। अष्टायुतं लिखेद्यो वै इष्टसिद्धिमवाप्नुयात् ॥३०॥ नंदायुतं लिखित्वा तु नवनाथसमो भवेत्। लक्षमात्रं लिखेद्यो हि शिवतुल्यो भवेत्क्षणात् ॥३१॥ प्रत्यहं विलिखेद्देवि शतं वा तु तदर्धकम्। त्रिशतं वा लिखेद्देवि सहस्रं वा तदर्धकम् ॥३२॥ एवं क्रमेण कथितः पुरश्चर्य्या-विधिस्तव। एवं यः कुरुते मर्त्यस्तस्य सिद्धिर्भविष्यति ॥३३॥

॥ इति श्री शिव ताण्डव प्रत्यक्ष सिद्धि पञ्चदशी यंत्र विधि समासः॥

॥ अथ प्रयोगविधिः ॥

करन्यासः - ॐ ऐं ऐं लं क्षं रं स्वाहा आचमनं सर्वशुद्धितया कर्तव्यं। ॐ ह्रां वां अंगुष्ठाभ्यां नमः। ॐ ह्रीं वीं तर्जनीभ्यां नमः। ॐ ह्रूं वूं मध्यमाभ्यां नमः। ॐ ह्रैं वैं अनामिकाभ्यां नमः। ॐ ह्रौं वौं कनिष्ठिकाभ्यां नमः। ॐ ह्रः वः करतलकरपृष्ठाभ्यां नमः।

हृदयादिन्यासः - ॐ ह्रां वां हृदयाय नमः। ॐ ह्रीं वीं शिरसे स्वाहा। ॐ ह्रूं वूं शिखायै वषट्। ॐ ह्रै वैं कवचाय हुं। ॐ ह्रौं वौं नेत्रत्रयाय वौषट्। ॐ ह्रः वः अस्त्राय फट्।

अथमन्त्रः - ॐ ऐं ह्रीं श्रीं क्लीं महात्रिपुरसुन्दरी स्वाहा।

पूर्वं पञ्चदशीविद्यामन्त्रस्य सपादलक्षजपं कुर्य्यात्। एवं कृते मन्त्रः सिद्धो भवति। सिद्धे मन्त्रे प्रकुर्वीत प्रयोगानिष्टसिद्धये। प्रथमं मन्त्रस्य पुरश्चरणं कुर्यात् पश्चाद् यन्त्रं साधयेत्॥

पहले मन्त्र का पुरश्चरण करें पश्चात् यंत्र साधना करें।

अथातः संप्रवक्ष्यामि प्रयोगं महदद्भुतम्। रवौ वारेऽर्कदुग्धेन श्मशान भस्मना लिखेत् ॥१॥ साध्यवर्णस्य नामानि चितामध्ये विनिक्षिपेत्। विक्षिप्तो जायते मर्त्यः, अष्टोत्तरशतं तपेत्। पञ्चदशी विलोमं तु सन्ध्याकाले विशेषतः ॥२॥

चन्द्रवारे गृहीत्वा तु श्वेतदूर्वां च केशरम्। श्वेतगुञ्जासमायुक्तं कपिलापयमध्यतः ॥३॥ भौमवारे गृहीत्वा तु काकरक्तं सपक्षकम्। नामाक्षरं लिखेद्यन्त्रे मौनभावयुतो नरः ॥४॥ तस्य द्वारे लिखेद् भूमावुल्लंध्योच्चाटनं भवेत्। कुटुम्बानां च सर्वेषां यदि शक्रसमो रिपुः ॥५॥ बुधवारे गृहीत्वा तु नागकेशररोचनम्। सर्षपा तैलयुक्तेन लिखेद्यन्त्रं तदुत्तमम् ॥६॥ कृत्वा तु वर्तिकां तस्य चालयेन्मन्त्रभाविताम्। नृकपाले कज्जलं तु तज्जपेन्मोहनं जगत् ॥७॥ गुरुवारे हरिद्रे द्वे रोचनागुरुसघृतम्। यन्त्रराजं समालिख्य तस्य मध्ये तु नामकम् ॥८॥ आसनान्ते खनित्वा तु यन्त्रं स्थाप्यं शुभानने। कर्षणं जायते देवि नान्या श्रेष्ठा क्रिया स्मृता ॥९॥

प्रयोगान्तरम् – अथातः सम्प्रवक्ष्यामि प्रयोगं महदद्भुतम्। भृगुवारे सकर्पूरं व चकुष्टमधुसमम् ॥१०॥ लिखित्वा यन्त्रराजं तु भूर्जपत्रे सुशोभनम्। दृष्ट्वा स्त्रीवशमायाति प्राणैरपि धनैरपि ॥११॥ शनिवारे चिताकाष्ठे पंचदश्या विलोमकम्। लिखित्वा यस्य नामानि श्मशाने निखनेद् बुधः। कुक्कुटस्य तु रक्तेन म्रियते नात्र संशयः ॥१२॥

अथातः संप्रवक्ष्यामि यन्त्रराजविधिस्तथा। यस्मै कस्मै न दातव्यं गोपनीयं च यत्नतः ॥१३॥ वटवृक्षतले यन्त्रं भूमिमध्ये ततो लिखेत्। कृष्णपक्षत्रयोदश्यां लेखिनीं वटवृक्षजाम् ॥१४॥ नीत्वारम्भं विधातव्यमेकचित्तेन मानवैः। अयुतं प्रजपेद्देवि धर्मकामार्थमोक्षदम् ॥१५॥ दाडिमीवृक्षलेखिन्या भूमौ यन्त्रसहस्त्रकम्। लिखित्वा जायते मोक्षो वन्दिनस्तु वरानने ॥१६॥ ब्रह्मवृक्षस्य लेखिन्या यन्त्रं पञ्चशतं लिखेत्। भूमिमध्ये दरिद्रस्य नाशनं भवति ध्रुवम् ॥१७॥ गोमूत्रं च शिलां चैव कर्पूरागरुमिश्रितम्। एकीकृत्याश्वत्थमूले लिखेद्यन्त्रं तु भूर्जके ॥१८॥ चिन्तितं चाचिरेणैव जायते [illegible]त्रि निश्चितम्। प्रतापाल्लभते भोगानिन्द्रतुल्यपराक्रमान् ॥१९॥ बिल्वपत्ररसं ग्राह्यं हरिता लमनःशिले। बिल्वशाखजलेखिन्या सहस्त्रद्वितयं लिखेत् ॥२०॥ एकान्ते च शुभस्थाने भूमिमध्ये तथैव च। विलिख्यात्र शुभं यन्त्रं वाचां सिद्धिः प्रजायते ॥२१॥ अर्कपत्ररसेनैव अर्कपत्रे समालिखेत्। अष्टोत्तरशतं चैव रिपुवंशविनाशकृत् ॥२२॥ किंकरीवृक्षबन्धाद्वै ज्वरादिशूलकं तनौ। जायते नात्र संदेहो यदि शक्रसमो रिपुः ॥२३॥ पाषाणस्तंभनं देवि शत्रुद्वारे च भूमिके। हरिद्रालिखितं यन्त्रं स्थाप्यं तत्र सुशोभनम् ॥२४। एवं कृते तु देवेशि पितृपुत्रादिकैः सह। शत्रोः प्रजायते द्वेषो सत्यं सत्यं ब्रवीमि ते ॥२५॥ अपामार्गरसेनैव लिखितं भो[illegible] ऐदाहिकं तृतीयं च चतुर्थज्वरनाशनम् ॥२६॥ भृङ्गराजरसेनैव

यन्त्रं लेख्यं तु भूर्जके। धारयेद्वापि हृदये विवादविजयो भवेत् ॥२७॥

अथातः सम्प्रवक्ष्यामि यन्त्रराजस्य सिद्धिदम्। लक्षयन्त्रं समालिख्य सिद्धपीठे शुभे दिने॥२८॥ भूमिमध्ये शुद्धचित्तो भूमिशायी जितेन्द्रियः। हवनादिकं तु कुर्याच्च सर्पिषा घृततण्डुलैः। शर्करामिश्रितैश्चैव यन्त्रसिद्धिः प्रजायते॥२९॥ यानि यानि च कर्माणि एकयन्त्रैः समालिखेत्। क्षणमात्रेण सिद्धिःस्यात् सत्यं सत्यं पुनः पुनः। देवरूपो भवेद्देवि नरः शीघ्रक्रियाकरः॥३०॥ भूर्जपत्रे लिखेद्यन्त्रं रोचनागुरुकुङ्कुमैः। कृत्वा च धूपदीपादि जलमध्ये विनिक्षिपेत्॥३१॥ रात्र्यन्ते स्वप्नमध्ये तु वरं देवि ददाम्यहम्। जीवन्मुक्तः सुभागी च सर्वान् कामानवाप्नुयात्॥३२॥ देवदत्तं महावीरं पञ्चदश्यास्तु यन्त्रकम्। वश्यं करोतु मे देवि जलमध्ये प्रवाहितम्॥३३॥ दुग्धमाषतिलांश्चैव शर्कराघृतवीरकान्। एकीकृत्य बलि दद्यात् कृष्णपक्षाष्टमीतिथौ ॥३४॥ वश्यो भवति वीरोऽयं प्राणैरपि धनैरपि। सर्वकर्माणि सिद्धिं च यान्ति नात्र विचारणा॥३५॥

यंत्र-मंत्र साधना में **देवदत्त** कहीं लिखा हो तो उसका अर्थ साध्य शत्रु या मित्र का नाम लिखना चाहिये।

पूजायन्त्रम्

सुन्दरी ८	ॐ १	महा ६
ह्रीं ३	क्लीं ५	त्रिपुर ७
श्रीं ४	स्वाहा ९	ऐं २

प्रयोगयन्त्रम्

८	१	६
३	५	७
४	९	२

देवदर्शनयन्त्रम्

८	१	६
३	५	७
४	९	२

द्रव्यप्राप्तियन्त्रम्

२	९	४
७	५	३
६	१	८

वशीकरणयन्त्रम्

६	७	२
१	५	९
८	३	४

मारणोच्चाटनयन्त्रम्

२	७	६
९	५	१
४	३	८

卐 इति मिश्रतन्त्रम् सम्पूर्णम् 卐

परिशिष्ट

पेज नं० ३४३ का प्रयोग विधि के अन्तर्गत विभिन्न सूक्त-

(केतुंकृण्वन्न, अभिव्यये, बलंधेहि, वय सुपर्णा, विजिहोर्ष-वृहत्सा)

केतुं कृण्वन्नकेतवे पेशोमर्या अपेशसे। समुषद्भिरजायथाः ॥१॥

अभिव्ययस्व खदिरस्य सारमोजो धेहि स्पन्दने शिशपायाम् ।
अक्षवीलो वीलित वीलयस्व मा यामादस्मादव जीहियो नः ॥२॥

बलंधेहि तनूषु नो बलमिन्द्रानलुत्सु नः ।
बलं तोकाय तनयाय जीवसे त्वं हि बलदा असि ॥३॥

वय सुपर्णा उपसेदरिन्द्रं प्रियमेधा ऋषयो नाधमानाः ।
अपध्वान्तमूर्णाहि पूर्धि चक्षुर्मुमुग्ध्यस्मान् निधनयेव बद्धान् ॥४॥

विजिहीष्व वनस्पते योनिः सूष्यन्त्या इव ।
श्रुतं मे अश्विना हवं सप्तवध्रिं च मुञ्चताम् ॥५॥

वृहत्साम सूक्तम्-

त्वामिद्धि हवामहे सा तौ वाजस्व कारवः ।
त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्ततः ॥१॥

सत्वं वज्रहस्त धुष्णुयाम हस्तवा नो अद्रिवः ।
गोमश्व रथ्यमिन्द्र संकिरसत्रावजंन जिग्युषे ॥२॥

॥ अथ शिव पञ्चावरण देवानां स्तुतिः॥

इस स्तोत्र में रुद्र यन्त्र में वर्णित पूजा का वृहत् कर्म है जो व्यक्ति नित्य रुद्र यन्त्र का अर्चन करने में असमर्थ हैं वे यदि इस स्तोत्र का पाठ करें तो उसे यन्त्रार्चन का पूर्ण फल मिलता है।

स्तोत्रं वक्षामि ते कृष्ण पंचावरणमार्गतः ।
योगेश्वरमिदं पुण्यं कर्म येन समाप्यते ॥१॥

जय जय जगदेकनाथ शम्भो, प्रकृतिमनोहर नित्यचित्स्वभाव ।
अतिगतकलुष प्रपञ्चवाचामपि, मनसां पदवीमतीततत्त्वम् ॥२॥

स्वभाव निर्मलाभोग जय सुन्दरचेष्टित ।
स्वात्मतुल्य महाशक्ते जय शुद्ध गुणार्णव ॥३॥

अनन्तकान्ति सम्पन्न जयासदृश विग्रह ।
अतर्क्य महिमाधार जयानाकुलमंगल ॥४॥

निरञ्जन निराधार जय निष्कारणोदय ।
निरन्तरपरानन्द जय निर्वृत्तिकारण ॥५॥

जयति परमैश्वर्य जयति करुणास्पद ।
जय स्वतन्त्र सर्वस्व जयासदृशवैभव ॥६॥

जयावृतमहाविश्व जयानावृत केनचित् ।
जयोत्तर समस्तस्य जयात्यन्तनिरुत्तर ॥७॥

जयाऽद्भुत जयाक्षुद्र जयाऽक्षत जयाऽव्यय ।
जयाऽमेय जयाऽमाय जयाऽभव जयाऽमल ॥८॥

महाभुज महासार महागुण महाकथ ।
महाबल महामाय महारस महारथ ॥९॥

नमः परमदेवाय नमः परमहेतवे ।
नमः शिवाय शान्ताय नमः शिवतराय ते ॥१०॥

त्वदधीनमिदं कृत्स्नं जगद्धि ससुराऽसुरम् ।
अतस्त्वद्विहितामाऽज्ञां क्षमतं कोऽतिवर्तितुम् ॥११॥
अयं पुनर्जनो नित्य भवदेकसमाश्रयः ।
भवानतोऽनुगृह्यस्मै प्रार्थितं सम्प्रयच्छतु ॥१२॥
जयाऽम्बिके जगन्मार्तजय सर्वजगन्मयि ।
जयाऽनवधिकैश्वर्ये जयाऽनुपम विग्रहे ॥१३॥
जय वाङ्मनसाऽतीते जयाचिद्ध्वान्तभाजके ।
जय जन्मजराहीने जय कालोत्तरोत्तरे ॥१४॥
जयाऽनेकविधानस्थे जय विश्वेश्वरप्रिये ।
जय विश्वसुराऽराध्ये जय विश्वविजृम्भिणि ॥१५॥
जयमङ्गल दिव्याङ्गे जय मङ्गल दीपिके ।
जय मङ्गल चारित्रे जय मङ्गल दायिनि ॥१६॥
नमः परमकल्याण गुण संचय मूर्तये ।
त्वतः खलु समुत्पन्नं जगत्त्वय्येव लीयते ॥१७॥
ज्वद्विनातः फलं दातुमीश्वरोऽपि न शक्नुयात् ।
जन्मप्रभृति देवेशि जनोऽयं त्वदुपाश्रितः ॥१८॥
पञ्चवक्त्रो दशभुजः शुद्धस्फटिक सन्निभः ।
वर्णब्रह्मकलादेहो देवः सकल निष्कल ॥१९॥
शिवमूर्तिसमारूढः शान्त्यतीतः सदाशिवः ।
भक्त्या मयार्चितो मह्यं प्रार्थितं शं प्रयच्छतु ॥२०॥
सदाशिवाङ्कमाऽरूढ़ा शक्तिरिच्छा शिवाह्वया ।
जननी सर्वलोकानां प्रयच्छतु मनोरथम् ॥२१॥
शिवयोर्दयितौ पुत्रौ देवौ हेरम्ब षणमुखौ ।
शिवाऽनुभावौ पुत्रौ देवौ हेरम्ब षणमुखौ ॥२२॥
शिवाऽनुभावौ सर्वग्धौ शिवाभ्यां नित्यसत्कृतौ ।
सत्कृतौ च सदा देवौ ब्रह्माद्यैस्त्रिदशैरपि ॥२३॥
सर्वलोकपरित्राणं कर्तुमभ्युदितौ सदा ।
स्वेच्छावतारं कुर्वन्तौ स्वांशभेदैरनेकशः ॥२४॥

तāविमौ शिवयोः पार्श्वे नित्यमित्थं मयार्चितौ ।
तयोराज्ञां पुरस्कृत्य पार्थितं मे प्रयच्छताम् ॥२५॥
शुद्धस्फटिक संकाशमीशानाख्यां सदाशिवम् ।
मूर्द्धाभिमानिनी मूर्तिः शिवस्य परमात्मनः ॥२६॥
शिवार्चरतं शान्तं शान्त्यतीतं खमास्थितम् ।
पञ्चाक्षरान्तिमं बीजं कलाभिः पञ्चभिर्युतम् ॥२७॥
प्रथमावरणे पूर्वं शक्त्या सह समर्चितम् ।
पवित्रं परमं ब्रह्म प्रार्थितं ते प्रयच्छतु ॥२८॥
बालसूर्य प्रतिकाशं पुरुषाख्यं पुरातनम् ।
पूर्ववक्त्राभिमानं च शिवस्य परमेष्ठिनः ॥२९॥
शान्त्यात्मकं मरुत्संस्थं शम्भोः पादार्चने रतम् ।
प्रथमं शिवबीजेषु कलासु च चतुश्कलम् ॥३०॥
पूर्वभागे मया भक्त्या शक्त्या सहसमर्चितम् ।
पवित्रं परमं ब्रह्म प्रार्थितं मे प्रयच्छतु ॥३१॥
अञ्जनादि प्रतीकाशमघोरं घोरविग्रहम् ।
देवस्य दक्षिणं वक्त्रं देवदेवपदार्चकम् ॥३२॥
विद्यापदं समारूढं वह्निमण्डल मध्यगम् ।
द्वितीयं शिवबीजेषु कलास्वष्टकलान्वितम् ॥३३॥
शम्भोर्दक्षिणदिग्भागे शक्त्या सह समर्चितम् ।
पवित्रं परमं ब्रह्म प्रार्थितं मे प्रयच्छतु ॥३४॥
कुंकुमक्षोदसंकाशं वामाख्यं वरवेशधृक् ।
वक्त्रमुत्तरमीशस्य प्रतिष्ठायां प्रतिष्ठतम् ॥३५॥
वारिमण्डलमध्यस्थं महादेवार्चने रतम् ।
तुरीयं शिवबीजेषु त्रयोदशकलान्वितम् ॥३६॥
देवस्योत्तरदिग्भागे शक्त्या सह समर्चितम् ।
पवित्रं परमं ब्रह्म प्रार्थितं मे प्रयच्छतु ॥३७॥
शङ्खकुन्देन्दु धवलं सद्याख्यं सौम्यलक्षणम् ।
शिवस्य पश्चिमं वक्त्रं शिवपादार्चने रतम् ॥३८॥

निवृत्तिपद निष्ठं च पृथिव्यां समवस्थितम् ।
तृतीयं शिवबीजेषु कलाभिश्चाष्टभिर्युतम् ॥३९॥
देवस्य पश्चिमे भागे शक्त्या सह समर्चितम् ।
पवित्रं परमं ब्रह्म प्रार्थितं मे प्रयच्छतु ॥४०॥
शिवस्य तु शिवायाश्च हृन्मूर्ति शिवभाविते ।
तयोराज्ञां पुरस्कृत्य ते मे कामं प्रयच्छताम् ॥४१॥
शिवस्य तु शिवायाश्च शिखामूर्त्ति शिवाश्रिते ।
सत्कृत्य शिवयोराज्ञां ते मे कामं प्रयच्छताम् ॥४२॥
शिवस्य च शिवायाश्च वर्मणा शिवभाविते ।
सत्कृत्य शिवयोराज्ञां ते मे कामं प्रयच्छताम् ॥४३॥
शिवस्य च शिवायाश्च नेत्रमूर्त्ती शिवाश्रिते ।
सत्कृत्य शिवयोराज्ञां ते मे कामं प्रयच्छताम् ॥४४॥
अस्त्रमूर्ती च शिवयोर्नित्यम र्चनतत्परे ।
सत्कृत्य शिवयोराज्ञां ते मे कामं प्रयच्छताम् ॥४५॥
वामो ज्येष्ठास्तथा रुद्रः कालो विकरणस्तथा ।
बलो विकरणश्चैव बलप्रमथनः परः ॥४६॥
सर्वभूतमस्य दमन - स्तादृशाश्चाष्टशक्तयः ।
प्रार्थितं मे प्रयच्छन्तु शिवयोरेव शासनात् ॥४७॥
अथानन्तश्च सूक्ष्मश्च शिवाश्चेष्कनेत्रकः ।
एकरुद्रस्त्रिमूर्तिश्च श्रीकण्ठश्च शिखण्डिकः ॥४८॥
तथाष्टौ शक्तयस्तेषां द्वितीयावरणेबर्चिताः ।
ते मे कामं प्रयच्छतु शिवयोरेव शासनात् ॥४९॥
भवाद्या मूर्तयश्चाष्टौ तासामपि च शक्तयः ।
महादेवादयश्चान्ये तथैकादशमूर्तयः ॥५०॥
शक्तिभिः सहिताः सर्वे तृतीयावरणे स्थिताः ।
सत्कृत्य शिवयोराज्ञां दिशन्तु फलमीप्सितम् ॥५१॥
वृषराजो महातेजो महामेघसमस्वनः ।
मेरुमन्दरकैलास हिमाद्रिशिखरोपमः ॥५२॥

सिताभ्रशिखराकारककुदा परिशोभितः ।
महाभोगिन्द्रकल्पेन वालेन च विराजितः ॥५३॥
रक्तास्यश्रृंगाचरणो रक्तप्रायविलोचनः ।
पीवरोन्नतसर्वाङ्गः सुचारुगमनोज्ज्वलः ॥५४॥
प्रशस्तलक्षणः श्रीमान् प्रज्वलन्मणिभूषणः ।
शिवप्रियः शिवसक्तः शिवयोर्ध्वजवाहनः ॥५५॥
तथा तच्चरणन्यासपविता परविग्रह ।
गोराजपुरुषः श्रीमान् श्रीमच्छूलवरायुधः ।
तयोराज्ञां पुरस्कृत्य स मे कामं प्रयच्छतु ॥५६॥
नन्दीश्वरो महातेजा नगेन्द्रतनयात्मजः ।
सनारायणकैर्देवैर्नित्यमभ्यर्च्य वन्दितः ॥५७॥
शर्वस्यान्तमुद्वारि सार्द्धं परिजनैः स्थितः ।
सर्वेश्वरसमप्रख्यः सर्वासुरविमर्दनः ॥५८॥
सर्वेशां शिवधर्माणामध्यक्षत्वेऽभिषेचितः ।
शिवप्रियः शिवसक्तः श्रीमच्छूलवरायुधः ॥५९॥
शिवाश्रितेषु संसक्तस्त्वनुरक्तश्च तैरपि ।
सत्कृत्य शिवयोराज्ञां स मे कामं प्रयच्छतु ॥६०॥
महाकालो महाबाहुर्महादेव इवापरः ।
महादेवाश्रितानां तु नित्यमेवाभिरक्षतु ॥६१॥
शिवप्रियः शिवासक्तः शिवयोरर्चकः सदा ।
सत्कृत्य शिवयोराज्ञां स मे दिशतु कांक्षितम् ॥६२॥
सर्वशास्त्रार्थतत्त्वज्ञः शास्ता विष्णोः परा तनुः ।
महामोहात्मतनयो मधुमांसासर्वप्रियः ।
तयोराज्ञां पुरस्कृत्य स मे कामं प्रयच्छतु ॥६३॥
ब्राह्मणी चैव माहेशी कौमारी वैष्णवी तथा ।
वाराही चैव माहेन्द्री चामुण्डा चण्डविक्रमा ॥६४॥
एता वै मातरः सप्त सर्वलोकस्य मातरः ।
प्रार्थितं मे प्रयच्छन्तु परमेश्वरशासनात् ॥६५॥

मत्तमातङ्ग वदनो गङ्गोमाशङ्करात्मजः ।
आकाश देहो दिग्बाहुः सोम सूर्याऽग्नि लोचनः ॥६६॥
ऐरावतादिभि र्दिव्यैर्दिग्गजै र्नित्यमर्चितः ।
शिवज्ञानमदोद्भिन्न स्त्रिदशानामविघ्नकृत् ॥६७॥
विघ्नकृच्चासुरादीनां विघ्नेशः शिवभावितः ।
सत्कृत्य शिवयोराज्ञां स मे दिशतु कांक्षितम् ॥६८॥
षड्मुखः शिवसम्भूतः शक्तिवज्रधरः प्रभुः ।
अग्नेश्च तनयो देवो ह्यपर्णातनयः पुनः ॥६९॥
गङ्गायाश्च गणाम्बायाः कृत्तिकानां तथैव च ।
विशाखेन च शाखेन नैगमेयेन चावृतः ॥७०॥
इन्द्रजिच्चेन्द्र सेनानीस्तारकासुर जित्तथा ।
शैलानां मेरुमुख्यानां वेधकश्च स्वतेजसा ॥७१॥
तप्तचामीकरप्रख्यः शतपत्रदलेक्षणः ।
कुमारः सुकुमाराणां रूपोदाहरणं महत् ॥७२॥
शिवप्रियः शिवासक्तः शिवपादार्चकः सदा ।
सत्कृत्य शिवयोराज्ञां स मे दिशतु कांक्षितम् ॥७३॥
ज्येष्ठा वरिष्ठ वरदा शिवयोर्यजने रता ।
तयोराज्ञां पुरस्कृत्य सा मे दिशतु कांक्षितम् ॥७४॥
त्रैलोक्य वन्दिता साक्षादुल्काकारा गणाम्बिकाः ।
जगत्सृष्टि विवृद्धर्थ ब्रह्मणाभ्यार्थिता शिवात् ॥७५॥
शिवाया प्रविभक्ताया भ्रुवोरन्तर निस्सृता ।
दाक्षायणी सती मेना तथा हैमवती ह्युमा ॥७६॥
कौशिक्याश्चैव जननी भद्रकाल्यास्तथैव च ।
अपर्णायाश्च जननीपाटलायास्तथैव च ॥७७॥
शिवाऽर्चनरता नित्यं रुद्राणी रुद्रवल्लभा ।
सत्कृत्य शिवयोराज्ञां सा मे दिशतु कांक्षितम् ॥७८॥
चण्डः सर्वगणेशान्तः `दिशतु कांक्षितम् ॥७९॥
पिङ्गलो गणपः श्रीमान् शिवासक्तः शिवप्रियः ।
आज्ञया शिवयोरेव स मे कामं प्रयच्छतु ॥८०॥

भृङ्गीशो नाम गणपः शिवाराधनतत्परः ।
प्रयच्छतु स मे कामं पत्युराज्ञापुरस्सरम् ॥८१॥
वीरभद्रो महातेजा हिमकुन्देन्दुसन्निभः ।
भक्तकालिप्रियो नित्यं मातृणां चाभिरक्षिता ॥८२॥
यज्ञस्य च शिरोहर्ता दक्षस्य च दुरात्मनः ।
उपेन्द्रन्द्रेयमादीनां देवानामंगतक्षकः ॥८३॥
शिवास्यानुचरः श्रीमान् शिवशासन पालकः ।
शिवयो शासनादेव स मे दिशतु कांक्षितम् ॥८४॥
विष्णोर्वक्षः स्थिता लक्ष्मीः शिवयोः पूजने रता ।
शिवयो शासनादेव स मे दिशतु कांक्षितम् ॥८५॥
महामोदी महादेव्याः पादपूजापरायणा ।
तस्या एव नियोगेन सा मे दिशतु कांक्षितम् ॥८६॥
कौशिकी सिंहमारूढ़ा पार्वत्याः परमा सुता ।
विष्णोर्निद्रा महामाया महामहिषमर्दिनी ॥८७॥
निशुम्भशुम्भसंहत्री मधुमांसासवप्रिया ।
सत्कृत्य शासनं मातुः सा मे दिशतु कांक्षितम् ॥८८॥
रुद्रा रुद्रसमप्रख्याः प्रमथाः प्रमथितौजसः ।
भूतसख्या महावीर्या महादेवसमप्रभाः ॥८९॥
नित्यमुक्ता निरुपमा निर्द्वन्द्वा निरुपपल्लवाः ।
सशक्तयः सानुचरा सर्वलोकनमस्कृताः ॥९०॥
सर्वेषामेव लोकानां सृष्टिसंहरणक्षमा ।
परस्परानुरक्तश्च परस्परमनुव्रता ॥९१॥
परस्परमतिस्त्रग्धाः परस्परनमस्कृताः ।
शिवप्रियतमा नित्यं शिवलक्षणलक्षिताः ॥९२॥
सौम्या घोरस्तथा मिश्राश्चान्तरालद्वयात्मिका ।
विरूपाश्च सुरूपाश्च नानारूप धरास्तथा ॥९३॥
सत्कृत्य शिवयोराज्ञां ते मे कामं दिशन्तु वै ।
देव्याः प्रियसखीवर्गो देवीलक्षणलक्षितः ॥९४॥

सहितो रुद्रकन्याभि शक्तिभिश्चाप्यनेकशः ।
तृतीयावरणे शम्भोर्भक्त्या नित्यं समर्चितः ॥९५॥
सत्कृत्य शिवयोराज्ञां स मे दिशतु मङ्गलम् ।
दिवाकरो महेशस्य मूर्तिर्दीप्तसुमण्डलः ॥९६॥
निर्गुणो गुणसंकीर्णस्तथैव गुणकेवलः ।
अविकारात्मकश्चाद्यः एकः सामान्यविक्रियः ॥९७॥
असाधारणकर्मा च सृष्टिस्थिति लयक्रमात् ।
